PAGE(S)MISSING

NOT AVAILBLE

1-8

अन्यत्र पठितमंत्राणां कथमन्यत्र गमनमत आह प्रकृतिवदिति। यथा सोपकारा प्रकृतिरनुष्ठीयते तथा
विकृतिरपीति तदर्थः तदनेनोपकारातिदेशे तत्स्पष्टभावेन तत्पदार्था अप्यतिदिश्यंते इति कर्त्तव्यतायां भाव
नायाः साकांक्षत्वादेतन्मूलकमेव प्रकृतिवदितीति मीमांसकसरणिः पदार्थांतर्गताश्च मंत्राः तत्र अग्नि
संबंधि निर्वापप्रकाशं मंत्रस्याग्निपरस्य सूर्यसंबंधि निर्वापप्रकाशनासमर्थत्वात्तत्पदहाय तत्स्थाने

प्रकृतिवद्विकृतिः कर्त्तव्येति मीमांसकैर्व्यवस्थापिते न्याये प्रकृतिवत्ययादीनामूहं वैयाकरणाः
साम्यग्विजानाति। तत्राग्नेर्मंत्रोस्ति अग्नये त्वा जुष्टं निर्वपामीति तत्र सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसका
म इति सौर्यचरौ मंत्र ऊह्यते सूर्याय त्वा जुष्टं निर्वपामीति विस्तरेणैतदुदाहरणं प्रदर्शितं ऊहः॥ ॥

सूर्यायेत्यूह्यमित्याह। तत्राग्नेरिति। मंत्रत्वं ह्यनेन इति यद्यप्यूहेन मंत्रत्वं तथाप्येकदेशस्योहे अनेकपद
समुदाये मंत्रत्वप्रत्यभिज्ञानात् तद्घटिते समुदाये मंत्रत्वव्यवहारः कर्मणः सांगत्वं चेति बोध्यं सोयं प्रत्यूहः
अन्येप्यूह्याः ऊहस्त्वस्य हि आर्त्विज्यलाभेन द्रव्यप्राप्तिद्वारा ऐहिकसुखसिद्धिः फलमिति बोध्यं। क्षाप्येलि
गपदं च प्रकृत्यादेरुपलक्षणं॥ यथायथमिति अर्थप्रकाशनसामर्थ्यानतिलंघनेनेत्यर्थः॥ ॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

सो०कौ०१ ननुवक्ष्यमाणागमस्यनव्याकरणफलत्वमतआह।प्रवर्त्तकइति।नित्यकर्मतामिति।एतेननित्यकाम्य
ताव्याकरणाध्ययनस्येत्युक्तं।नित्यत्वंचाध्येयज्ञेयपदार्थविशेषणीभूताध्ययनज्ञानयोर्बोध्यं।अत्रब्राह्म
णेनेत्युक्तेरन्यस्यैवमध्ययनंकाम्यमेवेतिसूचयति·निष्कारणइतिकारणशब्दःफलपरः।ननुनित्यत्वेपि
प्रत्यवायपरिहाररूपंफलमस्त्येवेत्यतआह।दृष्टमिति।अध्ययनादिनिष्ठकारणानपेक्षत्वंविषयेआरो

आगमइति।प्रयोजकःप्रवर्त्तकोनित्यकर्मतांव्याकरणाध्ययनस्यदर्शयति।प्रयोजनश
ब्देनचफलंप्रयोजकश्चोच्यतेनिष्कारणइति।दृष्टंकारणमनपेक्ष्येत्यर्थः॥ ॥

प्यनिष्कारणोवेदइतिप्रयोगः।आगमपदेनश्रुतिःश्रुतावपिजनमेजयाख्यानवत्पौरुषेयव्याकरण
स्यापिनित्यताबोधनमुपपद्यतेयद्यतेनप्रोक्तमितिसूत्रोक्तभाष्यरीत्यावेदार्थवद्व्याकरणार्थोपिअना
दित्वरूपनित्यतावानितिश्रुत्यातस्यनित्यत्वबोधनमितिबोध्यंधर्मत्वंचवेदस्यपुरुषप्रयत्नसाध्य
तयाधर्मत्वेनाप्तिमताध्ययनज्ञानकर्मत्वेनौपचारिकमित्याहुः॥ ॥७॥ ॥

षडंगःशिक्षाकल्पव्याकरणनिरुक्तछंदोज्योतिषांगसहितःवेदःस्वशाखारूपः।अध्येयःइत्यतःप्रेरणा
विषयाध्ययनकर्मवेदइतिबोधःयद्यपितेनप्रोक्तमितिसूत्रेभाष्येवक्ष्यमाणरीत्यावेदत्वंशब्दतदर्थोभयवृत्ति
तथापिज्ञेयइत्यस्यसम्यगर्थबोधपर्यवसाय्यध्ययनंकार्यमित्यर्थतात्पर्यमतएवसमानमीहमानामधी
यानानांचकेचिदर्थैर्युज्यंतेकेचिन्नेतिवक्ष्यतिभाष्यकृत्अध्ययनज्ञानयोश्चसमुच्चयःविनापिचसमु
च्चयदर्शनातअनेनैकतरस्याधर्मत्वंसूचयतिश्रुत्यामिलितस्यैवधर्मत्वबोधनात्तथाचव्यासःवेदा
र्थज्ञोजपंजप्यात्तथैवाध्ययनंद्विजःकुर्वन्स्वर्गमवाप्नोतिनरकंतुविपर्ययइतिजपपदमत्रसाध्यकर्ममात्रोपलक्षणं॥

प्रधानंचेति।पदपदार्थविगमस्यव्याकरणनिमित्तत्वात्तन्मूलत्वाद्वाक्यवाक्यार्थवसायस्येतिभावः॥

ज्ञाधातोश्चज्ञानानुकूलोमनःप्रणिधानविषयेंद्रियसंयोगसंपादनादिरूपोव्यापारोर्थस्तस्यैवात्रविधेयत्वं।एते
नज्ञानस्याविधेयत्वादिदंचिंत्यमित्यपास्तं।ननुगुणानांपरस्परसंबंधाभावात्षडंगेषुप्रधानमित्यनुपपन्नम
तआहयत्नेति।एवंचवेदार्थज्ञानेव्याकरणंप्रधानंकारणमितिभावःभाष्येप्रधानेकृतोयत्नइति।प्रधानविष
येनिर्वृत्तइत्यर्थःअन्यथायत्नविषयकृतेरसंभवादसंगतिःस्पष्टैकफलवानित्यत्रफलपदेनवाक्या
र्थविगमोविवक्षितःएतच्छास्त्रंचपदपदार्थविगमद्वारावाक्यार्थविगमोपयोगीतिबोध्यं॥ ॥

प्रो०कै०१ अवश्यमित्यनेनविवक्षितंदर्शयति। अध्यापनमिति। लाघवंचप्रतिपदपाठापेक्षयाप्रकृत्यादिविभागेना
१० न्वाख्यानस्यविवक्षितं। नन्वसंदेहः संदेहाभावः सचनात्यंताभावस्तस्यनित्यत्वात्। नचध्वंसस्तत्तद्विष
यकव्याकरणज्ञानवतः संदेहस्यैवोत्पावेनेतदसंभवात्। यस्यस्वधीतव्याकरणस्यापिकचित्संदेहःसत
द्विषयकवैयाकरणत्वाभाववानेववेदनार्थेहितत्रप्रत्ययोतआह प्रागभावइति। तत्परिपालनंचशास्त्रा

लघ्वर्थमिति। लाघवेनशब्दज्ञानमस्यप्रयोजनं। ब्राह्मणेनेति। अध्यापनंब्राह्मणस्यवृत्तिः। नचा
शब्दज्ञमुपाश्लिष्यंतिशिष्याइति। इत्तरस्यैवतुदुत्पादात्। स्वरतइति। पूर्वपदप्रकृतिस्वराद्ध्रुत्रीहि
xअसंदेहार्थमिति। संदेहस्यप्रागभावोत्रवेदितव्योनतुप्रध्वंसाभावः। नहिवैयाकरणस्यसंशयउत्पद्यविनश्यतिx
पर्यवसायइत्यर्थः॥

ध्ययनफलं। नतुस्वरूपं। तस्याजन्यत्वात्। तत्पालनंचप्रतियोगिजनककारणाविध्वंसनंप्रागभावस्यप्र
तियोगिजन्मनाश्यत्वादितिबोध्यं। भाष्येयाज्ञिकाः पठंतीति॥ यज्ञकांडप्रवावैदिकोःशब्दायाज्ञिकास्ते १०
पठंतीत्यर्थः॥ ऋषिपठतिशृणोतग्रावाणइतिवत्प्रयोगः तत्रऋषिर्वेदः संन्त्रत्रैभाष्येएवप्र
योगःताम्। अनर्थाहीकस्तर्हिनिश्चयस्तत्राह पूर्वपदेति। ॥ ॥

ननुअम्लेच्छत्वादीनांबहुत्वाद्बहूनामनुग्रहोन्याय्यइतिप्रथमतोभिधानंयुक्तमतआह मुख्यानीति॥ प्रधानत्वा
देवतेषांप्रथमतोभिधानमितिभावः। तेषांप्रधानत्वंचपदपदार्थज्ञानाधीनत्वेनांतरंगत्वात् वक्ष्यमाणानां
चबहिरंगशब्दापशब्दप्रयोगविधिनिषेधविषयत्वादानुषंगिकत्वंबोध्यंननुप्रकृ यइत्येकवचनमनुपपन्नं
प्रयोजनानीत्यनेनसामानाधिकरण्यादतआह। पुनरिति। इमानिचेतिचः समुच्चये। भाष्येप्रयोजनानीतिःप्र
वर्त्तकानिफलानिचेत्यर्थः तत्रवक्ष्यमाणवाक्यानिप्रवर्त्तकानितद्बोध्यानिफलानीतिविवेकः। ननुरक्षादिभिःस

मुख्यानिप्रयोजनानिप्रदर्श्यआनुषंगिकाणिप्रदर्शयति॥ इमानिचेति॥ नूनइतिपुनरित्यर्थः आ
नुषंगिकत्वाच्चैषांवर्गद्वयोपादानं। तेसुराहेलयइति। निंदार्थवादेननम्लेछितवाइतिम्लेछनंनिषिध्यते॥

हैवैतानिकुतोनपठितानीत्यतआह॥ आनुषंगित्वादिति। एषामानुषंगीकत्वंतेषांप्रधानत्वंबोधयितुंतथोक्ति
रित्याभावः। ननुपराबभूवुस्तस्मात्ब्राह्मणेनेतिश्रुतौपराभवस्यापशब्दभाषणफलत्वावगतेः पराभूमोतो
मेत्यध्येयमितिवक्तुमुचितमतआह निंदार्थवादेनेति। द्रव्यसंस्काराकर्मसुपरार्थत्वात्फलश्रुतिरर्थवादःस्यादि
तिन्यायेनयस्यपर्णमयीजुहूर्भवतिनसपापंश्लोकंशृणोतीत्यादावपापश्लोकश्रवणस्यप्राशस्त्यमात्र
परत्ववदस्यनिंदामात्रपरत्वादितिभावः प्रकरणाच्चक्रत्वर्थयंनिषेध ॥ ॥छ॥ ॥

केचिदाहुरिति। अत्रारुचिबीजं तु सर्वः प्लुतः साहसमनिच्छताविभाषाकर्त्तव्य इति। यदेति। सर्वस्य द्वे इत्यत्र प
दग्रहणस्य वार्त्तिककृतोक्तत्वादिति भावः। ननु नेदं द्वित्वं किं त्वैच्छिकः पुनः प्रयोगोत आह लत्वं चेति॥ नम्लेच्छि
तवै इत्यतत् म्लेच्छभाषा विषयमिति भ्रममनिरस्यत्यर्थं तद्विवरणं नायभाषितवै इति। हवै इति॥ प्रसिद्धो अपश
ब्दत्वं व्याकरणानुगत शब्दस्यैषत् भ्रंशान एव प्रसिद्धमिति भावः॥ ननु म्लेच्छो नाम पुरुषविशेषो देशविशेषो

तत्र केचिदाहुः हे हे प्रयोगे हैहयोरिति प्लुते प्रकृतिभावे च कर्त्तव्ये तदकरणं म्लेच्छनमिति। पदद्विर्वचने
कार्ये वाक्यद्विर्वचनं लत्वं च म्लेच्छनामित्यपरे। नम्लेच्छितवा इत्यस्य पर्यायो नायभाषितवा इति कृत्वा
र्थ इति तवे प्रत्ययः म्लेच्छ इति कर्म्मणि घञ्॥ दुष्टः शब्द इति। स्वरेण। स्वरतः आद्यादित्वात्तसिः मिथ्या
प्रयुक्त इति। यदर्थप्रतिपादनाय प्रयुक्तस्ततोर्थान्तरं स्वरदोषात्प्रतिपादयन्नभिमतमर्थं नाहेत्यर्थः॥
वगेव वत्नो हिंसकत्वात्। यथेन्द्रशत्रुशब्दः स्वरदोषाद्यजमानं हिंसितावानित्यर्थः॥ ॥७॥

वासकथमपशब्दोत आह। घ्नन्निति निंदावचनात् म्लेच्छतेरिति भावः निंदा च शास्त्रबोधितविपरीतोच्चारणेनपा
पसाधनत्वात् एवं च म्लेच्छा इत्यस्य निंद्या इत्यर्थ इति दिक्। असर्वनामत्वात्तसो प्राप्तेराह। स्वरेणेति। आद्या दि ११
त्वादिति च। तमित्यस्यापछब्दापेक्षित्वात् दह्य स्ट्र्येति मिथ्याप्रयुक्त इत्यस्य विवरणं ततोर्थान्तरमिति। न केवलं त
मर्थं नाहेतावत् किंतु प्रत्यवायोत्पादनद्वारा हिंसको पीत्याह वाग्वज्र इति च यथाधयुक्तता द्वीमाद्यजमानेधर्मोत्पत्तिरवं
तत् कृतापशब्दप्रयोगात्तस्मिन्प्रत्यवाय इत्याशयः। तत्र दृष्टांतमाह। यथेति। यंत्रे एतिहेतौ तृतीया फलमपीह हेतुः॥॥

मंत्र इति। नन्वोहितस्य कथं मंत्रत्वमिति वाच्यं। मंत्रशब्दस्य बोधकपरत्वात्। अत एव मंत्रो हीनः स्वरत इति प्र
सिद्धमपि शिक्षापाठं विहाय भाष्ये दुष्टः शब्द इति पठितं। तत्रत्य मंत्रशब्दस्य शब्दमात्रपरतेति सूचयितुं।
शत्रुशब्दस्यामित्रपर्यायत्वे बहुव्रीहितत्पुरुषयोरविशेषोत आह। तत्रेंद्रस्येति। शादेर्णप्तादौणादिकः क्रु
न्प्रज्ञादिगणेनिपातनात् ह्रस्वत्वं। संबोधनविभक्त्यभावायाह॥ इन्द्रशत्रुत्वस्येति। नन्वत्र यज्ञकर्मणीत्य

इंद्रस्याभिचारो त्वत्रेण रब्धः तत्रेंद्रशत्रुर्वर्द्धस्वेति मंत्रक हितः तत्रेंद्रस्य शमयिता शातयिता भवेति क्रियाश्र
यो न शत्रुशब्द आश्रितो ननु रूढिशब्दः तदाश्रयणे हि बहुव्रीहितत्पुरुषयोरर्थाभेदः तत्रेंद्रामित्रत्वे सिद्धे
सति इंद्रस्य शत्रुर्भवेत्यत्रार्थे प्रतिपाद्ये अंतोदात्ते प्रयोक्तव्ये आद्युदात्तत्वात् त्विजा प्रयुक्त इति अर्थात
रासिधानादिंद्र एव वृत्तस्य शातयिता संपन्नः इन्द्रशत्रुत्वस्य चविधेयत्वात्संबोधनविभक्त्यनुवाद्य वि
षयत्वादिहाभावः। यथा राजा भव युध्यस्वेति। ऊह्यमानस्य चामंत्रत्वाद्यज्ञकर्मणि जर्यादिपर्युदासेन
मंत्राणामेकश्रुति विधीयमाने हन्तभवति॥

कश्रुतौ प्राप्तायां पूर्वपदप्रकृतिस्वरकरणं स्वरापराध इति वक्तुं युक्तं। न च तथैवास्तु। शतपथब्राह्मणतज्ञा
ष्यविरोधात्तत्र हि आद्युदात्तत्वकरणमेव स्वरापराध उक्त इत्यादि स्पष्टमस्मत्कृतैकश्रुत्यवादे तत आह। ऊह्य
मानस्यचेतितद्युक्तमनाम्नातेषु मंत्रत्वमिति। न चास्यामंत्रत्वे लौकिकशब्देन क्रियमाणस्य कर्मणः कथं फल
जनकत्वमिति वाच्यं। स्वर्यायत्वेत्यादे लौकिकघटितस्य ऊहविधायकशास्त्रबलेन फलजनकत्ववदुपपत्तेरित्याहुः॥

भे०वकि०१

१२ = विरूद्धतआह। अविदितेति। एड्पेकं धइतिसांतत्त्वीबेधः शाद्धेनादंतपुद्विंगेनीवानिर्वांसं। निरुक्तेतु

नन्वधीतमविज्ञातमितिंतत्रगृहीतंशाब्दतः अविज्ञातमर्थत इतिबोध्यं।भाष्येतस्मादनर्थकमिति। अनेननि
दार्थवादेननिष्प्रयोजनाध्ययना ध्ययनानौचित्त्येननिःप्रयोजनं नाध्येयमितिनिषेधकल्पनादितिभावः।
अतोनिषिद्धमध्ययनंमाभूदितिव्याकरणमध्येयमितितात्पर्यं। एकः पूर्वपरयोरित्यत्रभाष्यपठितैकःशब्द
इत्यादिश्रुतिमूलकमाहभाष्ये॥ यस्तिति। अभ्युदयएतुत्वअदृष्टद्वारापुरूषार्थसाधनत्वं। कुशलोऽधीत
व्याकरणः लक्षणस्मरणपूर्वकं यः प्रयुंक्तेइति विशेषइति॥ अर्थविशेषइत्यर्थः॥ तदाह॥ सएवेतिसाधर्म्या

अविज्ञातमिति। अविदितस्वरादिसंस्कारत्वादर्थापरिज्ञानाश्च। निगदेनेति। पाठमात्रेण। नतत्ज्वल
तीति। निःफलंभवति। अनर्थकमिति। निःप्रयोजनं। यस्तु प्रयुंक्तइति। अनेनाभ्युदयहेतुत्वंव्याक
रणस्यदर्शयति। विशेषइति। सएवशब्दः क्वचित्केनचिन्निमित्तेनप्रयुक्तः साधुः। अन्यथात्वसा
धुः यथाश्वस्वशब्दोधनाभावनिमित्तकः साधुः जातिनिमित्तकोसाधुः। गविचगोणीशब्दः। साधर्म्या
त्प्रयुक्तः साधुः जातिप्रयुक्तस्त्व साधुः॥

त्॥ साधर्म्यमूलकादसत्येशारोपात्॥ भाष्येयथावत्॥ अंबूकृतादिदोषरहितं। वाचोयोगः॥ प्रकृतिप्रत्य १२
यविभागेनार्थविशेषपरत्वं तद्वेत्तीतिवाग्योगवित्॥ ॥छ॥ ॥ ॥

तविज्ञानमितिप्रयोगे १

श्रुतत्वादिति। एकत्रजयाग्निदोषयोश्चकारेण समुच्चयप्रतिपादनाद्बेत्यपिबोध्यं दोषदर्शनादिति शास्त्रस्या
धर्महेतुत्वंदोषइत्यर्थः। वादिप्रतिवादिपूर्वपक्षोत्तरपरतया व्याख्याने ऽसामंजस्यंमत्वाह प्रदुष्टेचेतिभाष्येकुत
एतदितिवाग्योगविदोदोषःकुतइत्यर्थः ननुसाधुज्ञानस्ययथाधर्मजनकता शास्त्रोक्तानतथाऽसाधुज्ञानस्या
धर्मजनकताशास्त्रोक्तेत्यतआह यथेति। एवंचापशब्दज्ञानमधर्मसाधनं धर्महेतुशब्दज्ञानविरोधित्वात्। य

कइति। वाग्योगविदः श्रुतत्वाद्दोषदर्शनाच्चप्रश्नः। प्रदुष्टेवपरतमाशंक्याहावायोगविदेवेति। एवमप
शब्दज्ञानेपीतियथाश्लैष्मिकद्रव्यसेवयाश्लैष्मिकोव्याधिर्भवतितद्विपरीतसेवयात्वारोग्यंतथात्रापि
यथोक्तंन्याय्यमितिभावः। भूयांसोल्पीयांसइति। परमतापेक्षयाप्रकर्षप्रत्ययः यदिमन्यसेबहवःश
ब्दाः अल्पेऽपशब्दाः अंगभूयस्त्वाच्चफलभूयस्त्वमिति। तत्रयस्माद्भूयांसोपशब्दाः अल्पीयांसःश
ब्दाः अज्ञानमिति। तथाचतिरश्चांब्रह्महत्यादिफलाभावः।

द्यद्विरोधितत्तद्विरोधिफलकंयथाश्लेष्मिकद्रव्यसेवेत्यनुमानप्रमाणमितिभावः एवंचशास्त्रस्याधर्महेतुतयातत्रप्रव
त्तिर्नस्यादितिनेदंवचोव्याकरणाध्ययनानुष्ठापकंस्यादितितात्पर्यं। नन्वस्त्वधर्मोपितथापिधर्माधिक्यात्पाध्येयंव्याकर
णमतआहभाष्येवेति। अंगभूयस्त्वादिति अंगानांधर्मजनकानांभूयस्त्वादित्यर्थः एवंचयज्ञादेःपापजनकत्वेप्यधि
कधर्मजनकत्वाद्यथातत्रप्रवृत्तिस्तथात्रापीतिभावः। आल्पीयांसः शब्दाइतिएवंचशब्दइतिप्रक्षिप्तक्षीरवदनुपादेयतद्विज्ञानमि
तिभावः।

कै० वि०
१३

नन्वेवं सामर्थ्यादवाग्योगविदेव दुष्यतीत्यत्र कर्त्तास्त्वत आह भाष्ये ऽप्ययौ वाग्योगविदिति। अत्यंतमित्यर्थे ऽत्यं
तायेति अव्ययं। पुरुषाणामिति। मनुष्याणामित्यर्थः तिरश्चामत्यंतायोग्यत्वादस्त्वज्ञानं शरणं मनुष्याणां तु
योग्यत्वात्तैर्निषिद्धानुष्ठानवर्जनार्थमेवप्रपं शास्त्रं विज्ञेयं। अतो ऽवाग्योगविदो महाननर्थ इति भावः तत्रता
त्यंतायेत्यनेन शास्त्राज्ञानं नैव शरणं दोषद्वयप्रसंगात् किंतु वध्यादेर्ब्राह्मणत्वाद्यज्ञानमेव पापाल्पत्वे प्रयो

नात्यंतायेति। पुरुषाणां विधिप्रतिषेधयोरधिकारात्तत्परिज्ञाने प्रयत्नस्य न्याय्यत्वात् प्रकरणात्सामर्थ्याद्व
लोपद्रत्वाद ऽवाग्योगविदिति। वाग्योगवित्तु स यज्ञोपि शब्दान् प्रयुङ्क्ते नापशब्दानिति ज्ञानपूर्वकाणां
प्रयोगाद्भ्युदयभाग्भवति। श्लोकस्याप्रसिद्धत्वात्पृच्छति। क्व पुनरिति। प्रातिपदिकार्थप्रश्न एवात्र ता
त्पर्यं किं तदस्ति यत्रेदं पठितमित्यर्थः अत एव श्लोका इति प्रथमांतेनोत्तरं अन्यथा श्लोकेष्विति वाच्यं स्यात्।
आप्तोक्तत्वापरिज्ञानादाह किंच भो इति यदुदुंबरेति। अयं श्लोकः सौत्रामणियागे सुरापाणस्य दुष्टत्वमुद्भावयति॥

जकत्वमिति ध्वनितं। भाष्ये योद्य ज्ञानन्निति निषेधशास्त्रमजानन्ब्राह्मणत्वाद्यज्ञानपूर्वकं तद्वधादि कुर्या
त्सोपि पतित एवेत्यर्थः प्रकरणादिति। संनिधेरित्यर्थः नन्वेवं वाग्योगविदोपशब्दज्ञानादधर्मः स्यादत आह
वाग्योगेति। एवं चापशब्दप्रयोग एवाधर्महेतुर्ज्ञानमात्रमिति न दोष इति भावः भ्राजा नाम कात्यायनप्रणीताः श्लोका
इत्याहुः भाष्ये किं चात इति। अतः प्रश्नात्किं विवक्षितमित्यर्थः। उदुंबरं। ताम्रं। दुष्टत्वमिति इदमुपलक्षणं अन्यत्राप्यदुष्टत्वस्य। १३

ननु कर्त्तरिक्तांतप्रमत्तशब्दस्य गीतशब्देन समासो नुपपन्नः तत्र नवत इत्यनेन साकांक्षत्वादत आह प्रमादेनेति।
विप्रतिपन्नत्वेन। वेदविषयविप्रतिपत्त्या अपत्वेन तत्वं स्वस्मिन्नारीप्यदेत्यनाशाय पूज्यस्यापि नगेव तदीश्वर
स्यतयोक्तिरितिसन प्रमाणमिति भावः ननु कथं ज्ञातमयमप्रमत्तगीत इत्यत आह श्रुतिरनुयाहिकेति। भाष्ये
विधांस इति। अत्र योग्यत्वाध्याकरणं कर्मबोध्यं। प्रत्यभिवादे। अभिवादीनंतर प्रयोज्ये वचनेनाम्नो ऽभिवादक

प्रमत्तगीत इति। प्रमादेन विप्रतिपन्नेन गीत इत्यर्थः। कात्यायनोपनिबद्धभ्राजाख्यश्लोकमध्यपठितस्यत्व
स्यश्रुतिरनुयाहिकास्ति एकः शब्दः सम्यक् ज्ञातः सुष्ठुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति। स्त्रीष्विवेति।
प्रत्यभिवादे हि गुरुणा प्लुतः कार्यः यस्तु प्लुतं न जानाति स स्त्रीवद्वक्तव्यो ऽयमहमिति। ननु अभिवादये दे
वदत्तोहमिति संस्कृतवाक्येनेत्यर्थः॥ ॥छ॥ ॥ ॥ ॥

नाम्नः प्लुतं कर्त्तुं ये न जानंति तेषु कामं निःशंकं विप्रोष्य प्रवासादेत्य यथाकामं विध्यनुसारमंतरेणैवेत्यर्थः अयम
हमित्यनुकरणस्यानितिपरत्वेपि कृतयोगाभावाद्गतित्वाभावेन नवदेदित्यस्य तिङ्ः तत्वेन चसमासाभावदित्याहुः
अत्र केचिदयमहमितिवदेत्। अनुकरणं चानितिपरमिति गतित्वात्समास इति पाठो दृश्यते सोयपाठः
भाष्ये स्त्रीवदिति। तद्दृष्टिकरणेन सूचितशास्त्राज्ञानित्वजायमानप्रयुक्तदुःखभाजो मा भूमेति भावः॥ ॥

Dr. BHAU DAJI MEMORIAL

ननुप्रकृतौप्रयाजमंत्राःसविभक्तिकाएवपठ्यंतेतत्किमनेनवचनेनेत्यतआह प्रयाजेति। ऊह्यमानायाऽ
ग्निशब्दप्रकृतिकविभक्तिस्तद्युक्ताइत्यर्थः।नचाग्निशब्दप्रकृतिकेत्यसंगतं।अपूर्वविभक्तिमात्रविधानेन
केवलःप्रत्ययइतिनिषेधात्यत्किंचित्प्रातिपदिकप्रकृतिकाःसर्वाविभक्तयःप्रयोक्तव्याइतिप्राप्नोती
तिचेन्न।त्वमग्नेप्रयाजानुयाजानांपुरस्तात्त्वंपश्चादितिमंत्रवर्णेनाग्निशब्दप्रकृतिकाएवताइत्याशयात्।

प्रयाजाइति।प्रयाजमंत्राऊह्यमानाग्निशब्दप्रकृतिविभक्तियुक्ताइत्यर्थः यथासमिधःसमिधोअग्न
आज्यस्यव्यंतुइति।यदग्राइतिपदंपदमितिसंख्येकवचनादितिशस्।स्वरशइति।स्वरउदात्तादिःअक्षरश
इतिअक्षरंव्यंजनसहितोच।आर्त्विजीनइति।ऋत्विजमर्हत्यार्त्विजीनोयजमानःऋत्विक्कर्मार्हतीतिया
जकोप्यार्त्विजीनःयज्ञर्त्विग्भ्यांघखञाविितिसूत्रेणयज्ञर्त्विग्भ्यांतत्कर्मार्हतीतिचोपसंख्यानमिति
वार्त्तिकेनखञ्।विधान्यजेतद्विधान्याजयेदितिद्वयोरपिविदुषोरधिकारात्।

तत्राग्नेर्देवतायाएकत्वादेकवचनमेव।विभक्तयश्चप्रथमाद्वितीयातृतीयाषष्ठीसप्तम्यएवेतिश्रौतसंप्र १४
दायः व्यंजनसहितइति। यथायेयजामहइतिपंचाक्षरमिति। वर्णवाहुःपूर्वसूत्रेइतिभाष्यात्वर्ण
मात्रमित्यन्ये।सकृत्प्रयुक्तार्त्विजीनशब्दस्योभयपरत्वेयुक्तिमाहविधानिति।वेदार्थज्ञइत्यर्थः॥ ॥७॥ ॥

चत्वारीतिऋग्रूपःमंत्रः।शब्दस्येतिशब्दशास्त्रप्रतिपाद्यस्येत्यर्थः वृषभाकारःशब्दशास्त्रप्रतिपाद्यःशब्दःरोर
वीति।महान्देवःअंतर्यामिरूपःशब्दोमर्त्याआविवेशस्वात्मेदमाविष्कृतवानितिमंत्रतात्पर्यं।महतोदेवस्य
शब्दब्रह्मणोव्याकरणाज्ञाप्यतयाव्याकरणज्ञस्तदाविष्टइवभवतीतियावत्।भाष्येपदजातानि।पराप
श्यंतीमध्यमावैखरीरूपाणिःअतएवाग्नेनिपाताश्चेतिचकारःसंगच्छतेनामाख्यातेति।नामशब्देनसुबं

चत्वारीति।शब्दस्यवृषभत्वेननिरूपणं।त्रयःकालाइति।लडादिविषयाःनित्यःकार्यश्चेति।व्यंग्य
व्यंजकभेदेन।सप्तविभक्तयइति।सुपइत्यर्थःकेचित्तिङामपरिग्रहप्रसंगात्सहशेषेणसप्तकार
काणिविभक्तिशब्दाभिधेयानीतिव्याचक्षते

तंनमत्याख्यातार्थप्रतिविशेषणीभवतीतिव्युत्पत्तेःआख्यातंतिङंतं।उपसर्गनिपातयोःपृथगुपादानंगोवर्द
न्यायेन।व्यंग्यःआंतरःव्यंजकःवैखरीरूपःतिङ्विभक्तीनांषट्त्वादाहसुपइति।सहशेषेणेति।शेषःषष्ठ्यर्थः
तत्सहितकारकाभिधायकत्वेनसुप्तिङोरूपयोरपिसंग्रहइतिभावः।भाष्येउरसीत्यादि।हकारंपंचमैर्युक्तंमंतस्था
भिश्चसंयुतं।उरस्यंतंविजानीयात्।मूर्धन्याऋदुरषाइत्युक्तेःमूर्धैवशिरःकंठेइत्यनेनमुखांतर्गतकंठादिस्थानमुपलक्ष्यते॥

ननुवर्षतिमूत्रेणान्भूमिंसिंचतीतिवृषभइत्युच्यतेतत्कथंशब्दएवमित्यतआह कामानामिति।मेघनुदकमि
वोक्तचतुःशृंगत्वादिगुणवैशिष्ट्येन ज्ञानपूर्वकंप्रयोगेणकामानांदानादित्यर्थः द्विश्टंगद्विपाद्विकरकंठमात्र
बद्धलौकिकवृषभादस्यव्यतिरेकः किंरोरवीतितत्राहभाष्येमहान्देवइत्यादिमहान्परब्रह्मस्वरूपोदेवोंत
र्यामिरूपःशब्दोमर्त्यंघाविष्टइत्यर्थः तदावेशफलमाहमहतादेवेनेति।साम्यं।सायुज्यं।तदुक्तंहरिणाअपिप्रयो

वर्षाणादिति।कामानांज्ञानपूर्वकानुष्ठानफलत्वात्।महतेतिपरेणब्रह्मणेत्यर्थः।चत्वारीत्यनेनैक
देशेनवाक्यांतरमपिसूच्यतइत्याह।अपरआहेति।परिमितानीतिप्राप्तेशेश्छंदसिबहुलमितिशेर्लोपे
परिमितेतिन्नवति।परिमितानिपरिछिन्नान्येवतावंत्येवेत्यर्थः।मनीषिशब्दःपृषोदरादित्वात्साधुः॥ ॥

त्कुरात्मानंशब्दमंतरवस्थितं।प्राडुर्महांतमृषभंयेनसायुज्यमिष्यते।आहच।चत्वारिशृंगात्रयोऽस्यपादाइत्यादि
ऋग्मंत्रः इहशेशब्दात्मानोकार्यो नित्यश्चतत्रांत्यःसर्वेश्वरःसर्वशक्तिर्महान्शब्दवृषभःतस्मिन्खलुवाग्योगवित् १५
शास्त्रजशब्दज्ञानपूर्वकंप्रयोगेणक्षीणपापःपुरुषोविछिद्याहंकारग्रंथीन् अंत्यतंसंयुज्यतेइतितदर्थंतव्याख्याता
तारः एतावंत्येवेति।वाक्परिमितानीतिषष्ठीतत्पुरुषःपदजातानिपराषश्यंतीमध्यमावैखर्यःनामादीनिच।
नामादिमध्येचएकैकंचतुःपादं।भाष्येमनसईषिणःचित्तप्रसिद्धिक्रमेणवशीकर्त्तारःविषयांतरेभ्योव्यावृत्याहिंसकावातेवेषां

अन्येषांतदज्ञानेहेतुमाहगुहेति।एकैकस्यनामादिरूपस्य।चतुर्थभागं।एकैकस्यचतुरंशत्वात्परादी
नांवात्रयोंशामध्यमांताःगुहाअज्ञानंहृदयादिरूपाच।वैयाकरणस्तुशास्त्रबलेनतद्बललब्धयोगे
नचगुहांधकारंविदार्यसर्वंजानातीतिभावः ननिमिषंतीति ज्ञानसामान्यविषयत्वाभावउच्यते।भाष्ये
यन्मनुष्येषुवर्त्ततइतियन्मनुष्येषुवर्त्तते ज्ञानविषयतयातद्वाचश्चतुर्थमित्यन्वयः तस्मात्सकलप
दज्ञानायमनीषित्वापचाध्येयंव्याकरणमितिशेषः हरिरप्याहवैखर्यामध्यमायाश्चपश्यंत्याश्चैतद

कथंमनीषिणएवविदंतीत्याह।गुहेति।अज्ञानमेवगुहातस्यामित्यर्थः सुपांसुलुगितिसप्तम्यालुक्।व्याकर
णप्रदीपेनतुतानिप्रकाशंते।तत्रचतुर्णांपदजातानांएकैकस्यचतुर्भागंमनुष्याअवैयाकरणावदंति।
नेंगयंतीत्यस्यैवव्याख्यानंनचेष्टंतेनानिमिषंतीति

त्कुतं।अनेकतीर्थभेदायास्त्रय्यावाचःपरंपदं।तत्रश्रोत्रविषयावैखरी।मध्यमाहृदयदेशस्थापदादिप्रत्य
क्षानुपपत्त्याव्यवहारकारणंपश्यंतीतुलोकव्यवहारातीता।योगिनांतुतत्रापिप्रकृतिप्रत्ययविभागावगतिरस्ति।
परायांतुनेतित्रय्याइत्युक्तं।स्वरूपज्योतिरेवांतःपरासावनपायिनी।तस्यांदृष्टस्वरूपायामधिकारोनिवर्त्ततइत्यु
क्तेःअनेकतीर्थभेदायानामाख्यातादिवीणावेणुमृदंगशब्दादिरूपानेकभेदायाःआहखल्वपिचत्वारिवाक्परिमितानीति

ऋक्मंत्रइतिऋतत्वतिउतोशब्दोप्यर्थे।बहूनामपिसमानस्थोदरपाणिपादानामध्ययनमधीयानानामे
कःकश्चित्पश्यन्नपिस्वन्यस्ताध्ययनोपितीक्ष्णबुद्धिरपिसन्नपश्यतिअर्थानभिज्ञानात्।अर्थपरिज्ञान
फलाहिवागित्यभिप्रायःएवमेकःशृण्वन्नपिनशृणोत्येनांवाचंयएवह्यर्थंसम्यगवबुध्यतेनैवसासम्यक्
कृताभवति।एवमर्थेनाथ्रुहासन्निदित्वार्थांतरेणाविद्वांसंस्तौतिःउतोत्वस्मै।अपोत्वस्मैकस्मैचिद्वैयाक
रणायतन्वंशरीरंविसस्रेविवृणोतिप्रकाशयतिसम्यक्ज्ञानंहिप्रकाशनमर्थस्य।अर्थोहिवाचःशरीरं।अपोप
मायुक्तयोत्तमयावाचोत्पादेनार्थज्ञंप्रशंसति।यथाजायाविवृतसर्वांगावयवान्त्वौशतीकामयमानान्नेत्रे

उनत्वइतित्वशब्दोऽन्यवाची।उतशब्दोपिशब्दस्यार्थे।सचान्निन्नक्रमः।प्रत्यक्षेणशब्दस्यस्वरूपमुप
जन्नमानोपिअर्थापरिज्ञानान्नपश्यतीत्यर्थः

प्रेम्णादर्शयंत्यात्मानं।कस्मिन्कालेयद्वासुवासानिर्णिक्तवासानीरजस्काऋतुकालेषु।तदाह्यतितमांस्त्रीपुरुषं
प्रार्थयते।यथासपुरुषस्तांयथावत्पश्यतिशृणोतितद्वचनार्थंनान्यशाधनपटप्रावृतंशरीरंएवंसएवैनांवाचं
यद्दशःप्रकृतिप्रत्ययविभागेनविगृह्यार्थमस्याःपश्यतिशृणोतिचेति।अयमर्थोनिरुक्तभाष्ययोःस्पष्टःभा
ष्येवाग्विदेवैयाकरणाय।पश्यन्निति।अर्थविशेषबोधकतयामनसापश्यन्नपिवर्णव्यतिरेकेणन्वाजानाती
त्यर्थः।अन्यवाचीतितदेवनाष्येउक्तमेकइति।अर्थज्ञावैयाकरणोयं।अनभिज्ञावैयाकरणमाहद्वितीयपा
दःतंव्याचष्टेप्रत्यक्षेणेतिश्रोत्रेंद्रियेणेत्यर्थः।नशृणोतीत्यस्यव्याख्यानंपश्यतीति॥ ॥७॥ ॥ १६

उत्तरार्धेउतोइत्याश्चर्ये।तदुक्तंनाष्येऽविद्वांसमाहार्धमितिवैयाकरणमाहोत्तरार्धंवाग्विदे।वैयाकरणाय॥
यथाजायापत्युर्विवाहतस्यैवगुप्तान्स्वावयवान्कामिनीत्वरूपंस्वार्थंचप्रकाशयतिसचतत्ज्ञानेनतद्भोग
जन्यानंदभाजनंएवंव्याकरणाध्ययनवतेस्वावयवान्प्रकृतिप्रत्ययरूपान्परादिरूपंगुप्तमात्मानम्
अर्थंचप्रकाशयतिसचतज्ज्ञानेनतात्प्रयोगतध्यानरूपतद्भोगेनवजनितान्युदयेनशुद्धचित्तःपरानंद
भाजनंनवतीतितात्पर्यं।नाष्येसक्तुमिवेति।यत्रव्याकरणेधीराध्यानवंतःसंतस्तितउनासक्तुमिवध्यानयुक्त

उतोइतिनियातस्समाहारःअविद्वांसमाहार्धमितिअविद्वल्लक्षणमर्धर्चं।आहेत्यर्थः।सचतेरितिषच
सेचनेइत्यस्य।दुर्धावइति।दुःशोधयथातितउनासक्तोस्तुषाद्यपनीयते।तथाव्याकरणेनवाचोऽपश
ब्दाइत्यर्थः।कसतेरितिटषोदरादित्वाद्वर्णव्यत्ययः॥

मनसातत्करणज्ञानेनवाचमक्रतकृषतअसाधुभ्योविविक्तांकृतवंतःतेतत्करणेनशुद्धचित्ताअत्रब्रह्मप्र
तिपादकशब्देशब्दार्थयोरभेदबुध्यासखायःसमानख्यातयःसमानज्ञानाःतत्तशब्देब्रह्मैकत्वज्ञानवंतस्ते
नेवदृष्टांतेनसर्वपदार्थेषुब्रह्मनिरूपिताभेदज्ञानवंतःसख्यानिसायुज्यानिजानतेप्राप्नुवंतीत्यर्थः।यतएषां
वाचिभद्रालक्ष्मीःस्वप्रकाशाब्रह्मरूपाअधिकंनिहितास्थितानवतीतिलिंगर्थःसचतेदुर्धावइति।यतःसचतेस्तो
दुःशोध्यार्थप्रतिपादकोनवतीत्यर्थःतितउशब्दइतएवमाष्यान्नपुंसकःचालनीतितउःपुमानितिकोशेत्वस्त्रिंगोपि॥ ॥

त्रक मंत्रइतिन तत्वति उतोशब्दोप्यर्थे। बहून्नमपि सम्यग्नरष्ठोदरपाणिपादानामध्ययनमधीयानानामे
कः कश्चित्पश्यन्नपि स्वन्यस्ताध्ययनोपि तीक्ष्णबुद्धिरपि सन्नपश्यतिअर्थानभिज्ञानात्। अर्थपरिज्ञान
फलाहि वागित्यभिप्रायः एवमेकः शृण्वन्नपि नशृणोत्येनां वाचं य एवार्थं सम्यगवबुध्यते नैवसा सम्यक्
कृताभवति। एवमर्थेना विद्वांसन्निंदित्वार्थांतरेण विद्वांसं स्तौति। उतोत्वस्मै। अपोत्वस्मै कस्मैचिद्वैयाक
रणाय तन्वं शरीरं विसस्रे विवृणोति प्रकाशयति सम्यक् ज्ञानं हि प्रकाशनमर्थस्य। अर्थो हि वाचः शरीरं। अर्थोप
मायुक्तयोत्तमया वाचोत्पादेनार्थज्ञं प्रशंसति। यथाजायाविवृतसर्वांगावयवान्तृत्वौ शतीकामयमानान्त्रे

उनत्वइति त्वशब्दोऽन्यवाची। उतशब्दोपिशब्दस्यार्थे। सचान्निन्नक्रमः। प्रत्यक्षेणशब्दस्य स्वरूपमुप
जन्नमानोपि अर्थापरिज्ञानान्नपश्यतीत्यर्थः

प्रेम्णादर्शयंत्यात्मानं। कस्मिन्कालेयदासुवासानिर्णिक्तवासानीरजस्काऋतुकालेषु। तदाह्यतितमां स्त्रीपुरुषं
प्रार्थयते। यथासपुरुषस्तां यथावत्पश्यति शृणोति तद्वचनार्थं नान्यदा घनपटप्रावृतशरीरांएवं स एवैनां वाचं
यद्दशः प्रकृतिप्रत्ययविभागेन विगृह्यार्थमस्याः पश्यति शृणोति चेति। अयमर्थो निरुक्तनाष्ययोः स्पष्टः भा
ष्ये वाग्विदे वैयाकरणाय। पश्यन्निति। अर्थविशेषबोधकतया मनसापश्यन्नपि वर्णव्यतिरेकेणन्वाजानाती
त्यर्थः। अन्यवाचीति तदेव नाष्ये उक्तमेकइति। अर्थज्ञावैयाकरणोयं। अनभिज्ञावैयाकरणमाहद्वितीयपा
दः तं व्याचष्टे प्रत्यक्षेणेति श्रोत्रेंद्रियेणेत्यर्थः। नशृणोतीत्यस्य व्याख्यानं पश्यतीति ॥ ॥७॥ ॥ १६

उत्तरार्धे उतोइत्यादृच्यर्थे। तदुक्तं नाष्ये ऽविद्वांसमाहार्धमिति वैयाकरणमाहोत्तरार्धं वाग्विदे। वैयाकरणाय ॥
यथाजायापत्युर्विवाहतस्यैव गुप्तान्स्वावयवान् कामिनीत्वरूपं स्वार्थं च प्रकाशयति सच तत् ज्ञानेन तद्भोग
जन्यानंदभाजनं एवं व्याकरणाध्ययनवतेस्वावयवान् प्रकृतिप्रत्ययरूपान् परादिरूपं गुप्तमात्मानमू
अर्थं च प्रकाशयति सच तज्ज्ञानेन तात्प्रयोगतध्यानरूपतद्भोगेन वजनितान्युदयेन शुद्धवित्तः परानंद
भाजनं नवतीति तात्पर्यं। नाष्ये सक्तुमिवेति। यत्र व्याकरणे धीराध्यानवंतः संतस्तितउनासक्तुमिव ध्यानयुक्ते

उतोइतिनियातस्समाहारः अविद्वांसमाहार्धमिति अविद्वल्लक्षणमर्धर्चं आहेत्यर्थः। सचतेरितिषच
सेचनेइत्यस्य। दुर्धावइति। दुःशोध यथातितउनासक्तोस्कषाद्युपनीयते। तथाव्याकरणेन वाचोऽपश
ब्दाइत्यर्थः। कसतेरितिष्टषोदरादित्वाद्वर्णव्यत्ययः॥

मनसातत्करणज्ञानेन वाचमकृतकृषत असाधुभ्यो विविक्तां कृतवंतः तेतत्करणेन शुद्धवित्ता अत्रब्रह्मप्र
तिपादकशब्दे शब्दार्थयोरभेदबुध्या सखायः समानख्यातयः समानज्ञानाः तत्तशब्दे ब्रह्मैकत्वज्ञानवंतस्ते
नैवदृष्टांतेन सर्वपदार्थेषु ब्रह्मनिरूपिता भेदज्ञानवंतः सख्यानि सायुज्यानि जानते प्राप्नुवंतीत्यर्थः। यत एषां
वाचि भद्रालक्ष्मीः स्वप्रकाशब्रह्मरूपा अधिकं निहिता स्थिता नवतीति लिंगार्थः सचतेदुर्धावइति। यतः सचतेरतो
दुःशोध्यार्थप्रतिपादको नवतीत्यर्थः तितउशब्दइत एवमाष्यान्नपुंसकः चालनीति तउः पुमानिति कोशे त्वुद्दिंगोपि॥ ॥

विस्तारेति। तनोतेरुः स्त्रन्वश्चेति व्युत्पत्तेरिति भावः तुन्नेति तुद धातोः कर्मणि ड्उः स्त्रन्वश्चेति भावः ध्यानं ज्ञात
र्यन्नावनं। मनसेति व्यापारपरं तदाह प्रज्ञानेनेति भाष्ये क्वेति किं तद्यत्र सायुज्यानि प्राप्नुवंतीति प्रश्नः उत्तरप
तिपएषइति। दुर्गमार्गप्राप्यत्वात् दुर्गमार्गत्वोपचारः दुर्गत्वमेवाह एकेति ज्ञानेनैवेति निर्विकल्पकज्ञानेनै
वेत्यर्थः अत एव दुर्गत्वं। नान्यः पंथा इति श्रुतेरिति भावः नाध्येवागविषय इतिच्छेदः अत एव श्रवणोपप

ततवदिति। विस्तारयुक्तमित्यर्थः। तुन्नवदिति। बहुछिद्रं। धीरा इति वैयाकरणा वाचमक्रतेति।
अपशब्देभ्यो विविक्तां कृतवंतः। मंत्रेघसेति च्लेर्लुकि सत्यक्रतेति रूपं। अत्रा सखाय इति। ऋ
चितुनुघेति दीर्घः। सखायः समानख्यातयो भेदग्रहस्य निवृत्तत्वात्सर्वमेकमिति मन्यंते। सख्या
नीति सायुज्यानीत्यर्थः एकगम्य इति ज्ञानेनैव प्राप्यः वाचीति। वेदाख्यब्रह्मणि या लक्ष्मीर्वे
दांतेषु परमार्थसंविल्लक्षणोक्ता सा निहितेत्यर्थः।

त्तिः वाग्वेदरूपा त्र वेदांतेष्विति। सत्यं ज्ञानमित्यादिषु। परमार्थसंविल्लक्षणा। परमार्थब्रह्म १७
मात्रविषयाखंडार्थरूपा सैषां वाचि निहितेत्यर्थः। सर्वेपि वेदास्तेषां ब्रह्मपरा वेदैश्च सर्वैरहमेव वेद्य इत्युक्तेरिति भावः।

अथ पाणिनिसूत्रव्याख्यानरूपं वार्त्तिकमवतारयति कथं पुनरिति। अत एवात्रैव पाणिनिनामग्रहणं। इतः
पूर्वं तु स वार्त्तिकशास्त्रान्वाख्यानप्रयोजनविषयप्रदर्शनपरो भाष्यकारस्यैव ग्रंथ इति बोध्यं। शब्दार्थसंबंधा
नामिति। शब्दाश्चार्थाश्च संबंधाश्चेति द्वंद्वः एवं च किमपूर्वशब्दनिष्पादनद्वाराऽर्थविशेषसंबंधनिष्पादकत्वं
शास्त्रस्य किं वास्ति इ शब्दार्थसंबंधबोधकत्वमिति प्रश्नार्थ इति तात्पर्यं। सिद्धे शब्दार्थसंबंधे इति। वार्त्तिके समा

कथं पुनरिति। किमाचार्य एव स्रष्टा शब्दार्थसंबंधानामपस्मर्त्तेति प्रश्नः। सिद्ध इति। तत्र नित्यः
शब्दो जातिस्फोटलक्षणो व्यक्तिस्फोटलक्षणो वा कार्यशब्दिकानामपि प्रवाहनित्यतया॥ ॥

हारद्वंद्वात्सप्तमी॥ संबंधश्च प्रत्यासत्या शब्दार्थयोरेवेति त्रयाणामात्यंतिकाविश्लेषप्रदर्शनाय समा
हारनिर्देश इति बोध्यं। व्यक्तिस्फोटेति। सा पदवाक्यरूपा नित्यैवेति तद्भावः एतच्चोपपादितं प्राक्॥ का
र्यशब्दिकानामिति। कार्यशाब्दिकानामिति त्वयपाठः उत्तरपदवृद्धे दुर्लभत्वात्॥ ॥छ॥ ॥

PAGE(S)MISSING

NOT AVAILBLE

18-22

असत्योपाधीति। जातिरूपेत्यर्थः जातिर्हि तन्मत आविद्यकोधर्मविशेषः यद्वालाघवेन धर्मीणामेवाविद्याकार्यत्वेन
सर्वेषां धर्मीणां ब्रह्मण्यध्यस्तत्वेन शुक्तिरजतादिज्ञाने शुक्त्यादीनां विशेष्यत्ववत्सर्वत्राधिष्ठानभूतं ब्रह्मैव विशेष्यं
विशेष्यमेव च द्रव्यमिति भावः यत्तु व्यक्तीनामाविद्यकत्वेन तदवच्छिन्नं ब्रह्मैव जातिरिति। तन्न। अनेकव्यक्तीनामा
विद्यिकानां कल्पने गौरवात्। अपागादग्नेरग्नित्वमित्यादिश्रुत्या जातेरेवानित्यत्वबोधनाच्च। अत एव जातेर्व्य

अर्थास्यापि जातिलक्षणस्य नित्यत्वं। द्रव्यपक्षे स सर्वशब्दानामसत्योपाधिव्यवच्छिन्नं ब्रह्मतत्त्ववाच्य
मिति नित्यता प्रवाहनित्यतया वा संबंधस्यापि व्यवहारे परंपरया अनादित्वान्नित्यता। सिद्धशब्द
स्य नित्यानित्ययोर्दर्शनात्पृच्छति। अथेति। नित्येति। नित्यलक्षणास्यार्थस्य पर्यायेण वाचकः। तमे
वार्थं कदाचिन्नित्यशब्द आह॥ कदाचित्सिद्धशब्द इत्यर्थः॥ ॥७॥ ॥

वहारनित्यता मा भूदस्ति॥ प्रवाहनित्यतामेवाग्रे वक्ष्यति भाष्यकृत्॥ शब्दार्थयोर्नित्यत्वपक्षे तत्संबंध
स्य नित्यत्वेप्यनित्यत्वपक्षे कथं संबंधस्य नित्यत्वमत आह संबंधस्येति। प्रवाहनित्यतया तयोरिव
तस्यापि नित्यत्वमिति भावः शब्दार्थयोः संबंधश्च शक्तिरूपे तादात्म्यमेवेत्यन्यत्र प्रपंचितं॥ भाष्ये २३
सिद्धशब्दस्य कः पदार्थ इति। अत्र पदार्थशब्दो रूढः सिद्धशब्दसंबंधीकः पदार्थ इत्यर्थः॥ ॥

कूटस्थेष्विति। कूटमयोघनस्तद्वत्तिष्ठंति ये तेषु संसर्गिनाशेपि स्वयमनष्टेष्वित्यर्थः। नन्वयोघनस्यापि तद्धिनि
त्यत्वं स्यादत आह आविधालिष्विति। भाष्यद्यावापृथिव्याद्यपि व्यावहारिकनित्यत्वाभिप्रायेण दृष्टांतितं। आका
शस्यापि व्यावहारिकनित्यत्वमेवाचार्याभिमतम्। एवं च तत्र रूढत्वान्नित्यवाचकस्यैव ग्रहणमिति भावः। ग्रंथा

कव स्थेष्विति। अविनाशिषु। अविचालिष्विति दिशांतरप्राप्तिरहितेषु। ननु चेति सिद्धशब्दात् क्रियानिष्पत्ती
प्यर्थो अवगम्यत इत्यर्थः। संग्रहे तावदिति। तत्र हि किं कार्यः शब्दोऽथ सिद्धः शब्द इति पक्षद्वयविचारः
कृतः तत्र कार्यप्रतिपक्षार्थाभिधाया सामर्थ्यात्सिद्धशब्द इति स्थितं। तत्समानतंत्रत्वादिहापि तथै
व युक्तमित्यर्थः। अथवेति। एवशब्दप्रयोगे द्विपदमवधारणं॥ द्योतकत्वेन एवशब्दस्यापेक्षणात्।
यदा तयोर्द्योतकमंतरेण सामर्थ्यादवधारणं गम्यते। तदा तदेकपदमित्युच्यते। तत्र स्वर्ग एवायोप
क्षयंतीत्यङ्गक्षश्रुतिः सामर्थ्यान्नियममवगमयति। अथ एवेति। इहापि नित्यानित्यव्यतिरेकेणारा
थ्यंतराभावात्सिद्धशब्दोपादानान्नियमोऽवगम्यते सिद्ध एवेति। कार्याणां तु पदार्थानां प्राक्प्रध्वंसा
वस्थयोः सिद्धता नास्तीति न ते सिद्धा एव॥
तरानालोचनेपि नियामकमाह। भाष्ये अथवेति। एतेन तत्समानतंत्रत्वाद्भाष्यकृतः पदार्थवादोपि तवस्यादित्यपास्तं ननु ए
कपदानीत्युक्त्वा पृथक्ष इत्यस्य पदद्वयात्मकस्योदाहरणत्वमसंगतमत आह। एवशब्देति नियमप्रत्यायकसामर्थ्यं
दर्शयति॥ इहापीति॥ कार्यवाचिन एव ग्रहणाभावे मूलमाह। कार्याणामिति। प्राक्प्रध्वंसावस्थयोरिति भावः॥ ॥

Dr. BHAU DAJI
डाक्टर भाऊदाजीइत्यास्यस्मारकम्
MEMORIAL

भाष्येय एवेतिगम्यतेइति। वाक्येइवसमासेपिसामर्थ्यात् तदतिरिक्तलक्षणभावोगम्यतइत्यर्थः अथवेति। मनुष्य
वृक्षाद्यपेक्षयाकाशादीनामप्यत्यंतसिद्धत्वमितिभावः प्रतीयमानस्येति। एतदग्रुदितसूत्रेउपपादयिष्यते। एवंत
र्हीति। एवमेवघटपदंकलशपयइत्यादिप्रयोगाः अन्यथापर्यायवाचीतिप्रयोज्यंस्यात्। विनापिप्रत्ययंपूर्वोत्तर
पदयोर्लोपइतिविधायकंतर्हि किमर्थमतआह लोपस्त्विति। वर्णानां देइत्यादीनांतत्रापिकश्चित्पूर्वपदस्यैवकश्चि

अथवेति। कथंपुनर्देवदत्तशब्देसंज्ञात्वेन विनियुक्ते एकदेशः प्रयुज्यतेनह्यसौसंज्ञात्वेनविनियु
क्तः नचैकदेशात्समर्थमाप्यस्यसमुदायस्यवाचकत्वमुपपद्यतेप्रतीयमानस्यप्रत्यायकत्वासं
भवादुक्तार्थमापस्यैववाचकत्वात्। एवंतर्हिअनुनिष्पादिनोअवयवस्वरूपाः संज्ञाविनियोग
कालेविनियुक्ताएवलोपस्तुवर्णानांसाधुत्वंमाभूदित्यन्वाख्यायते। इहापिनित्यानित्ययोर्निष्प
न्नत्वाविशेषात्सिद्धशब्दःप्रकृतिरूपात्ताप्रकर्षंगमयति। अत्यंतसिद्धः सिद्धइति। न्यायाकाशशब्दादीनां
स्थितंनित्यत्वमित्याह। अथवेति। न हि संदेहमात्राल्लक्षणंभवतिपुनःप्रमाणांतरेणनिश्चयोत्पादात्॥

दुत्तरपदस्यैवकश्चिदुभयोरितिलोकव्यवहारेणनिर्णयं। एवंवर्णानांशक्त्यभावोपिततएवनिर्णयइति
तत्वं। निष्पन्नत्वेति। विद्यमानकालसंबंधोनिष्पन्नत्वं। ननुनियुक्तिकंव्याख्यानमयुक्तंविपरीतस्यापिसं २४
भवादतआह न्यायाक्षेति। वृद्धव्यवहारादेवपदार्थसंबंधानांनित्यत्वंसंग्रहोक्तेस्थितमित्याख्यानतः सिद्धशब्देनतस्या[illegible]॥

सिद्धिर्मंगलमिति। तस्यामंगलत्वंचकार्येकारणरूपोपचारादितिबोध्यं। तत्प्रयोजनमस्येति। प्राग्वतीपष्ठक्। तत्रमंग
लानुष्ठानप्रयोजनान्याह। भाष्ये मंगलादीनीत्यादिना। ग्रंथेतन्निबंधनस्यफलमाह अध्येतारश्चेत्यादिना। आनुषं
गिकमंगलसंपत्येत्यर्थः। अध्ययननिर्वृत्तिः तत्समाप्तिः सिद्धिः सिद्धिविषयोर्थः मंगलार्थमित्यनेनेत एववार्तिकप्रवृ
त्तिःसूचिता। असंदिग्धोनित्यशब्दः किंनप्रयुक्तइत्युक्तंतत्रापि संदेहमाह भाष्ये ऽयंखल्विति॥ आभीक्ष्ण्येन बाहुल्येन

वर्ण्येनेति। प्रयत्नव्याख्यातव्येनेत्यर्थः। अगर्हितासीष्टार्थसिद्धिर्मंगलंतत्प्रयोजनआचार्योमांगलिकः प्रपंतद्
तिअध्ययनस्याविच्छेदात्। वीपुरुषाणीति। श्रोतॄणांपरैरपराजयात्। आयुष्मत्पुरुषाणीति। शास्त्रार्थानुष्ठाने
धर्मोपचयादायुर्वर्द्धनात्। सिद्धार्थाइति। अध्ययननिष्पत्तिरेवतेषांसिद्धिः नावश्यमिततितश्चाभीक्ष्ण्येन
येशब्दाः प्रयुज्यंते आगोपालांगनंतेषांअन्वाख्यावंस्यात्। विरलप्रयोगाणां। विनापिचक्रियापदप्र
योगेणाभीक्ष्ण्यवृत्तिर्नित्यशब्दः प्रयुज्यते॥ यथाआश्चर्यमनित्येइति। नित्यवीप्सयोरिति॥ ॥

अभीक्ष्ण्यामितिपाठेप्ययमेवार्थः प्रयुज्यंतइति। साक्षाच्छब्दे आभीक्ष्ण्यासंभवात् प्रयोगद्वारातत्थाह्यं। एवंच
नित्यशब्दोपादानेपिसप्रयोजनकोयांतरसंभवेनतत्रापिसंदेहएवेतिभावः नित्येशब्दार्थसंबंधेइत्यस्यशब्दार्थ
संबंधेज्ञातेसतिनित्येनित्यप्रयोगविषयेशब्देशास्त्रंप्रवृत्तमित्यर्थः स्यादितितात्पर्यं। नन्वाभीक्ष्ण्यवाचिनोनि
त्यंक्रियापदसाकांक्षतयाकथंकेवलस्यप्रयोगोतआह विनापिचेति॥ ॥छ॥ ॥ॐ नमः शिवाय॥ ॥

नन्वेवमर्थग्रहणं व्यर्थमत आह द्रव्यपक्षे इति योग्यता। बोधजनकत्वयोग्यता दौतात्म्यं तदुक्तं भाष्ये नित्यो ह्यर्थवतामिति।
शब्दानामित्यर्थः ननु तादात्म्यस्य संबंधत्वे कथं तस्य नित्यत्वमिति चेत् न। नष्टस्यापि वस्तुनोपि शब्देन बोधाद्बोधार्थेन तस्य
तादात्म्यं नित्यमित्याशयात् शब्दवृत्तिधर्मस्यैवार्थवृत्तिधर्माभेदमापन्नस्य तादात्म्यत्वेनादोषाच्च शब्दस्य च नित्यत्वादि
ति॥ आकाशवत्तन्निष्ठः शब्दोपि नित्यः व्यंजकाभावात्तु न सर्वदोपलंभ इति भावः ननु घटादिद्रव्यस्य कथं नित्यतेत्यत आ

अर्थसंबंधे चेति। द्रव्यपक्षे द्रव्यस्यानित्यत्वादर्थग्रहणं संबंधविशेषणार्थमुपात्तं। अनित्येऽर्थेक
थं संबंधस्य नित्यतेति चेत् योग्यतालक्षणत्वात्संबंधस्य तस्याश्च शब्दाश्रयत्वात्। शब्दस्य नित्यत्वा
ददोषः। द्रव्यं हि नित्यमिति। असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यं शब्दवाच्यमित्यर्थः। आकृतिरि
ति। संस्थानं। ब्रह्मदर्शने च गोत्वादिजातेरप्यसत्त्वादनित्यत्वं आत्मैवेदं सर्वमिति श्रुतिवचनात्॥ ॥

ह असत्येति॥ सच कंबुग्रीवादिमदाकारादिरूपः तद्व्यंग्यजातिरूपः भाष्ये यद्याकृतिशब्देन तद्व्यंग्यमुच्यते
तर्हि तद्व्याविद्धकत्वेन व्यंजकानित्यत्वेन चानित्यमित्याह जातेरपीति। अनेनैतत्प्रकरणस्थाकृतिपदस्य व्यं २५
ग्यव्यंजकोभयपरतां सूचयति। गौतमेनाप्युक्तं जात्याकृतिव्यक्तयः पदार्थ इति। भाष्ये खदिराङ्गारसवर्णकुंड
लेभवत इति प्रयोगाद व्यंजके विकृतेः कर्तृत्वं बोध्यं॥ ॥छ॥ ॥श्रीकाशीविश्वेश्वरायनमः॥ ॥

भाष्ये आकृतावपि पदार्थ इति। क्वचिदुपरतेति सत्त्वान्न सर्वतोपरतेत्यन्वयः ननूपरमो नाशश्चेत्तत्काले एवान्यत्र सत्त्वं
विरुद्धमत आह अन्यत्रेति। ननु परमार्थदृष्ट्या सर्वमनित्यमत आह। अद्वैतेनेति। नित्यत्वमिति। सर्वदा एकाकारपरा
मर्शदर्शनेन यावद्व्यवहारकालं तस्या अपि ध्रुवादित्वेन नित्यत्वमिति भावः अथावयवसंख्यानरूपापा जातिव्यंतिका
पा आकृतेर्यावद्व्यवहारकालं मध्ये मध्ये त्वपत्तौ नाशेपि प्रकारांतरेण नित्यत्वमाह भाष्ये यवेति नित्यत्वलक्षणे ध्रुवपद

न क्वचिदुपरतेति। अनभिव्यक्तेत्यर्थः अद्वैतेन लोके व्यवहाराभावात् व्यवहारे चाकृतेरेकाकारपराम
र्शहेतुत्वान्नित्यत्वं॥ अथवेति। असत्यत्वेपि तत्वतो लोकव्यवहाराश्रयणेन जातेर्नित्यत्वं साध्यते। त्रिविधा
चानित्यता। संसर्गानित्यता यथा स्फटिकस्य जपाद्युपधाने स्वरूपानिरोधाने पररूपप्रतिभासः। उप
धानापगमे स्वरूपप्रतिभासात्तु परिणामाभावः परिणामानित्यता॥ यथा बदरफलस्य श्यामतानिरोभा
वे लौहित्यस्याविर्भावः प्रध्वंसानित्यता सर्वात्मना विनाशः। एतत्त्रिधानित्यताप्रतिक्षेपेण नित्यतां प्रतिपाद
यितुमुक्तं ध्रुवमित्यादि। तत्र ध्रुवं कूटस्थमिति॥ संसर्गानित्यतापरिहृता॥ अविचालीति परिणामानित्यता
अनपायेत्यादिना प्रध्वंसानित्यता॥

स्यैव व्याख्यानं कूटस्थमिति॥ रूपांतरापत्तिर्विचालः। यथा पयसो दध्यादिरूपता। अनेन परिणामानित्यता परा
स्ता। उत्पत्तेः सत्तापर्यंतत्वादनुत्पत्तीत्यनेन जन्मसत्तारूपौ भावविकारौ निरस्तौ॥ अवृद्धीत्यनेन तृतीयो वृद्धिलक्षणः।
अनुपजनेति चतुर्थः परिणामः॥ अनपायेति पंचमोपचयः एतद्रूपविकाररहितामिति तदर्थः अव्ययेति
षष्ठो विनाशः॥ इदं च ब्रह्मविषयं नित्यत्वं॥ यावद्व्यवहारमेकरूपास्थितपदार्थविषयं च॥ ॥छ॥ ॥

अयमेवनित्यशब्दार्थदृश्यविनित्यतांचानेनोक्ता।तन्नाशेपितद्धर्मेणनश्यतिआश्रयप्रवाहाविच्छेदात्इतिभावः
यन्नित्यमिति।व्यक्तिजात्याकृतीनांमध्येयन्नित्यमित्यर्थः×त्वव्यवहारादित्याहन्नाष्येतदपीति॥यस्मिंस्तत्त्वमि
तियत्विहपितत्वप्रवाहनित्य× ननुशशशृंगादिपदार्थानांकथंनित्यत्वंतेषांस्वरूपस्यैवाभावादतआह॥बुद्धि
प्रतिभासइति।बाह्यःपदार्थोनशाब्दबोधेविषयःकिंतुबौद्धःसचप्रवाहनित्यइतिभावः एतच्चमंजूषायांविस्तरे

यन्नित्यमिति।बुद्धिप्रतिभासःशब्दार्थोयदाशब्दउच्चरितःतदातदर्थाकाराबुद्धिरुपजायतइतिप्रवाहनि
त्यत्वादर्थस्यनित्यत्वमित्यर्थः॥लोकतइति।अन्यथाकार्येषुवस्तुषुलोकव्यवहारोन्यथानित्येषु।शाब्दश्च
व्यवहारोनादिसिद्धव्यवहारपरंपराव्युत्पत्तिपूर्वकइतिशब्दादीनांनित्यत्वंघटादयस्त्वर्थ।क्रियाप्येतैरन्यतआ
नीयते॥उत्पादविनाशयुक्ताश्चोपलभ्यंतेनैवंशब्दादयःतावत्येवार्थइति।बुध्यावस्तुनिरूप्येत्यर्थः॥अत्र
भाष्यकारेणासंसक्तमप्येकवाक्यतामनाश्रित्यवाक्यत्रयंस्थापितं।सिद्धेशब्दार्थसंबंधेशास्त्रप्रवृत्तमित्ये
कंवाक्यं।कथंज्ञायतइतिप्रश्नेलोकतोज्ञायतइतिद्वितीयं।लोकतइत्यादृत्यालोकतोर्थप्रयुक्तइत्यादितृतीयं॥ ॥

यानिरूपितं॥शब्दादीनांनित्यत्वमिति।व्याकरणानिष्पाद्यत्वमित्यर्थः तावत्येवेतिवैयाकरणकुलभगत्वेचे
त्यर्थः ननुसकृदन्वितस्यलोकतइत्यस्यपुनरर्थप्रयुक्तेइत्यनेनान्वयःकथं।वार्तिकेचैकवाक्यतयैवान्वयःप्रतीयतेऽ २६
तआहअत्रेति।अनाश्रित्येति।न्यूनतापरिहारायेत्यर्थः लोकतइत्यस्यचलोकव्यवहारतइत्यर्थः॥ ॥छ॥ ॥

भाष्येऽर्थप्रयुक्तेइति।अर्थज्ञानप्रयोजनेनकृतइत्यर्थः परस्यविशिष्टार्थबोधोभवतित्वितिशब्दःप्रयुज्य
तेप्रयोगेणाविर्भूतशब्दज्ञानेनार्थज्ञानादितिभावः एवंप्राप्तेशब्दप्रयोगेशास्त्रेणास्येयंप्रकृतिरयंप्रत्य
यइत्यादिप्रकृत्यादिविभागज्ञानद्वारागवादयएवप्रयुक्ताःधर्मजनकानगाव्यादयइतिनियमःक्रियतइ
तितात्पर्यं॥विधानादिति॥तादर्थ्यस्यचधर्मत्वबोधनायत्वेवंप्रयोगइतिभावःचतुर्थीतियोगविभागो

शब्दप्रयोगइति।प्रयोगग्रहणेनप्रयोगाद्धर्मोनतुज्ञानमात्रादित्युक्तंभवति॥अर्थेनात्मप्रत्या
यनायप्रयुक्तोर्थप्रयुक्तः॥धर्मायनियमइति॥चतुर्थ्यातादर्थ्यंप्रतिपाद्यते॥संबंधसामान्ये
तुषष्ठींविधायसमासःकर्त्तव्यः।चतुर्थीसमासस्यप्रकृतिविकारभावएवविधानात्।धर्म्मा
र्थइति॥धर्मार्थत्वान्नियमएवधर्मशब्देनाभिधीयतइतिकर्मधारयःसमासः॥धर्मप्रयोज
नइति।लिङादिविषयेणनियोगाख्येनधर्मेणप्रयुक्तइत्यर्थः॥

ननभाष्यारूढःसुप्सुपेतिसमासइत्यप्यगतिकगतिरित्येवंव्याख्यातं॥द्वितीयपक्षात्तृतीयेविशेषंदर्शयति॥
लिङादीनि॥प्रभाकरांगीकृतमतेनेदं तन्मतेहिलिङादीनामपूर्वरूपंकार्यंवाच्यं।तदेवचस्वस्मिन्पुरुषंप्रयुञ्जा
ननियोगइत्युच्यते॥सएवधर्मस्तेनप्रयुज्यतेआक्षिप्यतइतिकर्मल्युडंतःप्रयोजनशब्दःसचासाधुनिरत्ति
रूपोनियमःधर्मप्रयोजनइतिषष्ठीसमासःएवंचद्वितीयेधर्मफलकोनियमइत्यर्थःतृतीयेधर्मप्रयोज्यइत्यर्थइतिभेदः॥

केचित्तुधर्मीयनियमइत्यनेनप्रत्यवायपरिहाररूपधर्मायायंनियमःऽऽक्रदृष्टोतआहनाप्येयपेति॥ नन्तु
लोकवेदयोरित्येवसिद्धेत्तद्धितानिर्देशोयुक्तोतआहप्रियतद्धितादृति।नन्वन्यार्थेन्यशब्दप्रयोगेऽपशब्द
त्वस्यादतआहनायमिति॥तेवेदलोकेति॥अवयवेसमुदायशब्दप्रयोगदर्शनादितिभावः।आधाराधेयक
१४असाधुप्रयोगेऽधर्मोत्पत्तेःधर्मायोनियमइत्यनेनधर्मस्ययज्ञादेरंगत्वमुक्तइत्यर्थःनानृतवदेदितिक्रत्वंगवा४१
२४ वाक्येनक्रतुवैगुण्यस्यबोधनात्।धर्मप्रयोजनोनियमइत्यनेनेकःशब्दइतिश्रुतेर्नियमादृष्टपुरुषार्थकरंसूचितमित्याहुःनन्वीदृशोधर्मनियमः४

प्रियतद्धितादृति।नायमयशब्दःकिंतुयलोकवेदयोर्न्नवायेअवयवास्तेलोकवेदशब्दाभ्याम।मभिधा
तुंशक्यंते॥आधाराधेयकल्पेनयात्तुतद्धितप्रयोगःप्रियतद्धितत्वनिमित्तःयथाकश्चिद्धनस्य
तपइतिप्रयुंक्तेकश्चिद्धानस्यतमितिसमूहप्रत्ययांत।अथवेति।नात्रावयवावयविभावःकिंतर्हि
दलोकव्यतिरिक्तःसिद्धांतशब्दार्थोन्नवरूपइत्यर्थःलौकिकःस्मृत्युपनिबद्धःवैदिकःश्रुत्युपनिबद्धः॥

ल्पनयात्विति॥लोकरूपसमुदायतदवयवयोरित्यादिः॥ नात्रावयवावयविभावइति॥त
त्रप्तवइत्यादिव्यवहारप्रयोजकोविभागोवयवावयविनोर्नेत्यर्थः॥कृतांतेषु।कृतांतःसिद्धां २७
तःतत्प्रतिपादकवाक्येष्वित्यर्थःनक्रांचनामेत्यस्यतज्ञवतियदितिशेषः॥ ॥छ॥ ॥

शक्यंक्षुदितिसामानाधिकरण्यंकथंस्त्रिन्नलिंगत्वादतआह॥शाकेरिति।तदाक्षुधमिति।ननुप्रधानक्रियानिरूपि
तशक्तेरभिधानेगुणक्रियानिरूपितशक्तौनाभिहितायाअभिहितवत्प्रकाशस्यस्यादुमिणमुलित्यत्रवक्ष्यमा
णत्वेनकथमेतदितिचेन्न॥प्रधानतिङर्थक्रियानिरूपितशक्तेरेवायंस्वभावोयत्स्वसमानाधिकरणगुण
शक्तेरभिहितवत्प्रकाशइत्यभिमानःवस्तुतइदमयुक्तमेवेतिस्यादुमीत्यत्रनिरूपयिष्यामः।खेदइति॥एवं

शक्यंचानेनेति।शाकेःकर्मसामान्येलिंगसर्वनामनपुंसकयुक्तेकृत्यःप्रयुक्तः।ततःपदांतरसंबंधादु
पजायमानमपिस्त्रीत्वंबहिरंगत्वादंतरंगसंस्कारंनबाधतइतिशक्यंक्षुदित्युक्तं॥यदातुपूर्वमेवविं
शेषविवक्षातदाशक्याक्षुदितिभवत्येव॥यदातुप्रतिघातस्यैवक्षुत्कर्मशक्तेस्तुप्रतिघातः।तदाक्षु
धंप्रतिहंतुंशक्यमितिभवति।खेदादिति॥खेदयतीतिखेदोरागः इंद्रियनियमासामर्थ्यवाखेदः॥ ॥

चग्राम्यकुक्कुटपरदारादौविशेषनिषेधस्येतरास्यनुज्ञाफलकतयाआरण्यतक्षलक्षणस्वदारगमनयोर्यथादोषा
भावोयथाचग्राम्यकुक्कुटपरदारगमनयोरधर्मस्तथाशास्त्रजनितज्ञानपूर्वकेगवादिप्रयोगेऽपूर्वोत्पत्तिरूपं
फलंशास्त्रेणबोध्यते॥ तेषांसाधुत्वबोधनात् अर्थादपशब्दानामधर्मजनकत्वंबोध्यते एकविधेस्तदितर
निषेधफलकत्वात्यथैकनिषेधस्यापरास्यनुज्ञाफलकत्वमितिभावः।दृष्टांततात्वंशेनवक्ष्यमाणवैदिकानातुसर्वांशेनेतिबोध्यं॥

व्रतयतीति। अन्यवहार्यत्वेनोपादत्त इत्यर्थः॥ भाष्ये उच्छिष्यानुच्छिष्यचेति॥ संतक्ष्यासंतक्ष्य चेत्यर्थः निखन्यानिखन्य वेत्यर्थ इत्यन्ये। ननु अपभ्रंशा न वाचकाः वाच्यप्रतीत्यन्यथानुपपत्या कल्प्यमानशक्तेः शिष्टप्रयुक्तसंस्कृते ष्वेव कल्पनात्। तदनुसारेणैव चापभ्रंशानां साधुस्मरणेन बोधकत्वोपपत्तेः समानायामित्यनुपपन्नमिति शंकते। यद्यपीति। तथापीति। एवं च वाचकत्वाभावेप्यर्थप्रत्यायकत्वाविशेषेण समानायामित्युक्तं निरूढिमागता इति। ते च शक्तिभ्रमेण बोधका इति भावः शक्तिभ्रमश्चैत्यं केन चित् गावीति प्रयुक्ते गौरिति साधुशब्दस्मरणात् प्रयोज्यस्य बो

पयोव्रत इति। सत्यामर्थितायां पय एव व्रतयतीति नियमोयं न तु विधिः अर्थित्वाभावे कारणाभावात्॥ समानायामिति। यद्यपि साक्षादपभ्रंशा न वाचकास्तथापि सामर्थ्यमाया साधुशब्दव्यवधानेनार्थं प्रत्याययंति केचिद्अपभ्रंशाः परंपरया निरूढिमागताः साधुशब्दान् स्मारयंत एवार्थं प्रत्याययंति। अन्ये तु मन्यंते। साधुशब्दवदपभ्रंशा अपि साक्षादर्थस्य वाचका इति।

धे पितटस्थस्य गावीशब्दादेवास्य गोबोध इति भ्रमेण तन्मूलको न्येषामिति भ्रम इति। वस्तुतो विनिगमनाविरहात् भाषाशब्देष्वपि शक्तिरेवेत्याह॥ अन्ये त्विति॥ साधुत्वं चैतन्मते शब्दगतधर्मसाधनतावच्छेदकवैजात्यमेव॥ यद्यपि साधुनैव भाषेतेति न श्रूयते तथापि फलनिर्देशवाक्ये तन्निर्देशादेवेदृशविधिः कल्प्यते॥ तत्र के साधव इत्याकांक्षायामेत एव साधव इति व्याकरणेन प्रतिपादनात्तद्वारा शास्त्रेण धर्मनियमो विधीयत इति बोध्यं॥ भाष्ये शब्देनैवेति। साधुनेत्यर्थः एवं क्रियमाणमिति॥ शास्त्रज्ञानपूर्वकमुच्चार्यमाणमित्यर्थः॥ ॥छ॥ ॥ २८

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक पुस्तकालय

अस्त्यप्रयुक्त इत्यादेः प्रकृतोपयोगमाह प्रयोगमूलत्वादिति॥ लोकतोर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियम इत्यनेन प्रयुक्तेषु साध्वसाधुषु प्रयुक्ते साधुत्वाख्यानेन तेषु धर्मः प्रयुक्तासाधुषु धर्म इत्यर्थकेनेदं सूचितं। एवं चाप्रयुक्तानामप्रयोगेणैवासाधुत्वानुमानादसाधूनामप्यनेनान्वाख्यानादप्रामाण्यमिति भावः वार्त्तिकोक्तनियमानुपपत्तिश्चेत्यपि बोध्यं॥ भाष्ये किमत इति। अप्रयुक्तसत्वं नास्माकमनिष्टं साधुमात्रार्थत्वाद्व्या

अस्त्यप्रयुक्त इति। प्रयोगमूलत्वादस्याः स्मृतेरप्रयुक्तानामप्यन्वाख्यानादप्रामाण्यमाशंकते॥ यथा घटादीनां विनाप्यर्थक्रियया सत्वं गम्यते नैवं शब्दानां ते हि सर्वदा व्यवहाराय प्रयुज्यमानाः संतः सत्वे नावसीयंत इत्याह। इदमिति। कश्चेदानीमिति। उपहासपरं। उत्तरं तु शास्त्रदृष्टप्रकृतिप्रत्ययादिसद्भावादनुमितसत्वा व्यवहारे तु न दृश्यंत इत्युक्तं। न त्विहलोक इति। यथा लोकेर्थविगमाय शब्दं प्रयुंक्ते नैवं मयैतेर्थप्रयुक्ताः अपितु स्वरूपपदार्थका इत्यर्थः॥

करणस्येत्यर्थः। उत्तरं प्रयोगादिति। तथा चाप्रयोगादसाधुत्वानुमानमिति भावः विप्रतिषिद्धत्वमुपपादयति। यथेति। एवं च सत्वे प्रयोग आवश्यक एव अप्रयोगे चासत्वमेव न स्यादिति भावः॥ ननु लक्षणवशेन सत्वके नाप्यप्रयोगाद्वा प्रयुक्तत्वमिति न विरोधो तो भाष्ये प्रयुंजान एवेति। ननु मयाप्रयुक्तश्चेत्किं॥ तत्र सोपहासमाह कश्चेदानीमिति स्वयमेव प्रयोगं कृत्वा संति चाप्रयुक्ता इत्यादीनां शब्दानां प्रयोगसाधुर्यत्यः स्यादित्यर्थः त्वत्प्रयोगेणैव प्रयुक्तत्वावगमे प्रयुक्तत्वोक्तिर्विरुद्धेति भावः ननु लोकांतरे तस्य न त्विह लोक इति च वा विरुद्धमत आह यथेति। अर्थबोधाय शब्दान् प्रयुंजानो हि मम लोकत्वेनाभिमत इत्यर्थः॥ ॥

साध्येऽर्थे शब्दप्रयोगादिति। अर्थविषयकज्ञानाय शब्दप्रयोगादित्यर्थः तदाशयमाह अर्थसद्भावइति॥ साध्येप्रयोगान्यत्वादिति। प्रयुज्यतइतिप्रयोगः शब्दः सोन्योपस्यार्थस्यास्तित्वादित्यर्थः सर्वनाम्नः परनिपातः पूर्वनिपातप्रकरणानित्यत्वात्। पदांतरसाहितेइति। पदांतरंकपूर्वमिति। तत्र केत्यनेन साधनपारोक्ष्यं निष्ठयाप्रकृतत्वंकर्तृत्वंचपूर्वमित्यनेन मध्यमपुरुषबोध्यमाप्तिमुख्यंचेतनत्वंबाबहुत्वंच। वसेः साक्षाऽत्यप्याकिमकेत्यत्रानिर्देशात् तरतेर्गत्यर्थत्वात्कर्त्तरिक्तः नन्वाख्यातेक्रियाविशेष्यकोबोधोत्रचकर्तृविशेष्य

अर्थेशब्दप्रयोगादिति। अर्थसद्भावः शब्दसद्भावेलिंगं नहिविनाशब्देनार्थप्रत्यायनमुपपद्यते॥ इतरोन्यथासिद्धतामाह। अप्रयोगइति। यतोन्येतेषामर्थानांसंतिवाचकास्ततोनैषामनुमानमुपपद्यते। यद्यप्यूचेत्यस्योषितादृतिसमानार्थोनिस्तथापि परोक्षतादेर्विशेषस्यानवगमात्॥ तथापितत्प्रत्यायनायपदांतरसहितः प्रयुज्यते॥

कइतिकथंलिडुंतसमानार्थत्वमितिचेन्न। विषयताविशेषानादरेणतथोक्तेः नन्वाख्यातेक्रियाविशेष्यकबोधेपक्षद्यतिस्सवतिअपाक्षीद्भवतीतिन्त्वादिसूत्रस्थभाष्यप्रयोगविरोधः अतीनागतयाककर्तृकसत्तायावर्तमानत्वासंगतेरितिवाच्यं। वर्तमानसामीप्येतत्रलटः सत्वात्। तरतिब्रह्महत्यांयोश्वमेधेनयजतेइत्यादेर्यत्कर्तृकोयागस्तत्कर्तृकंतरणमितिबोधः॥ अतएवह्रस्वोनपुंसकेइतिसूत्रेरमतेब्राह्मणकुलमितिक्रियाप्रधानमितिभाष्येनुक्तं॥ २५

नन्वप्रयुक्तानुशासनेनिर्मूलत्वाच्छास्त्रस्याप्रामाण्यंस्यादतआह। संप्रतीति। पाणिनेर्व्याकरणप्रणयनकालेइत्यर्थः पूर्वंप्रयोगसत्त्वाच्चव्याकरणप्रणयनादेवानुमीयतेइतिभावः इदमपिचत्रभाष्यवार्त्तिककाराभ्यामप्रयुक्तत्वंनोक्तंतदभिप्रायकमनुमानंबोध्यं। वार्षशतिकानीति। वर्षशब्दोदिवसपरः यथाश्रुतएव वा। आहरति। सामर्थ्यनावादितिभावः ननुसत्राणांबहुयजमानकानामृषिभिर्बेसिष्ठादिभिः संप्रदीयमानत्वात्नावादृषिसंप्रदायइत्ययुक्तमतआह वेदेति। भाष्येकृत्वेत्यनंतरमधीयतेइतिशेषः याज्ञिकाश्चकस्य

इदानीमप्रयुज्यमानानामपिपूर्वंप्रयुक्तत्वादनुशासनंकर्त्तव्यमित्याह॥ अप्रयुक्तइति॥ ऋषिसंप्रदायइति॥ वेदाध्ययनमित्यर्थः॥ सर्वइति। इदमत्रतात्पर्यं। यस्यकस्यचिद्वचनात्प्रयोगाप्रयोगौन व्यवतिष्ठेते। अपितुशिष्टानामेववचनात्। वाकोवाक्यशब्देनोक्तिरूपोग्रंथउच्यते। यथाकिंस्विदावपनंमहद्भूमिरावपनंमहदिति। पूर्वचरितसंकीर्तनमितिहासः। वंशाद्यनुकीर्तनंपुराणं। विकारइति। जीवतोमृतावस्थाविकारस्तत्रेत्यर्थः॥

सूत्रेणान्वाचक्षतइत्यर्थः। अत्रसत्राणांकर्मत्वंअनुपलभ्याऽप्रयुक्तत्वंशंकतेभाष्येनचैवेति। इतरलोकापेक्षयावसुमत्यांशब्दबाहुल्यात्तस्याः पृथक्ग्रहणं। अनेनांत्यपातालपर्यंतसंग्रहः। त्रयोलोकाःस्वस्त्वेनोपरितनसकलसंग्रहः। रहस्यं। उपनिषत्। मन्वादिस्मृतयोवा। वेदनिगूढार्थप्रकाशकत्वात्। एवंचदेशांतरशब्दःशास्त्रांतरवेदांतरोपलक्षकइतिबोध्यं। भाष्येहंमतिरित्यत्रचगतिकर्मेत्यनुकर्षःदातिर्लवनार्थइति। क्तिन्नंतंक्तिजंतंवाल्नवनेपदातिशब्दंप्राच्याः प्रयुंजते। तत्रार्थेदात्रशब्दमुदीच्याइत्यर्थः॥ ॥छ॥ ॥ ॥

वार्त्तिकोक्तो धर्मनियमः श्रुतिसिद्धस्तस्यानुवादो ग्रहणत्वग्रहणादित्याह एकः शब्द इति। तत्र यके देस्माद् पूर्वत्त्वदेत
रत्नद्दर्थमिति न्यायाद्वयोः साम्येन फलसंबंधाभावाद्विकल्पायोगेनैकस्य प्राधान्यमपरस्यांगत्वं कल्प्यं तत्र मघ
मंवा नियम्येतेति न्यायाश्रयेणाह। तत्र किमिति। सर्वत्रैव हि विज्ञानं संस्कारित्वेन गम्यते। परांगंवात्मविज्ञा
नादन्यत्रेत्यवधार्यतामिति न्यायेन ज्ञानस्य ज्ञेयशेषतया धर्महेतुत्वाभावात्। प्रयोगांगतया दृष्टार्थत्वाच्च प्रयोगस्य
फलं प्रति संनिहितत्वाच्चाह। आहोस्विदिति। यथाग्निश्लेष्मण इति। तथा धर्मजनकज्ञानविपरीतत्वात् तद्विपरीतज

किंपुनरिति। एकः शब्दः सम्यक्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति श्रुतिः तत्र किं सम्यक्ज्ञातः का
मधुग्भवति सुप्रयोगात्तु सम्यक्ज्ञानत्वानुमानमित्यर्थः अहोस्वित्सुप्रयुक्तः कामधुग्भवति सुप्रयुक्त
त्वं तु सम्यक्ज्ञानादित्यर्थ इति प्रश्नः ज्ञाने धर्म इति चेदिति। यथाश्लेष्मणः प्रकोपनं स्निग्धद्रव्यं रूक्षं वा
योः। तथेहापि प्राप्तमिति भावः। आचार इति। प्रयोगे। ऋषिर्वेदः। न च प्रयत्न इति यदि प्रयत्नेन विना फ
लं स्यात् प्रयत्नस्य वैयर्थ्यमापद्येतेत्यर्थः॥

न कत्वेनापशब्दज्ञानाद्धर्मप्राप्तिरित्यर्थः। प्रयोगे इति। एवं च प्रयोगादेवाधर्मवत् धर्मोपीति ज्ञानाद्धर्म इति वे
दविरुद्धमिति भावः। भाष्ये फलाध्यतिरेक इति। फलवत्त्वाभावप्रतियोगीन कार्य इत्यर्थः प्रयत्नवैयर्थ्य
मिति। व्याकरणाध्ययनविषयकप्रयत्नवैयर्थ्यमित्यर्थः साधीय इति। क्रियाविशेषणं शास्त्रसंस्कारवतां प्रत्युत
शब्दप्रयोगजन्यबहुपूर्वद्वाराबहुतरात्सुप्रयुक्तत्वमित्यर्थः। भाष्ये तत्र फलव्यतिरेक इति। कौशलव्यतिरेकवत् फलव्यतिरे
कोपि स्यादिति तस्य व्याकरणाध्ययनं व्यर्थमेव स्यादिति भावः शास्त्रपूर्वक इति व्याकरणाध्ययनपूर्वक इत्यर्थः तत्र वेदांगत्वात्त
द्व्याकरणाध्ययनपूर्वकप्रयोगे धर्म इति प्रमाणिकाः॥ ३०

वेदः शब्द इति। बोधक इत्यर्थः प्रमाणमित्यर्थो वा। तस्य यथेति तस्य यथाय ऋचैनमेवं वेदेति ग्रंथेन वेदतो ज्ञात्वा
नुष्ठानं फलायोक्तं तथास्यापि शास्त्रज्ञानपूर्वकप्रयोगः फलायेत्येकः शब्द इत्यादिनोक्तमित्यर्थः भाष्ये प्रमा
णमिति। प्रामाणिकमित्यर्थः शब्दश्च शब्दज्ञाने इति। एकः शब्दः सम्यक्ज्ञात इत्यादिः लेहयो लेहय इत्यादि
तु अपशब्दप्रयोगे। धर्मम् आह न तु ज्ञाने इति भावः यद्यपि तत्र प्रयुक्त इत्यप्युक्तं तथाप्यवैयाकरणस्य

तत्तुल्यमिति। वेदः शब्दो यस्यार्थस्य स वेदशब्दः तस्य यथा ज्ञात्वानुष्ठानं तथा शब्दानामपि प्रकृत्या
दिविभागज्ञानपूर्वकः प्रयोग इत्यर्थः॥ अपर आहेति। वेदश्चासौ शब्दश्चेति वेदशब्द इति कर्म
धारयः अथ वेति। अपशब्दज्ञाननांतरीयकत्वाच्छब्दज्ञानस्य दृष्टफलमपशब्दज्ञानस्य नास्तीत्यर्थः॥

सम्यक्प्रयोगादपि धर्माभावे न ज्ञानमेव तद्धेतुः प्रयोगस्तु तस्य द्वारमिति भावः भाष्ये भ्युपाय एवेति अपशब्द
ज्ञाननांतरीयकं शब्दज्ञानमिति शब्दज्ञानेन फले जननीये सहकारित्वेवापशब्दज्ञानस्यैव दृष्टफलतेति भा
वः॥ अपशब्दज्ञानं अपशब्दत्वेन तज्ज्ञानं एवं शब्दज्ञाने इत्यपि अपशब्दत्वेन तज्ज्ञाने हितज्ञत्वेन शब्दज्ञानं भव
ति। योहीति भाष्यस्य य एवापशब्दज्ञानसमानाधिकरणशब्दज्ञानादेव धर्म इति न ततो विपरीतफलकल्पना युक्तेति भावः तदा
ह अपशब्दज्ञाननांतरीयकत्वादिति। बहुव्रीहिः न हि वन्ध्यानयनांतरीयकं यात्रानयनं ततः दृष्टफलं भवति॥ ॥

तुष्यतु दुर्जन इति न्यायेनापशब्दज्ञानस्य विपरीतत्वमात्रेणाधर्मसाधनत्वमभ्युपगम्यापि भाष्ये समाध्यंतरमाह अथवा कूपेति। मृत्। आर्द्रा। पांसुः शुष्कः। यत्कर्मनांतरीयककर्मजन्यो यो विपरीतमात्रेण कल्प्यो ऽवैधो यो दोषः स तत्कर्मजन्यफलनाश्यो यथा कूपखनननांतरीयककर्तृव्यापारजन्यो मृल्लेपस्तत्फलजलनाश्य इति सामान्यतो दृष्टानुमानात्तन्नाशोनुमानमिति बोध्यं। उत्कृष्टधर्मेति। धर्मस्य विधिबोध्यत्वादुत्कृष्टत्वं अधर्मस्य तु वचनाबोध्यत्वेन विपरीतत्वमात्रेण कल्प्यस्याकल्प्यत्वेन तत्फलधर्मनाश्यत्वं यागीयहिंसायां न हिंस्यादिति वचनेन दुष्टत्वाबोधनाददुष्टत्वमेवेत्यन्यत्र विस्तरः भाष्ये ऽन्यत्रानियम इति यज्ञे सुशब्दप्रयोगादधर्मो ऽ

दोष इति। उत्कृष्टधर्मफलावाप्तौ स्वल्पमधर्मफलमुत्पन्नमप्यनुत्पन्नकल्पं भवतीत्यर्थः॥ प्रत्यक्षधर्माण इति योगिप्रत्यक्षेण सर्वविदितवंतः। परापरज्ञा इति। विद्याविद्याप्रविभागज्ञाः॥ ॥

पशब्दप्रयोगाद्धर्म इति तत्रैव तयोः प्रयोगनियमः तदतिरिक्तस्थले तु सुशब्दापशब्दयोः प्रयोगे ऽनियमः यो ऽपि यज्ञे दोषः सो ऽपि तद्गतकृतसंकल्पोहादिविषय एवं कृतौ हेलयो हेलय इति प्रपंच मित्यूह एव। विदितवेदितव्या इत्यनेन श्रवणमनननिदिध्यासनैः सम्यगुक्तो। अधिगतयाथातथ्या इत्यनेन साक्षात्कार उक्तः याथातथ्यं प्रयुंजत इति वर्तमानसमीपभूते लट् एवं नाप्यभाषंत इत्यपि अत एव तन्नामानो बभूवुरित्यर्थः स्वार्थे यत्। वेदितव्यस्य यद्याथातथ्यं स्वरूपं शुद्धचिदानंदरूपं तदधिगतं प्रत्यक्षेण प्राप्तं यैरित्यर्थः याज्ञे पुनरिति। अनेन तत्वज्ञानामपि कर्माधिकारं सूचयति। ॥ ३१

व्याकरणपदार्थविचारस्य संगतिं दर्शयितुमाह। उक्तमिदमिति। आदिना तस्माद्ध्येयं व्याकरणमित्यादि पुनः पुनरुक्तिर्द्यते। ननु सूत्रसमुदायस्य व्याकरणस्येदं सूत्रमित्युपपद्यते ऽत आह द्वाभ्यामिति सूत्रपदेनाष्टाध्याय्येव पदोच्यते तदापीष्यते यं प्रयोगः सा न सिध्येदित्यर्थः ननु किमुच्यते षष्ठ्यर्थो नुपपन्न इति पर्यायतया सहप्रयोगो ऽपि न स्यादत आह सामान्यविशेषेति। सूत्रे सामान्यं व्याकरणं विशेषः सूत्रशब्देनाष्टाध्याय्येव तदेकदेशो तु योगव्यवहार एव योगे योग उपतिष्ठत इत्यादौ। यदात्विति। सूत्राणि चाप्यधीयान इति भाष्ये वक्ष्यमाणत्वादिति

अथेति। उक्तमिदं न चांतरेण व्याकरणमित्यादि। तत्र पक्षद्वये ऽपि दोषदर्शनात्पदार्थप्रश्नः। षष्ठ्यर्थ इति द्वाभ्यामपि शब्दाभ्यामष्टाध्याय्याः प्रतिपादनाद्व्यतिरेकाभावः॥ सामान्यविशेषशब्दतया तु द्वयोः प्रयोगो न विरुध्यते। यदा त्वष्टाध्याय्येकदेशः सूत्रशब्देनोच्यते तदा षष्ठ्यर्थो ऽप्युपपद्यते। शब्दाप्रतिपत्तिरिति। न हि व्याख्यानरहितसूत्रमात्रश्रवणाच्छब्दाः प्रतीयंते। समुदितमिति। समुदायादेवार्थावसायोत्पादादित्यर्थः॥ ॥

भावः वस्तुत एकदेशस्य सूत्रत्वे ऽपि तस्यापि साक्षात्परंपरया व्याकरणत्वात् षष्ठ्यर्थानुपपत्तिरेवेति तत्त्वं॥ समुदायस्यातिरिक्तत्वे ऽपि दोषमाह। भाष्ये शब्दाप्रतिपत्तिरिति। व्याकरणात् शब्दान्प्रतिपद्यामह इति शब्दविषयव्यवहारासिद्धिः प्राप्नोतीत्यर्थः यतः केवलेभ्यः सूत्रेभ्यः शब्दप्रतिपत्तिर्न दृश्यते व्याकरणस्य शब्दप्रतिपत्तिहेतुत्वं च लोके सिद्धं व्याकरणाच्छब्दान्प्रतिपद्यामह इति व्यवहारात् सेयं प्रतिपत्तिसाधनता सूत्राध्यायवर्तमाना मधायां व्याकरणशब्दवाच्यतां व्यावर्तयतीति सा वस्तुदाहृता नहीति। भाष्ये चर्चापदानि चर्व्यमानानि विगृह्यमानानीत्यर्थः॥ ॥

शब्दइति। लक्ष्यमित्यर्थः अत्र पक्षे षष्ठ्यर्थउपपद्यते शब्दाप्रतिपत्तिहेतुत्वात्तु तदवस्थावाक्याध्याहार इति वाक्यघट
कपदानां सूत्रांतरस्थकृतानां स्वरितप्रतिज्ञयाध्याहारः कल्पनमित्यर्थः यद्वा वाक्याध्याहार इत्यनेन वार्त्तिकरूपवाक्या
नां सूत्रतात्पर्यविषयतावाक्यैकदेशन्यायेन सूचिता। ननु राजपूजन इति वत्कर्मल्युटि न दोषोत आह करण इति।
कर्मणि सत्तुकाचित्क इति भावः लक्षणप्रपंचान्यामिति। यथा कर्मधारयप्रकरणे। अलुक्प्रकरणे च। विजिगीषुक

शब्द इति। करणेल्युडिधीयते शब्दश्च व्याक्रियमाणत्वात्कर्म न तु करणमिति भावः। नवे चेति शब्दे व्या
ख्यापकत्वेन नवो योग इति चेत्। मीमांसादियोगस्यापि शब्दं प्रति विचारकत्वाद्व्याकरणत्वप्रसंगः।।
न चेदानीमिति। लक्षणप्रपंचाभ्यां मूलसूत्रवार्त्तिकानामुपपत्त्या दोषाभावः प्रस्कंदनमिति। यद्यप्ययं
मीमादिस्तथापि कृत्यल्युटो बहुलमित्यस्यैव मीमादयो पादान इत्ययं प्रपंच इति भावः। गौरित्युक्त इ
ति। सास्नादिमति पदार्थे कचित् प्रत्ययं गौरित्युच्यते न दातत्र वाचकांतराणां निवृत्तिः कृता भवति। एवमेक
स्मिन्नुदाहरणे उपन्यस्ते सर्वाणि तत्सदृशानि शब्दांतराणि प्रतीयंते। पूर्वपंचालादिति। जनपदांतरनिवृत्ति
विवक्षायामेकदेशेपि समुदायरूपारोपात्प्रयोगः।।

यायां हि अभिहितानभिधानमशक्तिसत्त्वकत्वाद्दोषाय इह तु व्युत्पादनार्थत्वान्न दोषस्तदिति भावः पूर्वं सामान्ये
उक्ते पश्चाद्विशेषकथनं प्रपंचार्थमिति युज्यते। अत्र तु विपरीतमिति न तत्सामान्यमित्यन्ये प्रतीयंत इति एवं
च विपरीतव्यावृत्तिः सदृशसंग्रहश्च व्याकृतिरिति भावः एतेन शब्दाप्रतिपत्तिरप्यत्र पक्षे उक्ता। व्यावर्त्यव्या
वर्त्तकरूपलक्ष्यलक्षणस्यातिप्रसक्तत्वात्स्थितिर्नाप्येकिंपुनरिति। जनपदांतरेति। भावप्रधानो निर्देशः।।।। ३२

पदेति। मात्रा। परिच्छिन्नोंशः औषधसंस्कृते तत्र समुदाये घृतादिशब्दस्य रूढिरिति भावः अशुक्लेप्यवयवे इति। प्र
योग इत्यनेनान्वेति आरोपादिति। समुदायस्य शुक्लत्वे अशुक्लावयवे प्रयोगे च हेतुः तत्र समुदाये शुक्लत्वारोपे हेतु
रवयवांतरस्य शौक्ल्यादिति वनैकदेशे पुष्पितं वनमिति वदेकदेशेपि शुक्ले शुक्लः पट इति व्यवहार इति बोध्यं। शब्दा
र्थभेदादिति। अनेकावस्थायुक्तं शिरोरादृशब्दार्थः यत्किंचिदेकावस्थायुक्तं तत् शिरः शब्दार्थः तादृशार्दृशब्दार्थ

तैलमिति। यदौषधसंस्कृता घृततैलमात्रा भवति तदेतदुदाहरणं। आकृतिवाचित्वे तु घृततैलशब्द
योः संस्थानप्रमाणनिरपेक्षा सर्वत्र मुख्या वृत्तिः। शुक्ल इति। अशुक्लेप्यवयवे अवयवांतरस्य शौक्ल्यो
त्समुदायस्य शुक्लत्वे सत्यारोपात्प्रयोगः। व्यपदेशिवद्भावेनेति। यथा राहोः शिर इत्येकस्मिन्नपि वस्तु
नि शब्दार्थभेदाद्भेदव्यवहारः एवमिहापि व्याकरणशब्देन शास्त्रस्य व्याकृतिक्रियायां करणरूपत्वमुच्य
ते। सूत्रशब्देन तु समुदायरूपतेति भेदव्यवहार उपपद्यते। सूत्र एवेति। पदच्छेदादिभिः सूत्रार्थस्यैवाभि
व्यंजनात्। आत इति निपातः अतश्च हेतोरित्यर्थः। नो द इति। नैतदित्यर्थः। अथवा नादोर्थरहितत्वाद्घोषमात्रमवगृह्यते

स्य तादृशाच्छिरः पदार्थो वयववदिति षष्ठ्यर्थोपपत्तिरिति भावः। सूत्रशब्देन तु समुदायरूपतेति। अनेकावस्थायुक्तस्य
तस्य व्याकृतिक्रियाकरणावस्थाविशिष्टमवयववदिति तद्रूपावयवस्यायं समुदाय इत्यर्थः। इदृशोस्य लौकिकस्यात्म
कज्ञानं वस्तुशून्यमेव व्यपदेशिवद्भावविषयेप्येवमेव शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति योगसूत्रे पतंजल्युक्ते
रित्यन्ये नाप्येऽविजानत इति। मंदबुद्धेरित्यर्थः सूत्रत एवेति। एतन्मूलकमेव पद्यते। सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्त्तिके इति।।

कै॰ वि॰
३३

ननुलोकप्रसिद्धमातृकापाठेनैववर्णज्ञानसंभवान्माहेश्वरोवर्णसमाम्नायःकिमर्थःइतिपृच्छतिभाष्येकि
मर्थइति। पाणिनयेमहादेवकृतइत्यर्थः ननुसाधुत्वान्वाख्यानंफलमतआहनहीतिऽतरंवृत्तिसमवाया
र्थइति। वृत्तिःशास्त्रवृत्तिस्तदुपयोगिसमवायोवर्णगतःक्रमविशेषःसबोध्यत्वेनार्थःप्रयोजनंयस्यसतथो
क्तःसतिह्यक्षरसमाम्नायेऽजादिसंज्ञाभिर्लाघवेनशास्त्रप्रवृत्तिरिग्यणइत्यादौयथासंख्यप्रवृत्तिश्चेतिभावः
अनेनास्यशास्त्रबहिर्भूतत्वंसूचितं।अतएवमंगलार्थमहतःशास्त्रौघस्यादितोवृद्धिशब्दंपठतीतिवक्ष्यतिअ
न्यकर्तृकत्वंचसूचितं। पाणिनिशास्त्रप्रवृत्त्यर्थउपदेशइत्युक्तेउपदेशोगुरूकर्तृकतायाःस्वरसतःप्रतीतेःसिद्धे

किमर्थमिति। नहिवर्णोपदेशेनकस्यचित्साधुशब्दस्यानुशासनमितिभावः।वृत्तिसमवायार्थइति
लाघवेनशास्त्रप्रवृत्त्यर्थइत्यर्थःधर्मनियमवत्समासः।वृत्त्यर्थइतिशास्त्रप्रवृत्तिप्रत्यासन्नत्वंसम
वायस्यदर्शयति।इग्यणइत्यादौहियथासंख्यशास्त्रंवर्णसंनिवेशमात्रादेवावतिष्ठते।वृत्तिप्रयो
जनइति।पारंपर्येणशास्त्रप्रवृत्तावस्योगत्वं।सतिहिसमवायेइत्संज्ञाततआदिरंत्येनेति।ततोइलोपइत्यादिशा
स्त्रप्रवृत्तिः॥ ॥
ज्ञारणेपिमंत्रोपदेशव्यवहारात् अनुबंधकरणार्थइत्यत्रकरणपदेनेतरस्यासिद्धत्वसूचनात् तत्करणंचो
पदेशकर्तृकर्तृकमेवप्रत्यासत्तेरित्याहुः।भाष्येकिमिदमिति।कोयंसमासइतिप्रश्नःधर्मनियमवदिति।षष्ठी
समासःपक्षत्रयमेतदुपपादयति।शास्त्रेति।आद्यतात्पर्यमुक्तंलाघवेनशास्त्रप्रवृत्त्यर्थइतिननुनेदमाघोच्चा ३३
रणमस्यानादित्वात्तत्कथमुपदेशत्वव्यवहारोतआह।भाष्येउच्चारणमिति।ढक्कानिनादेनाभिव्यक्तिरित्यर्थःफला
तरमाह।भाष्ये।नुबंधकरणार्थश्चेति।अनुबंधेबोधनार्थइत्यर्थःवेनाकारस्यविवृतगुणत्वसंग्रहःउपलक्षणत्वेनवाअनु
बंधत्वंनसमुदायात्यत्वेसातिनोन्यथेतितात्पर्यं॥ ॥

ननुप्रत्याहारशब्देनसूत्रंचेत् तादर्थ्यमनुपपन्नमतआह।प्रत्याहारशब्देनेति।अधिकरणव्युत्पत्त्याअर्थआद्यचावे
तिभावःभाष्येवृत्त्यर्थइति।लाघवेनशास्त्रप्रवृत्त्यर्थइत्यर्थःएतेनप्रत्याहारद्वारासमवायस्यवृत्त्यर्थतादर्शिता।भोत्स्याम
हइतिअंतर्भावितण्यर्थःबोधयिष्यामहइत्यर्थःएवंविज्ञातुमित्यस्यज्ञापयितुमित्यर्थःसतिह्युपदेशइति।एवंच
व्याकरणाध्येतॄणामक्षरसमाम्नायेनैवावश्यकेनेष्टवर्णज्ञानेसिद्धेनतदर्थंमातृकापठनीयेतिभावःएकश्रु
त्येति।त्रैस्वर्येणपाठेतुद्वयोरेवकर्तव्यतावदेदित्यर्थःतेषांलोकतःसिद्धौतुदोषरहितानामपिततएवसिद्धेरुपदेश

प्रत्याहारार्थमिति।प्रत्याहारशब्देनअणादिकाःसंज्ञाउच्यंते।इष्टबुध्यर्थश्चेति।सतिह्युपदेशेकलादिदोषरहिता
येवर्णानिर्दिष्टास्तेतथैवप्रयोक्तव्याइत्युक्तंभवति।एकश्रुत्यासूत्राणांपाठात्सर्वेषामुदात्तादीनामुपदेशःक
र्तव्यइत्यादि।इष्टबुध्यर्थश्चेतिचेदिति।आकृत्युपदेशादिति।उभयत्रापिविशेषोनांतरीयकत्वाज्जातिप्राधा
न्यविवक्षायांनविवक्ष्यतइत्यर्थः।संवृतादीनामिति।एकारादीनांसंवृतत्वंदोषोनत्वकारस्यतस्यसंवृतगु
णत्वात्तत्रसंध्यक्षरेषुविवृततमेषूच्चार्येषुसंवृतत्वंदोषः।कलःस्थानांतरनिष्पन्नः।काकलिकत्व
नप्रसिद्धःध्मातःश्वासभूयिष्ठतयाह्रस्वोपिदीर्घइवलक्ष्यते॥

वैयर्थ्यापत्तिरितिभावःत्रैस्वर्येणपाठेपिअन्यतमपाठेऽन्यस्यकर्तव्यत्वात्प्रायेणसर्वेषांग्रहणमित्यन्वोआ
कृत्युपदेशोकिमितिअकारादिह्रस्वव्यतिविशेषापादानंतदुपादानेव्यक्त्यंतरस्यग्रहणानापत्तिःचेत्येतआह।उपा
त्ताविति।नांतरीयकत्वंचतंविनाजातेरुच्चारयितुमशक्यत्वात्।संवृतादीनामितिसाध्ये।तादृशदोषसहिताना
माकृतिग्रहणात्प्राप्तस्यग्रहणस्यप्रतिषेधोवक्तव्यइत्यर्थः।तदाहएकारादीनांसंवृतत्वमिति॥ ॥ ॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

अविश्लिष्टइति। संश्लिष्टः संदिग्धयावत्। ह्रस्वइचेति। तद्वत्कालसंकोचेनोच्चारितइत्यर्थः निष्ठुरइति। त्वरितइत्यन्ये।
गोत्राणीति। स्वरदोषजातयइत्यर्थः भाष्येगर्गादिविदादिपाठादिति। संवृतादिदोषरहितानामेवतत्रपाठादितिभावः
साधुत्वमिति। निवृत्तकलादिदोषवत्वमित्यर्थः गार्ग्यइत्यादीनामिति॥ तत्रत्यानांकलादिदोषनिवृत्तिर्नस्यादित्यर्थः

एणीकृतोऽविशिष्टः किमयमोकारः। अथौकारइतियत्रसंदेहः अंबूकृतोयोव्यक्तोप्यंतर्मुखमिवश्रूय
ते। अर्द्धकोदीर्घोपिह्रस्वइव। ग्रस्तोतिजिह्वामूलेनिगृहीतः। अव्यक्तइत्यपरे। निष्ठुरः। प्रगीतःसाम
वदुच्चारितः। उपगीतः समीपवर्णांतरगोन्याऽनुरक्तः क्ष्विण्णः कंपमानइव रोमशोगंभीरः॥ अ
वलंबितोवर्णांतरसंभिन्नः। निर्हतोरूक्षः। संदष्टोवर्द्धितइवविकीर्णोवर्णांतरेप्रसक्तः एकोप्यनेकानि
भासीत्यपरे। स्वरदोषभावनाइतिस्वरदोषगोत्राणि। अनंताहिदोषाः अशक्तिप्रमादकृताः अस्त्यन्यदिति।
गर्गइत्यादिनेकसंनिवेशेनअगर्गादीनांसाधुत्वंयथास्यात्। गार्गइत्यादीनांदोषनिवृत्तिः कृतास्यात् नतुस
मुदायांतस्थानां। यद्यपिप्रत्ययविधयोगर्गादीनांपाठः तथापिप्रसंगात्समुदायसाधुत्वायापिनवति। नि
वृत्तकलादिकामितिअकारस्यसंवृतत्वान्निवृत्तसंवृतत्वादिकामितिनोक्तं। अकारस्यनिदर्शनार्थत्वात्स
र्ववर्णानांशास्त्रांतप्रत्यापत्तिरित्यर्थः।
तदाहततश्चेति। केचित्तुसमुदायानामेतत्प्रकृतिकपजंतसमुदायानांसाधुत्वंयथास्यादित्यर्थंपाठश्चरितार्थो
नकलादिदोषान्निवर्तयेदित्येवभाष्यार्थः पाठश्चैवविशिष्यतइत्यग्रिमभाष्यस्वरसादित्याहुः निदर्शनार्थत्वा ३४
दिति। तत्रावर्णस्यअअइतिकृतैवतद्वत्तदनंतरमन्येषामपिकरिष्यामीतिभावः एतेनावर्णस्यप्रतिपत्तेःकृतत्वाद्वक्ष्यामीत्य
नुपपन्नमितिपरास्तं। ॥

भाष्येसातर्हिवक्तव्येति। तथाचप्रत्यायत्याश्रयणेगौरवमितिभावः। लिंगार्थात्विति। अनुबंधस्यानीयततःप्रातादि
गतकलादिलिंगनिवृत्यर्थेत्यर्थः। नाकृतिनिर्देशप्रयुक्तदोषपरिहारमात्रप्रयोजनाप्रत्यापत्तिः किंतुसर्वानुबंधेसंज्ञा
पगस्त्राद्यकरणफलिकापीतिनगौरवमितिभावः। तदेवाविवृणोति। ततइत्यादिना। धातवादिगतकलादिलिंगनिवृत्त्यर्थः
अथवैतहरत्यस्यतथापीत्यर्थः अनेकमनुबंधशतमिति। एकैकस्यानुबंधस्यशतधाउच्चारणंतादृशाश्चानेकेउ
च्चारणीयाइत्यर्थः यथेति। एधश्यादयोनुदात्तङितःकलदोषयुक्ताःपाठ्याः स्वरितञितश्चध्माताःतत्रकलादात्म

यदनुबंधैरिति। यथास्वरितत्वमधिकारार्थंएवमात्मनेपदार्थंकिजादिकंप्रतिज्ञायकलादात्मनेपदमि
त्यादिकरिष्यते। नन्वनुदात्तङितइत्यादि। ननुचानुबंधान्नावेकथमणरिकासंज्ञाउपपद्यतेआदिरं
त्येनेत्यत्रआदिः कलेनसहेत्युक्तोअउइत्यादिकाःसंज्ञाःकरिष्यंते। स्वरसंधिश्चासंदेहायनकरिष्य
तइत्यदोषः। उपसयमिति। यथास्तृतागर्गादिस्थाअकारादयस्तथान्यत्रताएवसर्वत्रप्रयोक्तव्याइतिप्रति
पाद्यतइत्यर्थः॥ ॥
नेपदंध्मातात्कर्तृगामिनिक्रियाफलेइतिसूत्रेकार्यं॥ एवंटकितौकलध्मातौपठित्वा ध्यंतौकलध्मातावितिपाठ्यं।
एवंद्वितोर्धकदोषयुक्तान्पठित्वाअर्धकाक्रिरितिद्वितश्चग्रस्तान्पठित्वा ग्रस्तादयुञ्जइत्यादिबोध्यं। एतेचकला
दयःप्रक्रियादशायामेव। प्रयोगेतुशुद्धाएवशास्त्रांतेप्रत्यापत्तिकरणात् आदिःकलेनसहेतिपाठः। भाष्येऽपा
णिनीयमिति। वर्णसमाम्नायसमर्थनायप्रवृत्तस्यएकदोषपरिहारायसकलशास्त्रस्यव्याख्यानसापेक्षगुरु
प्रकारेणान्यथाकरणेदृष्टिकलापियेत्यादिन्यायआपततीतिभावः नन्वपठितेषुदोषनिवृत्तिर्नकृतास्यादतआह य
थान्यताइति। गर्गाद्यधिकारादिषुएकरूपेणपठितेषुतज्जातीयाएवतेसर्वत्रसाधवइत्यनुमातुंशक्यतइतिभावः॥ ॥

भाष्येपाठश्चैवेति। विशेष्यतेतत्तत्प्रत्ययवैशिष्ट्येन बोध्यतेइत्यर्थः। द्विष्ठानीत्यस्यद्वयोरर्थयोस्तिष्ठंतीत्यर्थः। इत्या
हशब्दस्यापीति। तत्रकः कीदृशोधावतीतिप्रश्नेश्वेतइतिउत्तरं श्वाइत्तइतिछेदेनकइत्यस्योत्तरंश्वेतइतिछेदेनकी
दृशइत्यस्योत्तरमिदं एवंकेषांजनपदानांगंताकोवासमर्थइतिप्रश्नेउत्तरं अलमित्यादि॥ अलंबुसादेशाविशेषाः बु
सानांपलालवर्णनां यातांप्राप्तिमान् तंसमर्थइतिवार्थः पातेतिकचित्पाठः पारं क्षिणोइत्यस्यरूपंकेवलानामि
ति। एवंचकस्मादिदोषाणांनकुत्रापिप्रसक्तिरितिभावः भाष्येयानित्यर्थग्रहणानीतिकार्यविधावक्तानुवाद

द्विगतादृति। ध्वानर्थौगताः प्रयोजनद्वयस्यसंपादकाइत्यर्थः तथावाक्यान्यपीति। शब्दस्याप्यर्थवत्
द्विगतत्वमित्यर्थः। अथवेतिकेवलानांवर्णानांलोकेप्रयोगाभावा त्वादीनांचकृत्तानांपाठात्तत्कत्वा
च्चवर्णानांनकश्चिद्विशेषः यानितर्हीति। उत्त्कादीनि। एतेषामपीति। शिष्टप्रयुक्तत्वेनोणादीनांपृषोदरा
दीनांचसाधुत्वाभ्यनुज्ञानात्सर्वेषामत्रसंग्रहः सिद्धः॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृतेभाष्यप्रदीपे
प्रथमस्यप्रथमेपादेप्रथममाह्निकं॥ ॥छ॥

नीत्यर्थः। उपदेशादृतिङ्या प्रातिपदिकादित्यादावनुवादरूपेणग्रहणमित्यर्थः एतेनोद्देशश्चप्रातिपदिकानांनोप
देशाइत्यादेवइतिसूत्रस्थभाष्यविरोधइत्यपास्तं॥ नन्वेवमतिप्रसंगः स्यादत आह॥ शिष्टेति एवंसंरत्तादीनांप्र ३५
तिषेधइत्यस्मिन्प्रत्याख्यातेइष्टबुध्यर्थः इत्यपिप्रत्याख्यातप्रायमेवेत्यलं। नन्वेवमतिप्रसंगः स्यादत आह
शिष्टेति॥ ॥इतिशिवभट्टसुतसतीगर्भजनागोजीभट्टेनकृतेभाष्यप्रदीपोद्योतेप्रथमस्यप्रथमेपादेप्रथममाह्निकं॥

ननुचतुर्दशसूत्र्याप्रयोजनमुक्तमेवतत्किंपुनस्तत्र्यहणेनेत्याशंक्याह सर्वेति। विशेषेण। तत्तद्रूपेण। प्रत्येकं
वर्णेभ्योविभक्तिमाशंक्याह। स्वरूपेणेति। जन्यज्ञानविषयोहिशब्दस्यार्थः एवंचस्वरूपमपिस्वजन्यबोधवि
षयत्वेनार्थः। अनुकार्यमर्थइतितुस्पष्टमेवएवंविद्यमानस्याप्यर्थवत्वस्याविवक्षितत्वादर्थवत्सूत्रेऽग्रहणादि
त्यर्थः स्वरूपस्यश्रोत्रगृहीतस्यैवशाब्दभानोपपत्तेर्नतत्रशक्तिः कल्प्या अनुकार्यंचसादृश्येनोपस्थापयतीति
नतत्रापिवृत्तिः वृत्त्याघबोधकत्वंचार्थवत्वमर्थवत्सूत्रेनिविष्टमितिभावः अनुकरणत्वप्रसंगान्नविभक्तिरि

अइउण्। सर्ववर्णनविशेषेणात्रविचारः क्रियते। अकारस्येति। अत्राकारादीनांस्वरूपेणानुकार्येण
वाऽसतोप्यर्थवत्वस्याविवक्षितत्वाद्विभक्त्यनुत्पत्तिः। स्वरसंधिस्तुनप्रवर्त्तते। वर्णोपदेशकालेजादि
संज्ञानामनिष्पादात्। अत्राकारस्यसंवृतत्वाद्दीर्घप्लुतयोर्विवृतत्वात्प्रयत्नभेदात्सवर्णसंज्ञा
याअप्रसंगात्प्रदेशेष्वकारेणदीर्घप्लुतयोर्ग्रहणंनप्राप्नोतीतिविवृतत्वमस्योपदिश्यते॥ ॥

तितत्वं। सौत्रत्वाद्वा। कारप्रत्ययोवाकुलकान्त। स्वरसंधिस्त्विति। सौत्रत्वात्संहितायाअविवक्षणाद्वेतिभा
वः अजादिसंज्ञानामनिष्पादादितितुचिंत्य। वर्णोपदेशइत्संज्ञायामचूप्रत्याहारेचनिष्पन्नेप्रवर्त्तमानानांय
णादीनांसुध्युपास्यइत्यादौतटस्थदुर्वादृश्यतावछेदकाक्रांतेवर्णोपदेशेप्यवप्रवर्तेदुर्वारत्वात्। अन्यथा इ
त्यास्यप्रत्नमित्यादौसवर्णदीर्घादिनस्यात्। अत्रसूत्रे। वाक्यापरिसमाप्तिन्यायेनेदग्रहणकशास्त्राप्रवृत्तेः भा
वर्ण्यपिनात्रतत्यहणमितिव्यर्थाविवृतोपदेशोतआहप्रदेशेष्विति। अकः सवर्णेइत्यादौतत्राप्यकारः संवृतएवेतिभावः।

ननुविवृतपदस्यगुणिपरत्वेसविशेषणत्वात्समासोनस्यादतआहविवृतस्यगुणस्येति॥भाष्येकर्त्तव्य
इत्यस्यप्रतिक्षेपइत्यर्थः।एतेनतस्योच्चारयितुमशक्यत्वमित्यपास्तं।भाष्येकिंप्रयोजनमित्यत्रउद्दिश्यतेत्य
ध्याहारःकर्त्तव्यइत्यनुषंगश्चनन्वाकारग्रहणंसवर्णग्रहणमेवेतिभेदाभावात्कथंतस्यकरणत्वमत

विवृतत्वस्यगुणस्योपदेशोविवृतोपदेशः।तत्रगुणस्यनित्यसापेक्षत्वादकारापेक्षत्वेपिसमासः।
यथादेवदत्तस्यगुरुकुलमितिआकारग्रहणार्थइति।समानाधिकरण्येननिर्देशादाकारग्रह
णंविवृतोपदेशस्यप्रयोजनमितिसामर्थ्यादवगमाद्बोधानुरूपमुत्तरंनभवतीतिनचोदनीयं।
सर्वस्यग्रहणेनेति।येनशास्त्रेणअणुदित्सवर्णस्येत्यनेनसवर्णाःगृह्यंतेतेनकारणेनेत्यर्थः।
किंचकारणमिति।आकृतिपक्षाश्रयेणग्रहणकशास्त्रस्यप्रत्याख्यानादाकारस्याप्यत्वजातिस
द्भावात्सिद्धंग्रहणमितिभावः।अत्रचनिमित्तकारणहेतुषुसर्वासांप्रायदर्शनमितिप्रथमा
कृतातेनकस्मात्कारणादित्यर्थःसंपद्यते॥

आहयेनशास्त्रेणेति।नन्वाकृतिभेदात्कथंतत्पक्षेप्यकारेणाकारग्रहणमतआह आकारस्यापीतिके
वलेकंठयत्वेस्यसतिस्वरत्वमत्वजातिव्यंजकमितिदीर्घप्लुतयोरपिसेतिभावःप्रातिपदिकार्थमात्रे ३६
प्रथमायांयथाश्रुतेन्वयोनज्ञायतेतआह अत्रचेति॥ ॥ॐश्रीकाशीविश्वेश्वरायनमः॥ ॥

उत्तरेपितर्हिप्रथमाकुतोनेत्यतआह।प्रयोगाभावादिति।निमित्तादिशब्दप्रयोगाभावेपितदर्थेगम्यमानेस्यादेव
विभक्तिरतआह।प्रायग्रहणादिति।विनाभागुणेइति।निमित्तेत्यादिवार्त्तिकेसर्वासामित्येतन्नपंचमीतृतीययावि
धायकंकिंतुहेतावितिविनाभागुणेतिसिद्धयोस्तयोरन्याभिरबाधायानुवादकमेवेतिभावःविवारयतीति।स्थान्य
तरप्रयत्नःदोषापत्तिरिति।दंडाढकमित्यादौदीर्घनापत्तिर्दोषइत्यर्थःननुप्रयत्नभेदेपिजातिसद्भावात्स्या

विवारभेदादित्यत्रतुकारणशब्दप्रयोगाभावात्प्रायग्रहणादसर्वनाम्नोवाप्रथमाद्वितीययोरभावाद्वि
भाषागुणेऽस्त्रियामितिपंचमीविहिता।विवारयतिविकासयत्यास्यमितिविवारःप्रयत्नः।व्यक्तिपक्षे
ग्रहणकशास्त्रारंभाद्दोषापत्तिः।व्यक्तिपक्षेभेदान्तरसद्भावादाह।किमुच्यतइति।बाह्यश्चेति।प्रयत्ना
स्तिनिर्वृत्तत्वात्कालस्य।यथाव्रीहेःप्रस्थादिव्यवहारःपरिमाणद्रव्यकृतः॥एवंमात्रादिव्यपदेशो
प्रयत्नत्वमभ्युपगम्यबाह्यत्वेनपरिहारः॥प्रसिद्धपरिमाणंवस्त्वंतर।गतपरिच्छेदकक्रियांतरा
पक्षपात॥कालव्यवहारस्यचाद्यत्वंकालस्य निमेषादिक्रियाकृतः॥ ॥छ॥ ॥

देवग्रहणमतउक्तं।व्यक्तिपक्षेइति।ननुकालस्यव्यापकत्वातबाह्यत्वेनसमाधानयुक्तंकिंचकालोनप्रयत्न
इतितद्भेदेकथंसवर्णत्वाप्राप्तिरतआहप्रयत्नानीतिबाह्यत्वंव्युत्पादयति।प्रसिद्धेति।प्रसिद्धपरिमाणंयद्वस्त्वं
तरगतंपरिच्छेदकक्रियांतरंपरिच्छेद्यक्रियापेक्षयान्यत्तदपेक्षणादित्यर्थःएवंचबाह्यपरिच्छेदकक्रि
यापेक्षयाबाह्यत्वोक्तिरितिभावःक्रियैवकालोनातिरिक्तइतिमतेइदं॥ ॥छ॥ ॥ ॥

अतिरिक्तः क्षणसमूहः कालइतिमतेपरिहरति। अथवेति। अयंभावः नाभिप्रदेशावछिन्नयत्नेनप्रेरितो
वायुस्तत्तत्स्थानाभिघातात्तत्तद्वर्णाभिव्यंजकइतिशिक्षादौस्पष्टं। वायोरल्पत्वाधिक्यानिच ह्रस्वत्वदीर्घत्वादि
रूपकालव्यंजकानीतिननुह्रस्वदीर्घयोः कालभेदादतोभिः सइत्यादौदीर्घाग्रहणवत् विलंबितरत्योच्चारित

अथवानाभिप्रदेशएवविशिष्टयत्नारंभाद्दीर्घादिनिष्पत्यानाभेश्चास्यक्षाह्यत्वात्कालस्यबाह्यत्वं।
विवृतत्वादीनांचास्यवन्त्रिप्रयत्ननिष्पाद्यत्वादाभ्यंतरत्वं। प्लुतादिवृत्तयस्तुयथानभेदिकास्तथा
तपरसूत्रेवक्ष्यति॥ किंपुनरिति। किंसूत्रकारेणैवविवृतोपदेशः कृतोवार्त्तिककारेणतुत
स्यप्रयोजनमुक्तं। अथाकृतएवविवृतोपदेशो। वार्त्तिककृताचोद्यत्वेनोपन्यस्तइतिप्रश्नः॥

स्यह्रस्वाकारस्यापिप्लुतमध्यापेक्षयाकालाधिक्यात् ऐस्मात्रविधायकेग्रहणानापत्तिरतआह प्लुतादी
ति। उपदिश्यमानस्येत्यत्रवार्त्तिककृतः कर्तृत्वेपक्षयोर्नेदोनस्यादतआह किंसूत्रकारेणेति। सूत्रका ३७
रोमहेश्वरः वेदपुरुषोवा। येनाक्षरसमाम्नायमित्याद्येतिस्यात् इत्याहुः॥ ॥ॐनमःशिवाय॥ ॥

ननुप्रत्यक्षतअकारेभ्रूतेतगुणस्यापिज्ञाततत्वात्प्रश्नोयमसंगतोतआह। दुरवधारत्वादिति। विवृ
तत्वादीनांश्रोत्रेंद्रियग्राह्यत्वाभावादितिभावः। अन्यथा। संवृतत्वे। स्वरूपप्रत्यये हिपुनः संवृतविधानंयु
क्तं स्यादितिभावः। प्रयोगएवेति। अतिखद्व इत्यादिप्रयोगेह्रस्वेनांतरतम्याद्विवृतोकारः प्राप्तः संवृतए
वन्नवत्वित्यर्थप्रत्यापत्तिवचंइतिभावः। नान्वितिअवश्चेत्युक्ते रचएव ह्रस्वत्वेनभाव्यमितिभावः गोस्त्रि

दुरवधारत्वादुपदिष्टोपिविवृतोव्याख्यानेनविनानशक्यतेज्ञातुमितिप्रत्यक्षेप्यकारेप्रश्नोयेनास
मंजसः। तत्रप्रत्यापत्यापूर्वः पक्षआश्रितः अन्यथाशास्त्रांतेप्रत्यापत्तिवचनमनर्थकंस्यात्।
स्वरूपप्रत्ययवाभावात्। अस्तिह्यन्यत् इति। प्रयोगएवप्राप्तेविवृतत्वेसंवृतप्रत्यापत्तिः स्यादित्यं
ज्ञापकमेतदित्यर्थः। नत्विहासतिविवृतोपदेशेसावर्ण्याभावादकारेणाकारस्याग्रहणाद्ग्रहणा
भावात्कथमतिखद्वइतिह्रस्वः नेषदोषः। उदीचामातः स्यानइतिज्ञापकाद्भवतिआकारस्यह्र
स्वः नेवलोकइति। प्रयुक्तानामनुशासनात्प्रयोगेचविवृतस्याकारस्याभावात्संवृतएवभविष्यती
तिप्रत्यापत्तिर्ज्ञापिकैव॥
योरित्यत्रैतद्धारणार्थमेवोपस्थितिः स्यादितितात्पर्यं॥ उदीचामानइति। नचायोन्यतरस्यामितिह्रस्वेचरि
तार्थमिदंनचात्रान्यपरिभाषोप्रतिष्ठते॥ फलाभावादितिवाच्यं। शास्त्रस्याल्पविषयतापत्तेः गोशब्दसाह
चर्येणस्त्र्यंशेप्यचश्चेत्यस्याप्रवृत्तेश्च। तदंशेहिफलाभावान्नप्रवर्त्ततइतिदिक्॥ ॥छ॥ ॥

कै॰वि॰
३८

नन्वाद्यपक्षेप्रयोजनान्वाख्यानमात्रपरत्वंद्वितीयेविवृतोपदेशपरत्वमपीतिविशेषस्पष्टत्वादतआह॥
विवृतोपदेशइत्यत्रेति।आहोपुरुषिकेत्यत्रेवुजःश्राकमयूरव्यंसकादित्वात्समासःअहोइतिअहमि
त्यर्थेतित्रप्रयोजनान्वाख्यानमित्येवन्यायःप्रत्यापत्तेःअकेर्तकेआपादनात्तावाञ्चेत्याहुःप्रत्यापत्याअइ
उणित्यत्रेवप्रक्रियादशायांसर्वत्राकारोविवृतःप्रतिज्ञातइत्यजाननशाकते।नाष्येतस्यविवृतोपदेशादिति

कःपुनरिति।विवृतोपदेशइत्यत्रकृतइतिवाकर्त्तव्यइतिवावाक्यशेषाध्याहारेनकश्चिद्विशेष
इत्यर्थः।आहोपुरुषिकेति।अहोअहंपुरुषइत्यहंकारवानहोपुरुषस्तस्यभावइतिमनोज्ञादि
त्वाद्वुञ्अहंकारवत्तमित्यर्थः।तस्येति।यदाप्रत्याहारेविवृतोकारउपदिष्टस्तदाप्रयत्नभेदात्तेनसंवृ
तस्याकारस्यग्रहणभावादकार्यनस्यादितितत्सिद्धयेसर्वस्याकारस्यविवृतत्वंकर्त्तव्यमित्यर्थः।
तेनशाम्यतीत्यादौदीर्घादिसिध्यति।ननुचसर्वेषामकाराणांयत्सामान्यंतदनुकरणमत्राकारः।
तस्यचविवृतत्वेप्रतिज्ञायमानेसर्वेषांतत्प्रतिज्ञातंभवतीतिकिमुच्यतेतस्यविवृतोपदेशादिति।
एवंतर्हियदाकस्यचिदेवाकारस्येदमनुकरणंस्वरूपपदार्थकोवाकारःतदेदमुच्यतइत्यर्थदोषः॥

तस्येत्यस्यवर्णसमाम्नायस्थस्येत्यर्थःसंवृतस्येति।धात्वादिस्थस्येत्यर्थःननुअइउणित्यादौकस्यानुकरणमित्यत्र ३८
विनिगमकाभावादाहस्वरूपपदेति।स्वरूपपदार्थकत्वंयथातथोक्तं।नाप्येविवारभेदादिति॥प्रयत्नभेदा
दित्यर्थःग्राहकस्यविवृतत्वात्ग्राह्यस्यसंवृतत्वादितिभावः।प्रत्याहारइति।संग्राहकेणस्त्रेइत्यर्थः॥ ॥

वक्तव्यमिति।एवंचप्रयत्नभेदेनासवर्णस्यापिअत्वजात्याक्रांतस्यविवृतेनाकारेणग्रहणंज्ञाप्यतइत्य
र्थःयद्यप्येकोपीति।प्रत्युच्चारणंवर्णान्यत्वात्आक्षरसमाम्नायिकस्यप्रयोगेभावादितिभावःआदित्येनेत्य
स्यचात्यसदृशेनसहोच्चार्यमाणआदिसदृशइत्याद्यर्थःतत्रककारादिचिह्नेनागादिशब्दस्यस्तत्सदृशत्वाद्वि
वृतएव।सादृश्यंचव्यक्तिभेदेसतिसर्वधर्मसाम्यंप्रयुक्तंग्राह्यंतस्यचप्रयोगस्येभावेप्यनेनततग्रहणंज्ञाप्य

दयमिति।अत्रहिककारेणचिह्नेनप्रत्याहारस्थोविवृतोनिर्दिष्टः।तेनसंवृतस्याग्रहणेकःसवर्णइ
तिवक्तव्यं।नहिद्वयोरिति।यद्यप्येकोपिविवृतोनास्तितथापिबुद्ध्यधिष्ठानत्वादादेशस्यद्वयोरित्युक्तं।नेत
दिति।अकइत्यकारेणविवृतेनदीर्घस्यविवृतस्यग्रहणादज्ञापकमेतदित्यर्थः॥कएषयत्नइति।धात्वा
दयःपठिताः।तत्राकारोविवृतःपठ्यतांनहिकिंचिद्गौरवंभवतितत्किमुच्यतेन्यत्रापिविवृतोपदेशः
कर्त्तव्यइतिप्रश्नः।यानीति।प्रातिपदपाठस्याशक्यत्वात्तस्यविवृतोपदेशादित्यनेनसर्वस्याकारस्य
विवृतोपदेशःकार्यतयाबोध्यतइत्यर्थः॥
नइतितात्पर्यं।केचित्तुदेवदत्तअजस्तीत्यादौप्रत्याहारलिंगेनैकआक्षरसमाम्नायिकोस्तिनदर्थंचाप्येकयोरित्युक्तमित्या
हुःनाप्ययुगपत्समवस्थानमित्यस्यप्रयोगइत्यादिः।एवमर्थइतिवृत्तावेवंशब्दःप्रकारवतिवर्त्ततइतिबहुव्रीहिः
प्रातिपदिकानीति।धातुप्रत्यययोरप्युपलक्षणंबोध्यं।सर्वासांग्रहणानिप्रातिपदिकादीनिविवृताकारयुक्तो
निपठनीयानीत्यर्थः।तद्गुरुभवतितस्मादिति।यतःसर्वोच्चारणंगुरुअतोधात्वादिस्थइतिवाच्यमित्यर्थः॥ ॥

DEBHAU DAJI MEMORIAL

कै॰वि॰
३८ ननुधातूनां बहुधापाठात् धात्वादीतिअयुक्तमतआह अग्रहणेति। प्रातिपदिकेत्युपलक्षणं। धात्वादिस्थ
स्यापीतिपठितधात्वादिस्थस्यापीत्यर्थः एतेनाग्रहणधात्वादीत्येववक्तुमुचितमित्यपास्तं। संवृतस्यैवेति।
एवंचधात्वादिस्थस्यविवृतवत्कार्यंत्वनतद्इत्यतिदेशोयमितिभावः अन्यथेतिगुणोच्चारणदोषाद्वार
णेयत्नाधिक्यमितिभावः ननुसंवृतयोस्तयोरभावेपिसंवृतस्यविवृतौनस्यातामेवतआंतरतम्याभावात्

धात्वादिस्थइति। अग्रहणप्रातिपदिकार्थविवृतत्वेऽवश्यचोदनीयेधात्वादिस्थस्यापिसंवृतस्यै
वपठितस्यकार्यार्थंविवृतत्वंप्रतिज्ञेयं। अन्यथादोषरूपविवृतोच्चारणेप्रयत्नस्यगौरवंस्यात्। विवृ
तत्वप्रतिज्ञानेप्रयोजनांतरमाह। दीर्घेति। असतिविवृतत्वप्रतिज्ञानेसंवृतस्याकारस्यस्थानेसाव
र्ण्यात्संवृतयोरेवदीर्घप्लुतयोः प्रसंगइत्यर्थः। नैवलोकइति। असत्यपिसावर्ण्येलिंगादकारस्यसंवृतौ
दीर्घप्लुतौभविष्यतः। पदयमतोदीर्घोयञिअतोरोरप्लुतइत्यादेतिभावः॥ ॥छ॥ ॥

नचेकोयणिवएचइगिवानंतरतमावपिभविष्यतः सामर्थ्येनतत्रतथांगीकारेपिखट्वाढकमित्यादौचरितार्थस्या
कःसवर्णेइत्यादेर्विषयेतथाकल्पनेमानाभावादतआह। असत्यपीतिसावर्ण्यइतिआंतरतम्येइत्यर्थः एवंवा ३९
तोदीर्घइतिअतोरोरप्लुतादित्यतोविशेषणंचसामान्यापेक्षंज्ञापकमितिभावः संवृतदीर्घादिवस्तु
नास्तिकथंलानामपिवेदलोकयोरसत्त्वंमन्यमानआह भाष्येस्थानीप्रकल्पयेदित्यादि। ॥छ॥ ॥

तद्वत्विवृतौदीर्घप्लुतावपिकुतोनसंतावृतावित्यतआह। अशक्यत्वादिति। केचित्तुशिष्टसंमतत्वान्नेत्तःइमौ
तुनतथेतिभावइत्याहुः संतिहिपणइतिभाष्येपणइतिबाहुल्याभिप्रायेणरेफस्यानुनासिकत्वाभावादितिबोध्यं।
नन्वीकारोकारयोःकथंसंवृतत्वमतआह ध्रुतःसंवृताइति ईऊऋतइत्यर्थः क्वचित्तुध्रुतइतिपाठः शाका
रोकारोकाराइत्यर्थः एवंचाद्यप्रयोजनार्थमेवसर्वत्राकारस्यविवृतत्वंप्रतिज्ञेयमितिस्थितेशंकतेभाष्ये। तत्रा

सतस्तत्रेति। आशक्यत्वाद्दीर्घप्लुतयोःसंवृतयोरुच्चारणस्येत्यर्थः। एवमपीति। असतिविवृतत्वप्रतिज्ञा
नेसंवृतस्याकारस्यसंवृतावेवईकारोकारौप्राप्नुतः। ध्रुतःसंवृताअन्यत्रानेवसाम्नइतिकेचिदिकारो
कारयोःसंवृतत्वस्याभ्युपगमात्। तत्रानुवृत्तिनिर्देशइति अकःसवर्णेदीर्घइत्यादौअयमेवाकारो
ऽनुकृतइतिककारादिनाविच्छिन्नज्ञायतेततश्चाणत्वात्तस्यग्राहकत्वमास्तुअस्यच्चावित्यादौत्वका
रस्याणत्वात् ग्राहकत्वंनप्राप्नोतीत्यर्थः॥ वृत्तिःशास्त्रस्यलक्ष्येप्रवृत्तिःतदनुगतोनिर्देशोऽनुवृत्तिनिर्देशः।

नुवृत्तीति। एतद्विशेषणोपादानस्यफलमाह। अकःसवर्णइति। अनणत्वादिति। अक्षरसमाम्नायेपठितत्वा
त् आकारस्येवानणत्वमित्यर्थः प्रत्युच्चारणंवर्णभेदेपिअकइत्यादौककारेणविच्छिन्नेतदनुकरणत्वा
नुमानमितिभावः तदनुगतइति। साध्यालक्ष्यसंस्कारकबोधजनकइत्यर्थः। ॥छ॥ ॥

ननूदात्तादिविरुद्धधर्माध्यासाद्भेदः स्यादत आह उदात्तादीति। प्रतिबिंबप्रतिभासभेदवदिति भिन्नभिन्नाकारप्रतिबिंबप्रतिभासवदित्यर्थः इकारादीनामपीति। सर्वध्वनिभिरेकस्य स्फोटस्यैव तत्तद्रूपेणाभिव्यंजनात् तत्तद्रूपाभिव्यक्तिकृतश्च परस्परं भेदव्यवहारोपीति भावः भाष्ये नुबंधसंकर इत्यस्यानुबंधकार्यसंकर इत्यर्थः ङीबादीति। टिह्वित्यादिना। आदिना णित्वप्रयुक्तयुक्पर्यायेण कित्वणित्वप्रयुक्तकार्ययोरप्यविरो

एकत्वादकारस्येति। एकैवाकारव्यक्तिः। उदात्तादिभेदप्रतिभासस्तु व्यंजकध्वनिकृतः। खड्गतैलादिभेदे प्रतिबिंबप्रतिभासभेदवत्। अकारस्यानिदर्शनार्थत्वादिकारादीनामप्येकत्वं बोध्यं। अनुबंधसंकर इति। एकत्वेकाणटकादीनां भेदाभावाज्ञोदादौ ङीबादिः प्राप्नोति। किरिणोति। नगोप्यन्सावर्णेति प्रतिषेधादकारो नाशाहतः। घटेनेति। एक एवाकारो द्विरुच्चार्यत इति च चाभावः। टस्तु वाद्धकादिषु कृतार्थः। द्रव्यवदिति। उपचारो व्यवहारः यथैकेन घटेनोदकाहरणादिक्रिया युगपदनेको न करोति तथैवैकमकारं युगपदनेको नोच्चारयेदित्यर्थः। विषयेणेति। वार्त्तिककारेण करणत्वेन सामान्यरूपतया चाभेदेन विषयो निर्दिष्टः। भाष्यकारस्त्वधिकरणत्वं व्यक्तिभेदाद्वैविध्यं च प्रतिपादयति। विषये विषय इति।

धइति भावः भाष्ये नुपपत्तिरिति। इष्टव्यवस्थाया इति भावः अव्याप्त्यतिव्याप्त्योः प्रसंगादिति तात्पर्यं। प्रतिषेधादिति। सावकाच इति प्राप्तस्येत्यर्थः वं स्त्विति। नोध्यचंद्य निति विहितः करणत्वेनेति। अधिकरणस्य करणत्वविवक्षयेत्यर्थः। सामान्यरूपतयेति। विषयत्वरूपेणेत्यर्थः। भाष्यकारस्त्विति। एकविषये नानालिंगकरणादर्शनाद्विषयभेदेन तदित्यत्र तात्पर्यं। ।छ। । ४०

गुणानुदात्तादय इति। भ्रमं व्यावर्त्तयति। गुणा अनुबंधा इति। तेषां गुणत्वमुपपादयति। कार्यायेति। व्याप्रियत इति। विषयत्वेन गृह्णातीत्यर्थः एककर्तृकत्वादिति। ५ स्यादित्यनेनेत्संज्ञारूपैककर्तृकत्वादित्यर्थः। नानेति। स्थितेकपमन्यथा व्याख्यानमत आह नानाशब्दमिति। नियमादिति। ज्ञापकत्वेहि

सर्वगुणमिति। गुणा अनुबंधाः। कार्याश्रितत्वादुपकारकत्वात्तत्र कर्मणि क्त। एटिति ब्रूयादित्यर्थः। शल्यकवदिति। शल्यकः प्राणिविशेषः स यथा कंटकतुल्यैः पक्षैर्व्याप्यते। नैवं सर्वानुबंधयुक्तोकारः शक्यो निर्देष्टुं। आद्यंतयोरेवेत्संज्ञाविधानान्मध्यपातिनां श्रवणप्रसंगादित्संज्ञैवायच्छते व्याप्रियत इत्येककर्तृकत्वादायम्येत्युक्तं। एवं तर्हीति। विषयेणेत्यतदन्यथा व्याचष्टे। नानाशब्दमनीयपुनः शब्दे घटित्वा यद्यनुबंधसंकरः स्यात् अकारमेव शिवादिभ्यो विदध्यात् अथोच्येत णित्कृतमेव यथा स्यात् ञित्कृतं मा भूदिति नियमार्थमेतत्स्यात्। तन्न। नियमाद्विधेर्बलीयस्त्वात्। अथ वेति। न ब्रूमः सर्वगुणानुच्चारयेदिति। किं तर्हि यथा लोके इह मुंडो भवेह जटिलो भवेह नग्नो भवेति यद्गुणको यत्रोच्यते तत्र तद्गुणक एव तत्र भवति। एवमिहापि यान्यः प्रकृतिभ्योपदनुबंधविशिष्टा विधीयते तासु तदनुबंधनिमित्तमेव कार्यं संपादयति॥

विध्यर्थत्वमिति भावः अत्र वाक्यत्रयेपि तु शब्दः पूर्वपक्षव्यावृत्तौ। यथा लोक इति। भ्रन्त्वाज्ञत्यागूढचारादिरिति शेषः एवं च लोकव्यवहारदृष्टांतेनैवासंकरः सिद्ध इत्यर्थः यत्र दशोका भवेत् तत्र गुण एवेति। भाष्ये पितद्विंग स्त्रेतिसावधारणं व्याख्येयमिति भावः। ।

यथाविकृतियागे इति। तत्र हि प्राप्त सामिधेन्यनुवादेन सप्तदशत्वं विहितं ततश्च त्रिः प्रथमामित्यादि वाक्यबोधितया प्रथमोत्तमयोस्त्रिरावृत्त्यैवेति भावः त्रिरावृत्त्येति। आवृत्तिः पुनरुच्चारणं। तज्जन्यसंख्यया सप्तदशत्व वदत्रानेकाचृत्वमिति भावः भाष्ये आवृत्ते संख्यानात् गणनादित्यर्थः भवेदावृत्ते

आवृत्तिसंख्यानादिति। यथाविकृतियोगे त्रयोदशसामिधेन्यः प्रथमोत्तमयोस्त्रिरावृत्त्या सप्तदशसंपद्यंते यथा घटेन तरतीति च्छ ज्लक्षणः — भवति। ननु मुख्ये विषये कृतार्थत्वाद्वचनस्य गौणं च त्वं कथं कार्यनिमित्तं। उच्यते। गोश्च इत्यत्राश्वशब्द प्रतिषेधाल्लिंगादावृत्तिभेदेनापि भेदाश्रयकार्यप्रवृत्तिः भवेदिति। गिरिणेत्यादावावृत्तिभेदेपि मुख्यमेकात्वं न निवर्त्तत इति भावः। एतदपीति। लोके पूर्वसंख्या संख्यांतरेण मुख्येनामुख्येन च बाध्यत इत्यर्थः। ऋषिसहस्रमिति। वित्तेन क्रीत्वा प्रत्येकं दत्वा सहस्रदक्षिणा ऋषयः संपन्ना इत्यर्थः॥

तः कार्यपरिहृतमिति। आवृत्त्या कार्यसिद्धमिति कृत्वा दूषणं परिहृतं भवेदित्यन्वयः लिंगादिति अनेन लिंगेन प्रकृतिस्मृतिसिद्धत्वादस्य व्यवहारस्य गौणत्वमेव नेति ज्ञाप्यत इति भावः। मुख्यमिति। आवृत्तिकृत गौण च त्वेन स्वगतैकात्वस्य बाधायोग इति भावः ननु स्वस्य प्रतिग्रहीतत्वाभावादेकन्यूनता। न च पुनर्दीनं दत्तस्यान्यस्वत्वाक्रांततया पुनर्दानासंभवात आह। वित्तेनेति। । ४१

ननु षष्ठीसमासे सहस्रसंख्याया विशेष्यत्वात् कथं दानेन संबंधः कथं वा संपन्ना इति बहुवचनांतेन सामानाधिकरण्यमत आह सहस्रं ऋषय इति। अत एव सर्वे इत्यनेन सामानाधिकरण्यं परनिपातो भाष्यप्रामाण्यात्। एकैकश इत्यत्र उभयोरपि द्योतकत्वेपि द्योतकसमुच्चयस्य च बहुशो दृष्टत्वेन द्विर्वचनशासो वैगिपद्यं यथा जातीयको गार्ग्यायणीत्यादौ तत्र च यथा ष्फस्तत्वे समुच्चित्य द्योतकता अन्यत्र च गार्गीति ङीषेव तथा प्रकृतेपि शसो वैकल्पिकत्वात् पक्षे एकैकमित्यपि। भ्यादिशब्द विषये तु न समुच्चित्य द्योतकता अनभिधानात्। एकशब्दे तु समुच्चित्य प्रत्येकं च द्योतकता अभिधानस्वभावात् यत्र तद्धिते नानुक्ता वीप्सा तत्र द्विर्वचनं भवत्येव यथैकैकशो देहीति भाष्यस्याप्ययमाशयः यत्र तद्धितमात्रेण

सहस्रमृषयः। ऋषिसहस्रमिति। कर्मधारये संपन्ना इत्यस्य साक्षाद्विभिः संबंधः षष्ठीसमासे तु सामर्थ्याद्व्यक्षयाः संबंधः संबंधः यथा ब्राह्मणशतं भोज्यतामिति भुजिर्ब्राह्मणैः॥

लोके वीप्सानभिधानं तत्र द्विर्वचनमपि माष श इत्यादौ तावतैव सर्वत्र वीप्साभिधानं तत्र न कदापि तयोः॥ समुच्चय इति दिक्। सामर्थ्यलक्षण इति। सामर्थ्यकृतो गुणत्वतैर्ऋषिभिः संबंध इत्यर्थः सर्वे त इत्यत्र तच्छब्देन गुणभूतस्यापि परामर्शोत्र पक्षे बोध्यः अत एव दत्वेति समानकर्तृकेक्त्वा सहस्रदक्षिणा गोरूपा येषां दातृणां त इत्यर्थः तेन गोसहस्रदानफला एव तेन त्वेकगोदानमात्रफला इति व्यवहारो यथा स्मृतौ तथा प्रकृतेपीति भावः भुजेर्ब्राह्मणैरिति। संख्यायां भोक्तृत्वानुपपत्तेर्गुणभूतब्राह्मणैरेव भुजेः संबंध इति भावः॥ ॥

भाष्येनैकात्वमिति। तन्मात्रमित्यर्थः एकस्यैवेति। व्यापकस्येत्यपि बोध्यं। अकारस्येत्यप्युपलक्षणमित्युक्तं। भाष्येनउच्चारणंनामेत्युत्तरमतइतिइतिशेषः। आन्यभाव्यमित्यस्यान्यत्वमित्यर्थो नेत्याह। अन्यस्येति। अथर्वेति। भावशब्दः कर्तृसाधनइतिभावः एवंचप्रतियोगमकारस्यान्यत्वमित्यर्थः यथेतिएवंचाग्रेइत्याद्यकारोदंडेत्यकाराद्भिन्नः दंडअग्रमित्यादौकालव्यवधानात् दंडइहेतिप्रयोगेइकारवत्। तथादंडइत्यत्राद्याकारोत्याकाराद्भिन्नः

संभविचेति। एकस्यैवाकारस्ययुगपत्स्थानकरणनिष्पन्नध्वनिव्यंग्यत्वात्सर्वैरित्यर्थः॥ एवंपरिहृतेष्वपि दोषेषुतत्रन्यायेनाकारस्यभेदंसाधयति। अन्यभाव्यमिति। अन्यस्यभावोऽन्यभावः ततोब्राह्मणादिषु। स्वार्थविधानात्ष्यञ् स्वार्थेष्यञ्। अथवाअन्योभावोन्यद्वस्तुतस्यभावइतिभावेष्यञ्। इहकालश ब्दाभ्यांव्यवधानंभिन्नानांदृष्टं। यथाअसंहितायांअइउइत्यादीनांकालव्यवायः दृतिरित्यादौशब्दव्य वायः तकारेणरेफकारेकारयोर्व्यवधानात् एकत्वेतुव्यवधानंनदृष्टं यथाअइतिकेवलाकालउच्चार्यतेत स्मादुदात्तादिभेदात्कालशब्दव्यवायाच्चनानात्वमकारस्यप्रत्यभिज्ञानंचात्वादिसामान्यनिबंधनं॥ ॥

शब्दव्यवायात् दृतिरित्यादौतकारव्यवहितेकारवत्। इत्यनुमानैर्भेदसिद्धेःउदात्तादिविरुद्धधर्मप्रत्ययोपिपारमा र्थिकएवेत्याशयेनतत्भेदादपिभेदसिद्धिरित्यभिप्रेत्याहउदात्तादीति। नानात्वमकारस्येति युक्तमितिशेषः ननुयएवो दात्तोकारः सएवदेवदत्तेनानुदात्तःकृतइति प्रत्यभिज्ञाविरोधोतआह प्रत्यभिज्ञानंचेति॥ ॥छ॥ ॥ ४२

विभुत्वंनिराचष्टे भाष्ये युगपच्चदेशेतिअर्कादिशब्दाएवदेशपदेनोच्यंते। देशान्तरेष्वपीति। देशानांदृष्टवद्भेदेषुसत्स्वित्यर्थः एवंवर्णानामनेकत्वेपरेणसाधितेवर्णैकत्ववादीएकत्वंस्थापयितुंतत्रदूषणोद्धारमाहेन्ना ष्ये यदिपुनरिति। तत्रशकुनिवदिति दृष्टांतस्यतद्व्यापरिच्छिन्नत्वेनतात्पर्यंतन्मतेतस्यविभुत्वादितिध्वनयन्ना ह। कालशब्दाभ्यामिति॥ व्यक्तिस्फोटवादिनइति। व्यक्तेर्नित्यत्वैकत्ववादिनएकैवशब्दव्यक्तिरितिवादिनइ

यद्यपिशब्दव्यवायोपिकालव्यवायोस्तितथापिकालव्यवायएवद्विधादर्शितः। शब्दश्चान्यःशब्दवां श्च॥ यदिपुनरिति। कालशब्दाभ्यांव्यंजकानामेवध्वनीनांव्यवायोनव्यंग्यस्येतिव्यक्तिस्फोटवादिनो भावः यथाशकुनिः पंक्तेरादौस्थितआशुसंचारात्तदंतेभवति एवंव्यंजकध्वनिसंनिधानसंनिधा नाभ्यामकारस्योपलंभानुपलंभावित्यर्थः। जातिस्फोटवादीव्यक्तिस्फोटवादिनंपर्यनुयुंक्ते। अनि त्यत्वमिति॥ ॥

त्यर्थःअनेनाद्यंदूषणंपरिहृतं। द्वितीयंपरिहरति। यथेति। एवमिति। अस्यानेकदेशेषुयुगपदुपलंभोव्यंजकव शादितिशेषः। पूर्वदृष्टस्यपश्चाद्दर्शनेपिअव्यवहितस्यव्यवधानेपिनभेदइत्येतन्मात्रेणदृष्टांतइतिभावः नन्वेवं विभुत्वेनित्यत्वेचसर्वत्रदेशेसर्वदोपलंभापत्तिरतआह॥ व्यंजनेकेत्यादि॥ जातिस्फोटेति। जातिरेवएकाश ब्दव्यक्तयस्त्वनंताइतिवादीत्यर्थः भाष्येऽनित्यत्वमेवस्यादिति। व्यक्तेरेकत्ववादीनस्यानित्यत्वमन्यतेइतिभावः॥ ॥

ननु विसोरेकस्यापि व्यंजकवशादनेकत्रोपलब्धौ कथमनित्यतेत्यत आह भवतेति। भाष्येपि नित्याश्च शब्दा इत्यस्य
नन्वेत्यादिः भाष्योक्त कूटस्थत्वाभावमुपपादयति रूपांतरेति। तस्माद्भिन्ना एवानित्या एवाकारा इति भावः नित्या एवे
ति पाठस्त्वयुक्तः अनंतवर्णवादे तदनित्यत्वस्यैवेष्टत्वात् इति बोध्यं यद्यप्यनुदात्तत्वादीनां ध्वनिनिष्ठत्वाभीका
रान्नदोषस्तथापि स्फटिकस्येवास्यापि इतरसंनिधानेन तद्रूपपरिग्रहे संसर्गानित्यता विरोधिकूटस्थत्वाभावइ
वइति भावः पुनरप्येकत्वनित्यत्वे साधयति। भाष्ये यदि पुनरित्यादिना। एकस्यैवाकारस्यानेकदेशेषूपलब्धिरा
भवता जातिस्फोटवन्नाभ्युपगम्यते॥ व्यक्तेरेवैकत्वनित्यत्वप्रतिज्ञानात् ह्यैकत्वं नित्यत्वं च नोप
पद्यते। दंड इत्युदात्तानुदात्तभेदेन भिन्नत्वान्नह्येकस्यैवोदात्तत्वपरित्यागेनानुदात्तत्वं युक्तं। रूपांतरप
रिग्रहादनित्यत्वप्रसंगात्। तस्माद्भिन्ना एव नित्या एवाकाराः प्रत्यभिज्ञात्वनिबंधनेति जातिस्फोटपक्षो। त्रि

दित्यस्येव संभवतीति न तावद्व्यक्तिभेदः सिध्यति॥ अन्यथा आदित्यस्याप्यनेकत्वापत्तिनित्यत्वापत्तिश्च तत्त
द्देशसंसर्गेण त्वमप्रकाशत्वागुणादि गुणसंसर्गादिति भावः विषम इति। आदित्य दृष्टांतेनानेकदेशोपलभ्यमानाका
रादिपक्षके कुसाधकः प्रत्यभिज्ञायमानत्वहेतुरनेक दृष्टकानेकदेशोपलब्धिविषयत्वरूपोपाधियुक्त इति भतेन ४३
भेदसाधकशब्द व्यवायहेतोः सत्प्रतिपक्षतायुक्तेति भावः अकारं पुनरुपलभत इत्यस्यैकोद्देशानेकाधिकरणस्थमिति शेषः॥

शब्दस्याकाशरूपैकाधिकरणत्वेनानेकाधिकरणत्वमयुक्तमित्याशयेनाह भाष्ये कारमपि नोपलभत इति। अ
कारमप्यनेकाधिकरणस्थं नोपलभत इत्यर्थः श्रोत्रोपलब्धिरिति। श्रोत्र एवेन्नुपलब्धिर्यस्येत्यर्थः करणोक्तिनं ते
न समानाधिकरणबहुव्रीहिर्वा। एतद्विशेषणफलं दर्शयति श्रोत्रेति। ननु दिश एव श्रोत्रत्वात्कथं तत्रोपलब्ध्या
काशदेशत्वसिद्धिरत आह आकाशेति। कर्णशष्कुल्यवच्छिन्नं नभ एव श्रोत्रं। चक्षुरादिवच्छ्रोत्रस्यापि भूतत्वभाव
व्यक्तिस्फोटवाद्याद। अकारमयीति। श्रोत्रोपलब्धिरिति। श्रोत्रोपलं आकाशदेशादेशत्वं शब्दस्य प्रतिपा व्या
दयति। आकाशप्रदेशविशेषस्य श्रोत्रत्वादिंद्रियाणामसंबद्धविषयाग्रहणच्छ्रोत्रस्य च निःक्रि
यत्वाद्गमनाभावादाकाशदेशत्वं शब्दस्यावश्याभ्युपेयं॥

श्यकमिति भावः दिशो नतिरिक्तमेव चाकाशमिति तत्वं। ननु तथाप्यंशतेजोंशगतघटादिरूपस्य तैजसचक्षुर्गा
ह्यत्ववदनाकाशदेशगतस्यापि शब्दस्याकाशात्मकश्रोत्रग्राह्यत्वं किं न स्यादित्याशंकायां किमसंबंधं तत्त्या
हकं संबद्धं वानाद्य इत्याह असंबद्धेति। अन्यथा रामेश्वरादिप्रदेशावच्छिन्नशब्दस्यापि श्रवणप्रसंगः॥ द्वितीयेपि किं श्रो
त्रस्य विषयदेशगमनात्संबंध उत शब्दस्य श्रोत्रदेशगमनात् नोभयमपीत्याह गमनाभावादिति। श्रोत्रस्य चेति। चेन शब्द
परिग्रहः॥ ॥

DR BHAU DAJI MEMORIAL

उभयोरपि गमनाभावे हेतुर्निश्चि यत्त्वं दूरदेशस्थ शब्दाग्रहणं तु दूरत्वादेर्विषयस्य प्रतिबंधकत्वाच्छ्रोत्रदेशेन
भिव्यक्तेः आकाशादेशत्वे च तद्देवतस्यापि व्यापकत्वेन श्रोत्रदेशे भिव्यक्तस्य तेन ग्रह इति भावः आहंका
रिकाणींद्रियाणीति सांख्यमतेपींद्रियाणां स्वाधिष्ठानभूतवृत्तिगुणग्राहकत्वनियमादाकाशदेशत्वं श्रोत्रो
पलब्धौ शब्दस्यास्ति ध्वनीति बोध्यं॥ श्रोत्रोपलब्धिरित्येव बुद्धिनिर्ग्राह्यत्वस्योक्तत्वात्पौनरुक्त्यमाशंक्या
ह

बुद्धिनिर्ग्राह्य इति। पूर्वपूर्वध्वन्युत्पादिताभिव्यक्तिजनितसंस्कारपरंप्राप्तपरिपा
कांत्यबुद्धिनिर्ग्राह्य इत्यर्थः। प्रयोगेणेति। प्रयुज्यत इति प्रयोगो ध्वनिः तेनाभिव्यक्तः॥

ह। पूर्वपूर्वेति। एवं चाक्षतिविरोधीयमानानेकवर्णवत्घटकत्वशादिशब्दग्रहणसंभवदर्शनाय तदुक्तमिति न पौ
नरुक्त्यं। प्राप्तपरिपाकेति। तत्सहकृतेत्यर्थः अंत्यबुद्धिरंत्यवर्णबुद्धिः एवं च ताद्दशसंस्कारविशिष्टांतःकरण
संयुक्तेन ताद्दशसंस्कारविशिष्टेन श्रोत्रेणांत्यवर्णसमुदायप्रतिबिंबवदखंडस्फोटरूपपदादिप्रत्यक्षमिति भावः नन्वेवं ४८
सर्वदा शब्दोपलंभः स्यादतो भाष्ये प्रयोगेणाभिज्वलित इति। तथा च श्रप्रयुज्यत इति ध्वनिरिति वर्ण इत्यर्थः॥ ॥

भाष्ये एकं च पुनराकाशमिति। एवं चैकस्मिन्नाम्रफले एक एव यथा रूपरसगंधादिस्तथा तदाश्रयस्यैक
त्वात्तदाश्रितशब्दोप्येक एव तत्रैव च तस्योपलंभ इति भिन्नदेशोपलंभ एवासिद्ध इति भावः नन्वेकत्वे ऽयं पूर्वो
यं परोयं देवगृहे यं राजगृहे इति भेदप्रतिभासः कथमत आह देशभेदेन त्विति औपाधिको भेदस्तु आकाश
स्येव न शब्दस्य प्येकत्वबाधक एवं संसर्गानित्यतापि तस्यैवेनास्यापि बाधिका तस्यापि भिन्नलंभ इत्यादि

देशभेदेन तु प्रतिभासो भिन्नदेशावस्थितपुनुष्योदीरिताभिव्यंजकध्वनिकृतः॥ भेदवाधादि। आका
शदेशा इति। यथा पृथिव्या एकत्वेपि स्रुघ्नमधुरादिदेशव्यवहारः। एवमाकाशस्यापि संयोगिघटादि
पदार्थविच्छेदेन व्यवहार इत्यर्थः॥

संसर्गानित्यताप्रतीते नित्याशयः अत्र शब्द इत्येकवचनेन स्फोटस्यैकत्वमखंडत्वं च ध्वनितं॥ ननु निरवयव
यवस्य कथं प्रदेशा बद्धुल्य मत आह यथेति। एवं चौपाधिकभेदेन भेदो दुर्वारः सर्वत्र भेद औपाधिक एव स एव
च व्यवहारोपयोगीत्याशयः। श्रोत्रसंबंधस्तु प्रदेशांतरोत्पन्नशब्दस्यापि वीचीतरंगन्यायेन कदंबमुकुलन्यायेन वा तं
त्रांतरे प्युत्पादित एव॥ ॥

तत्रापि पक्षेऽस्यच्वावित्यादौ दोषो नेत्याह नाप्याकृतिग्रहणादिति। तदाह। अकारजातिरिति। सर्वप्रदे
शेष्विति। प्रत्याहारेस्यच्वावित्यादौ अकारव्यक्तीनामानंत्यमाश्रित्य वार्त्तिककृता वर्णसमाम्नायस्य विवृतत्वे
पिधात्वादिस्यस्यापि विवृतोपदेशो नोदितः नाप्यकृतात्तु प्रयोगस्यानां प्रत्याहारस्यैर्ग्रहणाय तत्र जाति
निर्देशो आवश्यके जातेर्विवृतत्वप्रतिज्ञानेनैव सर्वसिद्धेः स दोषो वारितः अस्यच्वावित्यादौ तु सत्यपि विवृ

एवं व्यक्तिस्फोटपक्षे निराकृते जातिस्फोट एवाश्रीयते। आकृतिग्रहणादिति। आकारजातिः सर्व
प्रदेशेषु निर्दिश्यते नांतरीयकस्तु व्यक्तिनिर्देशः। तत्र प्रत्याहारे अकारजातेर्निर्देशात्तस्याश्च विवृ
तत्वप्रतिज्ञानाच्छास्त्रांते तस्या एव प्रात्यायत्त्रिविधानं। तदेवं जातिनिर्देशादनुवृत्तिनिर्देशस्थेना
कारेण ग्रहणमाकारस्य सिद्धं। अष्टन आ विभक्तावित्यत्र सत्यपि जातिनिर्देशे दीर्घोच्चारण
सामर्थ्याद्ध्रस्वस्य ग्रहणं न भवति॥ ॥

वृत्तेऽनण्त्वात्सवर्णग्रहणं न स्यादित्यपि जातिनिर्देशेनैव परिहृतं एवं चाणुदित्सूत्रे णग्रहणं नका
र्यमित्याशयः तस्याश्चेति स्वाश्रयव्यक्तिद्वारेत्यर्थः तत्र प्रत्यापत्तिवाक्ये तपरनिर्देशात्षण्णामेक ४५
देशोषनिर्देशाद्ध्रस्वस्यैव संवृतत्वं बोध्यं। ननु जातिनिर्देशे अतिप्रसंग इत्याह। अष्टन इति॥ ॥

अन्यथा ह्रस्वमेवेति। न च तन्निर्देशोंतरमपरिभाषया दीर्घो न स्यादिति दीर्घविधानं दीर्घनिर्देशे तु तत्सामर्थ्यात्तस्यापि
विधानं जातिग्रहणादन्यस्यापीति वाच्यं। दीर्घनिर्देशसामर्थ्ये नांतरमपरिभाषाबाधकल्पनापेक्षया ह्रस्वानुपस्थितेरेव
कल्पने लाघवमित्याशयात्। ननु दीर्घोच्चारणसामर्थ्यान्मास्तु ह्रस्वः प्लुतस्तु स्यादत आह। प्लुतश्चेति। विषये दूराद्धूता
दौ। अतेनापि प्लुतविधाने शेनुवाददोषः स्यादिति भावः सर्वत्राकृतिनिर्दिष्टेत्यत्र ज्ञापकमाह नाप्यतद्धेति सादृश्ये व
तिन्त्रमं व्यावर्त्तयति सदृति अपवावर्त्यं तमेनादिति। तदातद्धादित्यस्यच्वावित्यादिवदित्यर्थः। तदाह तत्र न्यायेनेति। त

अन्यथा ह्रस्वमेवोच्चार्येत। प्लुतश्च विषयस्मृत इति न्यायात्। प्लुतस्याग्रहणं। तद्धेति स आकृतिप
क्षो यत्रास्ति तत्तद्धत्। अपवावर्त्यं तमेतत्। तत्र न्यायेनाकृतिपक्षस्य स्थापितत्वान्न परेषपि स एव प
क्षः स्थित इत्यर्थः॥

त्रास्यच्वावित्यादौ आकृतिग्रहणप्रयुक्तातिप्रसंगनिवारणार्थमेवाहितत्रतत्रतपरकरणं। जातिपक्षेपि विवृतत्व
प्रतिज्ञाऽकः सवर्णे इत्यादेर्दडो न तिरित्यादौ दीर्घार्थमावश्यकैव। एवं प्रत्यापत्तिवचो व्यावश्यकमेव तुल्यन्यायाज्जा
तिग्रहणप्रयुक्तातिप्रसंगनिवारणाय तपरत्वविधेयेत्यदादीनामद्रित्यादौ तद्वारणाय प्रत्यय इत्येतदिति बोधितं अ
त्र पक्षेण ग्रहणप्रत्याख्याने पि ऋऌवर्णयोः सावर्ण्येन समानजातित्वातिदेशान्न दोष इति भावः॥ ॥छ॥

४६ अवात्तामिति। वसेर्लुङ् त सस्ताम् सिच् सः सीतितत्वं। वदव्रजेतिवृद्धिः द्वलो झलीति सलोपः ननुवचनसाम
र्थ्यात् झल् सदृशेपि भविष्यतीत्यत आह। असित्यादीति। सिदेर्लुङि सिरूपं आकृत्य नाश्रयणे प्याहत्ताष्येरूपसामा
न्यादिति। तथाचष्टे। व्यक्तीति। अभेदव्यवहारइति। रूपसादृश्यनिबंधनप्रत्यभिज्ञाकृताभेदव्यवहारइत्यर्थः अत्य

हल्ग्रहणेषु चेति अवश्याश्रयणीयतया आकृतिपक्षस्य दर्शयति। व्यक्तिपक्षेह्येकस्यैव तकारस्यानुकर
णं खफछठथेत्यत्र तदितिद्वयोस्तकारयोर्झलत्वं न स्यात्। अपितु एकस्यैवेत्यवात्तामित्यत्र सितलो
पो न स्यात्। अन्तित्थादित्यादावेवस्यात्। रूपसामान्यादिति। व्यक्तिनिर्देशोतिभेदापरामर्शेन लोकव
दभेदव्यवहारोऽस्तीति सिद्धमिष्टं। व्यक्तिरिक्तं सामान्यं भवतुमावाभूत् सर्वथा लोकइव शास्त्रेव्यवहारइ
त्यर्थः॥

महत् स्थूलकृशह्रस्वदीर्घगोघटादिषु गौर्घटइत्यादिव्यवहारवदिति भावः एवं च व्यक्तिव्यतिरिक्तजातिस्वीकारो
क्ति पिव्यर्थ एवेत्याशयेनाह। व्यतिव्यतिरिक्तं त्विति। मावेति। अनुगतप्रतीतिव्यवहारयोः सादृश्येनैवोपपत्तेरितिभावः। ४६
सादृश्यं चात्र समानध्वनिकृतं॥ ॥छ॥ ॥श्रीपार्वतीवल्लभायनमः॥ ॥छ॥ ॥

ऋऌक्। भाष्ये अपवृत्तकारेति। यद्यप्येतच्चतुर्दशसूत्रीविवृतौ नंदीश्वरकृतकाशिकायामनेकेषांऋषीणां
नानाविधार्थजिज्ञासायां शिवेन सर्वजिज्ञासानिवृत्तये एयाढक्कानिनादेन प्रकाशितेत्युक्तमितीदमनुपपन्नं
तथापि पाणिन्युद्देश्यकं फलमस्ति नवेति एतत्तात्पर्यं। अंत्यवर्णं चतुर्दशं तु पाणिन्युद्देशेनैवोपदिष्टमित्यपितत्रैवस्प

ऋऌक्। अल्पीयानिति। ऋकारापेक्षः प्रकर्षः ऋकारस्याल्पः प्रयोगस्ततोप्यस्याल्पतरइत्यर्थः। अ
ल्पप्रयोगस्यापि कार्यार्थमुपदेशः कर्तव्यइत्याशंक्याह। यश्चापीति। तत्र ऋकारावस्थायामेवोदात्तादि
षुकृतेषु स्थानेंतरतमइति स्थानिसदृशो ऌकारो भविष्यति॥ ॥छ॥ ॥

ष्टं॥ प्रयोगविषयइति। कर्मधारयः प्रयोगादन्यत्रानभिव्यज्यमानतया प्रयोगो विषयइत्युक्तः। अल्पेति। य
थामुक्तादणित्यादेः ननु ऋकारे कार्यप्रवृत्तावपि ऌकारे कथं तत्कार्योदात्तत्वादीनां दर्शनमत आह। तत्रेति। स्थानं
तरतमइतीति। यद्यपि कृपोरोलइत्यत्र रेफलकारयोः स्थान्यादेशभावस्तथापि तद्द्वारा ऋकारऌकारयोरपिसइतिभावः।

अर्थगतमिति। शब्दातिरिक्तमर्थरूपमित्यर्थः यद्वा व्यक्तेरेव वाच्यता तस्यां च प्रकारताविशेष्यताख्यविषयता
द्वयांगीकाराच्छक्तिग्रहोपपत्तिः साविकल्पकोपपत्तिश्च ततइतिभावः। प्रयोक्तृभिप्रायेणैवेति। शक्तिबोधनं प्र
योक्त्रधीनमितिभावः अन्यथा शब्दार्थसंबंधस्यानित्यतापत्तिः एवं च स्वेच्छयैकसंव्यक्तौ संकेत्यमानः शब्दो य
दृच्छाशब्दइतिबोध्यं। ननु ऋकारस्यावृत्ते ऋऌवर्णयोः सावर्ण्यात् ऋकारेण ऌकारस्यापि ग्रहणाद्व्यर्थ

यदृच्छेति। अर्थगतं प्रवृत्तिनिमित्तमनपेक्ष्य यः शब्दः प्रयोक्त्रभिप्रायेणैव प्रवर्तते स यदृच्छाशब्दो डित्था
दिः। ऋकारऌकारयोः सवर्णविधिरित्यस्य वार्त्तिककारवाक्यत्वात्सूत्रकारेणानाश्रितत्वादत्र ऌकारो
पदेशः कृतः॥ ॥

सिद्धौ किं ऌकारोपदेशेनेत्यत आह। ऋकारेति। उपदेशः कृतइति। पाणिनयेशिवेनेतिशेषः वस्तुतोऽत्र तस्यानु ४९
पदेशेऽप्रामाणिकत्वशंकया सवर्णविधेरपि तयोर्वक्तुमशक्यइति तदुपदेशः सवर्णविधिश्चारकफलमपि स्थ
लत्रयएवेति तत्रैव प्रयोजनोपन्यासइतिबोध्यं। ॥छ॥ ॥श्रीसदाशिवप्रसन्नोस्तु॥ ॥

ननु संतमसंतं वा क्रियायोगमर्थगतमंगीकृत्य डित्थादीनामपि व्युत्पत्तेरर्थगतार्थरूपप्रवृत्तिनिमित्तानपे
क्षशब्दसत्वे किं मानमत आह। अर्थवदिति। चिंत्यमिदं। बहुच्युर्वेतस्य चारिताप्यात्। एतदर्थं तद्धितपदं त
द्विशिष्टपरं अत्र त्ययद्दत्युक्तेश्चपचतकीत्यादौ न दोषः प्रत्ययश्च तद्धिताश्च भिन्नएव बहुपटवस्तिष्ठंतीत्यादौ पंस
मुदायमिति न्यायेन न दोषइतिकैयटाशय मन्येन नु ऌतकस्यासाधुत्वात्कथं शास्त्रविषयतेत्यत आह गव्यादी

अर्थवत्सूत्रारंभाच्चाव्युत्पन्ना यदृच्छाशब्दाः संतीत्यवगम्यते। गव्यादीनां तु गवादिनिवर्त्तितत्वाद
साधुत्वं। ऋतकशब्दस्त्वर्थाभिप्रायेणैव विनियुक्तइति ऋतकशब्दस्यानिवर्त्तकः॥ ॥छ॥ ॥

नामिति। ऋतकेन ऌतकानिवृत्तौ हेतुरर्थाभिप्रायेणेति। स्वगतक्रियारूपार्थाभिप्रायेणेत्यर्थः अर्थतः सजातीय
स्यैव निवृत्तिरेकप्रवृत्तिनिमित्तकत्वे सति अन्वाख्यानमन्वाख्यानस्य निवर्त्तकमितिभावः। तथ्यनयन्नाह भाष्ये चतुष्टयीतिश
ब्दानामर्थे या प्रवृत्तिः सा प्रवृत्तिनिमित्तभेदात्प्रकारचतुष्टयवतीत्यर्थः तत्र यदृच्छाशब्दो नाम वक्त्रा स्वेच्छया सन्निवेशितः स चा
नेकविधः एकव्यक्तिसन्निवेशितो डित्थादिरेकस्तत्र न किंचिदतिरिक्तं प्रवृत्तिनिमित्तमानंत्यव्यभिचारयोरभावात् किंतु प्राक्प
स्यैवार्थस्याविषयताद्वयेन भानं। तदुत्तरत्वादेः प्रकारत्वावच्छिन्नः स एवार्थः॥ ॥छ॥ ॥

यथा शब्दपराशब्देर्थ एवत्वादिः कुत्वमिति कुरिति च पर्यायौ। अनेकत्वमत्वे तन्नज्ञात्पुपलक्षितेसा। डित्थादीनां तु तच्छ
क्यादीनामानंत्यात्तत्पदमेव प्रवृत्तिनिमित्तं तदेव तदुत्तरत्वाद्यर्थः त्वादिपदेनोदित्संज्ञैवोच्यते। अत एव वृद्धि सूत्रे वक्ष्यति
कुत्वं कस्मान्न भवतीचोः कुः पदस्येति त्वात्कयन्न संज्ञेति अनेन च भाष्येण कुकुत्वपदयोः त्वत्न संज्ञापदयोः पर्या
यत्वं स्पष्टमेव। संज्ञा च पदमेव। ननु चतुर्विधेष्वनुकरणशब्दः क्वांतर्भवतीत्यत आह अशक्तिज्येति। यस्मादिति। अ
नुक्रियमाणशब्दव्यक्तयोबद्धः प्रत्यक्षिज्ञातु जातिनिबंधना रूपसादृश्यनिबंधना चेति भावः एतेपि यदृच्छाशब्दाः

अशक्तिजानुकरणस्य जातिशब्दत्वमिछंति यस्मादनुक्रियमाणे शब्दे या जातिः। समवेता तत्सं
बद्धमनुकार्यमनुकरणं प्रत्याययति।

स्वेछयैव वक्त्रा शब्दपरतया प्रयोगात् इत्यन्ये। प्लुत्यादिकं च गुरोरनृत इति। प्लुतः अनचिचेति द्वित्वं। प्र
पूर्वात्क्षिपेरंतर्भावितणार्थात्कर्मणि क्ते गतिरनंतर इति पूर्वपदप्रकृतिस्वरेणाशिष्टस्यानुदात्तत्वे उदात्तादनुदा
त्तस्येति स्वरितत्वं। अनृत इति निषेधस्तु नाऋदित्यादिदिति पृथगनुबंधकरणेन क्वचित्परस्याग्रहणज्ञापनात्॥

DR BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

न्याय्य इति। संज्ञात्वेन कल्पयितुमिति शेषः तत्र हेतुमाह। रूढंतमिति। प्रकृतिप्रत्ययादिविभागेनान्वाख्यातत्वमेवन्या
य्यत्वमित्याशयेन शंकते। सर्वशब्देति। शिष्टप्रयुक्तत्वमपि न्याय्यत्वमिति परिहारः न च तस्यैव प्रयोगे ऌतकशब्दो बो
धकोपि न स्यादिति वाच्यं बोधकत्वेप्यसाधुत्वान्न शास्त्रीयकार्यनिमित्तत्वमित्याशयात्। तद्ध्वनितं भाष्ये साधुम
न्यत इति ग्रंथेन। ऋतक एवासाविति। ऋतकशब्दप्रतिपाद्य एवासौ न ऌतकशब्दप्रतिपाद्य इत्यर्थः इदानी
न्याय्यभावादिति। ऋतकशब्दो न्याय्यः रूढंतं नामकुर्यादिति स्मृताउक्तत्वात् ऋतिः सौत्रो धातुः। तत औणादिकः
कुन् शिल्पिसंज्ञयोरपूर्वस्यापीति कुन् प्रत्ययः संज्ञादिष्विति आदिशब्देनैतद्दर्शयति गुणाः क्रियानि मित्ताश्च
विशास्त्रान्विता एव प्रयोक्तव्या इति। सर्वशब्दव्युत्पत्तिपक्षोकिमर्थवत्सूत्रेणेति चेत्। शिष्टप्रयुक्तानामेवा
व्युत्पत्तिपक्षोप्यस्तीति ज्ञापनायार्थवत्सूत्रोपादानं। अनुकरणशब्दानामव्युत्पन्नत्वात्तदर्थं च। अपरश्च
हेति पूर्वमुक्तं ऋतक एव न्यायत्वान्नियोक्तव्याः न तु ऌतकशब्द इति। इदानीं तु ऋतकशब्दस्यैवायम
यथांशोः शक्तिजत्वात् ऌतकशब्द इत्युच्यते॥
त्विति। भाष्ये कल्पयितव्य इत्यस्य विनियुक्तत्वेन ज्ञेय इत्यर्थः साधुऋतक एव नामत्वेन कृतो न ऌतकः
अशक्यात्तु तथोच्चारणमित्यपभ्रंशत्वान्न शास्त्रविषय इति भावः॥ अशक्तिजत्वादिति। जिह्वापाटवज
त्वादित्यर्थः॥ एवं च साधुरेवेति भावः॥ ॥छ॥ ॥ॐ श्रीकाशीविश्वेश्वराय नमः॥ ॥

ऌतकाऌऌफिड्डु वैषम्यं दर्शयति। ऋतकशब्दइति। ऌतकशब्दस्येति। अनन्वाख्यातस्येत्यादिः फिडफिड्डयोरू
पादिड्डु षदर्शनादाह। उणादयइतिवाहुलकसिद्धावेताविल्यर्थः अर्त्तिप्रवृत्तिश्चैवेति। तथा च फिडफिड्डयोः स
एव प्रकृतिर्नतुऌइतिधात्वंतरं कल्प्यं संज्ञास्तुधातुरूपाणीतितुअनादिशिष्टप्रयोगसाधनेउपायमात्रंनत्वा
धुनिकाक्रियमाणसंज्ञानुग्राहकइतिभावः एवंच देशभाषानुसारेणाक्रियमाणकूचीमंचीत्याद्यसाधुश

अयंनहीति। ऋतकशब्दोन्वाख्यातत्वाद्भवतुवाऌतकशब्दस्यानिवर्त्तकः ऋफिडऋफिड्डइत्यतोल्वन
न्वाख्यातावितिकथंऋफिडुऌफिड्डइत्येतयोर्निवर्त्तकौ स्यातामितिभावः। एषोपीति। उणाद
योबहुलमित्येवान्वाख्यातावितिभावः॥अर्त्तिप्रवृत्तिरिति। अर्तेःप्रकृतित्वेनप्रवृत्तिरित्यर्थः॥ ॥

स्त्राविषयश्चेत्युक्तं॥ अर्त्तेरिति। यतस्तस्यलोकेप्रवृत्तिर्लक्ष्यते ऋफिडादिप्रकृतित्वेनापितस्यैवप्र
वृत्तिरित्यर्थः॥ एवंयदृच्छाशब्दानंगीकृत्यशास्त्रान्वितानां कचिच्छिष्टप्रयुक्तानामेवयत्रकुत्रचित्संज्ञात्वे ४८
नाविनियोगोनान्येषामित्येवंऌतकऌफिडादीनांशास्त्रविषयत्वाभावान्नतस्थौऌकारोपदेशइत्युक्तं॥ ॥

इदानीनसंत्येवयदृच्छाशब्दाइतिपक्षावष्टंभेनतदर्थत्वंप्रत्याचष्टे। भाष्येत्रयीचेतिचेनेदंध्वनितंनन्वेवंड्डित्यादीनांकथं
तर्हिवोतआह अद्यत्वेपीति। एवंचसर्वेपिव्युत्पन्नाः क्रियादिशब्दाएवेतिभावः प्रशस्यरूपेति। अत्यंतप्रशंसायोग्ये
त्यर्थः एवंचयेषांक्रियागुणादिप्रवृत्तिनिमित्तकत्वंतेषांक्रियाद्यारोपेणार्थबोधकत्वमितितात्पर्यं। यथापूर्वपूर्वड्डि
त्यादिगतप्रशस्तगुणक्रियारोपेणतत्प्रवृत्तिनिमित्तकएवड्डित्यादिभ्योबोधः आद्योड्डित्येतुतद्व्यक्तेरेवविषयताद्ये

नसंतीति। अद्यत्वेपियदानामक्रियतेतदाप्रशस्यरूपाक्रियागुणोवाध्यारोप्यतइतिभावः। अन्यथाकृत्वे
ति। अव्युत्पत्तिपक्षाश्रयेणआचार्येणोपदिष्टऌकारः। वार्त्तिककारस्तुव्युत्पत्तिपक्षाश्रयेणप्रत्याचष्टे। स
मानेचेति। इहचाभिन्नार्थत्वं॥

नज्ञानमितिसैवप्रवृत्तिनिमित्तमपीतितस्यनादइतिसूत्रेभाष्येउपपादयिष्यते। अव्युत्पतीतिसंज्ञाशब्दाअव्युत्पन्ना
इतिपक्षाश्रयणेनेत्यर्थः आचार्येणेति। शिवोवेदपुरुषोवाचाचार्यः एवंचयदृच्छाशब्दसंज्ञावाश्रयेणप्रयोजनेउक्ते
तदनाश्रयणेनतत्प्रयोजननिराकरणमयुक्तमितिभावः ऋतकशब्दोऌतकशब्दस्यसाधुत्वाभावकल्पकइत्याद्यंदूषण
मप्ययुक्तमित्याह। भाष्येसमानेचेति। तत्रार्थशब्दःप्रवृत्तिनिमित्ताभिप्रायइत्याह इहचेति। तच्छब्दस्वरूपस्यव्यक्तिस्वरूपस्य
वार्थप्रवृत्तिनिमित्तत्वेनाध्यासइत्यर्थः॥

विपर्ययइति। क्रियाप्रवृत्तिनिमित्तमित्यर्थः। भिन्नस्वरूपौभिन्नप्रवृत्तिनिमित्तौ। यदितुऋतकोपिशब्दप्रवृत्तिनिमि
त्तकस्तदाभिन्नस्वरूपत्वादेवप्रवृत्तिनिमित्तविपर्ययः व्यक्तेरेवप्रवृत्तिनिमित्तत्वमितिपक्षेऋतकसंकेतविषयव्यक्ते
ऌतकसंकेतविषयव्यक्तेर्भिन्नैवेतितद्विपर्ययोस्त्येवेतिबोध्यं। भाष्येसमाधत्ते पक्षांतरैरपीति। जातिपक्षेत्विति।
यत्तुअक्षादिनानार्थानामेकशेषायतत्पक्षेप्यावश्यकमितितन्नजातिगतजातिस्वीकारेणपरिहृतं। पक्षांतरैर

ऌतकशब्दोहियदासंज्ञात्वेनविनियुज्यते। क्वचित्पिंडेतदातच्छब्दस्वरूपाध्यासः ऋतकेनविपर्य
यःभिन्नस्वरूपौचेतौशब्दौइतिभावः पक्षांतरैरपीति। यथाद्रव्यपक्षेसरूपाणामित्यस्यारंभः। जाति
पक्षेतुप्रत्याख्यानं एवमस्यापीत्यर्थः अव्युत्पन्नसंज्ञाशब्दपक्षेपिपारंपर्यायातःशिष्टप्रयुक्ताएवसंज्ञाः॥

पिपरिहाराभवंतीतिवार्त्तिककृतैवमुक्तंवस्तुतश्चतुष्टयीपक्षेपिदोषपरिहारः सुकरः। यदुक्तं। ऋतकोनऌतक
निवर्तकइतिमाभूत्तस्यानिवर्तकत्वंशिष्टप्रयोगाभावात्तन्निवृत्तिः न्याय्यत्वमपिवार्त्तिकेशिष्टप्रयुक्तत्वमेवेत्यभिसं ५०
धायभगवतानुक्तमपिस्वयंमंदबुध्यनुग्राहायस्फुटमाहाव्युत्पन्नेति। पारंपर्यायाताःअनादयः एवंचाशिष्टाप्रयुक्तायदृ
च्छाशब्दाअसाधुत्वेनशास्त्राविषयाइतिभाष्यतात्पर्यं॥ ॥

यत्तुचतुष्टयीति। पक्षेऌतकादीनांटिघुभादिवच्छास्त्रविषयत्वमेवेत्यस्माद्भाष्याल्लभ्यतेइतितन्न। पक्षभेदेनैकस्यशा
स्त्रविषयत्वतदविषयत्वांगीकारेनवेतिसूत्रस्थभाष्यविरोधात्। टिघुभादीनांपाणिन्यादिशिष्टप्रयुक्तत्वेनसाधु
त्वा च्छास्त्रविषयत्वेपिअन्येषांतद्विषयत्वेमानाभावाच्च। किंचसाध्वसाधुबहिर्भूतानामपिशास्त्रविषयत्वे
साध्वनुशासनेस्मिन्शास्त्रेइतितत्रतत्रभाष्योक्तासंगतिः किंचशास्त्रविषयत्वमथतद्योग्यसाधुत्वाभावइत्य
शक्यमितिदिक्। अनुकरणंशिष्टस्यवाअशिष्टप्रतिषिद्धस्यवाभवति तत्राद्यंसाधु अंत्यंनदोषायनाप्यभ्युदया

प्रयोजनांतरमपिवार्त्तिककारःप्रत्याचष्टेअनुकरणमिति। अनुका
र्यस्यदुष्टत्वात्। अनुकारणस्यापिदुष्टत्वमन्यते। सुरापानानुकरणवत्॥

येतिभाष्येन्वयः अर्थात्प्रतिषिद्धानुकरणस्यदुष्टत्वंबोध्यं॥ ननुशिष्टानुकरणं शिष्टस्यवाअशिष्टस्यवाप्रतिषिद्ध
स्यवानासाधुआद्यस्याभ्युदयजनकत्वात् अंत्यस्याभ्युदयाजनकत्वेपिदोषाजनकत्वात्। एवंचप्रकृते किमायात
मतआह अनुकार्यस्यदुष्टत्वादितिअर्थलब्धंतदाशयप्रकृतोपयोगइत्यर्थः। अतएवभाष्येतद्दर्शितेनो
पपादयिष्यतियस्कखाल्वेति। एवंचासाध्वनुकरणस्यासाधुत्वात्शास्त्राविषयत्वात्तदर्थतालकारोपदेशस्यनयुज्यतइ
तिभावः॥

भाष्ये यजेतवेति। यागोत्र स्मार्तो ग्राह्यः सादृश्याभावादिति। नन्वेकजातीयेष्वपि व्यक्तिभेदेन सादृश्यसंभवः सु
रापानत्वादेरेव तादृशस्य जले सादृश्येन तदतिरिक्तसादृश्याभावादित्याशयात् तदाह नास्तीति। दानादीनां कथं
लौकिकत्वेनोपन्यासोत आह स्मार्तत्वादिति। अस्वस्थेनेति। आस्तिकत्वे सत्यपीति भावः माल्यगुणकं वद्ध इति। मा
लायां साधूनि माल्यानि पु

भाष्यकारस्त्वनुकरणार्थत्वं समर्थयते। विषमइति। नह्यनुकार्यस्य दोषेणानुकरणस्य दुष्टत्वं विहित
करणाद्धर्मोत्पत्तिः प्रतिषिद्धाचरणाच्चाधर्मोत्पत्तिः। न त्वनुमानेन धर्माधर्मयोर्व्यवस्थेति मन्यते सु
रापानादौ तु तस्या एव क्रियाया अनुष्ठानात् सादृश्याभावान्नास्ति अनुकरणत्वं। दानादीनां स्मार्तत्वाल्लौ
किकत्वमुच्यते। स्नातानुलिप्तइति। स्वस्थचित्तत्वं दर्शयति। अस्वस्थेन हि चित्तेनाकार्यं क्रियते। मा
ल्यगुणकं वद्ध इति। लोकमध्ये प्रकाशमित्यर्थः। अकार्यस्य प्रकाशं क्रियते। लृतकशब्दोपि यदासतकार्थे
प्रयुज्यते तदापशब्दः यदा त्वनुकार्यं प्रत्याययति तदा साधुरेव। अर्थभेदात्। अस्व गोण्यादिवत्। अपश
ब्दइत्येवेति। अस्य हि गाव्यादयोपभ्रंशा वाच्याः॥

ष्याणि तैर्युक्तो गुणः सूत्रं कंठे यस्येत्यर्थः गड्वादित्वात् परनिपातः। अकार्यहीति। इहलोकास्ती रूणेत्यर्थः भाष्ये प्र ५१
योजनप्रत्याख्यानवादी शंकते एवमिहापीति। प्रयोजनवादी समाधत्ते। अयं लन्यइति अर्थभेदेन साधुत्वेदृष्टांतमाह अस्वेति अस्य हीति। ए
वंच तत्तदर्थे व्याकरणाननुगतत्वमपशब्दत्वमिति भावः॥

भाष्ये तु ष्यतु दुर्जनन्यायेन साध्वनुकरणार्थत्वं लृकारोपदेशस्याह अयं खल्वपीति यद्यप्यपभ्रंशस्य वर्णानां न साधुत्वं
तथापि वर्णविकारविधाने न तेषां साधुत्वमिति भावः भाष्ये भवेत्तदर्थेनेति। तदर्थेन क्लृपिस्थलृकारार्थेन लृकारस्योपदे
शेन प्रयोजनं न भवति एवं यद्यपि भवेत्तथापि तदनुकरणार्थइत्यर्थः ननु क्लृपिस्थस्यासिद्धत्वात्कथं तदनुकरण
मत आह। प्रयोगस्यस्येति। प्रयोगे। अनुकरणप्रयोगे। शास्त्रे तदीयकार्ये वा। असिद्धत्वं पौर्वापर्यस्य तत्रैव संभवा

अयमिति। असाधुरनुकरणमित्येतदप्यत्र नास्तीति भावः। भवेदिति। प्रयोगस्यस्येदमनुकरणं प्रयोगे च
नास्ति पूर्वत्रासिद्धमिति भावः प्रकृतिवदिति। तत्र यथा क्लृपेर्लत्वस्यासिद्धत्वादृकारस्थाने लृकारस्यात्कार्यं
तथानुकरणस्यापीत्यर्थः। द्विरिति। पचंतु पचन्त्विति केनचिदुक्तेद्विः पचंत्वनुकरणं एतच्च क्रियासाध
नाघनभिधानात् तिङंतं न भवति। एवमग्नीइत्यनुकरणं घ्यर्थानभिधानान्न द्विवचनांतं। ननु गम्लृस
प्लृइत्यादिस्थस्य पदानुकरणं तदा कथं प्रकृतिवद्भावः॥ ॥छ॥ ॥

न चैवं प्रकृते इति भावः। अकारद्वारेणेति अकारबुध्येत्यर्थः। भाष्ये द्विः पचंत्विति पचंत्विति द्विराहेत्यन्वयः। असत्यतिदेशेति
ङंतत्वाभावे हेतुमाह एतच्चेति घ्यर्थेति एतदर्थमेव द्विवचनमित्यन्वर्थसंज्ञाकरणं॥ भन्विति॥ एवं च पाठाभावे मूल
स्यैवानुत्वाभावात् कथं तदनुकरणे कार्यमिति तदर्थउपदेश आवश्यकइति भावः॥ ॥छ॥ ॥

अनुमीयंतइति। इदंचिंत्यं। आनुमानिकवचनेनऌतस्यवर्णस्यप्रत्याख्यानायोगात्॥ तस्मात्फ्लऌइत्यादिस्योऌकारःवर्ण
जनकत्वादत्रसाधुरितिवक्तुंयुक्तं एवंचाशक्तिजानुकरणेतिवार्त्तिके। शक्तिजपदंव्यर्थमितितात्पर्यं॥ एवंसाध्वनुकरणा
र्थत्वेऌकारोपदेशस्यप्रकृतिवदित्याश्रयणेनखंडितेतेनैवाशक्तिजानुकरणार्थत्वमपिखंडयतिपूर्वपक्षीभाष्येयदिप्र
कृतिवदिति। ननुमास्त्वपशब्दोपदेशः प्रकृतित्वंतुकथंनेत्यतआह प्रकरणादिति। अतिदेशस्यशास्त्रीयत्वमनेनदर्श

कृताध्लृदितइति ऌकारेपरतोयणादेशकरणादित्संज्ञानुवादाद्वाधात्वनुबंधस्यऌकारस्याकार्याण्यनुमीयंते
ततस्तदनुकरणस्यसिद्धःप्रकृतिवद्भावः नचायशब्दइति। सिद्धांतवादी। प्रकरणाद्धिशास्त्रीयाप्रकृ
तिराश्रीयते। शास्त्रानिबंधनंचकार्यमतिदिश्यते। अपशब्दाश्चनशास्त्रीयाप्रकृतिरनुपदिष्टत्वात्। नचापश
ब्दत्वंशास्त्रीयंकार्यंनापितदतिदेष्टुंशक्यं। नहिसाधोरसाधुत्वातिदेशोयुक्तिमान् तदेवंभाष्यकारेणाश
क्तिजानुकरणार्थत्वंऌकारोपदेशस्यस्थापितं॥

ते। तत्रचप्रत्यासत्त्याशास्त्रीयप्रकृत्यादेरेवग्रहणमुचितमितिभावः। उपलक्षणंभाष्यमित्याहशास्त्रनिबंधनंचेति। ना ५२
पितदतिदेष्टुमित्यादिचिंत्यं अब्राह्मणेब्राह्मणत्वाद्यतिदेशवत्संभवादितिकश्चित्। तदेवमिति। अशक्तिजस्यशास्त्रीयप्र
कृतित्वाभावात्तदनुकरणेऽतिदेशाप्रवृत्तिरित्यपशब्दत्वाभावादव्यकार्यसिध्यर्थंऌकारोपदेशइत्यर्थः॥ ॥छ॥ ॥

इदानींभ्रत्याद्यर्थत्वंतस्यपरिहरतिभाष्येएकदेशेति। रेफस्यागस्येति। वर्णैकदेशावर्णग्रहणेनग्रहयंतइतिपक्षेइत्यर्थः प्रत्य
भिज्ञानादिति। एवंचाछिन्नपुच्छेश्ववदृष्टांतेनलोकन्यायसिद्धस्येमेवत्वमित्यर्थः। व्याख्यानेभाष्येनन्यवदित्यस्यान्यवन्नेत्य
र्थः अन्यसादृश्यस्यापिनिषेधेतत्वंदृढीकृतं। सिद्धांत्येकदेशीवृत्तिंदृष्ट्वास्थानिवत्सूत्रमनेनोपन्यस्तमित्याशयेनाह षष्ठीनि
र्दिष्टस्येति। तत्संबंध्येकदेशविकृतमादेशरूपमित्यर्थः ननुच्छ्रोपोनइत्यत्रानपिषष्ठीनिर्दिष्टएवेत्यतआह। राज्ञइति। येन
विकारेणयस्यविकृतस्ययद्रूपमेकदेशविकृतन्यायेनप्राप्यते तद्रूपावच्छिन्नस्यतेनरूपेणतद्विकारविधौषष्ठीनिर्दिष्टस्ये
तितदर्थइतिभावः भाष्येक्रुत्तोनप्राप्नोतीति। द्विर्वचनादेरप्युपलक्षणं कस्तर्हि रेफइति। रूपइतिलवयवषष्ठीतिभावः

एकदेशविकृतस्येति। ऋकारेरेफभागस्यलत्वेकृतेसएवऌकारइति। प्रत्यभिज्ञानादितिभावः। षष्ठीनि
निर्दिष्टस्येति राज्ञःक्वचेत्यत्रराजन्शब्दः षष्ठीनिर्दिष्टःश्वन्इतिलोपाभावः यद्येवंरूपोरोलइत्यत्रापि
ऋकारः षष्ठ्यनिनिर्दिष्टइत्यनन्यत्वंनप्राप्नोतीत्याह यदीतिअथवेतिषष्ठीनिर्दिष्टस्येतिनापेक्ष्यते॥ ॥छ॥

रूपनाशेति। रूपेरेफस्यलस्तदवयवऋकारस्यचलकारघटितआदेशइत्यर्थः स्थानिनिर्देशएवतादृशकल्पकइति
भावः एतेनतस्यावयवषष्ठ्यंतत्वेनस्थानिषष्ठीनिर्दिष्टत्वाभावादिदंचिंत्यमित्यपास्तं॥ ननुस्थानिवत्सूत्रेहित
स्याप्रकृतेचननेनातिदेशउच्यते॥ किंतुछिन्नपुच्छश्वदृष्टांतेनप्रत्यभिज्ञयानन्यत्वमुच्यतेतत्रषष्ठीनिर्दि
ष्टस्येतिवक्तुमेवाशक्यमित्याशयेनाह भाष्येऽथवेति॥ ॥छ॥ ॥ॐ नमः शिवाय॥ ॥

ननुकादेशेन त्वमिवैकदेशाविकृतन्यायेननकारांतत्वमपिकुतोनेत्यतआह नचराजनिति। एकदेशपदेनससंबंधि
कतयोपस्थितावयविधर्मएवविकारविशिष्टेआरोप्यतेनत्ववयवएवलोव्यवहारादितिभावः भाष्येइहतर्हीति। एक
देशाविकृतमपिनत्तत्वादितिभावः भाष्येसएषइति। श्रुत्याद्यर्थं विद्यमानोऌकारोपदेशोः रवतोह्रस्वस्येतिगुरूत्या
सरूपसूत्रस्थेदेनप्रत्याख्यायतइति यत्तदयुक्तमित्यर्थः कुतइत्यतआह सैषेति। यतःसैषाप्रत्याख्याना त्मि

नकारांतस्येति। नचराजन्शब्दः कादेशीकृतेनकारांतोभवति श्वेवपुच्छे छिन्नेनपुच्छवानितिभावः अर
वतइति। रोस्यास्तिनिसामितिनित्ययोगेमतुपतेनऋकारएवरवान्नतुवर्त्तकरत्याद्यावकारःनरवान्रवान्इतिसमासःनित्ययो
गप्रतिपादनायवङ्क्त्रीहिर्नकृतः अक्षरस्येतिह्रस्वस्येति। तेनह्रस्वस्यैवरवतःकृतनीषेधोनदीर्घस्य· वार्त्तिककारस्यऌकारप्रत्याख्या
नंनिःप्रयोजनमित्याहसैषेति॥१५॥

काउक्तिःमहतोवंशस्तंवाद्धनुकर्षानित्रेत्युक्तेयथामहतोवंशात्स्तंवाज्ञ द्वानुकर्षणमयुक्तंएवंऌकारप्रत्याख्यानमितिगम्यते॥ तद्दा
हनिःप्रयोजनमितिमूत्रभेदपरिकल्पनंविना च्छुप्तशिरेविकृतसाधनमात्राफलत्वान्निःप्रयोजनमित्यर्थः वंशात्तंवादितिल्यब्लोपेपंचमी॥
तमवलंब्येत्यर्थःऌद्वापत्तिविशेषःवातद्यथावद्धायाससाध्यमल्पफलंनयुक्तंतयाऌकारोपदेशप्रत्याख्यानमपीत्यर्थतिदिक्॥ १\
फलविशेषो॰

एओङ्। ऐऔच्। विचार्यतइतिकृत्वाचिंतान्यायेनायंविचार इतिबोध्यं। इदंपदार्थमाहतपरेति। असत्वभूतेतिएवंचे
दमापरामर्शोनुपपन्नइतिभावः बुध्यापरामृष्टेति। उपदेशपदार्थभूतेत्यर्थः कर्मभावमिति। इदंपदवाच्यत्वे
नेतिभावः। यथेति। इदंचिंत्यं कर्तृकर्मेतरकारकाभाववत्स्यैवासत्वपदार्थत्वात् पक्षद्वयेस्वरूपवैलक्षण्यस्या

एओङ् ऐऔच्। इदंविचार्यतइति। तपरातपरसंध्यक्षरोपदेशोविचार्यतइत्यर्थः। तत्रोपाद्दिश्येरन्नित्य
त्रासत्वभूतायद्यपिक्रियास्तिधीयतेतथापिबुध्यापरामृष्टासत्वरूपतामायादितविचारक्रियायांकर्मभा
वमनुभवति। यथापश्यमृगोधावतीतिसरणंदर्शने। कथ्यात्रेति। कार्येकोविशेषइतिप्रश्नः। तपरोपदेशाश्चे
दिति। यद्युपुपदेशउच्चारणंतथापितपरोपदेशफलंचेदस्तिततस्तपरोच्चारणंकर्तव्यमित्यर्थः संध्यक्ष
राणीत्यन्वर्थापूर्वाचार्यसंज्ञा। संधीयमानावयवत्वात्॥

नुभवसिद्धत्वेनतद्विषयः प्रश्नोनुचितोतआहकार्यइति। भेदाभावादुद्देश्यविधेयभावोनुपपन्नइतिआशंक्यप
रिहरति। यद्यपीत्यादि। फलंचेदिति। संप्रदानेद्यत्रितिभावःफलस्यैवकरणत्वविवक्षयाकरणेद्यत्रित्यन्ये। संधी
यमानावयवत्वादिति। अइउणितिशिष्यमाणावर्णसदृशावयवसंधानेनास्यनिष्पन्नत्वादित्यर्थः॥ ॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्याख्यस्यस्मारकम्
५३

भाष्ये प्लुतिग्रहणं त्रिमात्रपरं। आदिना चतुर्मात्रग्रहणं। नन्वोमभ्यादाने इत्यादिनांतरतमपरिभाषासंस्कृतेनैचु
रूपप्लुतविधानादैचो त्वे पि तेषां प्लुतसंज्ञा न भविष्यतीत्यत आह तत्रैवामिति। ताभ्यामपि तेषां तपाकथंचिदांतरतम्यस
त्वादिति भावः भाष्ये ऽर्ध एकार इति। मात्रिकत्वेनार्धत्वं समांशं वा विनो पि पुंस्त्वमेतद्भाष्यप्रामाण्यात्। भाष्ये तेनाप्ये

प्लुत्यादिष्विति। प्लुतमभ्युपगम्या कार्याणि न सिध्यंतीत्युच्यते। प्लुत एव न प्राप्नोतीति दर्शयितुमाह प्लुतसं
ज्ञा चेति त्रिमात्रस्यैचः प्लुतसंज्ञा विधीयते। तपरत्वे च त्रिमात्रस्याग्रहणादित्याभावः। तत्रैवांप्लुतो विधीय
मानः इकारोकाराभ्यां गृहीत इकार उकारश्च स्यात्। अतत्पर इति असतीहतत्परत्वे एकारौकाराभ्यां मात्रि
कयोरर्धैकारार्धौकारयोर्ग्रहणादत्राद्ध्रस्वत्वाद्विधानं स्यादिति सूत्रं कर्तव्यं। तपरत्वे तु तयोरग्रहणा
त्प्राप्त्यभावः। ननु चेति। सूत्रारंभं प्रति न कश्चिद्विशेष इत्यर्थः अतत्परत्वे एच इति वक्तव्यं तपरत्वे त्वैच इ
ति। ऐचो विश्लिष्टवर्णावर्ध एकारोऽर्ध ओकारो न भवतः॥

तद्वक्तव्यमित्यत्र एतच्छब्देन नियामकं सूत्रं परामृश्यते। सूत्रन्यासभेदे पि गुरुलाघवतो विशेषो नास्तीत्याह सूत्रारं
भं प्रतीति विश्लिष्टेति। उपलभ्यमाने इत्यर्थः संश्लिष्टेति स्पष्टमनुपलभ्यमानेत्यर्थः एवं चेङ्विषये नावर्णप्राप्तिः अर्धइ
स्तु तपरनिर्देशेनत्वात् ह्रस्वत्वमेव नेति भावः एङोश्च तालव्यत्वमेवेति न तयोः स्थाने ऽवर्णप्राप्तिरिति तत्वा संश्लिष्टवर्णाविति ५४
कैयटस्याप्यत्रैव तात्पर्यं। ॥

भाष्ये प्रत्याख्यायत एतदिति। एतत्। ऐज्विषयमेव इग्गिति सूत्रं वर्तमानसामीप्ये लट्। भूयसा चेति। तद्वारकस्थ
यः स्थानसाम्यादित्यर्थः भाष्ये इदमपीति एङ्विषयमपीत्यर्थः सस्थानत्वादिति इकारोकाराभ्यां समानस्थानत्वा
दित्यर्थः तदाह तालव्य इति। तालव्य एवेत्यर्थः इदं चमतमष्टमे पि भाष्ये स्पष्टं। शाब्दपरविप्रतिषेधेनोत्तरभागसह

ऐचोश्चेति। अर्द्धमात्रावर्णस्य अध्यर्द्धमात्रे वर्णे वर्णयोः। भूयसा च व्यपदेशो भवत्यग्रामवदितीकारोका
रावेव भविष्यतः। सिद्धमेङ इति। अर्धेकारार्धौकारौ न स्तः। तत्र तालव्य एकार ओष्ठ्य ओकार इति तयोः स्थान
ईकारोकारावेव भविष्यतः। तावेवेति। ताभ्यामुपदिष्टाभ्यां दीर्घप्लुतयोरपिग्रहणं सिध्यतीति भावः। गुण
संज्ञायां दीर्घविकारोकारौ निर्दिश्यो। सुजातइति। अंतः पादस्य स्याव्यपरस्याकारस्यार्द्धमेकारमर्धमोकारं
चै चविदधति। पारिषद्कृतिरिति। गीतिवशात्तथोच्चारणमित्यर्थः॥

शाइति विवरणोक्तं तु चिंत्यं अंतरंगत्वेन पूर्वसदृशस्यैवापत्तेः स्पष्टं चेदं नित्यः परयणादेश इत्यादिना चः परस्मिन्नि
त्यत्र भाष्ये। भाष्ये तावेवेति। लाघवादिति भावः ग्रहणमिति। प्रदेशेषु इति शेषः नन्वेवं मात्रिकयोरेव गुणसंज्ञा स्यादत आ
ह गुणेति। एवमपि अत्रयोर्ह्रस्वपाठे ऽर्धमात्रा लाघवं भवति। आकारस्यार्द्धमिति। सुजाते एअश्वेति। अकारलेखस्तु प्रामा
दिकः शास्त्रविशेषाध्यायिनां समवायः परिषत् पर्षद्वा तत्र भवाकृतिरित्यर्थः॥ ॥ ॥

तदेवमतपरतपरत्वादिमतसाधारण्येनैचइग्गितिसूत्रस्यकर्त्तव्यताकर्त्तव्यतेउपयाघातपरत्वादिमतेसाधारणंदूष
णमाह।भाष्येएकादेशइति।एकःपूर्वपरयोदीर्घइतिसूत्रंकार्यमित्यर्थः।अन्यस्यासंभवादिति।अयंभावः।यथास्या
घोरित्यत्रातपरत्वेस्याद्घोर्दीर्घस्यस्थानेद्युमास्थेत्येवदीर्घेकारेसिद्धेपुनर्वचनमदीर्घार्थमित्यविशेषात्ह्रस्वप्लुतयोः
प्रसंगेतदुक्तंप्लुतश्चाविषयेइति।एवंचदूराद्धूतादिविषयेप्यनेनैवप्लुतेपक्षेनुवाददोषस्तत्रदूरहुतप्लुतएवप्राप्नोतीति

आंतर्यतइति।अन्यस्यासंभवादिदमत्रनास्तिप्लुतश्चविषयेस्मृतइति।अप्येकइति।प्रथमयोरितिसि
द्धेएतदपिकिमर्थमुच्यतइतिचेत्वाछंदसीत्यत्रानुवृत्त्यर्थंतस्मात्पूर्वप्रकृतिः पूर्वरूपार्थासिवोत्तरत्रानुवर्त्त
तइतिविद्धमितिपूर्वरूपंभविष्यति॥अथवेति।विधिनियमसंभवेचविधिरेवबलीयानितिविधेर्बलीयस्त्वा
न्नियमोनभवति।हलएवदीर्घत्वंयथास्यात्उतइत्यादौमाभूदिति॥ ॥

स्वद्वाद्वंद्वइत्यादिविषयकशास्त्रवैयर्थ्यमेवेत्यनुवाददोषःसोव्यएवेतिवैषम्यमिति।भाष्येयःसइति।प्रसिध्यर्थकंवा
छंदसीत्यस्यात्रानुवृत्त्यर्थमित्यर्थः।पूर्वरूपार्थेति।पूर्वव्यक्त्यात्मकपूर्वरूपार्थेत्यर्थः।भाष्येपरइतीयतेति।ह्रस्व
त्वादिरूपमितिभावः।सिद्धांतेतुरूपग्रहणंस्पष्टार्थमेव।अस्यभाष्यस्यपूर्वपक्ष्युक्तित्वात्अकारोनेति।रपरत्वेपि ५५
द्विमात्रत्वरूपदीर्घत्वासंभवः।विगृहीतस्येति।दीर्घप्रकृतिपरिभाषयोर्विरोधेनजातिपक्षेवातद्विषयकलक्षणानुपप्लवादितिभावः॥

ननुगुणवृद्धिसंज्ञयोस्तपरत्वाभावात्पूर्वोक्तदोषापरिहृतेश्चभाष्यमयुक्तमित्याशंक्याहतपरसंज्ञीति।तपरशब्दनि
र्दिष्टसंज्ञिनिगुणवृद्धिसंज्ञेप्रवर्त्ततइत्यर्थःएवंचत्रिमात्रादीनांतत्रसंज्ञितया।निर्देशाभावोक्तदोषइतिभावःभाष्येन
नुचेति।।एवंचेदैचोनतपरावितिभावःनेत्याहेति।सएवतपरइतिनेत्याहेत्यर्थःअर्थभेदेनशब्दभेदेतंत्रन्यायेतिति
द्भेदेपिशब्दैक्यपक्षेआहएकस्यैववृद्धिशक्तित्वादिति।एकशेषेतिसमाहारद्वंद्वविषयेएकशेषाभावेनेकवचनं।

तपरेइति।तपरसंज्ञिसहचरितेगुणवृद्धिसंज्ञेइत्यर्थःतादपीतितंतन्यायाश्रयणादेकस्यैववृद्धिशक्तित्वा
देकशेषाश्रयणाद्वाअनेकार्थाभिधानमितिभावः।बहुव्रीहिवादीचोदयति।किंदकारइति।समासद्वय
वादीतंप्रत्याह।अथकिंतकारइति।नवकेवलबहुव्रीहिवादिनोनिष्प्रयोजनंतपरत्वं।ऋकारस्थानगत्वा
द्भिन्नकालानांग्रहणाप्रसंगात्गुणानांचाभेदकत्वात्तत्प्राप्त्यर्थत्वाभावात्।अथवासंदेहार्थोमुखसुखा
र्थोवातकारएवंदकारइत्यर्थः

नुपपत्तेदंचिंत्यं।।सुखमुखार्थइतिपाठेमयूरव्यंसकादित्वात्समासःननुएदैजितिसंज्ञायास्तात्परत्वेपिसंज्ञि
नामेकारादीनांकिमागतमितिचेन्न।तपरशब्दबोध्योपिवर्णस्तत्कालस्यैवसंज्ञेत्यर्थान्नदोषःगुणानां
चेतिअणस्तुगुणानांतत्वाभावेपिअनणत्वादेवदीर्घादिविषयेतत्वमितिभावः॥ ॥छ॥ ॥

ननु दित्वे दिवउ दित्यत्र तत्कालग्रहणं न स्यादत आह तपरसूत्रे चेति। इहेति। तपरसूत्रे दकारानाश्रयणे न
वेत्यपि बोध्यं। पकारस्थानिक इति। तस्य चैतद्दृष्ट्यासिद्धत्वान्न तत्र तपरसूत्रप्रवृत्तिरिति भावः। अवयवग्रह
णे नावयवसदृशवर्णग्रहणेन ग्रहणं स्यान्न वेति भाष्यार्थः तत्फलितमाह। तत्र केवलेति। नन्वकारेणो

तित्स्वरितमित्यत्र भाष्येणास्य विरोधस्तत्र हि तितिप्रत्ययग्रहणं चोदितं। इहमान्भूत् छत्स्यामिति। ततो दित्वा
श्रयेण प्रत्याख्यातं। तपरसूत्रे च दकारश्रवर्त्वन्नतो निर्दिश्यते तेन च तत्कालस्य ग्राहको दकार इत्युक्तं। इ
ह च दकाराभ्युपगमेन जवादिषु दोषः परिहृतः अत्राहुः। पकारस्थानिको धकारस्थानिको वा दकारोत्र
विवक्षितः। कस्तर्हि दिकार इति। वर्णांतरसमानाकृतपद इति। आकारादिषु अकारसदृशा अवयवा लकारल्का
रयोरेफलकारसदृशावयवौ संध्यक्षरेषु अकारोकारसदृशाः। तत्र केवलवर्णकार्यमवयवेषु भवति न वेति
विचारः। इहसमुदाया अपीति। ऋलृ एओऐऔ इति। अवयवा अपीति। अइउण्‌ ऋलृक्‌ इति। तत्र समुदायपरे
निर्देशसंनिहिता अप्यवयवा नांतरीयकत्वादेजादिसंज्ञां न लभंते। अवयवपरस्त्वनिर्देशो समुदायो न संज्ञां लभते।।

एङ वयवग्रहणसंदेहवत् अकारादीनामेङादिसंज्ञा प्राप्नोतीति विचारोपि कुतो नेत्यत आह। तत्र समुदा
येति। अत एव प्राटतीत्यादौ न पररूपं। तत्र दृष्टांतमाह। अवयवपरे चेति। यथावयवपरे निर्देशे समुदा
यो न संज्ञां लभते एवं समुदायपरे निर्देशेऽवयवा न तत्संज्ञा इत्यर्थः।। ।। ५६

तदुपपादयति। यथेति। अन्यत्रेति। सर्वस्यान्यत्र यथाङ्निर्देशे समुदायनिर्देशो स्वपर एव सर्वस्यावयवस्यान्यत्रानिर्दे
शे तु समुदायनिर्देशो निर्दिष्टावयवपर इति विवेकः नन्वेजादिसंज्ञानामवयवावृत्तित्वे कथमेचोनिवर्त्तकेनायादि
ना तदवयवस्य निवृत्तिरत आह तत्रासत्यामपीति। तन्निवृत्तिं विना समुदायनिवृत्तेः कर्त्तुमशक्यत्वादिति भावः

यथाह यवरेत्यादान वत्कस्य हलो दुःखेनोच्चार्यत्वान्निर्दिष्टोप्यकारोन्यत्र प्राधान्येन निर्देशाद्धलासंज्ञां न प्र
तिपद्यत इति दध्यत्रेत्यादावनच्क एव यणादेशः प्रवर्त्तते। तन्नासत्यामप्येजादिसंज्ञायामयादयः समु
दायादेशा अपि नांतरीयकत्वादवयवान्निवर्त्तयंति। एवं स्थिते। अग्नेइंद्र इत्यादौ यत्रावयवकार्यं प्राप्नो
ति समुदायकार्यं च। तत्रांतरंगत्वात्तत्र च साक्षाच्चोदितत्वात्प्रत्यक्षात्परत्वाच्चावयवकार्यप्रसंगः। अवय
वावगतिपूर्वकत्वाद्धि समुदायावगमस्य समुदायकार्यं बहिरंगं। अयादीनां चावकाशः अग्न आयाहीति।
नन्वत्रापि यणादेशोऽवयवस्य प्राप्नोति। येन नाप्राप्त इति वा मध्येऽपवादा इति वा यणएवायादयो बाध
काः स्युः। तत्र यथा दधीन्द्र इत्यत्र दधिशब्दस्थ इकारः सवर्णदीर्घत्वं प्रतिपद्यते एवमेकारस्थोऽपि प्रतिपद्येत।।

अवयवकार्यं दीर्घः समुदायकार्यमय् तत्र च साक्षादिति। दीर्घे अपादिकार्ये हि समुदायव्यवधानेनावयवो नोदितो
न साक्षादिति भावः साक्षाच्चोदितत्वं प्रत्यक्षत्वे हेतुः नन्वायादिरनवकाशो त आह। अयादीनामिति। नन्वि
तितत्श्च विध्यंतरपूर्वको पादिः सर्वस्य बाधकः स्यादिति भावः परिहरति येनेति।। ।।

प्राधान्येनानिर्देशादिति। तदुच्चारणं विना समुदायोच्चारणस्याशक्यत्वादित्यर्थः तदाह तद्यथा वृक्ष इति। तदुपपा
× अस्यैजादिसंज्ञाभावेपि स्वतंत्राकारेण ग्रहणं स्यादिति शेषः भाष्ये अभ्यंतरश्चेति × दयतीति तिरोहितत्वादित्यादि
ना। समुदायकार्यपारतंत्र्यादिति। समुदायसंपादनरूपे कार्ये पारतंत्र्यादित्यर्थः स्वकार्यस्याप्रयोजकत्वादि
ति। स्वकार्यनिरूपितप्रयोजकत्वाभावादित्यर्थः तत्प्रयोजकत्वाभावेप्यत्वाद्यभाव इति भावः वचनादिति। अआ

प्रत्याहारे एओङ् ऐऔजित्यत्रावयवानां प्राधान्येनानिर्देशादित्येवं ग्रहणपक्षशंका। इदानीमग्रहणप
क्षशंकाबीजमुपन्यस्यते। अभ्यंतरश्चेति। तिरोहितत्वादवयवानां समुदायकार्यपारतंत्र्यात्स्वकार्यस्याप्र
योजकत्वान्नरसिंहवज्जात्यंतरयोगाद्वर्णांतरसारूप्यमात्रेण तत्कार्याप्रवर्त्तनादित्यर्थः। समानाक्षरे
ति। समानशब्देन पूर्वाचार्यनिर्देशादकोऽभिधीयंते। दश समानादिति वचनात् तेन सवर्णे कार्यं प्राप्नोती
त्यर्थः। असिद्धत्वाच्चेति। असिद्धवदत्राभादित्यनेन॥

इई उऊ ऋॠ ऌॡ दश समाना इति पूर्वव्याकरणवचनादित्यर्थः समानकार्यं। अक्रूप समानाक्षरकार्यमित्यर्थः
सवर्णकार्यमिति पाठे सवर्णदीर्घमित्यर्थः। भाष्ये दीर्घाच्छे इति। दीर्घस्य छे तुगिति हि तदर्थः ननु ह्रस्वस्येत्यत्राच इत्ये
व सिद्धे ह्रस्वग्रहणसामर्थ्यादेव तुग्नेति चेन्न। पदलाघवाभावादित्याशयात्। अस्ति ही ति तत्र दीर्घादित्य
स्याभावे कु — छायेत्यादावपि विकल्पः स्यादिति भावः असिद्धवदिति। वर्णे तु इच्छायेनेति भावः॥ ॥

भाष्ये उत्तरार्थमतदिति। इह किंचित्प्रयोग इति न्यायस्तु नाश्रितः अत्र केवलाकारोच्चारणे उत्तरत्र ककाराकारयो
रुच्चारणे गौरवादिति भावः संनिपातेति। नच दीर्घेणैव सा निवार्त्तितः दीर्घेप्यत्वजातिसंबंधसत्त्वेन न तथा संनिपा
तक्षतिर्लोपे तु तस्यापि निवृत्तेस्तद्विरोधस्य स्पष्टत्वात् इति भावः। परं तु जातिपक्षे तपरसूत्रं व्याप्यजातिनि
र्देशस्यैव बोधकमिति यत्वनिमित्तसंनिपातस्य दीर्घेणानिवृत्तिर्जातैवनकस्याप्यनुवृत्तिस्तस्माद्व्याप्यात्वजा

त्यत्तर्हीति। नन्वसति कित्वे आकारस्यास्याकारस्य लोपे कृते द्वयोरकारयोः पररूपस्य धातुं प्रत्यं
तद्भावात् छंदोगायेत्यत्रातो धातोरित्याकारलोपप्रसंगः नैष दोषः सन्निपातपरिभाषया लोपो
न भविष्यति। अकारं ह्याश्रित्य यशब्दः कृतो लोपस्यानिमित्तं। दीर्घत्वं तु कष्टायेति निपातनाद्भ
वति॥ ॥

तियआदि सन्निपातनिमित्तो दीर्घो न स्वसंनिपातविघातकलोपनिमित्तं संनिपातपरिभाषयाश्च स्वप्रवृत्तेः
प्राक् स्वनिमित्तभूतो यादृशः सन्निपातः स्वातिरिक्ततद्विघातकस्य स्वयमनिमित्तमित्यर्थः मात्राकालिकत्वसमा
नाधिकरणव्यापकजातिनिर्देशपक्षेप्यंगसंज्ञा तत्स्वनिमित्तं स्यादिति कन्मेजंतसूत्र वक्ष्यमाणभाष्यरीत्यायादेशनिमि
त्तसंनिपातस्य न लेशतोपि सत्तेति वदंति। प्रातर्ऋधंतंतत् लृकार इत्यादौ रोरितो लौतितुनापादितं तस्याभितोऽभागसत्त्वेन तेन व्यव
धानान्नदप्राप्तेः॥ ॥

अग्नेइंद्र इत्यादौ सवर्णदीर्घव्यावृत्तये आह सामान्येनेति। गोध्य चो संख्येति गोग्रहणं नौध्य चष्टनिति नौग्रहणं। वर्णावयवा
श्रयकार्याभावस्येति वर्णावयवेषु भेदेनाप्रतिभासमानेषु वर्णाश्रयकार्याभावस्येत्यर्थः तेन मातॄणामित्यादौ णत्वादिसिद्धिः
भेदेन प्रतिभासात्। सामान्यापेक्षज्ञापकं विनापि न्यायेन निर्वाहमाह भाष्ये अयं त्विति अभिन्नबुद्धिविषयस्येत्यस्य व्याख्या

एकवर्णवदिति। अवयवसंख्याश्रयणेन वाक्शब्दस्य षच्त्वात् तन्निमित्तं कार्यं प्राप्नोतीति एकवर्णवदित्यतिदे
शः क्रियते। गोनौग्रहणं ज्ञापकमिति। सामान्येन ज्ञापकं। वर्णावयवाश्रयकार्याभावस्येति अग्न एहीत्यादावेङः प
दान्तादतीत्याद्यपि न भवति। भाव्यप्रवृक्तस्येति। व्यपवर्गो व्यपवृक्तः भेदः। तेनाव्यपवृक्तस्याभिन्नबुद्धिविषय
स्यैकत्वालंबनज्ञानग्राह्यस्य समुदायस्य यो ऽवयवस्तस्मिंस्तद्विधिः पृथग्भूतवर्णविधिर्न भवतीत्यर्थः अव्य
पवृक्तस्यावयवस्येति। व्यधिकरणे षष्ठ्यौ अव्यपवृक्तस्य समुदायस्य यो ऽवयवस्तस्येत्यर्थः नहि संभवमात्रेण
कार्याणि क्रियन्ते अपि तु यत्र तद्बुद्धिरस्ति तत्रैवेत्यर्थः। माषानौक्रय्याइति निषेधस्तु मिश्रेष्वपि प्रवर्तते तत्र तद्बु
द्धितद्रसावेदनसंभवात्।

एकत्वालंबनज्ञानग्राह्यस्येति। समुदायस्य यो ऽवयव इति। वर्णसमुदायस्येत्यर्थः व्यधिकरण इति। सामानाधिक ५८
रण्येनान्वये ऽव्यपवृक्तस्येति व्यर्थं सर्वस्याप्यवयवस्यावयविना ऽव्यपवृक्तत्वादिति भावः भाष्ये अयं वा आश्र
यः अवयवसदृशास्वतंत्रवर्णाश्रयः उक्तेर्थे युक्तिमाह नहीति॥ ॥श्रीमोरेश्वरायनमः॥ ॥

Dr. BHAU DAJI MEMORIAL

ननु सामिधेनीशब्दस्य ऋक्शक्तत्वेन काष्ठमग्नावाधीयत इति भाष्यमयुक्तमत आह चर्यादिति। तदाधेयत्वेनेति भावः
तत्र सप्तदशेति। यद्यप्येकैका समिद् रत्निमात्रमिति मिलितानां सप्तदशानां समिधां सप्तदशारत्निमात्रत्वं भवति ए
कस्यापि तावत्त्वमस्ति तथाप्यव्यपवृक्तसमुदायावयवत्वात् न व्यपवृक्ताश्रयकार्यप्रसंग इति भावः नह्यव्यपवृक्त
त्वमात्रनिबंधनं तदभ्याधानं किंतु असंभवनिबंधनमित्याह। भाष्ये विषय इति। आहितपुनर्ग्रहणस्य निषिद्धत्वा

सप्तदशेति सामिधेनीशब्दस्तद्वाचकः साहचर्यात् काष्ठेषु वर्तते। तत्र सप्तदशारत्निः काष्ठे सप्तदश काष्ठानीति
बुद्धेरभावात् न तस्याभ्याधानं। असंभव इति। अर्धचतुर्हस्ता हि वेदिः। यथा तद्धीति। अल्पप्रमाणत्वात्तस्या
स्तत्संभव इति भावः॥ अव्यपवृक्तमिति॥ व्यपवर्गस्याभावेनेत्यर्थः॥ ॥छ॥ ॥

देकस्य काष्ठस्य प्रवृत्त्यभ्याधानं न संभवतीति भावः॥ युक्त्यंतरमाह असंभवश्चेति। तमुपपादयति अर्धचतुर्थह
स्तेति। अर्धेन चतुर्हस्तेति तृतीयातत्पुरुषः समिधोग्नेर्वेदिबहिर्विनिषेधात् असंभव इति भावः अव्यपवृक्तमिति अ
पभावे ऽव्ययीभावः तदाह व्यपवर्गस्येति वस्तुतस्तत्पुरुष एवायं व्यपवृक्तः भिन्नतेज मांस रूपा गावः सर्वपार्श्वेत्यर्थः
न भाव्ययीभावस्याभावोद्दित्यग्रे वक्ष्यते॥ भाष्ये कामचार इति स्पर्शे कामचारस्तेन शौचाभाव इत्यर्थः॥ ॥

एङोः संश्लिष्टावर्णत्वेन व्यपवर्गस्यास्पष्टत्वात्संध्यक्षरग्रहणमैजन्विप्रायमित्याह ऐऔदिति अकारस्येतियद्यप्येचो
विवृततमास्तथापिविवृततरत्वमस्त्येवेतिभावः प्रयत्नभेदादेवं एङैचोः परस्परंसावर्ण्याभावः एङोविवृततरत्वादैचां
विवृततमत्वादितिबोध्यं। नुडादीति। आन्नेदित्यत्र नुट् आदिनाच ऌपेदित्यत्रलत्वंमातॄणामित्यादौणत्वंचेतिबो
नुट्
यत्रतर्हीति। ऐओदित्यत्रहिस्फोटाकारप्रतिभासोस्ति। विवृतत्वादिति। अकारस्यविवृतोपदेशादंशेत्रे
कर्षोविवक्षितस्तदाह। विवृततरमिति। तत्रप्रयत्नभेदादसावर्ण्यादिकारेणसंध्यक्षरावयवस्यग्रहणंनास्ती
त्यर्थः। तदेवमाकारादिस्यस्यावयवस्यभेदेनाग्रहणादग्रहणंसंध्यक्षरस्थस्यत्वसावर्ण्यात्। ऋकारस्थ
स्तरेफोभेदेनप्रतिभासात्गृह्यतइतिनुडादिसिद्धिः॥ अथवेति। नरसिंहचद्वर्णान्तरत्वात्सादृश्याद्वृ
प्रत्यभिज्ञानातत्वासिद्धाद्दृष्यगुपलब्धानांवर्णानांसमुदायेनास्तिसत्वं। समुदायवाचोयुक्तिरपितत्र
वर्णान्तरेनतात्विकीभ्रांतिवशात्त्ववयवसद्भावाश्रयेणप्रवृत्ता॥
ध्यंसादृश्याच्चेति। चस्त्वर्थेस्तसमुदायोसंध्यक्षरादौ॥ सत्यपिगोसादृश्येगवयेगोत्वस्येवसंध्यक्षराद्यवयवेषुअत्वादिजाते
रभावात्अकारादिग्रहणेनग्रहणंनेतिभावः ऐकारादीनामेकैकप्रयत्नजन्यत्वेकैत्वमेवअकारादिवत्॥ अतएवेषां ५८
पदवन्नवर्णसमूहत्वेनप्रतिभासइतितदेवाहसमुदायवाचइति॥ भ्रांतिवशादिति। भ्रांतिगृहीतावयवसद्भावाश्र
येणेत्यर्थः एवंचभ्रांतिरेवग्रहणपक्षवीजमितिभावः॥ अतएवगोनोग्रहणंचरितार्थं विनाभोणत्वं॥ ॥

ननुविकरणविशेषनिर्देशेनश्नाविकरणनिवृत्यर्थंसूत्रंस्यादतआह नन्वश्नातिरेवेतितथाहिसतिनाश्नइत्येववदेदितिभा
वः नियमज्ञापकस्य। नियमबोधकस्य। नन्वखंडवर्णपक्षेऋकारप्रश्लेषोपिकथंसिध्यतीत्यतआह तत्र ऋकारेति। एवंच
रेफपदेनतत्सदृशाआरोपितरेफत्ववानपिगृह्यतइतिफलितं॥ मात्रपादः सामान्यात्निप्रायइत्याहजातीतिजातिश्चाव
यवानवयवसाधारणीत्याशयेनाह। ततश्चेति। एवंविधाचरत्वलत्वजातिरेवेत्यतिप्रसंगोनस्थान्यादेशभावश्चजा
तेर्व्यक्ति
अश्नोतेरेवेति। सामान्येनावलोपधोनिवर्त्यतेनत्वश्नातिरेव। सामान्यापेक्षत्वान्नियमज्ञापकस्यअविशक्ति
कइति। तत्रऋकारनिर्देशसामर्थ्याद्धिभागप्रकल्प्यादेशोविधीयते। स्फोटमात्रमिति। जातिस्फोटइत्यर्थः॥
ततश्चांतर्भूतानंतर्भूतरेफलकारव्यंग्यसामान्यंस्थान्यादेशभावेनाश्रीयते॥ ॥छ॥ ॥

तेर्व्यक्तिधारकोबोध्यः वस्तुतः स्फोटएवश्रोत्रग्राह्यः वायुनिष्ठरत्वादिनाचतस्याभिव्यक्तिः एवंचसाक्षाद्भलवतोभावे
नकल्प्यतइत्यत्राप्यवृत्तावस्यवैयर्थ्यापत्तिः एवंचरेफाबभासिनः स्फोटस्यप्रसंगेलकारावभासः स्फोटइत्यर्थः एवं
चकृपावपितत्प्रवृत्तिः संभवत्येव। तत्रापिरेफावभाससत्वात्॥ आकारादौतुनैवंह्रस्वाद्यवभासइतिनतत्राकारो
वभासप्रयुक्तकार्यापत्तिः तदुक्तेरश्रुतेरित्यादि॥ ॥ॐ श्रीकाशीविश्वेश्वरायनमः॥ ॥छ॥ ॥

यत्तु स्वतंत्रास्वतंत्रसाधारणजातिपरतयैतद्भाष्यव्याख्यानं। तन्न। तादृशजातौ मानाभावात्। नरसिंहदृष्टांता
नुपपत्तेश्च। सादृश्यानुप्रत्युभिज्ञेत्यादिस्वोक्तिविरोधापत्तेश्च। किंचैवं सति रजातेरित्येव भगवान्वदेत्। किंच तादृ
शजातिसत्त्वे वर्णैकदेशानामपि तज्जातिमत्त्वेन वर्णग्रहणेन ग्रहणपक्षस्यैव सिध्या ग्रहणपक्षमुक्त्वा ऽथवा न गृ
ह्यंत इति पक्षेतत्समाधानपरभाष्यासंगतेः अत एवाष्टमे रषाभ्यामिति सूत्रे यथा नरसिंहावयवानां नरत्वसिंहत्व

यत्तदिति। रेफाज्झल इति समानाधिकरणे पंचम्यौ॥ अव्यवाय इति। ऋकारेणयथा दीर्घो गृह्यते एव
मृकारस्थाग्गो पीतिभावः न सिध्यतीति तस्य भागस्य स्फुटप्रतीत्यविषयत्वाज्जात्यभिव्यक्तिहेतु
त्वाभावाच्चेतिभावः एतैरेवेति। अकारादयोऽप्यकारादिभिः प्रत्यापितत्वादाक्षरसामाम्नायिकाः भक्ति
स्फ। न प्रत्याप्यानप्रत्यायिके तिनियमेननिवर्त्यते॥

जातियोगाभावात्पुरुषमृगराजाभ्यामेकाकृतियोगाभावएवं वर्णवर्णैकदेशयोरपीति कैयट आह तेविदंति। ऋका
रेणेति ऋकारावयवस्य रेफस्यैव तज्जभागस्यापि केनचिद्दकारादिना ग्रहणं दृष्टत्वमिति मन्यते जात्यभिव्यक्तीति अत्रा ६०
दिजातीत्यर्थः एवंचनकेनाप्यचातत्ग्रहणमिति भावः। अ[illegible]। तन्वाकोरादिभिर्व्यवायेतिनस्यात् आक्षरसमाम्नापि
कत्वाभावादत आह आकारादयोपीति भक्तिस्त्विति। असवर्णत्वादनुपदेशाच्चेति भावः॥ ॥छ॥ ॥
२ = ऋजात्यभिव्यक्तिहेतुत्वाभावस्फुटप्रतीतिभासाविषयत्वं हेतुः चोहेतौ अतो न सिध्यतीत्यर्थः = २

भाष्येनृनमनशब्दमिति संज्ञाभूतमित्यभिप्रायः गंधर्वगानमित्यादौ सुबुत्पत्तेः पूर्वसमासेपिणत्ववारणायअखंडपदे
इत्यर्थकसमानपदे इत्यत्र पदस्यार्थबोधकस्यैव ग्रहणेन सखंडत्वेऽसंज्ञायांणत्वप्राप्त्यभावादिति बोध्यं। छंदस्यदि
त्यस्यतुनात्रप्राप्तिः दृष्टशेविषयेवग्रहाभावादित्याहुः बहिरंगावृद्धिरितित्रिपाद्यामपि बहिरंगपरिभाषाप्रवर्त्तत इति
वार्तिकमते नैतत्भाष्यमतेतु तन्नोति शब्दपावस्यैव ज्ञापकताबोध्या अतो नो ण इति। मातॄणामित्यादौ दीर्घस्य बहिरं

गुरोरिति। ऐकारोगुरुस्तस्य टेरिति सिद्धं। तंत्रन्यायाश्रयणञ्च गुरोरपि स्थाने प्लुतो भवति देवदत्तेति॥
क्रियते न्यास एवेति। अवश्यकर्तव्यतां दर्शयति। व्यपदेशोपि भागयोर्विरित्ततरत्वात् प्रयत्नभेदादिका
राकाराभ्यां अग्रहणं दद्ध्वाभावात्॥

गादिसिद्धत्वाण्णत्वं। यथा प्रशास्तॄणामिति निर्देशाद्व्रतपरत्वं मुखमुखार्थमेव उक्तस्त्राप्येवमेव फलाभावात् ध्वनि
तं चेदं वृत्तौ ननु गुर्वव यव टेरित्यर्थांगीकारे गुरुरूपटेः प्लुतो न स्यादत आह तंत्रेति। स्थानषष्ठ्यंतावयवषष्ठ्यंतयोर
रूपशब्दयोरित्यर्थः॥ गुर्ववयवटिश्चेच एवसंभवति॥ नान्यस्य आकारादेः तदवयवस्यव्यपदेशत्वाभा
वात् इति भावः अभ्वाभावादिति॥ तन्मूलटित्वाभावाच्चेत्यपि बोध्यं॥ ॥छ॥ ॥

संयोग इति। संयोगसंज्ञार्ह इत्यर्थः तस्यैकवर्णत्वमिति। एवं च संयोगसंज्ञा न स्यादिति भावः संयोगे इति भाष्यं तु संयोगार्ह इत्यर्थपरमिति तात्पर्यं॥ शिष्टसमाचारः शिष्टव्यवहारः भाष्ये मात्राकालो त्रेति। बहुव्रीहिः संयोगोन्यपदार्थः॥ मात्रिकव्यंजनाभावेनुपदिष्टत्वं हेतुः कुक्कुट इत्याद्युच्चारणं तु न उपदेशः अनुपदिष्टत्वं नाम अक्षरसमाम्नायेऽपठितत्वं ग्राहकशास्त्रेण गृहीतत्वं च॥ अनुपदिष्टं सत्सत्त्वेन कथं शक्यं विज्ञातुमित्यर्थः एवं चानुपदिष्टस्यासत्त्वात

तुल्यरूप इति। तुल्यरूपावयवत्वात्संयोगस्तुल्यरूपः॥ तस्यैकवर्णत्वं पूर्वपक्षे सिद्धांते तु वर्णद्वयरूपता। आशूच्चारणात्तु भ्रांतमेकत्वज्ञानमिति शिष्टसमाचारः॥ आत्रायीति। सानुनासिकनिरनुनासिकौ द्वाव त्र वर्णावित्यर्थः॥ ॥

त्प्रतिपत्तिरशक्येत्याह असच्चेति॥ क्वचित्तु असच्चेत्यादिग्रंथो न दृश्यते। अनेन लृकाराभावे तस्यासत्त्वशंकापातयोः सावर्ण्यविधिरप्यशक्य इति सूचितं। यत्रैतदस्तीति भाष्ये हलोनंतराद्दित्यत्र यकारादिभिरस्य ग्रहणे हल्द्वयाभाव इति भा ६१
वः सानुनासिकेति। अण्दिक्षास्त्रं हि विद्यमानस्य लोकसिद्धस्य सवर्णस्य ग्राहकमेव न तत्प्रसिद्धसवर्णकल्पकमिति भावः॥ ॥

हयवरट्। नन्वयं हकार इत्यनेनैकत्वं हकारस्य सूचितमिति कथं तद्विरुद्धं पूर्वश्चेत्यादिना भेदाश्रयणमत आह पूर्वपरेति एतद्भाष्यादेकत्वं वर्णानामित्येव पक्षो भगवतः संमत इति ज्ञायते। भाष्ये यदि पुनरिति। न चैवं परहकाराभावे लकारस्याप्यभावेन तत्राद्याश्रयणेन हलंत्यमित्यत्रान्योन्याश्रयपरिहारो वक्ष्यमाणो विरुद्ध इति वाच्यं। इत्यं ह इति न्यासेन लंत्यं यल् इति न्यासेन चातत्परिहारात् लाघवाभावेपि एवं कर्तुं शक्यं न वेत्येव विचारतात्पर्यात् यथाहरंत्यस्यैवावृत्या हे बोधकसूत्रसमुदायांत्यमिदित्यर्थः परं तु परहकाराभावेपि भइत्येवं सूत्रं कार्यं प्रातिशाख्यादिप्रसिद्धहलादिप्रत्याहारसिध्यर्थं तदर्थं रांत्ये तस्यापि शक्तिकल्पने गौरवात् हलंत्यमि

हयवरट्। पूर्वश्चेति। पूर्वपरोच्चारणक्रियाभेदादेकस्यैव हकारस्य पूर्वपरव्यपदेशः॥ शश्छोटीति। हकारपरस्य शकारस्याभावात्प्रसंगोच्चारितमेतत् उक्तेचेति। अश्वमपि वक्तव्यं भो हसतीति रोर्यत्वार्थं॥ ॥

त्यस्यावृत्याहल्प्रत्याहारसिध्यर्थे सूत्रसमुदायांत्यमिदित्यप्यर्थ इत्यदोष इत्याहुः॥ अट्ग्रहण एव्वेति। अट् गृह्यंते येषु सूत्रेष्वित्यर्थः शश्छोटीत्यस्योदाहरणदानेबीजमाह हकारपरस्येति न च तत् शाद्वित्यादेत्युदाहरणं संभवः शास्त्रबोधितं सौत्रं च विहाय हलो उच्चारणं वृथा चं विनोच्चारणस्यासाधुत्वेन तादृशोदाहरणाभाव इत्याशयात्। अत्र च भाष्ये एतदुदाहरणदानमेव मानम्॥ आटोतिदीर्घादिटीत्युत्पो रूदाहरणं महाँ हि स इति अट्कुप्वेति सूत्रेपि ग्रहणफलमर्हं योतिबोध्यं॥ अश्वमपीति इदमिण त्वस्याप्युपलक्षणं। तेन लिलिहि ढ्वे इत्यादौ विश्वाषिट इति टत्वविकल्पसिद्धिरिति केचित्॥ ॥

भाष्ये हशिचेतिसिद्धांतरीत्यानिर्देशः। इदानीतु यशिचेति सूत्रं अहकाराणिस्युरिति अतस्तत्र हकारग्रहणं कर्त्तव्यमिति भावः। अदाग्धा
मिति ष्ठत्वस्यासिद्धत्वादिति भावः स्वरूपप्रतिपत्त्यर्थ एवायमक्षरसमाम्नाय इति भ्रमं वारयति भाष्ये यदि किंचिदितितथ्याचष्टे
प्रयोजनार्थ इति। शास्त्रीयप्रयोजनार्थ इत्यर्थः एवं चाद्यहकारस्याशिणोरपि प्रयोजनं सूचितं अतएव मंचाहसंतीतिपुंयो
गादिति सूत्रे भाष्यप्रयोगः संगच्छते एतेन पूर्वहकारोपदेशप्रयोजनवार्तिके न्यूनतापरिहृता। कर्त्तव्य इत्यस्यास्यादिति शेषः
उपदेशोत्रोच्चारणमात्रं अन्यत्रापि प्रत्याहारांतरे सर्वथा हकारस्य द्विधोपदेशः कर्त्तव्य इत्यत्रास्य तात्पर्यं दोषप्रयोजनेति

यदि किंचिदिति। प्रयोजनार्थो हि वर्णानामुपदेशो न स्वरूपप्रतिपत्त्यर्थः॥ इदमिति। उभयत्रापि दोषप्रयोजनसद्भावा
त्प्रश्नः। स्वर्गयतीति णकारोत्र प्राप्नोतीति। नह्यत्र सवर्णग्रहणमस्ति। न स्रक्क इति। द्विर्वचने कृते चतस्यासिद्धत्वा
द्रोरीति रेफलोपो नास्ति। हलोयमामिति। लोपस्य पाक्षिक इति पक्षे रेफद्वयश्रवणप्रसंगः। कुंडरथेनेति। अनु
नासिके नैव परसवर्णेन भाव्यमिति नियमाभावाद्रेफः प्राप्नोति तस्य चासिद्धत्वाद्रोरीति रेफलोपो नास्ति॥ ॥

अन्यतरपक्षीय दोष एवान्यतरपक्षे प्रयोजनमिति बोध्यं॥ णकारोत्रेति। स्थानेंतरतमत्वादिति भावः ननु रेफस्य सवर्णा
भावात्कथमत्रानुनासिको तआह। नह्यत्रेति। ननु द्वित्वेपि रोरीति हलोपमामिति लोपान्न दोषो तआह द्विर्वचनइ ६२
ति॥ भाष्ये ऽवृद्ध्युपधादिति॥ अवृद्धिति ल्युत्तपंचमीकं॥ ननु पूर्वोपदेशे इणङ इत्यादौ यथासंख्यनिर्वाहः कथमि
ति चेन्न संज्ञाविधानसामर्थ्येन तत्र तज्ज्ञावितपक्षाश्रयणान्न दोषः॥ ॥श्रीमोदकप्रियायनमः॥ ॥

भाष्ये रेफोष्मणामिति। विजातीया इति शेषः तेन सजातीयेषु सत्स्वपि न दोषः ननु माष्ट रेफस्य विजातीयः सवर्णस्तथाप्य
नुनासिकविधौ सवर्णग्रहणाभावात् अनुनासिकः स्यादेवेत्यत आह। अनुनासिकपरेति। नहि रेफस्येति। न च रेफस्य ण
कारः स्थानेनांतरतमो भवत्येवेति वाच्यं। स्थानेंतरतम इति। सत्तम्यंतपाठे स्थानप्रयत्नोभयांतरतमे स्पर्शे चिन्मात्रमित्या
दौ चरितार्थोनुनासिकविधिः प्रयत्नासदृशे रेफे न प्रवर्त्तत इति भावात्। नापीति यद्यप्यंतरतमानंतरतमयोः प्राप्तावंतरत
म एवेति स्थानेंतरतम इत्यनेन नियमः कुंडरथेनेत्यादौ चानंतरतमस्यैव प्राप्तिरिति दमयुक्तं तथापि संभवदनुस्वारां
तरतमके अंकितइत्यादौ चरितार्थः परसवर्णविधी रेफे न प्रवर्त्तत इति भावः इदं जातिपक्ष इति केचित्॥ व

स्फो रेफोष्मणामिति। अनुनासिकपरसवर्णविधाने हि स्थानेऽतरतमपरिभाषोपस्था
नाद्दोषाभावः। नहि रेफस्य णकारोंतरतमः नाप्यनुस्वारस्य रेफः॥

स्तुतो व्यक्तिपक्षेपि तादृशव्यक्तौ चरितार्थोऽस्यां व्यक्तौ न प्रवर्त्तत इति वक्तुं शक्यं तद्ध्वस्पतीकोयणं चीत्यत्र कैयटः ऽ
व्यपि पदार्थे उत्सर्गापवादभावः संदिग्धत्वाश्रयोस्त्येवेति। केचित्तु स्थानेंतरतम इति सत्तम्यंतपाठप्रत्याख्या
न परभाष्यविरोधेनास्या युक्तेरसंभवद्युक्तिकत्वं किंचैवं सतिक्रमग्रहणं भाष्ये व्यर्थं स्यात्॥ तस्मादनुनासि
कविधौ सवर्णपदापकर्षपरभाष्यं रेफोष्मणामित्यस्य चानुनासिकाऽनुस्वारांतरतमश्च सवर्णो नास्तीत्यर्थः अत
एव महिष्मानित्यादौ सूत्ररीत्या स्थानप्रयत्नोभयांतरतमत्वकारसंभवेपि नानुनासिकः नाज्झलाविति निषेधेन सवर्णत्वाभावादिति भाष्याश
यइत्याहुः॥

कै॰वि॰
६३

नन्वपर्त्वात् अप्रसक्तद्वित्वस्यहस्यग्रहणमयुक्तमतआहहकारवदिति। ननुएककर्तृकयोर्भोजनपरिवेषणयोर्युग
पदसंभवात् अस्तुतत्रबाधःप्रकृतेतुलक्ष्यभेदेनभिन्नवाक्यावगतनिमित्तकार्यिभावःकिंनस्यात् यथावगतकार्यि
त्वस्यापिद्वौनिमित्तत्वंदध्युदकादावतआहतत्रेतिलक्ष्यभेदेनकार्यित्वनिमित्तसंभवेपीत्यर्थः सामान्यविशेषविध्यो
रेकवाक्यतायामित्यन्वयःशब्दोवाक्यात्मा। अर्थस्तदर्थःसंबंधःप्रतिपाद्यप्रतिपादकभावःतेषांपरिज्ञानंतद्यथालोकव्य

नेमौरहाविति।हकारवद्रेफोपिनकार्यीत्यर्थः।तत्रैकवाक्यतायांसामान्यविशेषविध्योर्लौकिकव्यवहारादेवशब्दा
र्थसंबंधपरिज्ञानात् सामान्यविधेर्विशेषविधिर्बाधकःप्रत्यक्षश्चविशेषविधिःसामान्यविधिस्त्वनुमेयद्
तिरेफस्यकार्यित्वंनिमित्तत्वेनबाध्यते।दध्युदकादौतुस्थानित्वेननिमित्तत्वमिकः।तस्मादित्युत्तरस्ये
त्यादिज्ञापकान्नबाध्यते॥

वहारादेवतथातयोर्बाध्यबाधकभावःसंभवेपिभवतीत्येतदपिलोकव्यवहारादेवब्राह्मणेभ्योदधिदीयतांतक्रं
कौंडिन्यायेत्यादिरूपादवगतमित्यर्थःविशेषसंनिधानेसामान्यशब्दस्यतद्व्यतिरिक्तपरत्वंचतद्बीजंपरिज्ञानवदि
तिभावः एवंवाचोरहाभ्यामित्यत्रसामान्यविशेषविधित्वाभावेपितत्रबाधेयद्बीजंतत्प्रकृतेप्यस्त्येवेत्या ६३
ह॥प्रत्यक्षश्चेति।अविलंबितप्रतीतिकत्वंप्रत्यक्षत्वंविलंबितत्वकत्वंचानुमेयत्वं॥ ॥छ॥ ॥

डाक्टर भाऊदाजी स्मारक संग्रह
Dr. BHAU DAJI MEMORIAL

लक्ष्येति।ज्ञापकात्त्वलक्ष्यानुरोधाद्यासत्यपिसामान्यविशेषभावेक्वचिद्बाधकत्वंविशेषविधेर्नाश्रीयतेजातिव्यक्तिपक्षयोरुभ
योरपीतिभावःक्वचिदपेक्षानास्तीति।बाध्यबाधकभावस्यतिशेषःयथेति।बाध्यबाधकभावाभावेदृष्टांतोयं।ननुकार्यित्वनिमित्त
योःसमावेशइतिबोध्यं।केचित्तुतक्रकौंडिन्यन्यायोपिसामान्यविषयानाक्रांतविषयाभावरूपानवकाशत्वमूलकएव॥अ
स्तिचप्रकृतेततन्नह्येतद्बोध्यानिमित्तत्वंसामान्यत्वप्रयुक्तकार्यित्वानाक्रांतंक्वचिदप्यस्तिसर्वत्राचःपरत्वादनचीत्यस्यप्राप्ते

लक्ष्यस्येत्ययेक्षुणाद्बाध्यबाधकभावेनक्वचिदपेक्षानास्तियथाचिचीषतीतिदीर्घत्वद्विर्वचनयोः॥नमइति।
विधानादेषांसाधुत्वंस्यात् प्रत्याहारप्रतिबद्धंतुकार्यंनप्राप्नोति।केपुनरिति।तत्स्वरूपप्रश्नः।कथमिति।
प्रवृत्तिनिमित्तप्रश्नः॥

रतोयुक्तोलक्ष्यानुरोधात्सामान्येनकार्यित्वबाधःनचैवमिकोयणित्यादौ।मत्वर्थइत्यादौसामान्यप्राप्तनिमित्तत्वाभावेन
कार्यित्वस्यचारितार्थ्यादितिभाष्याभिप्रायमाहुः ननुकार्यार्थइत्यत्रकार्यंसाधुत्वंचेत् खरवसानयोरित्यादिनासिद्धमत
आहविधानादिति।उपदिश्यंतइतिपाठेभाष्येवर्तमानसामीप्येहब्उपदिष्टाइत्यर्थः।प्रवृत्तिनिमित्तेति।प्रकृतेभा
समानवैशिष्ट्यप्रतियोगिरूपःप्रकारस्यमर्थइतिभावःकेनप्रवृत्तिनिमित्तेनायोगवाहशब्दवाच्यतैषामित्यत्रतात्पर्यं॥

नन्वनुपदिष्टाश्चेति चकारश्रवणादनुच्चारितत्वमयोगवाहशब्दप्रवृत्तिनिमित्तांतरमित्याभातितदयुक्तं अनुपदेश
पदार्थस्यैवानुच्चारणस्य तत्राभावात् प्रयोगेषूच्चारितत्वात्। नच प्रत्याहारसूत्रानुच्चारितत्वमर्थः यदयुक्ता इत्यनेनै
व तदर्थलाभेनपौनरुक्त्यापत्तेरतआह अयुक्ता इत्यस्यैव हेतुकथनमिति। प्रत्याहारबोधकलक्षणेनायुक्ता इत्यन्व
यः तथाचैष्टेपाणिभावादिति। ग्रहणकशास्त्रेण प्रदेशे प्रवर्त्तमानेन यो वर्णस्तेषां ग्राहकस्तस्य पाणिभावादित्यर्थः

अयुक्ता इति। अस्यैव हेतुकथनं अनुपदिष्टाश्चेति। अयुक्ताः प्रत्याहारलक्षणेन। पाणिभावादसंबद्धा इ
त्यर्थः। उपदेशो द्विविधः पाठो ग्रहणकशास्त्रेण प्रत्यायनं च। स द्विविधोप्येषां नास्तीत्यर्थः। चशब्दो हेतौ।
यतोनुपदिष्टास्ततोऽयुक्ता इत्यर्थः। कचित्तु चशब्दो न पठ्यते शर्षीति। शर्षुपाठे झलोमिति झलां ज
शझशीति जश्त्वं सिध्यति। उपध्मानो पाद्ब्रूरिति। यदि द्विर्वचने पूर्वत्र जश्त्वमसिद्धं अथापि पूर्वत्रासि
द्धियमद्विर्वचन इति सिद्धं सर्वथो विज्झिषतीति प्राप्नोति॥

एषां नास्तीति। अतोऽयुक्ता इत्यर्थः एवं चाक्षरसमाम्नायेऽयुक्ताः संतो वहंति प्रयोगं निर्वाहयंतीत्ययोगवाहपदव्युत्प
त्तिर्दर्शिता। नपठ्यत इति। तत्र यत इत्यध्याहार्यमिति भावः नाप्येउरः केणतिउरः कायतीति सुवुत्पत्तेः पूर्वसमासे ६४
पि सोपपादावित्तिनसत्त्वं पाशकेल्प कका म्येधेव तत्प्रवृत्तेः ननु शराजशोऽप्यवती तिलक्षणेनाभावात्
शर्षुपाठस्य न जश्त्वावः प्रयोजनमतआह शर्षु पाठे इति यदीति पूर्वत्र द्विर्वचने इत्यन्वयः॥ ॥

ननु पूर्वं द्वित्वे जश्त्वात्पूर्वमेव हलादिशेषे कथमुपध्मानीयस्याभ्यासे जश्त्वं झशपरत्वाभावात्। अभ्यासे चर्चेत्यनेन
त्वांतरतम्यात्प्रकृतिवरावर एवेति उपध्मानीय एव स्यादिति चेत् चिंत्यमेवैतत्। उपध्मानीयश्रवणापादनेनापि
नाप्यसामंजस्यात् अंत्ये तु द्वित्वे कृतेपि द्वित्वाश्रयस्य कार्यं कर्त्तव्ये सिद्धत्वं नेत्यपि पूर्वत्रासिद्धीयमित्यस्यार्थ इति पर
त्वात् जशत्वे कृत एव हलादिः शेष इत्याशयान्न दोषः द्विर्वचनं कथमिति। वकाररहितस्येति शेषः। ननु निपातनादत्र

निपातनादिति। द्विर्वचनं कथं निपातनाद्वाक्यशेषोनुमीयते। असिद्धप्रकरणे स्तोभ्क नाभ्रूरित्यत्रोज्वेर्नद
ति तत्र नंशा इति दकारस्य द्विर्वचननिषेधः कर्त्तव्यो न तु द्विर्वचनमिति पूर्वत्रासिद्धीयमद्विर्वचन इत्यस्या
प्रवृत्या नत्वस्यासिद्धत्वादिष्टद्विर्वचनसिद्धिः। अथापि न वाक्यशेषानुमानं। निपातनमेव प्रतिपादकं त
थापि दकारोपदेशसामर्थ्यात् द्विर्वचने कृते दकारस्य वत्वं प्रवर्त्तते। अकृत्वविषय इति विशिष्टविषय
मनुमानमित्यर्थः॥ अवश्यमिति। अनुस्वारस्य शत्वात् तद्व्यवाये षत्वेसिद्धे तु मूर्ग्रहणं नियमार्थं॥ ॥

क्षणमात्रं स्यान्न तु प्रदेशविशेषावच्छिन्नमतआह। अथापीति। नचास्तु ऊ इत्यादौ दकारोच्चारणं सार्थकं नेतदुच्चेरू
पमिति नाप्यो क्तो दोषाभावात्॥ अपतापाति रिक्तविषयेऽस्मात् द्यज्ञानानभिधानादिति तदाशयः अकृ
त्वविषये निपातनमिति पक्षांतरत्वाद्यमेव समाधानं अनुस्वारस्य शत्वादिति यद्यपि इण्कवर्गाभ्यामुत्तरोनु
माव्यवहितः सकारः सुहिन् इत्यादौ संभवति तथापि तदनभिधानमिति भावः॥ ॥छ॥ ॥

पुंस्वित्यत्र सं पुंकानामित्येतत्प्रवृत्तिपरविवरणग्रंथस्तु चिंत्य एव। तस्य समः सुट्पुमः खय्यम् परेकानाम्रेडितेइति
सूत्रत्रयमात्रविषयत्वात्। ननु सूत्रविशेषानाश्रयणे तत्प्रत्याहारासंनिवेशात्कथं तन्निबंधनकार्यप्रवृत्तिरत आह
प्रयोजनविशेषमिति। अविशेषेणेति भाष्यस्य प्रयोजनविशेषानिर्देशं विनेत्यर्थ इति भावः यत्रयत्रेत्यादि यद्यत्प्रयोज
नसिद्धिरुद्देश्या तत्तद्विषयसकलप्रयोजनोद्देशेनेत्यर्थः। जस्त्वेकृते संयोगसंज्ञायामिति॥ कार्यकालपक्षेइदं। भाष्येइ
दुदुपधस्येति विसर्गस्याल्त्वे स्थुपधात्वमिति भावः इदुदुपधस्य सकारस्येति। विसर्गस्थान्युपलक्षणमेतत्। अत ए

नुमो पोऽनुस्वारस्तत्रैव यथा स्यात्। अन्यत्र मा भूत् पुंस्विति। अविशेषेणेति प्रयोजनविशेषामनपेक्ष्य स
कलप्रयोजनोद्देशेन यत्र यत्र प्रदेशे प्रयोजनसिद्धिस्तत्र तत्रोपदेशः कार्य इत्यर्थः उब्र्क इति उपध्मानी
यस्य जश्त्वे कृते संयोगसंज्ञायां तस्यासिद्धत्वात्। संयोगाभावाद्गुरुत्वाभावान्न स्यात्। महोरस्केनेति।
पूर्वत्रासिद्धेन स्थानिवदिति निषेधः अचः परस्मिन् पूर्वविधावित्यस्य नत्वस्थानिवदादेशाद्युत्पस्य॥ ॥

वनिष्कृतमिति सिध्यति। अत एव वक्ष्यमाणपक्षांतरेणाविरोधः निष्कृतमित्यादौ सुव्युत्पत्तेः पूर्वं समासेपि इणः षइ
तिषः पाशकल्पककाम्येष्वेव तत्प्रवृत्तेः द्विर्वचनप्रयोजनमिति विसर्गजिह्वामूलीयादेर्द्विरुच्चारणे विशेषस्या ६५
ग्रहात् उच्चारणस्य कर्त्तुमशक्यत्वाच्च शास्त्रप्राप्तिमात्रेणैतत्प्रयोजनकथनमिति सतो द्रष्टव्य॥ ननु सोपदादावि
तिसत्त्वस्य स्थानिवत्त्वं पूर्वत्रासिद्धीयत इति निषेधान्नेत्यत आह॥ पूर्वत्रेति॥ ॥ ॐ नमः शिवाय॥ ॥

इमेइत्यनेन (न) हयवरट् सूत्रस्था एव गृह्यंते किंतु वर्णमात्रमित्याह इदानीमिति अर्थवंत इति साध्यं वर्णा इति पक्षः पक्षता
वच्छेदकमेव हेतुः धातुप्रातिपदिकेत्यादिस्तु दृष्टांतः अनुत्पत्तिज्ञानं। अनुत्पपापज्ञानं। भाष्ये धातव इत्यादिप्रक्रिया
भ्रयप्रकृतिप्रत्ययानां वाचकत्वमित्येवं रूपवर्णस्फोटाश्रयेण अयं च शास्त्रव्यवहारमात्रोपयोगी। एतद्वासनावशादे

इदानीमन्यदपि वर्णगतं वस्तु विचार्यते। किं पुनरिति। पक्षद्वयेपि प्रतिवर्णं विभक्त्यनुत्पत्तिज्ञानं विचारस्य प्र
योजनं। वर्णव्यत्यय इति एकस्य वर्णस्याभ्युपगमोन्यस्यापगमो व्यत्ययः सक्कारस्येति तस्यैवान्वयव्यतिरे
कावनुविधत्ते अर्थावसाय इति भावः वर्णानुपलब्धौ चेति अर्थांतरावगमात्स्वकृतोर्थो न गम्यत इति वि
वक्षितं। इतरस्त्वर्थावगत्यभावमात्रमनेनोक्तं इति मत्वा पृच्छति। किं तदिति॥

वलोकव्यवहारेपि शास्त्रज्ञास्तथा व्यवहरंति धर्मे चैवंविधज्ञानस्योपइति बोध्यं। हेत्वंतरमाह वर्णव्यत्यये चेति। ननु कूया
दीन् सिंहादाविव वर्णव्यत्यये तआदेकस्यैति तस्यैवान्वये तिक्रपशब्दस्य तदीयशक्तग्रहबोधकत्वरूपद्योतकत्वं प्राग्वत्। अत ए
व तेषामपि प्रातिपदिकसंज्ञापादनं करिष्यते तृतीयहेतुमाह वर्णानुपलब्धौ चेति। अनर्थगतेरित्यस्य सद्वर्णसत्तायां योर्थः स्तद्यानवग
तेरित्यर्थ इत्याह अर्थांतरेति॥ ॥

प्रश्नमुपपादयति भाष्ये। नसाधीय इति। नञि काकुः परमतापेति। परेणानर्थगतेरित्युक्तत्वात् इहार्थगतिरस्तीत्यभ्यु
पगम्य परमते कटाक्षेण अन्यस्यलीयार्थगत्यपेक्षयात्रातिशयेनार्थगतिरस्तीति विवक्षितेति भावः। तच्छब्दार्थमाह वर्णस्ये
ति। परे तु तच्छब्देन तद्वर्णघटितपरामर्शेन कश्चिद्विशेषः अत एव पूर्वभाष्ये सककारेण कश्चिदर्थो गम्यत इत्युक्तमित्या

साधीय इति परमतापेक्षया प्रकर्ष आरोप्यते। यथा न किंचिदयं तत्र करोतीत्युक्ते कश्चिदाह सुतरामयं क
रोतीति। एवं तर्हीति। प्रकृतोऽर्थो न गम्यते। अर्थांतरं तु गम्यत इत्यर्थः। तस्यार्थ इति। वर्णस्य परं प्रति वर्णाना
मर्थवत्त्वमस्तिरूपमिति कथं तस्येति वर्णः परामृश्यत इत्याह सोर्थ इति। प्रकृतोर्थ इत्यर्थः। उष्ट्रमुख इति गता
र्थत्वादप्रयोग एव द्वितीयस्य मुखशब्दस्य लोपो विधीयते। अत्राहि उष्ट्रो मुखमस्येत्येव विग्रहः नन्वप्राणीप्रा
ण्यंतरस्य मुखं स्वतीति विशिष्टावयववृत्तिरूढशब्दः सादृश्यान्मुखं विशिनष्टि एवमिहाप्यनर्थगतेरित्यत्रा
र्थशब्देन प्रक्रांतोर्थ उच्यते नार्थमात्रमित्यर्थः॥

हुः लाघवेन तु कर्मधारयमाह। भाष्ये सोर्थ इति प्रकृतोर्थः। तस्मिन्वर्णे सति योऽर्थः प्रतीयते स इत्यर्थः। ननु दृष्टांते स
प्तम्युपमानपूर्वेति वचनेनोत्तरपदलोपेपि प्रकृते तच्छब्दलोपः केन। किंच तच्छब्द उत्तरपदमपि न। तच्छब्देन नञः समा ६६
सान्नावादत आह गतार्थत्वादिति। तथा च तद्दत्रापि लक्षणेति भावः॥ ॥ॐ काशीविश्वेश्वरायनमः॥ ॥
श्री

चतुर्थहेतुमाह भाष्ये संघातार्थवत्त्वाच्चेति। एकास्तिकतेति भाष्यप्रयोगादेवास्तिकताशब्दस्यैकवचनांतत्वमपि। इ
दंतर्गत्वादिति। इदं चिंत्यं। इत्यन्नृतलक्षण इति सूत्रस्य स्वग्रंथविरोधात्। तत्र हि संज्ञाप्रवृत्त्युत्तरकालजातवि
भक्तेस्तन्मध्यपतितत्वेपि तदवयवत्वं नेत्युक्तं तस्मादंतरंगत्वात्तदवयवप्रातिपदिकत्वे तन्निमित्त सुपि तद
नंतरं रूढंतत्वनिमित्तकप्रातिपदिकत्वे सुप्लोप इति वक्तुं युक्तं धनतीत्यादौ तु न तदापत्तिः धातुप्रत्ययांत

नलोपादीनीति। श्रवणं तु विभक्तेर्न भवति। यतोऽयद्वैवावयवानां प्रातिपदिकसंज्ञा प्रवर्त्तते तदैव समु
दायस्यापि। तत्र तदंतर्गतत्वाद्विभक्तेर्लुकान्न वितव्यं। समासग्रहणेन च तुल्यजातीयस्य सुबंतावयव
समुदायस्य प्रातिपदिकसंज्ञा निवार्यते न त्वर्थवत्समुदायमात्रस्य येनैव चार्थेन समुदायार्थवत्त्वं
तेनैव तदवयवानामपीति विभक्त्युत्पत्तिश्चोद्यते॥

पदयोस्तदवयवपरत्वेन तत्र तदप्राप्तिः धात्वादेस्तदवयवत्वं तु व्यपदेशिवद्भावेन बोध्यं वस्तुत इत्यं न्नृतेति सू
त्रस्य कैयटोक्तिरयुक्तेति तत्रैव निरूपयिष्याम इति न दोषः धकारे जस्त्वमादिपदार्थः सुबंतावयवसमुदाय
स्येति। सुबंतावयवेति बहुव्रीहिस्ततः कर्मधारयः इदमुपलक्षणं। पदे सति पदार्थयोः संसर्गस्तद्वारकार्थ
वत्समुदायस्य तेन तिङंतसमुदायस्याप्यावृत्तिः प्रकृतेनप्तेद इत्याह येनैव चेति॥ ॥ॐ नमः शिवाय॥ ॥

तच्चैकमिति। संघातस्यैकत्वमिति भाष्यस्य संघातस्याप्येकत्वमर्थः एवं च विभक्तिः समुदायादेवेति भावः ननु
समुदायादुत्पद्यमाना विभक्तिः सर्ववर्णसंबंधिनी चेत्। प्रतिवर्णं पदत्वं प्राप्नोतीत्यत आह पदसंज्ञा त्विति। य
त्स्वार्थबोधनाय विभक्त्युत्पत्तिस्तस्य संज्ञा प्रवर्तते न तेषामिति भावः केचित्तु विभक्तिः प्रकृत्यर्थगतप्रक
तिबोध्यसंख्याद्योतिका। संख्या च समुदायस्यैवार्थो न प्रत्येकवर्णानामिति न तेभ्यः स्वाद्युत्पत्तिः। एकत्वं संघा

अत्र परिहारमाह। संघातस्येति। वृक्ष इत्यत्रैकत्वं विभक्त्यर्थः। तच्चैकमित्येकैव विभक्तिरुत्पद्यते॥
यथा बहवो द्रष्टार एकेनैव दीपेन दृश्यमर्थं पश्यंति। सा चोत्पद्यमाना समुदायादेवं तंत्रेण सर्वानुग्राहिण्यु
त्पद्यते। समुदायाद्द्विर्वचनवत्पदसंज्ञा तु समुदायस्यैव भवति न प्रत्येकं। यस्मात्प्रत्ययविधिरित्यनुवर्त
नादसुबंतत्वात्॥

त्स्यार्थ इति भाष्यस्वरसात् प्रकृत्यंशे वर्णव्यत्ययापाययोः संख्यांतरानुपजननात्सा समुदायस्यैवार्थ इति तद्भा
वः। न चाव्ययेष्वप्येकवचनं दुर्वारं॥ संख्यारहितार्थप्रतिपादिकेषु तथास्वीकारेपि वस्तुतः संख्यावत्यर्थे संख्या ६७
नभिधायकत्वाद्युत्पत्तौ मानाभावात्॥ एवं चैषां प्रकृतित्वमेव नेति न केवला प्रकृतिरित्यस्यापि न विषयः
एतेन प्रत्येकं पदसंज्ञानुग्रहाय द्विर्वचनवैषम्यात्स्यादेव प्रत्येकं सुबुत्पत्तिरित्यपास्तमित्याहुः॥ ॥

अनुमानेन साधितामर्थवत्तां प्रत्यक्षविरोधेन दूषयति। अनर्थकास्त्विति। सर्ववर्णानां पक्षत्वे हेतोर्भागासिद्ध
त्वं स्यादत आह धात्वादीति। विपक्षे बाधकमाह। अन्यथेति। वर्णव्यत्ययेत्यादिहेतोरर्थानुपलब्धेरिति हेतोश्च
धात्वाद्यतिरिक्तवर्णविषयत्व एव संगतेरित्यपि बोध्यं॥ असमासशंकयेति। तथा चेवीभ्यान्न प्रतीयेतेति भावः

अनर्थकास्त्विति। धात्वादिव्यतिरिक्ता वर्णाः पक्षीक्रियंते। अन्यथा शास्त्रविरोधः प्राप्नोति। किमिद
मिति। असमासशंकया प्रश्नः समासेन तूत्तरं। तेनैव वीप्साद्योतितेति द्विर्वचनं न भवति। वर्णव्यत्ययेति
यदुक्तं वर्णव्यत्यये चार्थांतरगमनाद्वर्णानुपलब्धौ चानर्थगतेरिति तस्यानैकांतिकत्वमुद्भाव्यते॥ ॥

तेनैवेति वीप्सायां तस्य विधानादिति भावः ननु वर्णव्यत्ययादिष्वर्थदर्शनं नार्थवत्त्वाभावसाधकमत आह यदुक्त
मिति। एवं चार्थवत्त्वसाधकहेतौ व्यभिचारप्रदर्शनद्वारा अनर्थकतासाधकत्वमस्य। भाष्ये अर्थदर्शनादित्यस्य वर्णव्य
त्ययाद्यभावेर्थस्यैव दर्शनादित्यर्थः। नार्थव्यत्यय इत्यस्य नार्थांतरावगतिः किंतु तस्यैवावगतिरित्यर्थः॥ ॥

उभयस्यन्याप्यत्वंविषयभेदेनेत्याह यत्रान्वयेति। यथा एतिद्वतद्वत्यादौ। नसर्वत्रकूपादावित्यर्थः नकूप
सूपेति। वर्णानामर्थवत्वेकूपशब्दस्यत्रिधन्वयादर्थान्वयः स्यात् नचदृश्यते। ततःसमुदायांतरत्वप्रयुक्त
मेवार्थांतरत्वंतदर्थानवगतिश्च नेतुव्यत्ययादिकृतमित्यर्थः ननुककारसकारयकाराणामेवार्थवत्वमूपस्तु

उभयमित्याहेति। यत्रान्वयव्यतिरेकाभ्यां अर्थवत्ताशक्यते कल्पयितुंतत्रैवासावभ्युपगंतव्या
नसर्वत्रेत्यर्थः संघातांतराणीति। तदुक्तं। नकूपसूपयूपानामन्वयोर्थस्यविद्यते अतोर्थान्तरवा
चित्वंसंघातस्यैवगम्यत इति। एतस्यायीति। दृष्टोह्यतदर्थनगुणेनो ऽर्थभावः सुरांगवद्रथांगवच्चेति॥ ॥

शास्त्रेषु बोधकएवेतिकस्यार्थस्यसत्तातत्रतत्रापाद्यतइतिचेत्तर्हिनन्तमेववर्णानामर्थवत्वं तत्रैवपदेकूपयोरभा
भावात्। किंचसंख्यासमुदायस्यैवार्थइत्यपिनियंतुमशक्यंकूपगतेकत्वस्ययूपादिभिरप्रतीत्यासंख्यायिका
दिभिरन्वयव्यतिरेकसत्वात् द्विवचनेनवेषम्यंतुप्रागुक्तमेवतस्मात्समुदायस्यैवार्थवत्वंतदेवध्वनयन्नाह
नाप्येवंइत्यल्पपीत्यादिदृष्टाहीतिअतदर्थनरथांगेनगुणिनोरथस्ययथार्थवत्तातथाप्रकृतेपीतिभावः॥ ॥

भाष्येजग्रहणेष्विति। प्रत्याहारग्रहणं कुतोनेत्यर्थः तत्फलितार्थमाह यएते इति अस्तु। तद्बोधकसूत्रेषु प्रागुक्तेषु। प्र
× हारे ऽक्षरसमाम्नायेजग्रहणेषु अचूप्रत्याहारग्राहकेषुपठितानामनुबंधानांप्रत्यासत्त्या × त्याहारार्थास्तदुपकारकाः
अजग्रहणेन। अचूशब्देन। अणगादिप्रत्याहारेषुतेषांग्रहणेफलाभावंमनसिनिधायाजग्रहणेनेत्युक्तंनचहग्रहण
दौ टग्रहणस्यापत्तिः हल्षुउच्चारणार्थाकारोच्चारणेनोच्चारणार्थवर्णहीनहल्लोहल्घटितप्रत्याहारेग्रहणाभावस्य

आचारादिति। आचारोव्यवहारः। तृषिमृषिकृषेरितियएनकृतः। अप्रधानत्वादिति प्रधानाप्रधानसंनिधौ
प्रधानमेवकार्यभाक्प्रयोजकमितिपरार्थानामनुबंधानामच्संज्ञानप्रवर्त्ततइत्यर्थः। शैलीति। शीलेभ्यवा
शैलीसमवधानपूर्विकाप्रवृत्तिः यथालोकेब्राह्मणैः सहब्राह्मणभोज्यतेक्षत्रियैः सहक्षत्रियाइति। ए
वमिहापिवर्णाआचार्येणनिर्दिष्टाइत्यर्थः लोपश्चेति। परत्वान्नित्यत्वाद्वा आदिरंत्येनसहेतेत्यनेनाच्संज्ञावि
धानकालेअनुबंधानांलोपादसंनिधानादच्संज्ञानप्रवर्तते अनुबंधाद्युच्चारणएवसंति। इत्संज्ञाप्रतिबंध
कार्यभसतएवप्रतिपादयंतिस्वतस्तुनकिंचित्कार्यं प्रतिपद्यंते॥

वक्तुंशक्यत्वात् प्राधान्येन। प्रत्याहारेषुग्रहणार्थत्वेन। परार्थेति। अजादिस्वरूपबोधनार्थत्वेनपरार्थत्वं। यथाकारादयः संज्ञि
विशेषसमर्पणायोपात्तानतथायादयइत्यर्थः अप्रधानत्वमप्याचारेणसाधयति। भाष्येआचार्यस्येतिआचार्यशब्देनाना
दिःशब्दपुरुषः एवंचान्यत्रसंज्ञिविशेषसमर्पणयोपात्तत्वादितामसंज्ञित्वमेवेतिभावः परत्वादित्याद्यंतरंगत्वोपलक्षणंएवंचपूर्वम
नुबंधलोपादादिरंत्येनेतिसंज्ञाविधानकाले ऽसंनिधानादित्यन्वयः एवंचानुबंधसदृशभिन्नानामेवमध्यगसदृशानांग्राह्यतांबोधय
तीतिभावः॥

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

६८ भाष्ये लोपः खल्वपि तावदिति। सर्वतः प्रथममित्यर्थः। यत्तु एवमपि लणित्यकारस्य हल्ग्रहणापत्तेराचारादित्येव समाधिरत्र युक्त इति। तन्न। अतोऽन्त्यस्येति सूत्रे लकारोच्चारणेन न लण्सूत्रस्थस्यानुनासिकत्वाभावज्ञापनात् एवं चेतस्यानुबंधत्वमेव न किंतु उच्चारणार्थत्वमेव अत एव भाष्ये इत्यादिसूत्रचतुष्टयोपादानेनैवैतद्विचारप्रवृत्तिः कृताष्टोकेऽचाज्ग्रहणेष्वित्येवोक्तं। उरण्परसूत्रे च लपरत्वस्योपसंख्यानमेव कार्यमिति तुल्यास्यसूत्रे वक्ष्यते भाष्ये तत्कालाना

उत्कालोजिति। सिद्धे त्वेयोगविभागेन कालविशेषावच्छिन्नस्याच्त्वं नियम्यते। ततोऽनुबंधानामकालत्वाद्भावः। एवमपीति। ककारात्कृते रूपदेशन्मात्रिकस्याच्त्वं मन्यते। अत्र च यद्यप्ययं परिहरोऽस्ति॥ द्वावेतौ ककारौ। न च वर्णद्वये नैका जातिर्व्यज्यत इति तथापि पूर्वमेव मात्राकालोऽत्र गम्यते न च मात्रिकं व्यंजनमस्तीत्युक्तत्वात्पुनरिह नोक्तः॥

मर्थाग्रहणमच्च देन यथा स्यादिति योगविभागः कार्य इत्यन्वयः। सिद्धे त्विति। अकारादीनामुपदेशात् सवर्णग्रहणाच्चेति भावः। ननु ककारद्वयस्य मात्रिकवर्णत्वं कथं एकस्यैव त्रैरूप्यं नियत्रोपदेशात् अत आह ककारात्कृतेरिति। न च वर्णद्वये नेति। जातिरपि स्वपर्याप्त्यधिकरणव्यंग्येव तद्वारेव कार्यभागिति भावः। भाष्ये एष एवार्थ इति अपर आ ६८
हेत्यादिना वार्तिककृतोक्त इत्यर्थः। ह्रस्वादीनामिति। ह्रस्वदीर्घप्लुत इत्यतः प्राग्यावत् ऊकालोज्झिति तावदेवास्फुटवक्रसूत्रं। फलं दर्शयति। अचूकायोलीति। अचूनिमित्तकार्याणि तत्कालैर्धर्मैः कर्तुमर्हाणि यथा स्युरित्यन्वयः॥ ॥

अणः सुद्ध्युपदेशः अणसूपदेशः अणश्चायोच्चारणं तदंतस्यानां बोधकं अणुदिदित्यत्र किमर्थं क्रियत इत्यर्थोऽस्य भाष्यस्येत्याह अणुदिदिति अणसु अणमध्ये। तेनात्र स्थाने किमर्थमुपदेश इति तु नार्थ इत्याह ऽण्ग्रहणेनेति। इह संप्रतेत्यादिना व्यंगुणानेदका इति पक्षे। भेदकत्वपक्षे चेदमेवाणग्रहणं मानमिति भावः। यथास्थित सूत्रन्यासे इदं जातिपक्षेणाण्ग्रहणप्रत्याख्यानेतु न कश्चिद्विचारः एवं गुणा अभेदका इति न्याय्यपक्षेऽपि न विचार इति बोध्यं। भाष्ये

अथ किमर्थमिति। अणुदित्सवर्णस्येति कस्मात्सूत्रमिति प्रश्नः इण्ग्रहणेन ग्रहणार्थत्वं तस्यानवैयर्थ्योमेत्रो कर्त्तव्य उपदेशः। गीर्ष्वित्यादौ मूर्द्धन्योऽयथा स्यादिति। ननु च भेद इति। श्रुतिकृतोऽस्त्येव भेदः सूक्ष्मत्वात्तु दुर्लक्ष्यः॥

वक्ष्यत्येतदिति। सिद्धत्ववचनं चावश्यकं अन्यथा परस्यानुस्वारस्य चापदांतस्येति परसवर्णे तस्यासिद्धत्वात्पूर्वस्यानुस्वारस्य ययीत्यस्यानापत्तौ रूपासिध्यापत्तेः तद्द्विर्वचनसिद्धिरेव फलमित्याह परसवर्णे तद्धीति। ननु न भेदोनुपलब्धेरत आह श्रुतिकृत इति यदि नित्यो लोपः स्यादिति। तदा भेदो न स्यादित्यर्थः विभाषा चेति च स्त्वर्थो। एकदेश्याह यथाऽभेद इति यथा द्विर्वचनप्रवृत्यप्रवृत्त्यो र्भेदो न स्यादित्यर्थस्तथैवास्मानुवृत्ताद्विभाषाग्रहणमिति भावः।
न वति

तृतीयोज्ञापकमुपन्यस्यति। अनुवर्त्ततइत्यादिना। झरोझरीतिलोपेइत्यर्थः मध्यस्यतयाहलोपमात्रमित्यस्यापिवै
कल्पिकत्वंसिद्धमितिभावः लोपापवादइति। यद्यपिहर्यनुभवइत्यादौतदुदाहरणेलोपेप्राप्तेपिद्विर्वचनमारभ्यतेत
थापिकृतेद्वित्वेपश्चाल्लोपेपिद्विर्वचनंव्यर्थमित्याशयेनापवादत्वोक्तिरितिभावः तयोर्योगयोर्लोपविधायकयोःप्र
त्तमित्यादौदाधातोः क्तेआतस्तकारोऽवउपसर्गादित्यनेन। आदित्येआदित्याङ्गवाद्यर्थेप्यन्तात् एयःतद्धा

तदेतदिति। ज्ञापकत्वमस्यविघटयतिआचार्योपदेशपारंपर्यात्तुज्ञायतेअनुवर्त्ततेविभाषेति।
तस्मात्त्रिव्यंजनसंयोगश्रवणायाणुदितिणकारेणप्रत्याहारः कृतोणचकारेणेतिस्थितं॥ ॥

चष्टेज्ञापकत्वमस्यविघटयतीतिसर्वथाऽसंभवंत्युपसंहरतीत्यर्थः ज्ञापकेतदनुवृत्तिंसाधयतस्तत्खंडने ७०
नुवृत्तिःसंदिग्धैवेतिभावः लण्सूत्रेविभाषासलोपरित्युक्तेरात् । आचार्येति। अण्ग्रहणतज्ज्ञापकादि
त्यपिकश्चित्तत्तुवार्त्तिककृतापर्ग्रहणप्रत्याख्यानान्नोक्तं॥ ॥श्रीसांबसदाशिवायनमः॥ ॥

वक्ष्यमाणरीत्यासर्वत्रनिर्णयकसत्वात्प्रश्नःकतरस्मिन्निति १
लण्। किमितिकृप्रत्यासत्तिः कप्राप्तिरितिसंदेहइत्यर्थःभाष्येकतमस्मिन्निर्तिपाठेपिइतरादिविधौन्यायाधिप्रत्याख्या
नान्नदोषइतिबोध्यं। नहिद्रुलोपइतिवर्द्धेत्यादौगुणोऽसिद्धइतिभावः दीर्घोचइत्येवेति। मात्रालाघवाभावेपिसंप्रात्य
लाघवायासंदेहायचेतिभावः ― तथागीर्भ्यामिति। विसर्गस्यासिद्धत्वादितिभावः तेषुचकृतेष्विति। परत्वादितिभावः

लण्संदेहोभवतीति। किंप्रत्यासत्तिराश्रीयतेऽथवाव्याप्तिरितिसंदेहः। नह्रिकेपरइति। नन्वल्लोपानदुया
नत्केतिह्रस्वेकर्त्तव्येनह्रोधइत्यसिद्धत्वादस्तिकेपरतोहकारः तथागीर्भ्यामित्यादौरेफः। अत्राहुः नमुनइत्य
त्रयोगविभागेनधत्वादीनामसिद्धत्वाभावात्तेषुचाकृतेषुहकारादीनामभावः॥ नहिपदांतादिति॥
ननुचभोगभोगइत्यत्राश्ग्रहणस्यप्रयोजनंवक्ष्यते वृक्षवृंकरोतीत्यत्रहलिसर्वेषामितिलोपोमा
भूदिति। तत्कथमुच्यतेनहिपदांतादितिउच्यते अप्रगृह्यस्येतिपर्युदासेनाचएवानुनासिकेनभाव्यंनतुह
लइत्युक्तं॥

योगविभागस्यभाष्यानारूढत्वात्केत्यादिभाष्यात्केपरेइतिभाष्याच्चतेषामनभिधानंवक्तुंयुक्तं। भाष्येअचोद्दी
तिअवश्चेतिपरिभाषणादितिभावः नहिपदांतादितिपदानामेवानुनासिकोऽवसानेजायतइत्याश्रित्येदमुक्तं। ननुत
त्रपदांताधिकारोस्ति। लोपइति। अशाहलोविशेषणादितिभावः पर्युदासेनेतिक्रियमाणोप्यण्ग्रहणेइत्यर्थः॥ ॥

भाष्येपिनसत्त्वंनिषिध्यतेकिंतुकार्यित्वमेवेत्याहकार्यभाजइतिएवंचानुनासिकप्राप्तियोग्याःपदांतानसंतीत्यर्थः
वस्तुतोस्यायेस्तिद्धांत्युक्तित्वेनतदज्ञानेनैवपूर्वपक्षस्योचित्त्यनैवंभाष्यव्याख्यानमनुचितंपूर्वपक्षेऽस्यसंदेहस्यचा
नुत्थानात्।तस्मादष्टमाध्यायस्यभाष्यमेकदेश्युक्तिरित्येवोचितंव्याख्यातंचतत्रोपाध्यायैरित्थमेवभाष्येकर्त्रेहत्रि
तिअचामुपलक्षणंअतएवाचोप्रगृह्यस्येत्युक्तं मन्यथाऽकोप्रगृह्यस्येतिवदेत्।निषेधात्संप्रसारणप्रसंगइति॥
चिंत्यमिदं।एगेपरतस्तत्प्रकृतिभूतप्रातिपदिकस्याटिलोपविधानेनदध्वतेःस्यानित्वेमानाभावेनवकारेएकदेशवि

नहिपदांताइति।कार्यभाजइत्यर्थः अचोप्रगृह्यस्येति हलोहिनभाव्यमित्यत्राप्यग्रहणसामर्थ्यात्पू
र्वेणेतिस्थितं।तत्रदक्षंदध्वतीतिक्विपिकृतेदक्षदध्वमाचष्टइतिणिचिटिलोपेचकृतेदध्नुवयतेक्विपि
विकृतेदध्नुवइतिभवति क्विपितुकौलुप्तंकौविधिंप्रतिचनस्यानिवदितिनिषेधात्संप्रसारणप्रसंगः॥

कृतन्यायेनदध्वतित्वस्यदुर्लभत्वात्।अर्धाधिकविकारेणप्रत्यभिज्ञाभावाच्च।अतएवराजकीयमित्यादौअल्लोपोन
दध्वएवटिलोपस्यानित्वेतुप्रकृतिभावापत्तिःएतेनविविएकदेशविकृतन्यायेनदध्वतित्वात्पत्वापत्तिःनचाणिलोपस्य
स्यानिवत्वान्नषत्वं।पूर्वत्रासिद्धीयेतन्निषेधात्इतिपरास्तं।नचब्रश्चेतिसूत्रेपदाधिकारेणब्रश्चातत्वमेकदेशवि ७१
कृतन्यायेनसुलभमितिवाच्यं।स्कोरितिसूत्रअंतेग्रहणमनुवर्त्यवैयधिकरण्येनैवान्वयाभ्युपगमेनादोषात्अतए
वांतेग्रहणंचरितार्थअर्धाधिकविकाराच्च एवंचदक्षब्रजोणिजंतात्क्विपिदक्षभ्इत्यादौषत्वंनेत्याहुः॥ ॥ब॥

वलोपप्रसंगश्चेति।इदमुपलक्षणंक्वौविधौस्यानिवत्वनिषेधादूठ्प्रसंगश्चेत्यपिबोध्यं।भाष्येरोरीतित्रिपाद्यांब
हिरंगासिद्धत्वाभावादितिभावः भवूभावएकाचोबशित्यनेन।तत्रस्थेकाचइतिझषंतस्येतिचधातोरित्यपेक्षया
व्यधिकरणषष्ठीतिभावः रुत्वं।दश्चेत्यनेन।तत्रस्थेकाचइति भाष्येद्रुहापितर्हीत्यस्यऋतइत्वमितिशेषः

लोपोव्योर्वलोतिवलोपप्रसंगश्च विचितुस्यानिवद्भावाद्वलनिमित्तोलोपोनभवतिहलि।सर्वेषामित्य
नेनतुलोपेक्रियमाणेपूर्वत्रासिद्धेनस्थानिवदितिस्यानिवत्वनिषेधाद्वलोपःप्राप्तोअशाग्रहणानुव
त्यानिवर्ततेअजर्घाइति गृधेर्यङ्लुकिरुगागमेभ्यासस्यकृतेलङिसिपिशब्लुकिगुणपरत्वस्ि
पूलोपभषूभावजश्त्वरुत्वरलोपदीर्घत्वेषुरूपं।द्रुहापितर्हीति।धातुग्रहणेनहिलिंगेनाधातोरे
वरपरत्वंनिवर्त्तितं।धातोस्तुरपरत्वेसत्यनंत्यत्वान्नप्राप्नोतीतिप्रश्नः॥

ननुधातुग्रहणेनऋकारस्यदीर्घेनिरपरइतिज्ञानाज्ञनेतिदीर्घस्याप्यरपरत्वात्कथमत्रेत्वाप्राप्तिरतआह।धातु
ग्रहणेनेति।भाष्येतस्मात्तत्रेतिनचइहाकिंचित्रयोइतिन्यायेनज्ञापकत्वमप्यस्त्वितिवाच्यंगइइत्यादेरनुकरणेप्रकृतिवदनुकर
णमित्यस्याभावेत्रोपडीत्यादावित्वाभावार्थमिहापितदावश्यकत्वात्।गत्यंतराभावेतन्यायेनज्ञापकत्वाश्रयणाच्च॥ ॥

कै०वि०

७२ तदाहतस्मादिति एवंचपरत्वेपिमाहणामित्यादौउपधायाश्चेतीत्त्ववारणेनधातुग्रहणस्यचारितार्थ्येनतपरत्व
निवृत्तौनज्ञापकेत्यर्थः भाष्येसामर्थ्यात्पूर्वेणेति। नचगम्लित्यादौयथादेशेलपरत्वार्थमेवपरेणाण्ग्रहणंस्या
दितिसामर्थ्यंकथं। ऋकारांशेहारूपाणिरोरीतिप्रवृत्त्याफलाभावेनतत्साहचर्यात् लृकारांशेपिहलरूपाणिअप्रवृ
त्तिरित्याशयात्। रलयोःसमानश्रुतित्वेनतत्रापिरोरीत्यस्यप्रवृत्तेरित्यन्ये। लृकारेयण्घटितप्रयोगानभिधा

इहापीति। तस्माद्धातुग्रहणस्यसप्रयोजनत्वान्नज्ञापकत्वमित्यर्थः सवर्णइति अचीकृतादिति ऋ
कारस्यऋकारएवयथास्यात् ऋकारोमाभूदित्येवमर्थंतपरत्वंक्रियते यदिपूर्वेणणकारेणाण्
ग्रहणंस्यात् ऋकारोनण्त्वाद्भिन्नकालस्यग्राहकएवनभवतीति ऋकारोनैवस्थानीनीनाप्यादेशः
प्रसजतीतिकिंतपरत्वेनकृतंचनतज्ज्ञापकंपरेणाण्ग्रहणस्य॥

नमेवैतद्भाष्यप्रामाण्यादित्यन्ये। भाष्येसवर्णेतपरमितियदु ऋदित्सूत्रेतपरंकरोतितज्ज्ञापकंसवर्णग्रहणंपर
याकारकमितिवार्त्तिकाक्षरार्थः इत्येवमर्थमितिह्रस्वोयथास्यात्दीर्घोमाभूदित्येवमर्थमित्यर्थः ऋकारइतिउद्देश्य ७२
समर्पकइत्यर्थः नचभाव्यमानत्वेनसवर्णग्रहणाप्रसक्तेस्तद्वैयर्थ्यंतपरत्वाभावेआदेशांतरनिवृत्त्यर्थत्वेनस्वरूपा
प्यनुज्ञानार्थत्वेनापूर्वबोध्यत्वाभावेनचाविधेयत्वात्। कृतेतुतपरत्वेभाव्यमानतापीत्यन्यत्। ॥

भाष्येसंमृधेतिआदेशेनतौनिवर्त्येतेइत्यर्थः अर्धचतुर्थाइतिवक्तुमुचितंमतआह अर्धेनेति। भाष्येतिस्रोमात्रा
इतिइणइतिपदच्छेदाभिप्रायेणेदंतदुक्तंविभक्तिनिर्देशइति संहितायांतुसार्द्धमात्राद्वयमेवेतिबोध्यं। अणादिग्र
हणेषूक्तैर्महद्भिर्यत्नैःसंदेहपरिहारेप्रतिपत्तिगौरवमितिलाघवायवर्णांतरमेवकिंनानुबध्यतइत्याशयेनाह।

अर्धंचतस्यइतिअर्धेनचतस्यचतुर्थीद्विमात्रार्धेति। किंपुनरितिवर्णेत्सतिवर्णैश्छेदःवर्णांतरमनु
बंधःकिंपुनक्रियतइत्यर्थः व्याख्यानतइति। न्यायादागमाद्वाशब्दशक्तिरनुसरणीयेत्यर्थः॥ ॥

भाष्येकिंपुनरिति। एततद्वक्ष्यमाणं। आचार्यःशिवः ननुज्ञापितेपिप्रवर्त्तकतयावानास्यचारितार्थ्यमतआह
न्यायादिति। उक्तोन्यायःआगमउपदेशपरंपरातत्सिद्धएवायमर्थोणकारानुबंधनरूपस्यव्यवहारेणबोध्यतइत्यर्थः एवं
चव्याख्यानेनैवपूर्वणकारेणकेचित्केचित्परणकारेणेतिनिर्णयेज्ञापकानुसारेणक्लेशोदर्शितइतिसूचितं॥ ॥

झलजः। भाष्ये नझकारेत्यादि। अत्र हि तत्र हल्मात्रानुकरणं तु सूत्रादन्यत्र नास्तीति अयवरट् सूत्रे प्रपंचितं। झ
कारभकारयोरविहिपदांतयोरिति। पदांतयोः सतोस्ततः परस्यादादेः परस्य झभौस्यातामित्यर्थः एवमपि पं
चागमाद्गति। लक्ष्यसंस्कारकालिकं संख्यासाम्यं यथासंख्यप्रवृत्तौ निमित्तमिति मन्यते सिद्धांती तु प्रतिपत्तिका

झलजः। नझकारेति। झकारस्य पदांतस्य जश्त्वेन भाव्यमिति तस्याभावः उज्झेर्झकारः। संयोगांतस्येति
लुप्यत इति तस्याप्यभावः संतु तावदिति उद्देशानुद्देशाभ्यां संख्यासाम्याद्यथासंख्ये लब्धे प्रयोगे यस्यागम
स्यागमी विद्यते स प्रवर्तते नान्य इत्यर्थः किमिदमिति। अक्षरसमाम्नाय इति व्यवहाराद्योवादुमांवाचंस्वर
शोक्षरशाद्गति चोक्तत्वात्प्रश्नः अक्षरं न क्षरमिति क्रियाशब्दोयं नित्यस्यार्थस्य वाचक इति दर्शयति। अ
त्र क्षियः क्षरतेर्वा विनाशार्थस्य नञ्पूर्वस्य रूपं॥

त्तिकमेव संख्यासाम्यं तत्प्रवृत्तौ निमित्तमित्याह संत्विति। येषामागमानामागमिनः संति तेषां भवं तु इत्यर्थः। अनुदेशः
प्रतिनिर्देशः स्न गवता तु स्पष्टप्रतिपत्तये नु बंधद्वयमदर्शि इति व्यवहारादिति। अइउण्सूत्रेयं व्यवहारो भाष्ये। ७३
प्रश्न इति। तत्र घटकीभूताक्षरपदार्थावगमायेति भावः भाष्येऽक्षरमित्यस्यानक्षमिति विग्रहप्रदर्शनं। ॥

तच्चेति अक्षरं चेत्यर्थः ब्रह्मतत्वस्यैव तत्वे हेतुगर्भं विशेषणमाह परमार्थतो नित्यमिति। यतस्तत्प्रागभावाप्रतियोगि
त्वे सति ध्वंसाप्रतियोगित्वरूपनित्यत्ववदित्यर्थः नन्वेवं प्रकृते किमायातमत आह व्यवहारनित्यतया चेति। सर्वेषां शब्दाना
माकाशादिवत्सृष्ट्यादावुत्पत्तिः प्रलये च नाश इत्यर्थः एवं च व्यवहारनित्यतयोऽक्षरब्रह्मसादृश्यवत्तां तेषां पदादिरूपा
णामयं वर्णसमाम्नायः शास्त्रप्रवृत्तिद्वाराबोधक इत्यक्षरसमाम्नाय इति चतुर्दशसूत्री विषयव्यवहारोपपत्तिः ए
वं च शब्दे औपचारिकोक्षरपदप्रयोग इति भावः न्यायादिनयेप्याह जातिस्फोटस्य वेति भाष्ये श्नोतेर्वेति तद्व्याचष्टे

तच्च ब्रह्मतत्वं परमार्थतो नित्यं व्यवहारनित्यतया च वर्णपदवाक्यस्फोटानां नित्यत्वाज्जातिस्फोटस्य वा। अ
श्नोतेर्वेति। सरन्प्रत्ययस्यानुबंधलोपे कृते अनुकरणं स ऽर इति तत्रार्थमश्नुते व्याप्नोतीत्यक्षरं पदं वाक्यं।
वर्णं वाहुरिति। रूढिरिति। रूढिरियं वर्णस्येत्यर्थः पूर्वसूत्र इति व्याकरणांतरे वर्णअक्षराणीति वचना
त्। किमर्थमिति वर्णानां साधुत्वस्याप्रतिपाद्यत्वात्पदस्यैव साधुत्वान्व्याख्यानात्प्रश्नः॥ ॥

र्थमश्नुत इति वर्णानामनर्थकत्वेन चिंत्यमिदं नानादेशेषु युगपत् एकस्यैव शब्दस्याभिव्यक्तिदर्शनेन स्फोटस्यापि व्याप
कत्वमस्तीति भाष्यार्थ इत्यन्ये। ननु न्यायादिनयेऽव्याप्यवृत्तिष्वविनाशिषु वर्णेषु कथं तद्व्यवहारोत आह वर्णं वाहुरिति। न घटितः
पाठोत्र प्रामादिकः व्याख्यानं भाष्ये ऽ पर्वेत्युक्ते : नन्वनंतरोक्तयोगाभावात्कथं तेषु प्रयोगोत आह रूढिरिति। तदुक्तं भाष्ये ऽक्षर
मिति। व्याकरणांतर इति पूर्वसूत्रशब्दे षष्ठीतत्पुरुष इति भावः एवं चाक्षरसमाम्नाय इत्यस्य प्रकृतिरूपो वर्णसंघात इत्यत्र तात्पर्यं। भा
ष्ये उपदिश्यत इति अक्षरसमाम्नायोपदेशः किमर्थ इत्यर्थः पूर्वकृतोप्ययं विचारः कंचिद्विशेषं वक्तुं पुनः क्रियते॥ ॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

येनशास्त्रेणेति।चतुर्दशसूत्र्यात्मकेनतन्मूलकपाणिनिव्याकरणेनचेत्यर्थः तत्शास्त्रंवाचोविषयः बंधनंप्रतिपा
दकमित्यर्थः वर्णज्ञानंशास्त्रंवाचोविषयः कासावाक् यत्रब्रह्मचवर्त्ततेचात्पुराणादिइति भाष्याक्षरार्थः तदर्थमित्ये
तद्व्याचष्टे शास्त्रप्रवृत्त्यर्थमिति कलादीति इदंप्रयोजनंयस्यशांत्तेदूषितंअनुबंधकरणार्थमिति लघ्वर्थमित्यक्षराणां
मंत्रार्थेस्वारस्यंचिंत्यंअनुबंधकरणमूलकप्रत्याहारद्वारालाघवेनशास्त्रप्रवृत्त्यर्थमित्यर्थोवावाक्समाम्नायःवाक्सं
ग्रहोपापइत्यर्थः तदाहएतावाङ्गिरेवेति।दृष्टफलेनाभ्युदयेनवापुष्पितः अदृष्टफलेननिःश्रेयसेनवाफलितः वो

वर्णज्ञानमिति।वर्णायेनशास्त्रेणज्ञायंतेतद्वाचोविषयः शास्त्रेणवाग्विषयीक्रियतेआवध्यतेतस्याः परि
ज्ञानायेत्यर्थः यत्रचेति।ब्रह्मवेदःपदेवर्ततेतस्यचशास्त्रंविषयइत्यर्थः तदर्थमिति।शास्त्रप्रवृत्त्यर्थ
मित्यर्थः इष्टबुध्यर्थमिति।कलादिदोषरहितज्ञानार्थमित्यर्थः लघ्वर्थमिति अनुबंधकरणार्थमित्यर्थः
वाक्समाम्नायइति।एतावाङ्गिरेववर्णैः वाग्व्यवहारइत्यर्थः पुष्पितःफलितइति।दृष्टादृष्टफलाभ्यामभ्युदय
निःश्रेयसाभ्यांवा।चंद्रतारकवदिति।अनादित्वान्नित्यत्वं वाग्व्यवहारस्यसूचयति।ब्रह्मराशिरितिब्रह्मतत्वमेव
शब्दरूपतयाप्रतिभातीत्यर्थः॥

ग्व्यवहारस्येति।तत्संग्राहकस्यचतुर्दशसूत्रीरूपस्येत्यर्थः यथाश्रुतेहिभाष्येअक्षरसमाम्नायोद्देशेनप्रवृत्ताविशेषे ७४
णानामन्यपरतयायोजनेभाष्यविरोधः अतएवेतत्प्रतीकमुपादायहरिणास्याक्षरसमाम्नायस्यवावग्व्यवहारजन
कस्यनकश्चित्कर्त्तास्त्येववेदेपारंपर्येणस्मर्यमाणमितिव्याख्यातंब्रह्मतत्वमेवेतितदुक्तंनंदिकेश्वरेणकारःसर्ववर्णाग्र्यः
प्रकाशःपरमेश्वरइत्यादिनासर्ववर्णानांमायेश्वररूपतावर्णित्पएवचमहादादिसृष्टिरित्यर्थपरतयाचतुर्दशसूत्रीयोजयता॥ ॥

तदाहसर्ववेदेत्यादि।अन्येतुवर्णज्ञानंचतुर्दशसूत्र्यात्मकंशास्त्रंवाचोवेदशास्त्रपुराणरूपायाःसकलवाचःविषयो
बंधनं।यत्रचवर्णसमाम्नायेब्रह्मबोध्यतयावर्त्तते।व्याख्यातान्चैषाञ्चतुर्दशसूत्रीब्रह्मपरतयानंदिकेश्वरेण।तद
र्थसकलवाक्ज्ञानार्थं।ब्रह्मबोधनार्थंच।अनेनसकलवेदाध्ययनेनयत्फलंतदक्षरसमाम्नायज्ञानेनसूचितंत
द्वक्ष्यतिसर्ववेदेत्यादिनासोयमित्यादिभाष्यग्रंथएतत्श्लोकपूर्वार्धस्यैवव्याख्यानपरःतत्रवर्णज्ञानमित्यस्यव्या
ख्यासोयमक्षरसमाम्नायइति।वाग्विषयइत्यस्यव्याख्यावाक्समाम्नायइति।सर्ववाग्रूपत्वात्।तदध्ययनतन्मू

सर्ववेदेति।सर्ववेदाध्ययनस्यकृतस्यपुण्यंयत्फलंतत्प्राप्नोतीत्यर्थः मातापितरावितिामहात्म्याति
शयःशास्त्रस्यप्रत्याहारफलाख्यानद्वारेणव्याख्याप्यते।महीयतेइति।पूजांप्राप्नुतइत्यर्थःमहीय
शब्दःकंड्वादियगंतः॥ ॥इत्युपाध्यायजय्यटपुत्रस्यकय्यटकृतेभाष्यप्रदीपेप्रथमस्याध्यायस्यप्रथमेपादेद्वि
तीयमाह्निकंसमाप्तं॥

लव्याकरणाध्ययनाभ्यांपुष्पितःफलितःतदर्थभावनयाजनिततत्वरूपफलःचंद्रतारकवत्प्रतिमंडितइत्यनेनास्या
नादित्वंसूचयति।तादृशोयंब्रह्मराशिर्वेदितव्यःबोध्यबोधकयोरभेदात्।सर्ववेदेतिसर्ववेदाध्ययनजन्यपुण्यफलस्यचि
त्तशुद्धिरूपस्यप्राप्तिरस्यज्ञानेध्ययनमात्रेभवतिइदमेवपूर्वंपुष्पितत्वं।तादृशापुत्रसत्वेनचमातापित्रोःस्वर्गेपूजाभव
ति।यथाकृतराजसूययुधिष्ठिररूपपुत्रेणपांडोःस्वर्गेपूजेति।इष्टबुध्यर्थमित्यादितुप्राग्व्याख्यातत्वान्नव्याख्यातमित्याहुः॥
॥इतिकालोपनामकशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतेभाष्यप्रदीपोद्योतेप्रथमस्यप्रथमेद्वितीयमाह्निकं॥ ॥

श्रीगणेशायनमः॥ वृद्धिरादैच् द्विपदंसूत्रंकृतमनयोःसाधुत्वमितिभाष्यदर्शनात्।अन्यथाउद्देश्यानेकत्वात् वृद्धिशब्दस्यावृत्तिर्वाक्यार्थ
बोधापकार्यास्यात् द्वंद्वेतुसमाहारस्यैकस्योद्देश्यस्य

७५

कै॰वि॰
७५

के॰ वि॰
७६

:॥श्रीगणेशायनमः॥वृद्धिरादैच्।द्विपदंसूत्रंकृतमनयोः साधुत्वमितिभाष्यदर्शनात्।अन्यथाउद्देश्यानेकत्वात्वृद्धि
शब्दस्यावृत्तिर्वाक्यार्थबोधायकार्यास्यात् द्वंद्वेतुसमाहारस्यैकस्योद्देश्यस्यशब्दतः संभवात्तांविनापिसिध्यति नचसमाहारे
टच्प्रसंगःसमासांतविधेरनित्यत्वात् प्रतेरंश्चादयइतिसूत्रेंश्चादिगणेराजन्शब्दपाठात्।अन्यथाराजाहइतिटचासि
द्धेकिंतेन।यद्वापदत्रयंयस्यशायांभाष्येवृद्धिःरात् ऐजितिपदविभागदर्शनात् वृद्धिशब्दस्यावृत्त्यायोज्यः अत्र पक्षेऽनयो
रितिभाष्यंखंडयोरित्यर्थकं।असाधुशब्दोच्चारणेपाणिनेरश्रद्धापतापत्यातदुक्तपदानांसाधुत्वंविचारयतिभाष्येकुत्वमि

:॥श्रीगणेशायनमः॥ वृद्धिरादैच्। कुत्वंकस्मादिति।अनेकशक्तेः शब्दस्यशक्त्यतावच्छेदेनसंद्गि
विनियोगान्नित्यत्वाच्च सर्वसंज्ञानांलौकिकत्वादादैछब्दस्यानुकरणशब्दत्वाज्जातिशब्दत्वाद्वाशास्त्रप्राप्तिरस्तीतिप्रश्नः।

त्यादि।ननुऐछब्दस्यारंत्येनेत्यनेनकृत्रिमतयालौकिकवैदिकबहिर्भूतत्वेनकथंकुत्वादिशास्त्रप्राप्तिः लौकिकत्वंचलोके
र्थबोधनायप्रयुक्तशब्दत्वमतआह।अनेकेति।नित्यत्वाच्चेतिचोहेतौयतःशब्दार्थसंबंधस्यनित्यत्वात्सर्वसंज्ञानांनित्यत्व
मतोलौकिकत्वाच्छास्त्रप्राप्तिरित्यन्वयः लोकेऽर्थांतरेऽप्रसिद्धानामपिसंज्ञानांनित्यत्वमितिबोधयितुंसर्वशब्दः नन्वेवं
वृद्धिरादैनित्यादीनांवैयर्थ्यमतआह शक्तीतिशक्त्यवच्छेदःतत्संकोचःविनियोगःविशेषेनियमः अस्मिन्नर्थेतातिरिक्तार्थां
तरव्युदासायचसःपरिसंख्यायांचात्रशास्त्रेप्रायेणनियमव्यवहारइतिबोध्यं। यद्वाशक्त्यवच्छेदःशक्तिनिश्चयःश
ब्दार्थस्यानवच्छेदेइत्यादावच्छेदशब्दस्यतदर्थकत्वदर्शनात् फलरूपेहेतौतृतीयाविनियोगउपदेशःशक्तिनिश्चयफ

लकोपदेशादित्यर्थः एवंचतत्संकेतकरणरूपप्रकरणादर्थांतराप्रतीतिरितिबोध्यं।इदमेवयुक्तंसर्वार्थवाचकत्वेपिसंकेत =
रूपत्वेनाज्ञातशक्तिबोधकतयाविधित्वसंभवेनएषांनियमार्थत्वासंभवात् नन्वेवंलौकिकार्थबोधोनस्यादतउक्तमनेक
शक्तेरितिस्वशास्त्रे एवप्रकरणादन्यार्थाबोधइतिभावः अनेकस्मिन्ननेकावाशक्तिरस्येतिविग्रहः अंत्येसर्वनाम्नोवृत्ति
मात्रइतिपुंवत्वं।कोपधप्रतिषेधेतद्धितवुग्रहणाच्छास्त्रियादितिपुंवत्वं।आश्रयभेदादेवशक्तिभेदइतिमतेआद्यं।निरूपकं ॥ह्य॥
भेदाद्भेदेद्वितीयः नित्यशब्दार्थसंबंधेपुरुषव्यापारात्प्रागवाचकस्यनपुरुषव्यापारेणवाचकताशक्याकर्तुमतःसर्वेसर्वा
र्थवाचकाइत्यभ्युपगमादनेकशक्तित्वावसायः तादात्म्यमेवचशब्दार्थयोः शक्तिः अत्र पक्षेगौणमुख्यविभागःप्रसिध्य
वे प्रसिद्धिमूलःअन्यायोनेकार्थत्वमितित्वश्रद्धेयमितिनिरूपितंमंजूषायांअत्रलौकिकशब्दत्वंशास्त्रीयसंज्ञात्वसमाना
धिकरणंनित्यत्वंहेतुरतोनंवैदिकेषुव्यभिचारः सर्वसंज्ञानामितिवदतासूचितमिदं।अ ^ साध्यं X पूर्वाःसंज्ञाःक्रियं
तइतिपक्षेपिलौकिकत्वंसाधयति।अनुकरणेति।अयमपिलौकिकत्वेहेतुःआदिरंत्येनेत्यनेनसंज्ञात्वेनाविनियुक्तस्यै
चूशब्दस्यानुकरणंसूत्रेलक्षणपातेनैवोपस्थापितयोरैकारौकारयोस्तात्पर्यवशाच्छाब्दबोधविषयत्वेतिबोध्यंअनुकरणे
चसर्वशब्दानांसाधुत्वेनशास्त्रविषयतेतिभावः येत्वेजित्याद्यंतावयवद्वारासमुदायानुदायानुकरणमिति।तन्नात्तपास
त्यादिरंत्येनेतिसूत्रवैयर्थ्यापत्तेः वृद्धिशब्दादिःशास्त्राविषयतायाएवमप्यनुपपादनाच्च।नत्वनुकरणत्वाननुभवःकिंच
त्रयीशाशब्दानांप्रवृत्तिरितिपक्षेउक्तहेतुद्वयस्याप्यसत्वातआहजातीति।वैयाकरणव्यवहाराच्चतत्सिद्धिरितिभावः अत्रप
क्षेजातिबोधार्थमेवसंज्ञासूत्राणीतिबोध्यं।अत्रापिपक्षेलौकिकत्वंसंज्ञापक्षवदेवबोध्यं। हरदत्तस्तुवृद्धिशब्दोवृधेर्भावेक्तिन्
[illegible]तन्ना।अ

इ॰ गुणइत्यादावसंभवात्॥

ननु कुत्वमित्यत्र संज्ञात्वपक्षे ककारादिपंचकगतप्रवृत्तिनिमित्ताभावाद्भावप्रत्ययोनुपपन्नः किंचात्र ककारस्यप्राप्तिर्न
तु कुवृत्तिधर्मस्येति कुत्वमित्यसंगतमत आह तत्रेति। आसक्तरूपः संबद्धस्वरूपः एवं च कुशब्दः कुशब्दवत्ककारादिषुश
क्त इत्येवं शक्तिग्रहात्कुशब्दस्य प्रवृत्तिनिमित्तत्वं संबंधश्चाभावादिव्यवहारसिद्धतादात्म्यं तादात्म्येन कुशब्दं प्रवृत्तिनिमित्तीक
त्यशक्तित्वेन तस्य ग्रहे बाधकाभावात्। केचित्तु शब्दस्य स्वरूपं कुशब्दत्वं सामान्यं तत्कादिष्वारोपितं प्रवृत्तिनिमित्तं तद्व्य
क्तिश्च वाचिकेत्याहुः तेन च कुत्वशब्देनुस्वार्थाश्रयः ककारो लक्ष्यते इति ककारः कस्मान्नेति चोद्यपर्यवसानं। वस्तुतः कु

तत्र कुशब्दः पंचसु वर्णेषु व्यासक्तस्वरूपो वाचकत्वेन विनियुक्त इति शब्दस्वरूपे प्रवृत्तिनिमित्तेभा
वप्रत्ययः छंदोवदिति। न वैशेषिकादिसूत्राणि किं त्वंगत्वाद्व्याकरणसूत्राण्येव इष्टिश्चेयं छंदोवदिति॥ ॥

त्व कुपदयोश्च पर्यायते ति शल्कसूत्रेनिरूपितमिति न कश्चिद्दोषः अंगत्वात् पदपदार्थकथनद्वारा वेदोपकारत्वात्॥
मुखं व्याकरणमित्यादिनांगत्वनिरूपणञ्च प्रधानं च षट्स्वंगेषु व्याकरणमिति यस्य शाखाभाष्योक्तेश्च अस्यामिष्टौ ना
र्षत्वं प्रयोजकं नैषेष्टिरस्ति छंदोवत्कवयः कुर्वतीति सूत्रव्याख्याविति सूत्रेभाष्योक्तेः तस्मादंगत्वमेव प्रयोजकमिति भावः ११
ननु छंदसि विहितस्य सूत्रे कथं प्रवृत्तिरत आह इष्टिरिति तथा च साप्यकारीयातिदेशात्सूत्रेषु छंदः कार्यप्रवृत्तिरिति भावः भाष्ये ज
श्रत्वमपीति। संहितायां पाठे इत्यर्थः उभयसंज्ञान्यपीति उभे संज्ञे येषामिति विग्रहः संज्ञाद्वयहेतुककार्यदर्शनेन तद्वत्वकल्पनेति भावः॥ ॥

ननु सूत्रादादैज्मात्रग्रहणपक्ष एव प्रतीयत इति प्रश्नानुपपत्तिरत आह उभयथेति। घुगादिसंज्ञासु तद्भावित
पक्षस्य लोपसंज्ञायामदर्शनमात्रस्येति भावः ननु टिघुभादिसंज्ञास्वतद्भावितानामेव ग्रहणं दृश्यत इति सोपि पक्षः
शंकितुमुचित इति चेन्न तत्र हि तद्भावितासंभवादतद्भावितानामेव ग्रहणं न च तथा प्रकृत इति उभयथेत्युक्तं। वृद्धि
शब्दे तत्राद्यंगीकारे तद्भावितग्रहणं। वृद्धिशब्दैकत्वे द्वितीयः पक्ष इति भावः। भाष्ये वृद्धिलक्षणो मयडिति। नित्यं वृद्ध
शरादिभ्य इति। अस्य वृद्धसंज्ञाद्वारा वृद्धिलक्षणत्वं बोध्यं। वृद्धलक्षण इति पाठे एषां वृद्धिलाभावेन समुदायानां वृद्ध

किं पुनरिति॥ उभयथा शास्त्रे दर्शनात् पक्षद्वये च दोषदर्शनात्प्रश्नः॥

त्वाभावादित्यर्थः फिञिति। उदीचां वृद्धादगोत्रादिति। न च प्राचामवृद्धादिति फिनाप्येतत्सिद्धं पुंवद्भावनिषेधो
प्याम्रगुप्तायनीर्नाय इत्यादौ जातेश्चेति सिद्ध इति वाच्यं। आम्रगुप्तायनेरपत्यं युवेत्यर्थे। णो एयक्षत्रियार्षञित
इति लुकि आम्रगुप्तायनिरित्येवरूपं पितरि पुत्रे चेष्यते फिनि तु ञितः परत्वाभावान्न सिध्येत् न चाब्राह्मणगोत्र
त्रमात्राद्युवप्रत्ययस्योपसंख्यानमिति तत्सिद्धिः ब्राह्मणगोत्रे तदप्रवृत्तेः भाष्ये एषविधिरिति। पूर्वपदांतोदात्त
त्वमित्यर्थः भावद्भार्ये आसर्वनाम्न इत्यात्वस्य वतुनिमित्तमिति पुंवत्वनिषेधप्राप्तिः॥ ॐ नमः शिवाय॥ ॥

यदि प्रथमपक्षे दोषो दुरुद्धरोस्तु तर्हीत्यन्वयः। तद्धेत्युत्तरपदे इति समासाक्षिप्तोत्तरपदशब्देन सामानाधिकरण्या-
योत्तरपदस्येत्येवं वृद्धिर्यस्मिन्निति बहुव्रीहिरिति भावः तत्राधिकारलक्षणायां बीजमाह तत्रहीति नचआअवतीति औः
सर्वस्य औः सर्वौरित्यादौ वृद्धिरूपोत्तरपदसंभवः नचैकादेशोव्यपवर्गाभावः नेंद्रस्येति निषेधेन पूर्वोत्तरपदसंबंधि
कार्यस्यैकादेशात्प्राक् प्रवृत्तिस्वीकारात् तथाच सर्वशब्दांतोदात्तत्वे शेषनिघातेन औकारस्यानुदात्तत्वे एकादेशस्य

उत्तरपदस्येत्येवमिति। नत्रहि वृद्धौ सर्वं चेत्यप्युच्यमाने वृद्धिमात्रस्योत्तरपदस्याभावात्सामर्थ्याद्वृ
द्धिमदुत्तरपदं ग्रहीष्यत इत्युच्यमानमुत्तरपदग्रहणं सामर्थ्यादुत्तरपदाधिकारं गमयति॥ ॥

स्वरितो वानुदात्ते इति पाक्षिकस्वरितः स्यादिति वाच्यं तादृशानामाभिधाने दृढतरमानाभावात् स्वरितत्वाद्वाधि
कारलाभ इति बोध्यं॥ अन्यथा वृद्धेरिति॥ वृध्यात्मकतद्धिताभावाद्वृद्धिनिमित्तग्रहणमिति भावः व्य
धिकरणबहुव्रीह्याश्रयणसामर्थ्यादेव व्यपदेशिवद्भावाप्रवृत्तिरिति भावः॥ तेषामेवेति॥ एवं शब्दो
प्यर्थे विशिष्टस्य निमित्तत्वे विशेषणानामपि तत्त्वमिति भावः॥ ॐ श्रीकाशीविश्वेश्वरायनमः॥ ॥ ९८

Dr BHAU DAJI MEMORIAL
डाक्टर भाउदाजी ... स्मारकम्

अन्यथा वृद्धेरिति। वृध्यात्मतद्धिताभावाद्वृद्धिनिमित्तग्रहणं व्यधिकरणबहुव्रीह्याश्रयणसामर्थ्यादेव व्यपदेशिवद्भावा
प्रवृत्तिरिति भावः तेषामेवेति। एवशब्दोप्यर्थे विशिष्टस्य निमित्तत्वे विशेषणानामपि तत्त्वमिति भावः ननु वृत्तावनेकत्वसं
ख्यावगते र्बहुवचनांतेन विग्रहोनुपपन्नो तआह निमित्तेति। तत्रकात्स्न्यप्रतिपत्तिकालिकं न प्रयोगसमवीयिर्मितिनपा
रिषघास्तार्य दोषः नच वैयाकरणेणार्थेपि निषेधापत्तिरिष्टापत्तेः अत एवादैज्मात्रस्येति पक्षेऽत्र दोषानुद्भावनं तद्भावि

वृद्धेर्निमित्तमस्मिन्निति। निमित्तशब्दोपादानसामर्थ्याद्व्यधिकरणो बहुव्रीहिराश्रीयते अन्यथा वृद्धेस्ताद्धितस्ये
त्येव ब्रूयात् वृद्धिनिमित्तत्वात्तद्धित एव वृद्धिशब्देनाभिधायिष्यते अथवा वृद्धेः संबंधी यस्तद्धित इति वैयधि
करण्येन संबंध आश्रयिष्यते। योसौ ककार इति अणकेषु सत्सु वृद्धिर्भवतीति तेषामेव निमित्तत्वम्। अथ
वेति। निमित्तशब्दोपादानादेवाश्रितबहुसंख्यो वृद्धिशब्दः समस्यते। वृद्धीनां निमित्तं वृद्धिनिमित्तमिति॥ ॥

तानामेवेति पक्षेपि न व्याप्यामिति सूत्रे ऐजंशोपि वृद्धिपदसंबंधेन निषेधप्रवृत्तिरत्र स्यपादा अत एव देविकाशिंशपे
ति सूत्रे भाष्यकृता तत्संबंधो दर्शित इत्याहुः। आदैज्मात्रग्रहणादेव माजादीनां चेति सार्थकं। अन्यथा स्यादृद्धत्वात्त
स्येऽवृद्धमित्येव सिद्धे किं तेन॥ ॥छ॥ ॥ श्रीसांबशिव प्रसन्नोस्तु॥ ॥छ॥ ॥

वार्त्तिकमिति। सूत्रेऽनुक्तदुरुक्तचिंताकरत्वं वार्त्तिकत्वं। एतेन सूत्रव्याख्यानाय प्रवृत्तस्य कात्यायनस्यायुक्तादुरुक्तचिंते
त्यपास्तं। प्रस्तावेति वार्त्तिकेऽधिकारशब्दोक्तः सइति भावः वृध्यादीनां संज्ञात्वाङ्गेदनिबंधनषष्ठ्यनुपपन्नेत्यत आह संप्र
त्ययइति। भाष्ये संज्ञेत्येतइति शब्दार्थज्ञानामितरेतराध्यासादिदं नानुपपन्नं भाष्यकारस्त्वितिअधिकारं विनाऽसंप्रत्यय
दृष्टांतस्य लौकिकस्याभावादर्थापरिज्ञाने दृष्टांतानुपयोगाच्चेति तद्भावः वाक्याध्याहारेणेति। इदमिदानीमिति वाक्याध्याहा

संज्ञाधिकारइति वार्त्तिकम्। तस्य व्याख्यानमपसंज्ञेत्येवमिति। अपशब्दः संज्ञायाः प्रस्तावद्योतनार्थः वृध्यादी
नामिति। संप्रत्ययइत्येतदपेक्षया कर्मणि षष्ठी वृध्यादयः संज्ञात्वेन यथा प्रतीयेरन्नित्यर्थः यथा लोकइति कात्या
यनेनासंप्रत्यये लोको दृष्टांतत्वेनोपात्तः भाष्यकारस्तु वाक्याध्याहारेणानर्थकत्वे लोकं दृष्टांतत्वेन योजयतीव इह सू
त्रमिति। बहुव्रीहिः प्रकरणं चान्यपदार्थः समाहारे द्विगुर्वा अर्थवंति चेति। यथा लोकोऽर्थवंति प्रयुंक्ते एवम
नर्थकान्यपीत्यर्थः यावच्चाप्तत्वमाचार्यस्य न साधितं तावदत्रानर्थकत्वशङ्का झटिति समन्वयानवगमाद्वा॥ ॥

रेणेत्यर्थः ननु द्विगोरकारांतोत्तरपदत्वात्स्त्रीत्वे ङीप्स्यादत आह बहुव्रीहिरिति। अन्यपदार्थस्याशाब्दत्वाद्बहुव्रीहिदुर्ब
योत आह समाहारेति पात्रांतादित्वात्स्त्रीत्वाभावः। अत एव त्रिसूत्रीत्यादि संगच्छते। बहुसूत्रशब्दस्यैवेतत्र पाठादित्यभि ७८
मानः नन्वनर्थकदृष्टांतेऽर्थवंतीत्यादिव्यर्थमत आह यथेति। यद्यप्यन्वितार्थकपदसमूह एव वाक्यं तथापि भाष्ये पदस
मूह एव वाक्यशब्दः प्रयुक्तोऽतोऽनर्थकानि वाक्यानीति न विरुद्धं। झटिति। विनाचार्याचारादिज्ञानेन॥ ॥

पदार्थानां। कुंडमजाजिनमित्यादीनां स्फुटतोपत्यं स्फैयकृतः उपचारो नाम गौणी वृत्तिरित्तिस्त्रमंखुदस्यति व्यवहा
रादिति अनेन व्यवहाराच्छक्तिग्रह उक्तः स च शक्तिग्राहकशिरोमणिः भाष्ये वेदे याज्ञिका इति यज्ञकांडद्रष्टारो ऽनृषय इ
त्यर्थः वेदकर्तृत्ववत्संज्ञाकर्तृत्वं तेषां द्रष्टव्यं। भाष्ये इहैवेति। वृद्धिरादैचि सूत्र एवेत्यर्थः असत्याः शक्तेर्व्याख्यानेनोत्पा
दयितुमशक्यत्वादाह वृद्धिशब्दस्येति प्रत्यापनशक्तिः प्रत्यायने बोधजनने कारणीभूता शक्तिः भाष्ये उदाहरंती

दशदाडिमानीति। पदार्थानां समन्वयाभावादत्रानर्थक्यम्। आचार्याचारादिति। आचार्याणां व्यवहारा
दित्यर्थः वृद्धिशब्दः संज्ञेति वृद्धिशब्दस्य प्रत्यापनशक्तिर्व्याख्यानेनैव प्रकाश्यते यथा देवानां वर्णानामि
ति वर्णत्वम्। अपरइति। प्रदेशाद्वा संज्ञासंज्ञ्यभिव्यक्तिः संज्ञासूत्रार्थाद्वा प्रदेशार्थव्यवस्थेत्यर्थः॥ ॥

ति वृद्धिरादैजिति सूत्रार्थकल्पनार्थं तत्प्रदेशत्वेनाभिवृद्धिरित्युक्ता तदुदाहरणत्वेनाकार्षीत् अक्षैषीद औषी
दित्युदाहरंतीत्यर्थः एवं च वृद्धिशब्दस्य प्रत्यायकत्वमादैचां प्रत्याय्यत्वं निर्णीय वृद्धिरादैच्सूत्रस्य संज्ञाबोध
कत्वं वृद्धिशब्दस्य संज्ञात्वं च निर्णीयंतीति भावः। तेन अपराचार्योक्तोदाहरणेन॥ ॐ नमः शिवाय॥ ॥

नन्वाकृतिर्जातिस्तद्भेद आदैक्ष्वपि। तद्भावस्तु न वृद्धिशब्देपीत्यत आह। आकृत्येति। बहुव्रीहिरिति भावः। अनाकृ
तिरित्येतन्यायसिद्धमित्याह लाघवार्थमिति। नन्वेकस्यापित्यादेरनेकाः कृत्कृत्यप्रत्ययसंज्ञाः क्रियंते अत आह प्र
योजनेति सति हि प्रयोजने तथा कृते तु न तथा प्रयोजनाभावादिति भावः। प्रत्यभिज्ञाननिमित्तकं प्रत्यभिज्ञा प्रमा
णकमित्यर्थः वस्तुतोभाष्य

अनाकृतिरिति। आकृत्या साहचर्याज्जातिरेव लक्ष्यते तेनायमर्थः वृद्धिशब्द एकत्वात् संज्ञा आदैचां तु बहुत्वा
त्संज्ञित्वम् लाघवार्थं हि संज्ञाकरणं यथा सर्वादीनि सर्वनामानीत्यनेकस्यैका संज्ञा क्रियते न त्वेकस्यानेका
प्रयोजनाभावात् आकृतिमतद्इति अवस्थाभेदेष्वपि स एवायमिति प्रत्यभिज्ञाननिमित्तं देवदत्तत्वादिकं
सामान्यमस्तीत्याकृतिमतद्इत्युक्तम् लिङ्गेन वेति कलादिना वर्णदोषेणेत्यर्थः तमेवोपालभ्येति यो हि सूत्र
कारमुपालभते नगमकं नेदं सूत्रमिति स कथं वृत्तिकारान्प्रामाण्येनाश्रयतीत्यर्थः अपरितुष्यन्निति तथापि परि
हारान्तरं ब्रुवता आचार्यो वारोन प्रमाणत्वेनाश्रित इत्यर्थः तथापीति लिङ्गेन वेत्येतद्वक्तव्यमित्यर्थः अनाकृतिः
संज्ञेत्येतत्तु न्यायसिद्धत्वान्न वक्तव्यम्॥

णकमित्यर्थः वस्तुतो भाष्ये आकृतिमतद्इत्यस्य भेदवतद्इत्यर्थः अवस्थाभेदेन च तत्रारोपितः स आरोपितभेदश्च जाति ८०
मत्वेन मानं अत एव देवदेत्यादौ नडाविति कश्चित्। स कथं वृत्तिकारानिति। तस्यैवेति भाष्यस्य तदीयस्यैवेत्यर्थ इति भा
वः लिंगेन वेत्येतदिति लिंगासंग इत्यं लिंगासंज्ञेति च वक्तव्यमित्यर्थः॥ ॥ ॐ नमः शिवाय॥ ॥

ङकारादिष्विति। धात्वादिपवित्रेष्वित्यर्थः। ननु संज्ञालिंगे कृतेपि इत्संज्ञाद्यभावे कथं तेषां निवृत्तिरत आह। भाष्येस्व
भावतः संज्ञेति तद्याचष्टे संज्ञा संज्ञिनमिति। भाष्ये पाणिनीयं त्विति। अनंतस्य त्वेषु दोषविशिष्टपठने आनुनासिक्या
दिवत् प्रतिज्ञाकरणे च दुर्ज्ञेयत्वादिति भावः ननु भवते जन्मार्थत्वेनाभूत तत्रावप्रतीत्या ज्ञौ सति प्रमाणीभूत इति स्या
त् तदविवक्षायां तु प्रमाणमाचार्यः प्रकारांतरेणाभूत इति अर्थः स्यादत आह प्रामाण्यमिति। वृत्तिविषये इति प्रकृता

अप्यवेतर्हीति। एवं सतीत्यर्थः ङकारादिष्वनुबन्धेषु ककारादिकमासंक्ष्यते ततस्तेषां संज्ञात्वे सति ङित्वात्म
नेपदमिति करिष्यते संज्ञाश्च संज्ञिनं प्रत्याय्यस्वयं निवर्त्तत इतीत्संज्ञालोपश्च न वक्तव्यो भवत इत्यर्थः प्रमा
णभूत इति। प्रामाण्यप्राप्तः भूप्राप्ताविल्यस्माद्धूषादेति णिजभावे स्वरूपम् वृत्तिविषये च प्रमाणशब्दः
प्रामाण्ये वर्त्तते दर्भपवित्रेति प्रमादाभावं दर्शयति प्राङ्मुख इति प्राच्या अभ्युदयहेतुत्वात् महतेति म
नः प्रणिधानं दर्शयति। एतत्रागमाद्बोद्धव्यम् एवमानर्थक्ये परिहृते संज्ञासंप्रत्ययार्थं पक्षांतराणि प्रश्न
मुखेन प्रतिक्षिपति किमत इति॥

क्षिप्रायं प्रमादः पिशाचादिसंबंध आगमः संप्रदायः। प्रकृत भाष्योक्ति वा भाष्ये नर्थकेनेतेति बोध्यार्थरहितेनेत्यर्थः ते
न पारायणे सर्वेषामदृष्टार्थत्वेपि दृष्टप्रयोजनराहित्यरूपमनर्थकत्वं पदपदसूत्राणामस्त्येवेति न वक्ष्यमाणे सूत्रादिप्र
त्याख्यानासंगतिः॥ संज्ञासंप्रत्याय। संज्ञात्वनिश्चयाय। भाष्ये। किमत इति अतस्तादृशाक्षरकत्वात्किं कथम
र्थवत्त्वं यत्र यतस्तद्दशाक्षरनिरूपणमित्यक्षरार्थः साध्वनुशासने इत्यनेन साधुत्वपक्षस्याकांडताव्वारिता॥ ॥
२

द्वंद्वत्वादिति। अनयोरित्यस्य पदयोरिति विशेष्यं। पदानामेव साधुत्वान्वाख्यानादिति भावः। भाष्येऽविशेषेणेति। प्रत्ययविशेषमनादायेत्यर्थः। ननु वर्णसमाम्नाये आकाराद्युपदेशोप्यादैच्छब्दस्य किमागतमत आह तेषां चेति। संज्ञाग्रहणद्वारेणेति शेषः तपरद्वति। आदिरंत्येनेति च तेषां कृतयोरादैचोर्ज्ञयोर्द्वंद्वनिर्देशेन द्वंद्वशास्त्रेण कृतं साधुत्वमित्यर्थः। ऐजित्यपि तन्मूलकादिरंत्येनेत्यनेन बोधितामित्याशयेन भाष्ये ऽक्षरसमाम्नाये उपदिष्टा इत्युक्ते। ननूपसर्जनं पूर्वपरस्त्रेत्यादिभिः प्रयोगनिय

कृतमनयोरिति। आदैच्छब्दस्य द्वंद्वत्वादनयोरिति द्विवचननिर्देशः आदैचद्विति। तेषां च द्वन्द्वनिर्देशो यमादैच्छब्द इत्यर्थः प्रयोगनियमार्थमिति। आदैचशब्द इति प्रयोगो माभूदित्यर्थः नेहेति प्रयुज्यत इति प्रयोगः तत्र स्वतंत्रस्य पदस्य प्रयुज्यमानस्य नियमो नारभ्यते अपितु यदावयवस्य प्रकृतिप्रत्ययागमाद्युपसर्जनरूपस्य। लोके च केवल एव वृद्धिशब्दः प्रयुज्यत इति न तस्यानेन नियमः क्रियते लोके च प्रयुक्तानामिद
मनुशासनं॥

म आरभ्यत एवेत्यत आह प्रत्यत इति स्वतंत्रस्येति। गत्युपसर्गनिरासः तौ हि द्योतकत्वात्परतंत्रौ। यदावयवस्येति आदिना द्योतकाः युक्तंतरमाह लोके चेति शिष्टलोकाभिधाय प्रयुक्तानां चेदमनुशासनमिति भावः। केवलः आदैच्य ८१
दासंबंधः भाष्ये संस्कृत्येति साधुनन्वाख्यायेत्यर्थः आप्तिसंबंधः पौर्वापर्यलक्षणः॥ ॐ नमः शिवाय॥ ॥

षष्ठ्यभावेपि नाभिन्नभासित्याद्यावादेशदर्शनादाह स्थानेति षष्ठी स्थाने इति सूत्रगत इति शेषः। तत्र हि सूत्रे स्थानशब्दो धिकरणव्युत्पत्त्यार्थवाची भावव्युत्पत्त्या प्रसंगवाची च तंत्रेणोपादीयते। अन्यथा केवलार्थशब्दं प्राप्तिशब्दं वोपाददीत एवं च यानि योगाः षष्ठी सा प्रसंगनिरूपितसंबंधार्थिकैवेत्येकोर्थः द्वितीये तु षष्ठीशब्दो लक्षणया स्थानिपरः स्थाने इति सप्तमीवाच्यस्यार्थस्याधिकरणत्वविवक्षया बोध्यायोगशब्दश्च युज्यत इति व्युत्पत्त्या आदेशवाची ततोर्थ आद्यन्तेन स्था

षष्ठीनिर्दिष्टस्येति। स्थानशब्दोर्थवाचीतिष्टंत्यास्मिंछब्द इति स्थानं। न च वृद्धिशब्दार्थमादैचो वर्ण्यशब्दाः ते नात्र षष्ठ्यर्थाभावादिति तात्पर्यम् तथा हि षष्ठ्यभावेपि तदर्थसद्भावाद्भवत्येव स्थान्यादेशभावो यथा नास्ति नस्तंव परस्त्री परत्रंचेति आगमा अपीति अत्राप्यर्थापेक्ष्यते अनागमकानामर्थे सागमकाः प्रयोक्तव्या इत्यर्थः॥

नीस्थाणोभिधानसमर्था देशा वा नित्यर्थ इति भावः। भाष्यस्य तु षष्ठीनिर्दिष्टस्य स्थानिनो योर्थस्तस्य वाचका उच्यंते। न चात्रादैच्षष्ठीनिर्दिष्टस्य। निनोर्थमभिधेयत्वेन पश्याम इत्यर्थः। षष्ठ्यर्थाभावादिति षष्ठीबोध्यस्थान्यर्थाभिधानसामर्थ्याभावादिति भावः। तदर्थसद्भावादिति आदेशस्य स्थान्यर्थबोधनसामर्थ्यसद्भावादित्यर्थः वस्तुतस्तु स्थानं प्रसंग एवा सचार्थवत एवाऽर्थप्रत्यायनाय शब्दप्रयोगात्। एवं चार्थप्रयुक्त एव स्थान्यादेशयोः संबंध इति स्थान्यर्थाभिधानसमर्थस्यैवादेशता तिवदति। अत्रापीति। वस्तुतो ऽवयवषष्ठ्यैवागमा उच्यंत इत्यर्थः॥ ॥छ॥

कलादिलिंगसूत्रमव्याप्तत्वयेआह देशेति। देशविशेषप्रतिपत्त्यर्थयत्नसाध्यागमप्रतीतियत्नाभावेनेत्यर्थः इदंखल्वपी
तिभाष्यंपूर्वोक्तपक्षाणमसंभवंप्रतिपादयति। अस्तिसामानाधिकरण्यमिति। नन्वतादृशेसंज्ञासंज्ञासंज्ञित्वसंभा
वनेतिभावः। इत्युक्तयोरिति। विशेषणविशेष्यत्वसंज्ञासंज्ञित्वसंभावनास्यलप्रदर्शनायेत्यर्थः संज्ञासंज्ञिनोरप्य

लिङ्गंनचेति देशविशेषप्रतिपत्तयेटकारादिलिङ्गंक्रियतइत्यर्थः इदंखल्वपीति। विशेषणविशेष्यभाव
निराकरणेनसंज्ञापक्षंस्थापयति देवदत्तः पचतीत्यस्तिसामानाधिकरण्यंनत्वेकविभक्तिकत्व
म् गौरश्व इत्येकविभक्तिकत्वमस्तिनतुसामानाधिकरण्यमित्युक्तयोरुपादानम् संज्ञासंज्ञि
नोरप्यस्तिविशेषणविशेष्यत्वम् प्रसिद्धप्रसिद्धिवशादुक्तेदेनोपादानं॥

ति। अङ्कितादिसंज्ञादिस्वरूपेणैवसंज्ञिनं सजातीयाद्यागांतराद्विजातीयाच्च होमादेर्व्यवच्छिनत्तीतिविशेषणं। सं
ज्ञीचव्यवच्छेद्यः सान्विशेष्यः विषयतावशेषरूपमपितत्तयोरस्त्येवेतिभावः प्रसिद्धीतिद्वयोर्हिप्रतीतेत्यादिनाभा ८२
ष्येउक्तमेतत्। यद्यसत्यपिव्यवच्छेद्यच्छेदकभावेसंज्ञासंज्ञिनोर्विशेष्यविशेषणभावोलोकेनप्रसिद्धइत्यर्थः॥ ॥

ननुसामानाधिकरण्यंनामद्वयोः शब्दयोरेकाभिधेयसंबंधस्तथ्नयुक्तं सामानाधिकरण्यस्य शब्दधर्मत्वेनविशेषणवि
शेषयोः सामानाधिकरण्यमितिभाष्यासंगतेः। संज्ञासंज्ञिनोरेकाभिधेयसंबंधाभावेन संज्ञासंज्ञिनोर्वासामानाधिकरण्य
मित्यस्याप्यसंगतेरतआह। तत्त्विति भिन्नप्रवृत्तीत्यनेनपर्यायनिरासः वस्तुतस्तुइदंचिंत्यं अग्नेदेविसरस्वतिइडे
काव्येविहव्ये एतानितेअघ्न्येनामानीत्यादौनामत्रितेसामानाधिकरण्येइत्यस्यव्याप्तत्वयेतत्रसामान्यवचनग्रहणमितित

तत्तुसामानाधिकरण्यंशब्दयोरेवकेचिदिच्छंति। द्वाभ्यांशब्दाभ्यांभिन्नप्रवृत्तिनिमित्ताभ्यामेकस्याधिक
रणस्याभिधेयस्यप्रतिपादनात् विशेषणविशेष्यार्थप्रतिपादनाच्च विशेषणविशेष्यत्वम्॥ ॥

त्सूत्रस्यभाष्यविरोधापत्तेः युगपदधिकरणवचनतापक्षेपट्वी मृद्व्यावित्यत्र समानाधिकरणलक्षणपुंवद्भावशं
कापरभाष्यविरोधापत्तेश्च विशेषणत्वादिकंचोपपद्यतइत्याह विशेषणेतिभाष्येसंज्ञासंज्ञिनोरित्यत्र संज्ञिपदे
नसंज्ञिसमर्पकः शब्दोभिप्रेतः संज्ञाशब्देचशब्दः प्रवृत्तिनिमित्तंसंज्ञिनितत्संबंधात् संज्ञिबोधकशब्देत्वसंज्ञिग
ततत्तद्धर्मः प्रवृत्तिनिमित्तंएवंचवृद्धिशब्दवदभिन्नाआदैचइतिबोधः शब्दशब्दवत्त्वंचलोकसिद्धतादात्म्येनेत्याशयः॥

अन्येत्विति। संज्ञासंज्ञिनो रुक्तं प्रवृत्तिनिमित्तमिति सामानाधिकरण्यं। एकविभक्तिकत्वं त्वत्र पक्षे शब्दद्वारा बोध्यं। वि
भक्तिशब्देन शक्तिर्वाभाष्ये संज्ञासंज्ञिनोरित्यस्य तत्प्रवृत्तिनिमित्तयोरित्यर्थः। अन्येत्विति मतेऽरुचिबीजं तु प्रतीतप
दार्थकयोरिति बहुव्रीहिस्वरसभंगः विशेष्यणविशेष्यभावो भवतीत्यस्य तदर्थप्रतिपादकत्वं भवतीत्यर्थः ननु वैया
करणनामादैच्छब्दः प्रतीतपदार्थक एवेत्यत आह नहीति वृद्धिशब्दोऽपि अन्वययोग्य इति शेषोऽत्र द्रष्टव्यः केचित्तु दृष्ट्या

अन्ये तु नीलमुत्पलमिति प्रवृत्तिनिमित्तयोरेकमधिकरणमाश्रय इति सामानाधिकरण्यं विशेषणवि
शेष्यभावं चार्थयोरेवमन्यंते नचादैच्छब्द इति नह्यस्य कश्चिदर्थो विकोऽर्थः प्रसिद्ध इत्यर्थः॥ आवर्त्तिन्य
इति देवदत्तादिशब्दो हि दानादिप्रतिपादनायावर्त्तते॥

दिशब्दाः शब्दपरा एव वृद्धिशब्दाभिन्ना आदैच इति शेषः तदुक्तं हरिणा रथ्यादयो यथा शब्दा स्वरूपोपनिबंधनाः
आदैच्प्रत्यापितैः शब्दैः संबंधं यांति संज्ञिभिरिति। सामानाधिकरण्यं चैकविशेष्यकप्रतीतिजनकत्वमित्याहुः भा
ष्ये यत्नोऽपि इति। प्रत्यय अनीयरित्यादैलघ्वर्थमित्यस्य लाघवार्थमित्यर्थः नमांसपिंड इति दूरस्यस्यापि नामोच्चारणमात्रे
णाह्वानादिसंभवादितिभावः॥

सतोहीत्यादिना नभावरूपं विवक्षितं अभावस्यापि पिलोपादिसंज्ञादर्शनात् नापि विद्यमानत्वं प्रत्ययविधौ संज्ञावि
शिष्टस्यापि विधानादत आह बुध्येति अत एव भावर्णिर्भविता मनुरित्यादौ न दोषः एवं च सच्छब्देन पूर्वं बुध्या विष
यीकृतत्वं विवक्षितमित्यर्थः। बुद्धिसत्तासमाविष्ट एव चार्थः शब्देन बोध्यत इति सिद्धांतात्। तत्वाहि पूर्वोच्चारित
स्यैव भवतीत्याह। शब्देन पूर्वमिति। भाष्ये मांगलिको मंगलप्रयोजनः महतोऽर्थेतिः एकैकं सूत्रं शास्त्रमिति शास्त्रो

अथ वेति सत्यसति वा संज्ञिनि बुध्या विषयीकृते शब्देन पूर्वं निर्दिष्टे संज्ञा प्रवर्त्तत इत्यर्थः ततश्चादेङ्गु
ण इत्यादावदेङादयः संज्ञिनो गुणादयः संज्ञाः इह तु मङ्गलार्थोऽन्यथापाठक्रमः आर्थस्त्वन्यथाक्रमः
अन्ये तु सिद्धिहेतवो भविष्यंति॥

घस्येत्युक्तं। मंगलादीनीत्यादिना स्वप्रयोजनं श्रोतृप्रयोजनं चोक्तं प्रथंते विस्तृतानि भवंति तेन समाप्तिरर्थाक्षिप्ता। आ
र्थस्त्वन्यथेति आदैजुत्तरा वृद्धिरित्याकारः अनुपूर्वेज्ञानस्यासत्तिविधया हेतुत्वादिति भावः कथं तर्हि वृद्धिशब्दस्य संज्ञात्वप्र
तीतिरत आह। अन्ये त्विति लाघवादयः आदैचो वृद्धिपदाभिन्ना इत्यर्थः एवं चानुपूर्वीव्यत्यासेन विलंबेन बोधजनकश
ब्दोच्चारणं मंगलार्थं क्षम्यतामिति बोध्यं अत्रैकशब्दः प्रथमार्थकः प्रथमं तथाकरणं मंगलार्थमेव एवं चान्यत्रापि तथाकर
णं उद्देश्यविधेयभावेनान्वये तादृशस्यैव साधुत्वमिति भ्रमवारणार्थमित्याहुः॥ ॐ नमः शिवाय॥ ॥

DR BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

८३

परिभाषेतितदाह यत्राष्टकपदंतत्रैकालित्याद्यपतिष्ठतइत्यर्थात्प्राप्यंयुक्तमेवेत्यर्थः वस्तुइदंवृद्धिसूत्रेपिसुव
चंकिंचैवमष्टकसंज्ञायामित्यादिभाष्यवार्त्तिकव्यवहारानुपपत्तिः केचित्तुपरिभाषात्वेपिएकाल्प्रत्ययोद्देशेना
ष्टकपदवद्देशस्यत्वंविधेयंपदपरत्वार्थंतवापिलक्षणावश्यकत्वेनसामानाधिकरण्यान्वयार्थंतावत्पर्यंतलक्ष
णायाउचितत्वात् पदत्रयाध्याहारेगौरवाच्च। एवंचपरिभाषात्वेप्युद्देश्यत्वेनतस्यैवपूर्वभागेयुक्तः आनुपूर्वीप्र

अष्टकएकाल्प्रत्ययइतीतुपरिभाषानसंज्ञेतिनास्तिव्यभिचारः अष्टकशब्देनह्येकाकीकथ्यतेइत्य
नियमेनग्रहणेप्राप्तेनियमःक्रियतेअस्यानइति। अंतरेणापिसंज्ञाशब्दप्रयोगंलोकव्यवहारवदत्र
संज्ञासंज्ञिसंबंधःसिध्यतीत्यर्थः॥

त्यासाद्बोधस्तत्स्थयोः समइतिवदंतिः भाष्येनुवर्त्यस्यादितितत्रासंबंधबहुव्यवायादशक्यमितिभावः अस्थाने।
अनवसरेपिद्यते। विलक्षणंभवतीत्यर्थः अभिसंबंधः संज्ञासंज्ञिभावः ततोज्ञातुंशक्यइतिभावः॥ तस्याकृत ८६
इत्यस्यतेनाज्ञातइत्यर्थः। तथाचतेनकथंप्रतिपत्तुंशक्यइतिभावः अथतत्रेतिअनुमानादिनाज्ञातइत्यर्थः॥ ॥

सतोवृध्यादिष्विति। सतोनिष्पन्नस्यसंज्ञाभावात्संज्ञासंबंधात् तदाश्रये। संज्ञाश्रयेसंज्ञयासंज्ञिविधायकेशास्त्रेमृ
जेर्वृद्धिरित्यादौवृध्यादिपदेषुइतरेतराश्रयत्वादप्रसिद्धिर्वाक्यार्थाप्रसिद्धिरित्यर्थः अविद्यमानेसंबंधस्यवक्तुमशक्य
त्वादितिभावः वहनक्रियायामितरेतराश्रयत्वाभावेपितत्फलतीत्याहनेतीति। सामर्थ्यंतरेति। कारणांतरेत्यर्थः सू
त्रकर्कीलादिनचसामान्यलक्षणयाकृतत्वाविसकलविषयकशक्तिग्रहः संभवत्येव। अन्यथातवापितत्तद्बोधृबुद्धौ
असंनिहितसकलाकारविषयकशक्तिग्रहासंभवेनानुवादेपिदोषः स्यात् सामान्यलक्षणानंगीकारेपिशक्तिग्रहवो

सतोवृध्यादिष्विति विधौचायंदोषः नानुवादेवृद्धिर्यस्येत्यादौतत्रचसंज्ञाविधानस्यचरितार्थत्वान्मृजेर्वृद्धि
रित्यादौवृद्धिशब्दएवादेशः प्राप्नोति। ननुचनेदइति। नैशकटस्याभिमतदेशांतरप्राप्तिरितरेतराश्रये
चोद्यम्। सामर्थ्यंतरानुप्रवेशेनोत्तरम्॥

धादीनांसमानप्रकारकत्वेनैवकार्यकारणभावाभ्युपगमान्नदोषइतिवाच्यंजातिप्रकारकशक्तिग्रहस्यस्वाश्रयीभूत
सकलव्यक्तिबोधकत्वेप्यनुत्पन्नेजात्याश्रयत्वसंबंधस्यवक्तुमशक्यतयाभाविव्यक्तेर्जात्याश्रयत्वाभावात् तद्बो
धासंभवेनमृजेर्वृद्धिरित्यत्रतत्जन्योत्पत्तिज्ञप्त्योः परस्पराश्रयइतिभावात्। वृद्धिरादैजित्यस्यविद्यमानेषुबुद्धि
द्धिस्थेष्वचारितार्थ्येनभाविनामुद्देश्यत्वासंभवेनतत्रवृद्धिपदस्यशक्तिग्रहासंभवाच्च॥ ॥ॐनमःशिवाय॥ ॥

कै०वि०
८५

यद्यप्यस्य सूत्रस्य शाटकं वयेत्यादाविवनाविसंज्ञाविज्ञाने नासिध्यति यथा च तत्रोत्पत्त्यनंतरं गृहीतशक्तिक शाटकसादृश्या
त् शाटकपदशक्तिग्रहस्तथा प्रकृतेपि स्यादेवेदमिग्यणद्वृत्तिसूत्रेभाष्ये तथाप्यत्र वास्तवमेव परिहारमाह भाष्ये सिद्धं
त्विति। एतच्च मंजूषायां विस्तरेण निरूपितं न्यायेति वक्ष्यमाणे न्यायेत्यर्थः ननु वृद्धिर्यस्येत्यादौ समुदायासंभवात्प्र
त्येकमेव संज्ञोत्पत्त आह अन्यथेति। एवं च तमादाय तत्रापि संभवः द्वंद्वनिर्देशात्समुदायस्यैव स्यादितिभावः समुदा

सिद्धं त्विति। न हि मृजेरपूर्व आकारोभाष्यते किं तु मृजो उपदिष्टे मार्ष्टीत्यादी नाम साधुत्वबुद्धिः प्राप्नोतीति तेषां
साधुत्वान्वाख्यानं क्रियते प्रत्येकमिति। यद्यपि नित्यशब्दत्वे नैतदपि व्यवतिष्ठते तथापि न्यायम्रुत्पादनायो
पन्यासः समुदाये मा भूतामिति। अन्यथा मृजेर्वृद्धिरित्यादौ समुदाय आदेशः प्राप्नोति। समुदायावयवसन्नि
धौ क्व तात्पर्यं कस्य च नांतरीयकत्वमिति विचार्यते। अन्यत्रेति यत्न साध्यासमुदायप्रतिपत्तिरिति यत्नाभावेन
भवतीत्यर्थः ननु सहग्रहणं नियमार्थं स्यात् समुदायस्यैव समाससंज्ञा यथा स्यान्नावयवानामिति। नैतदस्ति
उभयत्र तात्पर्याभावाद्युगपदुभयत्र प्रसक्त्यभावाद्विकृत्वमेव सहग्रहणस्यान्यत्र समुदाये तात्पर्यं नास्तीत्यस्याव

येमातापित्रोर्मृते हनीति वृद्धोधे साहित्यं न तु क्रियानिष्पत्तौ इति भावः उभयत्रेति। समुदायेवयवे चेत्यर्थः उभयत्र तात्पर्या ८५
भावे हेतुर्युगपदिति। फलाभावादिति भावः यद्यपि पर्यायः प्राप्नोति तथापि समासविधिर्नियमो भयपरत्वे गौरवमित्य
तो लिंगत्वकल्पनमेवोचितमित्यत्र तात्पर्यं॥ ॥छ॥ ॥ॐ श्री पार्वतीप्राणजीवनाय नमः॥ ॥

नाप्यकारस्त्विति तदेकदेशीत्यर्थः द्वंद्वत्यनुवृत्त्यैव सिद्धे उभे ग्रहणं सर्वार्थकमिति भावः न न्यायकादेव किंतु युक्तितोपि
प्रत्येकं संज्ञेत्याह नाप्येप्रत्यवयवमिति प्रत्येकं वाक्यपरिसमाप्तिमुपक्रम्य प्रत्येकं भुजिसमाप्तिं युक्तिं न युक्तानहि भुज्य
ये त्रिवाक्यार्थः किं तु एवं तावति आह। अत्रेति। वाक्यार्थस्य। अत्र प्रयोतकव्यापारस्तस्य समुदायाविषयत्वसंभवात्फलग्र
हणं। तच्च प्रयोज्यव्यापाररूपमित्याह तच्चेति। ननु विशिष्टपरिमाणस्यापरनीयस्य भोजनक्रियासमुदायपर्याप्तत्वपि वक्तुं

उभे त्यस्यत्वं सहेति। अत्र सहग्रहणं वार्तिककारस्य कर्तव्यत्वेन स्थितं भाष्यकारस्तूभे ग्रहणस्यैतत्प्रयोज
नं स्थापयिष्यति। प्रत्यवयवं चेति। अत्र वाक्यशब्देन वाक्यार्थः फलमुच्यते तच्च देवदत्तादीनां भोजनं तस्य
चैतदेव रूपं यत्प्रत्येकपरिसमाप्त्या संपद्यते अत्रादनादिरूपत्वात्तृप्तिफलत्वाच्च भोजनस्य नाद्यक्रियातु
समुदाये समाप्यते। गीतादिक्रियासमुदायरूपत्वात्तस्याः संयोगसंज्ञा त्वन्वर्थत्वात्समुदाये प्रवर्तते॥
वृद्धिसंज्ञा तु लक्ष्ये दृष्टपगादैचां दर्शनान्माला दीनां चेति द्विकृत्वाच्च प्रत्येकं व्यवतिष्ठते॥ ॥

शाकपमत आह। तृप्तिफलत्वाच्चेति सर्वापि क्रिया प्रत्येकं समाप्यत इति न्नमो न कार्यद्वृत्याह नाद्येति। गीतादीति। आदिना नृत्तवाद्या
दि अन्वर्थत्वं संयुज्यते वर्णे अत्रेति लक्ष्यानुसारी तत्र समुदाये वाक्यपरिसमाप्तेराश्रयणमिति तत्वं। प्रकृते न्यतर
न्यायाश्रयणे हेतुमाह वृद्धिसंज्ञेति। लिंगादिति। प्रक्षेरकमिति निषेधबाधनार्थं हि तदिति भावः न च नामधेयरूपमा
लादीनामाद्युदात्तार्थं तत्तस्य वा नामधेयस्येति पक्षे वृद्धत्वादिति वाच्यं अन्तिमक्तेति न्यायेन तत्राप्रवृत्तेः॥ ॥

समुदाये समाप्तौ युक्तिमाह। अत्र शातस्येति एवं चाकथितसूत्रे दंडिरपि परिगणनीय इति भावः इत्येके तु उद्देश्यत्वरूपमा
र्थप्राधान्यं शतस्येत्यमुद्देश्यत्वेन गर्गाणुण कर्म दंडेश्च स्वसंप्रदानकदानानुकूलव्यापारानुकूलव्यापारः शासनरूपोऽर्थः
शासनं निमंत्रणं एवं तद्वत् कर्तुरित्युभयोः कर्मत्वं कर्तृप्रत्ययसमभिव्याहारे धात्वर्थप्रधानव्यापारविशेषणफला
श्रयत्वेन गर्गाणां शाब्दं प्राधान्यं तत्रैव प्रधाने कर्मणि लकारः प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणामित्युक्तेः

गर्गादिति। अत्र शातस्येप्सिततमत्वात्प्राधान्यम्। अपादानस्यानप्राप्ता गर्गा गुणकर्म। न च गुणभेदे प्रधा
नस्यभेद इति शतदण्डनं समूहे परिसमाप्यते। अर्थिनश्चेति। शतस्य प्राधान्यं प्रतिपाद्यते। दण्डपरायां हि
चोदनायां शतस्य प्राधान्यमतो वाक्यादवगम्यते। अथ तत्रांतरेणेति। न्यायादन्वर्थत्वाच्च समाससंज्ञायाः
समुदाये परिसमाप्तो सिद्धायां योगविभागार्थं तत्र सद्ग्रहणं स्थितमिति तत्रांतरेणेत्युक्तम्। ॥

दुहादिष्वस्याप्रामाणिकः पाठ इति वक्ष्यते अपादानस्यानप्राप्ताइत्यनेन चानुद्देश्यत्वमात्रमभिप्रेतमिति परे शातस्य प्रा
धान्यमिति। शारीराभिहननलक्षण दंडव्यावर्त्तनेनेति भावः नन्वंतरेणापीति वाच्यसार्वकालिकासत्त्वप्रतिपादकमपि ८६
शब्दरहितमयुक्तमत आह न्यायादिति। शतदंडनन्यायेत्यर्थः योगविभागेति। तिङंतसमासायेति भावः॥ ॥

साध्ये किमर्थमिति। चतुर्थीतत्पुरुषः न परकरणं क्रियत इति पाकं पचतीति वत्सामान्यविशेषभावेन सहप्रयोगः अ
त्वजाते भिन्नकालवर्णवृत्तित्वाभावात् द्वितीयमाश्रयतिव्यक्तिरिति यत् गुणस्येत्यादिर्बहुव्रीहिः साध्ये किं च कारणमिति
निमित्तकारणहेतुष्विति हेतौ प्रथमा अस्ति प्रयोजनमेतदिति काकास्सूचितमनुशयं पृच्छति किं तर्हीति। किं तर्हीति प्रश्ने इति इ

अथ किमर्थमिति। किमाकृतिपक्षे भिन्नकालनिवृत्त्यर्थमथवा व्यक्तिपक्षे गुणान्तरयुक्तानां ग्रहणार्थमि
ति प्रश्नः आकारस्येति। व्यक्तिः पदार्थो भेदकाश्च गुणा इति दर्शने यद्गुणस्यैवोच्चारणं तद्गुणस्यैव संज्ञाप्रसंगे गुणां
तरयुक्तानामपि संज्ञाप्रतिपत्त्यर्थं तपरत्वमित्यर्थः। किं च कारणमिति। अभेदका गुणाः मुंडेनापि चौर्ये कृते कुन्त
जित्वावस्थायामपि चौरोयमिति व्यपदिश्यत एवेति प्रश्नः भेदकत्वादिति। सर्वगुणसंग्रहार्थं गुणग्रहणं कर्त्तव्य
मित्यर्थः। एकोयमिति। उदकत्वजातियोगादेकत्वं न विवक्षितं किं तर्हि विशिष्टभाजनस्थमेकमुदकं द्रव्यं तदे
व गुणांतरयोगादन्यत्वेन लोके व्यपदिश्यते॥

दं वक्तव्यमित्यर्थः तदाह भेदकत्वादित्यादि जात्यात्मनैकत्वे व्यक्तिभेदादेवोपपत्तेर्न गुणाभेदकृतभेदे इदमुदाहरणं स्याद
त आह। उदकत्वेति। आत्मशब्दो द्रव्यवाची भाष्ये वा जो युवेति भाष्ये स्वामाख्यां न जहातीत्यनुकर्षः एतेनाभेदकत्वे
प्रत्यभिज्ञा प्रमाणं दर्शितं॥ ॥छ॥ ॥ ॥ॐ श्रीकाशीविश्वेश्वराय नमः॥ ॥

ननुगुणेषूत्तमयांगीकारे खंडिकोपाध्यायचपेटादानं विरुध्येतेति चेन्न पत उभयमिति लोकमात्रविषयमिति न विरोध इत्याह
आम्नाय इति न नूभयोरिति न्याय्यत्वप्रतिपादनेन किंपुनरत्र न्याय्यमिति प्रश्नो युक्तोत आह । शास्त्र इति अत्रेति तिथि रणसप्तमी
नेत्यभावः इत्येवं न्याय्यमिति विधेयाणां भिन्नविषय इति विषयस्तत्रैतत्कृतस्यापि अत्रत्यय इति निषेधात् अत स्तथैव ज्ञाप
कमुपन्यस्यति पदय मिति प्रयत्नं स्वशब्देनोपादानरूपं कथमिति यथा वध्यादेशे उदात्तनिपातनेन एकाच इति स्व

उभयमितिं आम्नायशब्दानियत्रस्वरा इति वेदे गुणानां भेदकत्वं । लोके तूभयथा व्यवहारः गोपिंडोपि वत्सा द्य
वस्थाभेदात् क्रयविक्रयादिषु मूल्यादिभेदाद्भेदेन व्यवह्रियते स एवायमिति प्रत्यभिज्ञानाद्भेदेनापीति प्रश्नः ।
किंपुनरिति । अत्रेति । शास्त्रे । उदात्तमेवेति । तस्माद्गुणरहितस्योच्चारणाभावान्नांतरीयकत्वादुच्चार्यमाणोपि
गुणः प्रयत्नमंतरेण न विवक्ष्यत इत्यर्थः । यद्येवं कथमन्यत्रोक्तं उदात्तनिपातनं करिष्यत इति यावता तत्रा
प्यविवक्षा प्राप्नोति । नैष दोषः । तत्रापि स्थानेंतरतम इति वचनात् आदेशस्य यः स्वरः प्राप्तस्तस्मिन्नुच्चारयि
तव्ये उदात्तोच्चारणं यत्नेन विवक्षार्थं विज्ञायते ॥

त्रस्य मेकाज्ग्रहणं न कार्यमिति । यः स्वरः प्राप्त इति ॥ हंतेरनुदात्तत्वादनुदात्त इत्यर्थः न चैव मस्याादीनामा
द्युदात्तत्वेनादेशानडः स्यान्न नुरूपे नुदात्ते उच्चारणीये उदात्तोच्चारणं विवक्षार्थमिति ज्ञापिते पिव्यर्थमुदात्तग्रह
णमिति वाच्यं परमास्थि शब्दादावंतोदात्ते उदात्तगुणकस्यापि स्थानित्वेन विवक्षायां मानाभावादित्याशयात् ॥ ॥ ८१

नन्वेवमपि चतसर्याद्युदात्तनिपातनसामर्थ्यात् चतस्र इत्यत्र चतुरः शसीत्यस्याप्रवृत्तिरिति भाष्योक्तमनुपपन्नं चतुः
शब्दस्य षट्संख्याया इत्याद्युदात्ततया तत्स्थानिकचतसरि स्थानिस्वरेणाद्युदात्तोच्चारणोपपत्त्या चतुरः शसीत्येतद्बाधक
त्वयोगात् अत आह । अन्ये त्विति । एकश्रुतिः स्वविभाषाऽछंदसीति वैकल्पिकी । तत्पाठे क्वचिदुदात्तोच्चारणं विवक्षार्थमित्रे
स्वर्येणपाठमस्तिप्रेत्य प्रकृतसूत्रस्थ ज्ञापकमित्यविरोधः अन्ये त्वित्यरुचि । बीजं तु निपातनं नामान्यादृशो प्रयोगे प्राप्ते न्या

एवमनुनासिकस्यापि प्रयत्नाधिक्येनोच्चारणं विवक्षार्थमेव ॥ उञ ऊँ इति यथा ॥ अन्ये त्वाहुः एक
श्रुत्या सूत्राणि पठ्यंत इति क्वचिदाद्युदात्तोच्चारणं तद्विवक्षार्थमिति ॥ ॥ ॥

दृशप्रयोगकरणात् तद्रूपाद्यत्नात् तत्र तत्रोदात्तादिविवक्षा तिसृचतसृ इत्यत्रापि इदं द्व प्रयुक्तं तोदात्ते उच्चारणीये
आद्युदात्तोच्चारणं विवक्षार्थं संपूर्णाष्टाध्यायी आचार्येणैकश्रुत्या पठितेत्यत्र न मानं क्वचित्कस्य चित्पदस्यै
कश्रुत्या पाठे यथा दांडिनादि सूत्रे ऐक्ष्वाकेति । एतावदेव भाष्यादवश्यते यथाद्याप्यध्येतार एकश्रुत्यैवांगा
नि पठंति ब्राह्मणवत् तथापि व्याख्यानतोनुनासिकत्वादिवदुदात्तनिपातनादिज्ञानमित्याहुः ॥ ॥

कै॰वि॰
८८

स्वरितादेरितिभाष्ये उपलक्षणं उदात्तादेरंतानुदात्ताद्व्याप्नोतीत्यपि बोध्यं। आश्रीयमाण इति। शब्देन निपातनेन
वाश्रीयमाणा इत्यर्थः नन्वेवमनुदात्तादिग्रहणं व्यर्थं स्यादत आह अजिति। एजर्थं तपरत्वमित्याह इदं तर्हीति भाष्ये
चतुर्मात्रोपि प्लुतः प्लुतावैच इति सूत्रे भाष्ये स्पष्टः कार्यकालमाश्रित्य नोदयति। नन्विति अयं भावः तत्पक्षे मृजेर्वृ
द्धिरित्यादौ उपस्थितं वृद्धिरादैजिति पदैकवाक्यतयान्वेति एकं वृद्धिपदं तु प्रत्यभिज्ञामात्रफलकं अनुवाद एव। एवं

अनुदात्तादेरिति। अजुपलक्षणं चानुदात्तश्रुतिः स्यादिति प्रश्नः। उत्तरे त्वज्ग्रहणमेव कुर्यादित्यभिप्रा
यः। व्याख्यानत इति। अस्येऽवद्यमित्याद्युदात्ते सिद्धे मालादीनां चेति मालाशब्दस्य दृष्टान्तत्वादुपादानस्या
कारप्रश्लेषनिश्चय इत्यर्थः॥ इदं तर्हीति। ननु भाव्यमानत्वादेचो ग्राहकानस्तविष्यंति॥ ॥

च भाव्यमानत्वं स्पष्टमेवेति। उत्तरस्य तत्त्वं यं भावः अनुवादत्वकल्पनापेक्षया तत्रोपस्थितं वृद्धिरादैजिति तत्रैव शक्ति
ग्राहं[illegible]पाद्यवाक्यत्वेदेन मृजेर्वृद्धिरित्यस्यार्थं बोधयति। ज्योतिष्टोमेन यजेतेत्यादौ तु शक्तिग्राहकशास्त्रांतराभा ८८
वाद्गत्या विधावेव सामानाधिकरण्यान्नामधेयत्वावगतिः कल्प्यते न तु विद्यमाने शक्तिग्राहके तथा कल्पनमु
चितं पदस्यानुवादकत्वकल्पनं चेति॥ ॥छ॥ ॥ ॥ ॥

DR BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

यत्तु कार्यकालपक्षे वृद्धिरादैजित्यादेर्यत्र वृद्धिपदं तत्रादैजित्युपतिष्ठत इत्यर्थः यथा च ज्योतिष्टोमादिपदानां यागवि
धावेव सामानाधिकरण्यान्नामधेयत्वावगतिस्तथेहापि मृजेर्वृद्धिरित्यादौ सामानाधिकरण्यान्नामधेयत्वावगतिः
उपस्थापकेन वृध्यादिपदेन उपस्थाप्यस्य वृत्त्या बोधनात्परं संज्ञासूत्रत्वावगतिरिति। तन्न कार्यकालं संज्ञापरि
भाषं यस्येत्युपस्थितमिदं भवति पचिभमितीति ष्यङः संप्रसारणमिति सूत्रस्य भाष्येण कार्यकालं संज्ञापरि
भाषं प्रगृह्यः प्रकृत्येत्युपस्थितमिदं भवति ईदूद्देद्द्विवचनं प्रगृह्यमिति ईदेदिति सूत्रस्य भाष्येण च विरोधात्
त्वडीत्याद्युपस्थितमिदं भवति यचीत्येव वक्तव्यं स्यात् अपसंज्ञेत्यादि प्रकृतसूत्रस्य वार्त्तिकविरोधश्च प्रकारां
तरेणात्रत्यतत्प्रत्याख्यानपरभाष्यविरोधश्च किंच मृजेर्वृद्धिरित्यादिसूत्रस्य वृध्यादिपदानां तदुपस्थिति
संपत्त्या चरितार्थेन स्वोपस्थापितपदार्थेऽन्वये मानाभावात्॥ मृजेर्वृद्धिरित्यादौ इकादेरुपस्थापकस्या
पि विधेयाकांक्षासत्त्वात् विधिविषये एव तत्प्रवृत्तेश्च भवत्येवान्वयः एवं च ज्योतिष्टोमवाक्याद्वैल
क्षण्येनात्र नामधेयता दुरुपपादा॥ किंचोपस्थाप्यार्थस्य वृत्त्या बोधनात्संज्ञासूत्रत्वं वा इको गुणे
त्यादिवदुपस्थापकत्वात्परिभाषात्वं वेत्यत्र विनिगमकाभावः अनुवादेपि संज्ञासूत्रोपस्थिति
रणो गृह्यस्य वृद्धिर्यस्येत्यादिविषये भाष्ये स्पष्टेति दिक्॥ ॥ ॥ ॥

भाष्ये किं तकारइत्यस्य तादपि परस्तपर इत्यनंगीकुर्वतइति शेषः संबंधाभावादिति। शेषशेषिभावा

नैतदस्ति। न ह्यत्र संज्ञाविधावेवोभाव्यते किं त्वैज्भिरयत्वात्त्रिमात्रचतुर्मात्राणां ग्रहणात्सं
ज्ञाप्रसंगाद्धि गुणविधौ तेषामपि प्रसंगात्तन्निषेधाय तपरत्वं। एवं व्यवस्थिते चोदयति। यद्यै
जर्थस्तकारस्तेनाकारस्य संबंधाभावात्कथमादित्येतत्पदम्। उच्यते। तात्पर्येणैजर्थत्वं तका
रस्योच्यते। आनुषंगीकं त्वाकारार्थत्वं। ज्ञापकद्वारेणाकारप्रश्लेषे विज्ञायमाने प्रतिपत्ति
गौरवं भवति। सति तु कारे आकारस्वरूपप्रतीतिः स्पष्टा भवतीति तकारसहितस्याकारस्या
संदिग्धानुकार्यप्रतिपादनार्थत्वाद्धि भक्त्युपपत्तौ सत्यामादित्येतत्पदं सिद्धम्॥ ॥

भावादित्यर्थः। तात्स्य पदत्वाभावे जश्त्वं न स्यादिति भावः आनुषंगिकफलं दर्शयति ज्ञापकद्वारेणेति॥ ॥

इको गुण। गुणवृद्धिग्रहणस्योत्तरत्र निषेध्यसमर्पणाय आवश्यकत्वेपि इक्पदस्यैकः स्यान इत्यर्थार्थमावश्यकत्वे
पि योगविभागविषयकोयं प्रश्नो भाष्ये इक्ग्रहणमिति ननु इग्ग्रहणेनाकारादीनां निवृत्तिरशक्या कर्तुमत आह स्था
निवत्वस्येति। ननु आकारस्य परध्युदाहरणादाने गुणाशेच अकारोदाहरणादाने किं बीजमत आह आकारस्येति। नेनु
आकारस्य वृद्धिविधौ सत्त्विवृद्धिविधौ अयासीदित्यादौ अपवादत्वात्सिगिः इगां साबाध्यत इति भावः। इतरवृद्धिविधौ सत्त्वे

इको गुण॥ ॥इग्ग्रहणमिति। वक्ष्यमाणज्ञापकवशादाकारादिनिरासादिक एव गुणवृद्धी भविष्यत
इति प्रश्नः। आत्संध्यक्षरेति। आकारादीनां स्यानित्वस्य निवृत्त्यर्थमित्यर्थः। आकारस्यांङ्गत्वस्य वृद्धिवि
धावभावाद्धि शेषाभावाच्चाकारस्यातो लोपविधानादाकारस्य गुणप्रसंगमुदाहरति याते ति। ज्ञायतीति।
एचां द्विमात्रत्वाविशेषात् प्रयत्नाधिक्याभावादैकारोपदेशे प्येकारो गुणः स्यात् उं स्मिति ति भकान
स्यो ध्यात्वादोकारो गुणः स्यात् पररूपेति अतो लोपश्च न भवति आर्द्धधातुकोपदेशे पदकारात्तत्तस्य लोपवि
धानात् उपदेशसामर्थ्यादिति प्रतिपत्तिलाघवार्थमेकारमेवोपदिशेदित्यर्थः॥ ॥ ॥

वे भ्याह विशेषाभावादिति। अकारस्येति एयस्नोपाविति पूर्वविप्रतिषेधेनातो लोपस्य वृद्धिगुणबाधकत्वादिति भा
वः पुत्रीपतीत्यादौ त्वविशेष इति बोध्यं। अकारस्य गुणः सार्वधातुकार्द्धधातुकयोरित्यनेन। नन्वैकारोच्चारणसा
मर्थ्यात् गुणेनेत्यत आह। एचामिति। सर्वेषां विवृत एव प्रयत्न इत्यभिमानः आर्धधातुकोपदेश इति गुणनिष्पन्नश्च
तदुत्तरकालिक इति भावः। प्रतिपत्तिलाघवं। तथापि विवृततावेङोतात्यामैचोतप्येवचेति पाणिनीयशिक्षोक्तेः प्रयत्नलाघवमपि बोध्यं॥

इग्रहणेति। तत्तश्चामिदेरितिनावयवषष्ठी किंतुस्थानषष्ठीतिसर्वादेशेगुणः स्यादित्यर्थः नाप्येनैतानिसंतिज्ञापकानीति
छत्रिन्यायेन। ननुनैतानि संतिज्ञापकानीतिप्रतिज्ञायांप्रज्ञापकसमर्थनमयुक्तमित्यतआह। विशेषेतिटकः किंत्वंज्ञा
पकंयंविधिंप्रतीत्यादिविशेषप्रतिपादनायेत्यर्थः शंकतेकेचिदिति। यदप्युच्यतइतिसमुच्चयार्थापिशब्देनेतिशेषः आ
र्थेन। सामर्थ्यप्राप्तेन अंगस्यअंगः सदृशइतिभावः ज्ञायतइति। आदिनाजग्लावित्यादिनन्वेवमात्वमपिबाध्येत

पदपंजनेरिति। यद्येवंमिदेर्गुणोविधीयमानोज्ञापकेनव्यंजनस्यनिरस्तत्वादिग्ग्रहणाभावाच्चसर्वादेशः
प्राप्नोतिमिदइतिः मिदिरित्यावश्रवणादिकारस्यनभविष्यतीत्यदोषः। यतावदिति। विशेषप्रतिपादनायसकलज्ञाप
कापेक्षः। केचिदाहुः। टकः किंत्वेनज्ञापकेनाकारनिरत्यर्थत्वेनिराकृतेयदप्युच्यतइतिज्ञापकाक्षेपोग्रंथच्छायां
नपुष्णाति। तस्माद्यर्थेनक्रमेणसर्वज्ञापकन्तङ्ञोपन्यासंकृत्वायथासंभवंज्ञापकसमर्थनंकर्तव्यम्। आ
यादयोपीति। ऐकारोच्चारणस्याविकृतरूपश्रवणार्थत्वादितिभावः। यंविधिमिति। आयादेशस्यह्येकारश्र
वनिमित्तमित्यायादेशेनबाध्यते। नहिआयइत्येवंपाठः कर्तुंशक्यः त्वयाग्लायतइत्यादिरूपासिद्धिप्रसं
गात्। नध्याख्येतिनिपातनाद्गुणवन्नबाधिष्यते॥

नहितस्यऐकारोनिमित्तंस्तेइतिपाठेपिसुकरत्वात् अतआह नध्याख्येतिध्याइतिकृतात्वनिर्देशेनैकारोच्चार
णस्यात्वाबाधकत्वज्ञापनादितिभावः॥ नचास्यसौत्रत्वंबाधकत्वमंगीकृत्यसौत्रत्वकल्पनापेक्ष ९०
याबाधकत्वज्ञापनस्यलघुत्वादित्याहुः नचरैशब्दादिष्वप्याचारक्विपिरायतीत्यादौसंध्यक्षरस्यगुणः स्यादिति
वाच्यं। एजंतेष्वप्याचारक्विबभावएतज्ज्ञाप्यमामाणयादित्यदोषात् गुणवदिति। वैधर्म्यदृष्टांतः॥ ॥

ननुपररूपेपिगुणानामभेदकतयाकदाचित्सानुनासिकोपिस्यादतआह रूपग्रहणस्येति। परेतुअत्रपररूपश
ब्देनपरशब्देनवायदुपस्थितंरूपंप्रयोगस्थंतस्यग्रहणंस्थानेजायमानः किंगुणकइत्याकांक्षायामंतरतमपरीक्षा
षयोस्यगुणकः प्रकृतेचोभयांतरतमासंभवात् परशब्देनयद्गुणस्योपस्थितिस्तद्गुणकएवभविष्यतीतिभा
ष्याशयात्रूपग्रहणस्येत्यादिचिंत्यं गुणानांशब्दत्वादिवत् शब्दरूपत्वाभावेनव्यावृत्त्यसंभवश्चरूपग्रहणेनेत्याहुः
ननुगमेरप्ययंडइतिभाष्यमनुपपन्नंगमीगमश्चांतात्यंताध्वदूरपारेतिसूत्रेपठितेनान्यत्रापिदृश्यतइतिवार्तिके

पररूपेणेति। रूपग्रहणस्येदमेवप्रयोजनंवक्तव्यं यादृक्परस्यरूपंतादृगेवयथास्यादिति॥
गमेरप्ययमिति। सप्तम्यांजनेरित्यतोडन्येष्वपिदृश्यतइत्यत्रडोनुवर्तमानोगमेरपिविधीयत
इत्यज्ञापकंडित्वमितिव्यंजननिरत्यर्थंसूत्रंस्थितं॥

ननुगोऽगइत्यादौडस्यसत्वादतआह सप्तम्यामिति सप्तम्यांजनेरित्युत्तरंपठितेऽन्येष्वपिदृश्यतइतिसूत्रेदृशिग्रहणस्य
सर्वोपाधिव्यभिचारार्थत्वेनैचप्रकृत्यंतरादपिडसिद्धंतान्यंतेतिप्रकरणस्थंवार्तिकंनकार्यमितिभावः नाप्येआंतर्यतओ
८ कारइति। स्थानतआंतर्यादितिभावः ननुतनोतेर्ईउः सन्वच्चेतिडित्करणान्नव्यंजनस्यगुणइतिचेन्न। उणादीनामव्युत्प
त्तिपक्षांगीकारात्। नचैवमपिस्थानप्रयत्नांतरतमेषुइकारादिषुचरितार्थानिगुणादिशास्त्राणिव्यंजनेनप्रवर्ततइतिवाच्यं। ईषच्छ्वा
सादिनापतिप्रसंगात्। सूत्रमतेस्थानप्रयत्नैक्यादितिभाष्याशयः स्थानेंतरतमइतिसप्तम्यंतपाठस्यभाष्येप्रत्याख्यानेनास्याप्युक्तेरसंभवदु
क्तिकत्वाच्च॥

कै॰वि॰
८१

भाष्येएतेपीति।औकारादयः एषूदाहरणेष्विकःप्राप्नुवंतीत्यन्वयः सद्वत्यत्रतुनस्यादेवेतिभावः त्यदादीनामइत्यत्रत्यदा
दीनामितितुतदोः सः सावित्युत्तरार्थंस्यात् संज्ञोपसर्जनंव्यावृत्त्यर्थंचस्यादितिबोध्यं।आश्रितेति।आश्रितोगुणवृद्धिशब्दव्या
पारउच्चारणंयेषुआदेक्षुविधीयमानेषुतदर्थमित्यर्थः तेनेति।इत्येवमित्यध्याहृत्यस्वरूपपदार्थकेनान्यतरेणविशेषणादीदृ
शार्थलाभइतिभावः अतएवसंबंधानुवृत्तिप्रदर्शनपरभाष्येगुणवृद्धीइत्युच्चार्यगुणवृद्धिग्रहणमनुवर्त्ततइत्युक्तं।
उपक्रमस्थगुणवृद्धिग्रहणसामर्थ्यादित्येतद्भाष्यस्वारस्यादाहअथवेति।पुनरुपादानसामर्थ्यादिहत्यंगुणवृद्धिग्रह

संज्ञयेति।गुणवृद्ध्यनुवृत्त्यैवगुणवृद्ध्योरिकःसिद्धत्वात् द्वितीयंगुणवृद्धिग्रहणमाश्रितगुणवृद्धिव्यापा
रार्थंविज्ञायते तेनगुणइत्येवंयोगुणः वृद्धिरित्येवंयावृद्धिरितिविज्ञायते अथवागुणवृद्धिमात्रग्रहणे
गुणवृद्ध्योरिकारादेवसिद्धेपुनर्गुणवृद्धिग्रहणंगुणवृद्धिशब्दव्यापारार्थंविज्ञायते आदेङ्गामिति पूर्व
सूत्रे संज्ञासंज्ञिसंबंधायोपात्तोयावृद्धिशब्दस्तादृशउत्तरत्रानुवर्त्ततेइत्यदेङामित्युक्तं तत्रैतन्न
चोदनीयम् वृद्धिशब्दोऽनुवर्त्तमानआदैचःप्रत्याययतीत्यादैचांगुणसंज्ञाप्राप्नोतीति।। ॥

यं गुणवृद्धिशब्दविहितगुणवृद्धिलाक्षणिकमितिभावः यादृशइतिस्वरूपपदार्थकइत्यर्थः नन्वेवंसतिउत्तरत्रनि
षेध्यसमर्पणार्थंगुणवृद्धिग्रहणस्यचारितार्थ्येनसामर्थ्यदुरुपपादं।अनुवर्त्तमानस्यस्वरूपपरत्वेनानिषेध्यसमर्पकत्वा
भावादितिचेन्न।आगंतूनामतेनिवेशइतिन्यायेनादेङ्सूत्रेगुणपदोत्तरंवृद्धिपदोपस्थित्यातत्साहचर्येणतत्रसूत्रेस्वरू
पपरत्वंतस्यउत्तरत्रतुयोग्यतयाऽर्थपरत्वंइकइतिसूत्रेपिनधात्वित्यादिसाहचर्येणार्थपरत्वंइकइतिषष्ठीनिर्देशाच्चेतिभाष्याशयात्॥ ८१

नपुंसकस्येति।द्यत्रजपाःपुंसीतितुप्रापिकमितिभावः यत्तुभावविषयमेवैतदितितन्नमांसंभक्षोऽस्येतिक
र्मण्यणीतिसूत्रस्यभाष्यप्रयोगविरोधात्।तेनेति।अत्रादैजित्यनुवृत्तिर्नस्वकार्यायकिंतुवृद्धिशब्दस्यान्यसं
बंधनिवृत्तयेइतिभावः भाष्येवृद्धिरादैजदेङ्गुणइतिसूत्रक्रमनिर्देशःपुनर्वृद्धिरादैजित्यभिधानमदेङित्यत्रसंबंधा
नुवृत्तिंदर्शयितुंऽइकोगुणवृद्धीइत्युक्तिस्तुयथान्यासाभिप्रायेणआदैजदेङ्ग्रहणमिति।स्वरितत्वाप्रतिज्ञानेनादेङ

संबंधमिति।संबध्यतइतिसंबंधंकर्मणिघञ्।नपुंसकस्याभिधेयत्वान्नपुंसकनिर्देशःआदैज्ग्रहणसंब
द्धंवृद्धिग्रहणमदेङ्गुणइत्यत्रानुवर्त्ततेनादेङ्गिर्नसंबध्यते इहत्वनुवृत्तमादैचोजहातिकांतारोत्तारणा
यसार्थस्येवत्यागोपादाने।अथवेति।वृद्धिशब्दस्येहाकांक्षावशादुपस्थानेनत्वदेङ्गुणइत्यत्र।अ
थवैकइति।एकोभवतिरध्याह्रियते वृद्धिरादैजदेङ्गुणोभवतीति एकवाक्यत्वंसंपद्यते॥ ॥

ग्रहणवदादैजित्यपिनिवृत्तमित्यर्थः क्वचित्तुआदैज्ग्रहणंनिवृत्तमित्येवपाठः ननुमंडूकस्यचेतनत्वात्तस्यागति
संभवेपिशब्दस्यकथंसेत्यतआह वृद्धिशब्दस्येतिस्वरितत्वासंगादनुवर्त्तमानस्यापीतिशेषःइहेति।इकइतिसू
त्रेइत्यर्थःअदेङित्यत्रतुनसंबंधःगुणसंज्ञासंबंधेनादेङानिराकांक्षत्वादितिबोध्यं।नन्वेकयोगत्वंनैकार्थत्वाभिन्नाविषयसं
ज्ञाद्वयविधानात् नापिनिरंतरपाठात्तस्येदानीमपिसत्त्वेनकरिष्यतइत्यस्यासंगतेःगोरणावित्यादावेकयोगेप्यनुवृत्तिदर्शनाच्चातआहएकइति॥

प्रतिपत्तिकालेलक्ष्यसंस्कारकवाक्योपप्लवकालेएककालेति आदैज्वृद्धिसंज्ञोदेङ्गुणसंज्ञोभवतीतिसंग्राहकवाक्यार्थबोधएककालइतिभावः समूहालंबनात्मकएकोवाक्यार्थबोधइतितात्पर्यं। यद्वादैज्वृद्धिसंज्ञोदेङ्गुणसंज्ञश्चभवतइत्येकोवाक्यार्थबोधइतितात्पर्यं। प्रतिपत्तिर्वाक्यार्थबोधः णेरणावित्यादौअवांतरवाक्यार्थभेदान्नदोषः केचित्तुएककालाप्रतिपत्तिर्भवतुवतापिस्वरितत्वगुणाप्राप्तवृद्धिपदसंबंधाभावः कुतइतिचिंत्यं नचस्वविषयवाक्यजबोधानंतरंनिराकांक्षतयान्यत्रान्वयाप्राप्तौहिततप्राप्तयेस्वरितासंगोनस्येतदेकयोगइतिवाच्यं व्यवधाननि

यद्यपिप्रतिपत्तिकालेभवतिक्रियासिद्ध्यतेतथाप्येककालाप्रतिपत्तिरित्यादैज्संबधावृद्धिसंज्ञाअदेङ् संबद्धागुणसंज्ञेतिनास्तिवृद्धिसंज्ञायाआदेङ्भिः संबंधः॥

बंधनायामनेकसंबंधाप्राप्तावनेकसंबंधायस्वरितत्वासंगइत्यस्यापिवक्तुंशक्यत्वात् तस्मादयमत्रभाष्यार्थस्तदधीतेतद्वेदेत्यत्रद्विस्तद्ग्रहणादेकयोगेनुवृत्त्यभावइति॥ स्पष्टंचेदंतदस्मिन्नस्तीतिसूत्रेभाष्येएकयोगत्वंचद्वयोःसंहितापाठएव वस्तुतएकयोगेप्यनुवृत्तिर्भवतितदस्यास्त्यस्मिन्नितिसूत्रेद्विस्तद्ग्रहणाभावात्। तदधीतइतिसूत्रेतुबालानांसुखबोधायद्विस्तद्ग्रहणमित्यप्युक्तंतत्रैवातोत्रभाष्येयंसमाधिरेकदेशिनइत्याहुः॥॥ ९२

ननुवृद्धिगुणसंज्ञयोःसामान्यविशेषत्वाभावात्कथमुत्सर्गापवादसाम्यमतआह। यथेति। आतइत्युपादानादेवतद्विषयेकस्यासंदिग्धत्वंअतएवतदतिरिक्तावकाशविरहः तदुद्देशेनैवप्रवृत्तिरूपंतात्पर्यंच। ननुगुणसंज्ञयावृद्धिसंज्ञावत्कृत्यादिसंज्ञयापिप्रत्ययसंज्ञाबाध्येतेत्यतआह। प्रत्ययेति। नतथाधाकांक्षयाप्रत्ययसंज्ञयासंबंधः येनसंनिहि

अथवान्यवचनादिति। यथाकप्रत्ययेनाण्बाध्यते। असंदिग्धत्वादनवकाशत्वात्तात्पर्याच्चविधेःअणस्तुविपर्ययात्। एवमदेङ्गुणइत्यत्रवृद्धिग्रहणमनुवृत्तंनत्संदिह्यतेकिमुत्तरार्थेहानुवृत्तिरपेहार्थापीति। सावकाशाचवृद्धिसंज्ञातात्पर्यंचनास्ति। गुणसंज्ञातुतात्पर्यादसंदेहान्निरवकाशत्वाच्चवृद्धिसंज्ञासंबंधमदेङांबाधते। प्रत्ययसंज्ञातुसंज्ञिविशेषासंयुक्ताधिकारेणैवविधीयमानाकृत्यादिसंज्ञाविषयेपि
प्रवर्त्तते॥ ॥

तत्कृत्यादिसंज्ञयानिराकांक्षत्वान्नप्रत्ययसंज्ञायासंबंधस्यात्। किंतुसंज्ञाकांक्षयासाहिस्वस्यबहुविषयत्वलाभाय कतिपयानंतरविषयलाभेपिपुनः पुनर्विषयांतरमाकांक्षते॥ बहुविषयत्वंचास्याः संज्ञिविशेषासंबंधेनाधिकारकरणादवसीयतइतिभावः प्रकृतेतुनतथेतिबोध्यं॥ ॥ ॐ नमः शिवाय॥

एव जौ प्राप्ताविति यत्नामुक्ते इति शेषः। मंडूकगतयोऽधिकाराद् इत्यस्यैव स्वरितलिंगेनानुवर्त्तमानं यत्राकांक्षा तत्रैव संबध्यते
इति विशेषमभिधातुमयं पक्षः स च संबंधो यत्र विभाषाग्रहणरूपं यत्नविशेषं कुर्वतः सूत्रकृतोऽप्यभिमतः अस्य वि
शेषस्य प्रागकथनं तु एतद्विशेषद्वारा पुनस्तत्परामर्शेन तत्रैव परिहारे मुख्यताबोधनायेति बोध्यम्। इहत्विति। अकर्त्तव्य

अपवेति। विभाषा तिलमाषेत्यत्र ह्युमाभंगयोरधान्यत्वात् स्वेजौ प्राप्तौ चोदितायां रवञ्ग्रहणस्यानुवृत्ति
राश्रिता। अनुवर्त्तमानश्च खञ् यत्नाभावाद् व्रीहिशाल्यादिभिर्न संबध्यते अपितु विभाषाश्रुत्या यत्नेनति
लादिभिरेव संबध्यते तथेहापि वृद्धिग्रहणमदेङ्गुणाद् इत्यत्रानुवर्त्तमानमपि यत्नाभावाद् दे ङ्गि र्न संबध्यते।
इह तु पुनर्गुणवृद्धिग्रहणं यत्नो भवति। अपवेति। अपेक्षालक्षणं लौकिकमधिकारमाश्रयति। समुदा
यस्य चापेक्षायां नास्त्येतदनंतरस्य विधिर्वा भवति प्रतिषेधो वेति। गुणस्यैवापेक्षायुक्तेति समुदायस्य भेदाभावात्॥ ॥

त्वविशिष्टपुनर्गुणवृद्धिग्रहणं यत्न इत्यर्थः अनुवृत्तो हि तदकर्त्तव्यं भवतीत्याद्यः भाष्ये। उभयं निवृत्तमिति। स्वरितलिं
गानासंगेनाननुवृत्तिरेव निवृत्तिरित्यर्थः अपेक्षेति। इकद्इत्येतावन्मात्रस्येतराकांक्षत्वात्। समुदायापेक्षायां च लक्ष्यानु
सार एव बीजम् अनंतरस्येति न्यायेन गुणस्यैवापेक्षायुक्तेत्येतन्नास्तीत्यन्वयः समुदायत्वं च युगपदुभौ संनिधानात्क्रमेणासंनिधा
नाच्चेति बोध्यं॥ ॥

षष्ठीति स्थानषष्ठीत्यर्थः षष्ठी स्थाने इति परिभाषया तत्व निर्णयः। अस्य च सूत्रस्य गुणवृद्धिशब्दाभ्यां विधीयमानौ
वृद्धिगुणाविक स्थाने इत्यर्थे ऽवांतरवाक्यार्थबोधोत्तरमेव प्रवृत्ते रूभयोरपि समकालप्रवृत्तिकताबोध्या गुणश्रुत्येत्य
स्य गुणशब्देन विधेयत्वबोधिकयेत्यर्थः तत्र यदीति। बुद्धेः क्रमिकत्वाद्विशेषणविशेष्यभावे कामचाराच्चेति भावः
सोस्यतिङ्गंतस्येति षष्ठ्यास्तेनांतेत्यनुसंहारादेतद्विशेषणत्वमेतत्परिच्छेदकत्वं तस्येति भावः तदा तस्यायं विशेष

किं पुनरिति। उभयथा संभवाद्दोषदर्शनाच्च प्रश्नः। तत्राङ्गस्य गुण इति षष्ठीनिर्देशाल्लिंगादलोंत्यस्येत्युप
तिष्ठते गुणश्रुत्यात्विक इति। तत्र यदि पूर्वमिकाङ्गं विशेष्यते इगंतस्याङ्गस्य गुणो भवतीति स च भवन्न
लोंत्यस्येत्यंत्यस्य भवति तदासोस्य शेषो भवति। यदा त्वंगस्येति पूर्वमेवांत्यमलं षष्ठी नीयते अङ्गांत्यस्य
गुण इति। पश्चादिकांत्यो विशेष्यते यदायं तस्य विशेषणत्वाच्छेषो भवति। अपरस्त्वंगस्येति गुणवृद्धिवि
धौ न स्थानषष्ठी किं तर्ह्यंगपेक्षावयवषष्ठी तदा स्थानषष्ठ्यभावादलोंत्यस्येत्यस्यानुपस्थानमिति त
दपवादपक्षो भवति॥ ॥

पत्वादिति। तच्छेषशब्दे तंत्रेण बहुव्रीहिषष्ठीतत्पुरुषाविति भावः भाष्ये। इको गुणवृद्धीति पूर्वपरान्वयितेन त
द्यलाभ इति भावः परिच्छेद्यपरिच्छेदकभावकृत एव च शेषशेषित्वव्यवहार इति बोध्यं। अपलिति। अवांतरवाक्यार्थबो
धकाले निर्णीतार्थकत्वेन स्थानषष्ठीत्वसंभावनायां तत्प्रवृत्तावपि पश्चादिक इत्यस्योपस्थितौ मिदेरित्यादौ योग्यत्वेन स्थानषष्ठी
त्वसाहचर्येणान्यत्राप्यवयवषष्ठीत्वनिर्णय तदसंबंध इति भावः॥ ॥ ॥

DR. BHAU DAJI MEMORIAL

बाधायोगादिति। आत्यंतिकबाधायोगादित्यर्थः। प्रातिपदिकसंज्ञाबाधः षोडशिग्रहणाग्रहणादौ न वत्त्यैवेति बोध्यं। समुच्चय इति मिदेरंत्यस्येकश्चेत्येवमाकारः न हीति। अत्यर्थशब्दनिवेशेनैकस्य नानेकाभिधायकत्वं। तत्रेआवृत्तौ चनमानमिति भावः। अनेकयोगेति। एवं चैकवाक्यमिति त्वाष्यं मयुक्तमिति भावः उत्तर मेकस्मिन्नित्या

अत्राप्यनुमानमेव हि बाधः वचनेन प्राप्तस्य बाधायोगात्। ततश्चांगावयवस्य यत्तत्रास्थि तस्येको गुणावृद्धी इत्ययमर्थः संपद्यते। समुच्चयस्त्व संभवान्नोपन्यस्तः न हि युगपद्द्वौ षष्ठ्यर्थौ संभवतः स्थानेयोगो ऽवयवयोगश्चेति। विकल्पोपि न भवति। एकत्वात् षष्ठ्यर्थस्य। तस्मात्तच्छेषतदपवादपक्षावेवात्र शंकितौ। यद्येकमिति। अनेकयोगव्यवहितयोरप्येकस्मिन्कार्यदेशे स्वस्वनिमित्तसन्निधापितयोरङ्गांगिभावाद्विशेषणविशेष्यभावादेकवाक्यतोपपत्तिः। अपनानेति। अंगस्येतीगपेक्षावयवषष्ठ्या मिकः स्थानित्वात् तद्विशेषणत्वादङ्गस्यानुपस्थानमलोंत्यस्येत्यस्य तत
श्चानयोर्भिन्नविषयत्वान्नानावाक्यत्वम्॥

दि। अंगांगिभावो गुणगुणिभाव इत्याह। विशेषणेति। इकः स्थानित्वादिति साचनालोंत्यसूत्रप्रवृत्तौ निमित्तं अ ८५
न्त्यसमुदायोत्तरस्थान षष्ठीत्वाभावात्। अंगस्येति वचनस्थान षष्ठीति भावः। तद्विशेषणत्वादिति अ
वयवित्वेन विशेषणत्वादित्यर्थः। नानावाक्यत्वमिति अत्र पक्षे युगंतत्वादि नियमार्थमिति बोध्यं॥ ॥

मिदादीनामिति। गुणादिविधौ परिभाषाद्वयस्य परस्परसंबंधापरित्यागे नोपस्थानं तच्छेषत्वं। तत्रैकस्या असंभवे द्वितीयापि न प्रवर्त्तत इति भावः। भाष्ये। नंत्यत्वादीति। तच्छेषपक्षे नंत्यत्वादिको गुणो न प्राप्नोतीत्यर्थः। अंगस्येति। चस्थान षष्ठीति अंगस्य स्थाने गुणो भवति स च पत्रांत्य इक् तत्रांत्यस्येक इत्यर्थ इत्यभिमानः तदाह। नेदेनेति शास्त्रस्य बद्धि

वृद्धिगुणाविति। मिदादीनामतिगंतत्वादलोंत्यस्येत्येतदंगमिग्ग्रहणेन संनिपततीति तेषु प्रदेशेष्विग्ग्रहणं कर्त्तव्यम्। दोषांतरमप्याह। सर्वादेशप्रसंगश्चेति। अंगस्येत्येतद्भेदेन सर्वांगेषु व्याप्रियते तत्रेगंतस्यैवालोंत्यस्येति विधिरन्यत्र तु षष्ठ्या अलोंत्यस्येत्यनुपसंहाराद्यातावातेति सर्वादेशो गुणः प्राप्नोति। यथैवहीति। अंगस्येति षष्ठ्युच्चारितैवांत्यमलं नीतेति नास्या अपररूपमस्तीति नास्ति सर्वदेशगुणप्रसंगः॥ पूर्वापेक्षोयमिति। मिदादिष्विग्ग्रहणं कर्त्तव्यमित्यत्रैवार्थे हेतुत्वेनेदमुपात्तमित्यर्थः॥ उच्यते चेति। मि
देरिति चोदनया॥ ॥

विषयत्वायेत्यर्थः। तत्रेगंतेष्वेवेति। तच्छेषत्वादिति भावः। अन्यत्र अनिगंतविषये गुणशास्त्रे। अंत्यमलमितीक् परिभाषाशेषभूतालोंत्यपरिभाषयेत्यर्थः। अंगस्येति स्थानषष्ठीति भाष्येंत्यमिकमुपसंक्रांतेत्यनुकर्षः। एवं च संग्राहकवाक्यस्येगंतमात्रविषयत्वादनिगंतविषयकलक्षणाभाव एव आवृत्तौ च नमानमिति भावः अत एव गायोष्टकः क्विं सार्थकं हि श्वहेत्वर्थ इत्याह। मि
दादिष्विति॥ ॥

अत्ति

अनंत्यस्य चेकइति। यद्यपि जुसि चेत्यादीनां प्रधानत्वे तेऽग्विशेषणत्वे तस्मिन्निति परिभाषया व्यवहितस्येकोनभविष्यति तथापि प्रत्ययस्यांगांशेऽत्यिताकांक्षतया जुसि चेत्यादिभिरप्यंगमेवाविशेष्यत इत्याशयः। समानन्यायेति। गुणाप्रकरणावैरूप्याय सर्वत्रांगस्येत्यवयवषष्ठ्येवस्यादिति भावः। निर्दिष्टेति अनियमे नियमकारिणीत्वात् परिभाषायाइ

इहात्रस्येति। यद्यंगस्येतीगपेक्षया षष्ठी तदा लोंत्यस्येत्यस्य निमित्ताभावादनुपस्थानं। स्यान षष्ठीद्वयस्योपस्थाने निमित्तं ततश्चांगावयवस्यानंत्यस्य चेको गुणः प्राप्नोतीति न दोषः। ह्रस्वस्य गुण इति। समानन्यायत्वादेतदुक्तं। अंगस्यावयवो यो ह्रस्वस्तस्य गुण इति। नत्वत्रेक् परिभाषोपतिष्ठते निर्दिष्टस्थानिकत्वात्।। अन्ये त्वाहुः अत्रापि परिभाषोपस्थाने सति ह्रस्वेनेग्विशेष्यते ह्रस्वस्येको गुणो यथा स्यात् दीर्घस्य माभूदिति। ओर्गुण इत्यत्राप्यस्यानुपस्थानमनंत्यस्याप्युकारस्य गुणार्थं असति ह्यस्यानुपस्थानेऽगस्येति स्थानषष्ठी स्यात्। अंगं चोकारेण विशेष्यत इत्युकारांतस्यैवांगस्य गुणः स्यात्।। ।।छ।। ।।

तिभावः। अन्ये त्विति अयं भावः न ह्यनियम इति श्रुतिः स्मृतिर्वा किंतु परिभाषा लिंगवती फलवती चेति नियमः फलं चेतरव्यावृत्तिवदितरसंग्रहोपीति ह्रस्वेस्येत्यस्यांगविशेषणत्वमावर्तनेनावयवषष्ठीत्वबोधनेनानंत्यस्यापि गुणसंपादनमेव फलं स्यात् अकारे तु गुणगुणयोर्न विशेष इति न रेन दृश्यति अनंत्यस्याप्युकारस्येति। नन्वेवं ह्रस्वग्रहणं व्यर्थमत आह। दीर्घस्येति। क्ङिसंज्ञासवर्णयोरेवेति पक्षे ङितिगुणस्याग्नि-
चितिइत्यादौ प्रसंगो बोध्यः।। ।।

गुर

पुनः श्रुतिः पुनर्गुणविधानं। ननु चेति। बहुव्रीहिसमासः सामर्थ्यादिक् परिभाषानुपस्थितिश्चेति भावः भिदोदकाराद्यारणं। तु भिन्नो भिन्नमित्यादौ चरितार्थश्क्नोः क्ङित्वेनानिग्लक्षणत्वेपि निषेधप्रवृत्तेः गुग्विधानमपि क्ष्मापयतीत्यादौ यलोपार्थं ओकाररूपगुणार्थं च चरितार्थमित्याशयः युकीति लाघवात्तु रूपेनिर्णीते निषादस्य पतिन्या

पुगंतेति। भेत्तेत्यादौ गुणो सिद्धे पुनः श्रुतिर्नियमार्थेति गुरूपधस्येहितेत्यादौ न भविष्यति। नापि हे अग्निचिदित्यादौ उभयनियमाश्रयणादिति भावः। ननु भेत्तेत्यादौ दकारस्य क्ष्मापयतीति पकारस्य च यथा स्यादिति विध्यर्थमेतत्स्यात्। नैतदस्ति। पुक्यंतः पुगंतः लध्वी उपधा लघूपधा ततः समाहारद्वंद्वनिर्देश इत्यंतस्य गुणेन भवितव्यम्।। प्रकृतस्येति। एकेन वाक्येन नियमद्वयस्या लाभात्प्रकृतस्यैव गुणस्य नियमः स्यात्। पुगंतलघूपधस्यैव सार्वधातुकार्धधातुकयोरिति न तु सार्वधातुकार्धधातुकयोरेव पुगंतलघूपधस्येति। अपापीति। अनंतरस्य विधिर्वेति परिभाषायदिनाश्रितेति भावः। अपापीति। अभ्युपगम्यवादेनोच्यते। आवृत्त्यादिन्यायाश्रयणेनवा।। ।।

पिपठीरिति। पिपठिषतेः क्विप्। अतोलोपइत्यकारस्यलोपः षत्वस्यासिद्धत्वात्ससजुषोरुरितिरुत्वं।
पूर्वत्रासिद्धेनस्थानिवदिति। अल्लोपस्यरुत्वेस्थानिवद्भावाभावः। आंगमिति। अंगस्येत्यनुवर्त्तनादंगा
धिकारविहितंयद्रूपांतरमिटस्तदेवानिवार्यतेइडेवयथास्यादितिनियमेनेत्यर्थः। वोरुपधायादीर्घ
इतिदीर्घत्वंनांगं। यत्तुग्रहोलिटिदीर्घइतिदीर्घत्वंतद्वचनाद्भवति पिपठिषिब्राह्मणकुलानीत्यत्रल
कारलोपस्यस्थानिवद्भावात् झलंतत्वाभावान्नुमभावस्तेनपिपठीषीतिकथंसांतमहतः संयोगस्येतिदी
र्घत्वमितिनचोदनीयं। कौविधिंप्रतिनस्थानिवदित्यग्रेवस्थापयिष्यतेनतुकौलुप्तंनस्थानिवदिति॥

णेगौरवमितिबोध्यं॥ क्विविति अप्रत्ययइत्यस्याश्रूयमाणप्रत्ययइत्यर्थः॥ कृदंतत्वात्प्रातिप
दिकत्वेस्वादयः॥ झलंतत्वाभावादिति॥ स्वविधौस्थानिवत्वाभावादजंतलक्षणोपिनेतिद्रष्टव्यं॥ न
नुकौलुप्तस्यस्थानिवत्वनिषेधादल्लोपस्यस्थानिवत्वंदुर्लभमतआह॥ क्वाविति॥ ॥

कै॰वि॰१ अलावीदित्यत्रेतिनचसमार्ष्टेत्यत्रह्रस्वादंगाद्दितिसिजल्लोपायसिद्धत्ववचनंचरितार्थंसिद्धत्वेहिपरत्वात्सि
११६ जल्लोपेततोवृद्धिरन्यथापूर्वंवृद्धौसनस्यादितिवाच्यं।लावस्यायामडितिपक्षेसर्वतोवृद्धेरंतरंगत्वेनतत्पक्षेसि

अप्यवेति।इडिडवेत्यस्मिन्नियमेदीर्घत्वस्यासिद्धत्वान्नास्ति
नियमेनव्यावृत्तिः।ततःशास्त्रदृष्ट्याअविकृतरूपएवेट्प्रयो
गेएवतुविकृतः।अलावीदित्यत्रतुसिज्लोपएकादेशेसिद्धइ
त्यसिद्धत्वनिषेधवचनात्सवर्णदीर्घत्वंनवति॥ ॥

जल्लोपात्प्राप्त्यातदेकवाक्यत्वेनपक्षांतरेपिसिजल्लोपस्यैवोचित्येनसमार्ष्टेत्यैवरूपस्योचित्यात्सत्यभिधाने।सिज
लोपएकादेशइतितुसिजल्लोपोत्तरप्राप्तसवर्णदीर्घरूपैकादेशविषयमेवेतिबोध्यं।वस्तुतोनियमस्यैकदेशयुक्त्याद्धिफलोयं ११६
विचारइतितत्त्वं॥६॥

हलोनंतराःसंयोगः॥ ॥अंतराशब्दोमध्येइत्यर्थेनधोत्वोरस्येति।कालमात्रस्येत्यर्थः।अर्द्धेति।वर्णाद्वर्णोच्चार
णेऽर्धमात्राकालस्यनियतत्वात्तदधिकोऽर्धमात्राकालइत्यर्थःअतएवमात्राकालोवग्रहइतिप्रातिशाख्यांतरेरविरो
धःनैवदोषइत्यादेःसंज्ञानावेनदोषःसंज्ञायांचनप्रयोजनमित्यर्थइत्याह।दोषनिवृत्त्येइत्यादि।अप्सव्यश

हलोनंतराःसंयोगः॥ ॥कथमिति।किमंतरशब्दस्यनञाबहुव्रीहिःअर्थांतराशब्दस्येतिप्रश्नः।
अंतरंविवरंवर्णशून्यःकालः।अविद्यमानाइति।मध्येयेषामन्येवर्णाअविद्यमानाइत्याधेयस्यनिषे
धोनत्वाधारस्य।अवग्रहइति।अर्द्धमात्राकालोवग्रहइष्यते।अर्द्धमात्राकालस्थित्वावर्णमात्रमु
च्चार्यतेतत्रगुरोरनृतइतिप्लुतोनभवेत्।नैवदोषइति।दोषनिवृत्त्येसंज्ञाक्रियतेप्रयोजनाभिनि
वृत्त्येवाइहत्वोभयाभावःअधिकरणवृत्तेर्द्दूशब्दतसंबंधाभावाद्धिचार्यमाणानामित्यादौतुवाक्यस्य
टेरित्यनुवर्त्ततेनतुगुरोरनृतइति।अप्सव्यशब्देदोषइतिचेत्नैवंविधेविषयेप्रकृत्यवयवस्यावग्रहंप
दकाराःकुर्वंति।अप्सुयोनिनित्यादावपिसमासपदानामंतोऽवगृह्यतइतिसुशब्दात्पूर्वस्यनास्त्यव
ग्रहः।संयोगसंज्ञायामिति।वृद्धिसंज्ञावदानंतर्यव्यवस्थितानांहलांप्रत्येकंसंयोगसंज्ञाप्राप्नोति॥ ॥

ब्देइतिअप्सुशब्दाद्यतिअपोयोनियन्मतिश्चेत्यलुक्।प्रकृत्यवयवस्य।तद्धितप्रकृत्यवयवस्य।अत्रचवैदि
कसंप्रदायएवशरण्यं।अंतइति।समासेसमस्यमानपदांतएवावग्रहोऽयमपिवैदिकसंप्रदायएवनन्वनंतर
ग्रहणात्एकैकस्यसंसंज्ञादुर्लभेत्यतआह।आनंतर्येतिएवंचतदुपलक्षणमितिभावः॥ ॥

संज्ञाप्रतिषेधेतिपाठेकर्मणिघञ्बोध्यः संज्ञाप्रतिबंधेतिपाठः सुगमएव। कस्मादिति। बहूनांसंनिधानेऽविशेषेण द्वयोर्बहूनांचसंज्ञायाः सिद्धांतयिष्यमाणत्वादितिभावः परिहरति। पूर्वत्रासिद्धीयमद्विर्वचनेइतिद्विर्वचनेकार्येऽन्यस्यासिद्धत्वंनैत्यर्थकं नतुद्विर्वचनस्यतदभावप्रतिपादकमितिभावः। संयोगांतत्वादिश्चेतिप्रत्येकसंज्ञापक्षेस्कोः संयोगावयवत्वासंभवेनषष्ठीसमासासंभवाद्बाधवाञ्चकर्मधारयएवेतिभावः आदिशब्दश्चपूर्वभूतसमीप

किंचस्यादिति। द्वयोरानंतर्येएकैकस्यापिसंयोगसंज्ञायांगुरुसंज्ञाप्रतिबंधाकार्यसिद्धिरितिप्रश्नः॥
निर्यायादिति। सतिरेफेयकारःसंयोगइतिएत्वप्राप्तिः ननुसमुदायस्यापिसंज्ञित्वेअचोरहाभ्यांद्वेइति
यकारस्यद्विर्वचनेकृतेकस्मादेत्वंनभवतियथाऽग्नेयादिति। एत्वेकर्त्तव्येपूर्वत्रासिद्धमितिद्विर्वचनस्या
सिद्धत्वान्नायंदोषः। शक्तेतितकारेझलिपरतःककारःसंयोगांतत्वाद्श्चेतिलोपप्रसंगः। संयोगा
विति। कथंदत्तावुपसर्जनार्थस्यद्वित्वावगतिरितिचेत्। आदिग्रहणसामर्थ्यात् अन्यथासंयोगादि
तिवक्तव्यंस्यात्॥ ॥

वाचीआदित्वंचप्रत्यासत्त्यासंयोगत्वाक्रांतपरापेक्षयैवेतिपदांतांशेसंयोगादिग्रहणचारितार्थ्यंबोध्यं। अन्यथास्य
र्कयतेरप्रत्ययेऽर्कइत्यादावंतकस्यापिलोपःस्यात्। कथंदत्ताविति। अयंपूर्वपक्षोयुक्तःसंयोगस्यद्वित्वत्वेन
प्रतीतेरभावात्संयोगत्वेनैवानेकसंयोगप्रतीतिः नहिदत्तावनेकबोधकउपसर्जनाभेतिभाष्यसंमतसंख्यावि ११७
शेषानवगमस्यैवभाष्यकृतोक्तत्वात् नत्वनेकानवगमइतितेनोक्तमितिविभाव्यतां॥ ॥ ॥

संयोगात्परइति। नचांगावयवसंयोगग्रहणायादिग्रहणं। तत्र यद्यपिदरिद्रातौनफलंआर्धधातुकविवक्षायां
तस्याल्लोपविधानात् तथापिखद्धादिस्पआचारक्विबंतेभ्योलिङिःखद्धायादित्यादौएत्ववारणंफलमितिवाच्यं। स्य
सिचसूत्रादुपदेशपदानुवृत्त्याघुमास्थाघन्यस्योपदेशिकस्यैवग्रहणेननामधातुत्वाप्रवृत्तेरितिभावः खद्धादिभ्य
आतोधातोरितिसूत्रस्यभाष्यप्रामाण्येननाचारक्विपोऽभावाच्चसिद्धांतेतुनिर्यायादित्यादिवारणायांगावयव

संयोगात्परोयआकारः तदंतस्यांगस्यैत्वमित्यर्थलाभात्। संयोगावंताविति। अत्रापिसंयोगस्यलोप
इत्येवंसंयोगेनपदस्यविशेषणात्तदंतविधौलब्धेअंतग्रहणमाश्रितसंख्याभेदःसंयोगोयथागृह्ये
तेत्येवमर्थंविज्ञायते। संयोगयोरिति। षष्ठीसमासआश्रीयतइत्यर्थः। संयोगयोरितिद्विवचननिर्दे
शाःस्कोर्द्वित्वात्समीपयोरपिहलोर्द्वित्वात्। तेनायमर्थः। झलिपरतोयःसंयोगःपदांतेचयःसंयो
गतस्यादिःसमीपोयःककारःसकारश्चतयोर्लोपइति॥

संयोगग्रहणायतदितिवाच्यं। भाष्ये। आदीइतियद्यपिमुख्यादित्वमुभयोर्व्याहतंतथाप्येकःआदिशब्दोगौणइ
तिभावः पूर्ववद्द्विवचनांतसमासेनदोषपरिहारइतिनभाष्यार्थः अस्यत्रापिद्विवचनोपादानादतआह। षष्ठीति।
एवंचफलंशेपिसंयोगादिविशेषणमर्थवद्भवतीतिभावः आदिशब्दश्चनावयववाचीअसंभवादित्याह। समीप
इतिफलादिविशेष्यस्यसंयोगस्योपसर्जनत्वेपिसौत्रत्वाद्धत्तेनबुद्धिशक्तेत्यत्रव्यपदेशिवद्भावेनतस्यापि
स्वसमीपत्वेनदोषस्तदवस्थः आदिग्रहणसामर्थ्याद्व्यपदेशिवद्भावाप्रवृत्तेः॥ ॥ ॥

वस्तुतस्तु प्रत्येकं संज्ञेति पक्षो वाच्यः तथा सूत्रान्तलभ्य तएवेति व्युत्पादयितुं गूढाशयः पृच्छति। भाष्ये। कथं कृत्वेति।
तमेवालानं व्याचष्टे। संयोगेति। एवं चान्वर्थसंज्ञाविरोधात् प्रत्येकं वाक्यपरिसमाप्तिन्यायो नात्राश्रयितुं शक्य
तइति व्यर्थं सहेतीति भावः किंच श्रुतमानंतर्यं प्रत्येकसंज्ञावादितोपलक्षणमाश्रयितव्यं। विशेषणत्वमेवो
चितं तत्वे संभवेति। उपलक्षणत्वस्यान्याय्यत्वात् किंचाद्यंतग्रहणसामर्थ्याद्विवचनांतेनैव विग्रह इत्यर्थस्य

नचैवं सति शक्तावस्तेत्यत्र प्राप्नोति। संयोगादेरत इत्यत्रापि संयोगादात इत्येव संयोगात्परोयः
आकारः तदंतात्धातोर्नत्वमिति सिद्धेरादिग्रहणाद्द्वित्वसंख्याश्रयणमर्थं। कथं कृत्वेति। संयोगसंज्ञाया अ
न्वर्थत्वात्संयुज्यंतेस्मिन्वर्णा इति समुदायः संयोग इत्यर्थस्याश्रयणात्सहवचनं कर्त्तव्यमित्यर्थः॥ ॥

नियमेनालापः बहुवचनांतेनापि संख्यावादित्याहुः वस्तुतोन्वर्थसंज्ञाचिंत्या तदाश्रयणे घटपटौ संयुज्येते यत्रे
त्यादौ संयोगानुयोगिप्रतियोग्यतिरिक्तस्यैवान्यपदार्थतया प्रतीतेर्व्युत्पन्नत्वेन तद्व्यतिरिक्ततत्घटितपदवा
क्यरूपसमुदायस्य संज्ञायत्वावनिष्टापत्तिः तस्मान्महासंज्ञाकरणं प्राचामनुरोधेनेत्येव न्यायः अतए
वन्नगवतागर्गदंडनन्यायमाश्रित्य सहग्रहणं प्रत्याख्यातं नतु महासंज्ञयेत्यलं॥ ॥छ॥ ॥

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

नन्वविशेषेणेत्यस्य द्वयोर्बहूनां चेति नार्थः अस्याविशेषस्याग्रे वक्ष्यमाणत्वात्। मस्जौ दोषदानासंगतेश्चात आह। द्व
योरित्यस्येति। अतएव भाष्ये समुदाये संयोगादिलोप इति वक्षाति। तत्र युक्तिमाह। यथेति। भाष्ये पूर्वं धातुरूपसर्गेणेत्या
श्रित्य क्वचित् क्वचिद्वाक्यसंस्कारपक्षाश्रयेणादोषोपन्यासः। हल इति जाताविति। वस्तुतो हलौ च हलश्चेत्ये

आहोस्विदिति। द्वयोरित्यस्य विशेषस्यानाश्रयणाद्बहूनामेवेत्यर्थः। यथा पपाचेत्यत्र समुदायैकाचो द्वि
र्वचनं तावद्वा नैकाच्चः। यदा तु द्वयोरेव हलोरानंतर्यं यदा द्वयोर्नवित्येव हल इति जातो बहुवचननिर्दे
शात्। नंक्तेति। मस्जिनशोर्झलीति नुमि कृते न सजाना संयोगसंज्ञा न तु सजयोरिति सलोपाप्रसंगः
निश्चेयादिति। यः संयोगो नासाव ग्ग्यादिर्यश्चांगादिर्गकाररेकारसमुदायो नासौ संयोगः। इंद्रं दिद्रीषि
षतीति। अत्र द्वौ संयोगौ नदौ दरौ च तत्रश्च दकारस्य संयोगादित्वात् द्विर्वचननिषेधप्रसंगः। नवाज्वि
धेरिति। अजाश्रयः प्रतिषेधविधिः अजादिरिति कर्मधारयः। तेन अचआदेः परेऽनंतरा नंद्रा न
द्विरुच्यंते॥ इंद्रशब्दे तु दकारो नकारेणाव्यवहितत्वात् द्विरुच्यत एव॥ ॥छ॥ ॥

कशेषः स्वरितादिति सूत्रे नुदात्तानामित्यत्र भाष्ये तथैव वक्ष्यमाणत्वात्॥ परेनंतरा इति। तस्मादित्युत्तरस्येत्य
स्योपस्थितेरिति भावः चंद्रीयतेः सनो विधाने पपेष्टं नामधातुश्चिति द्वितीयैकाचो द्वित्वं नकारसहित
स्यैव॥ आधवयवा चः परत्वाभावेनैतन्निषेधाप्रवृत्तेरिति बोध्यं॥ ॥छ॥ ॥

बहूनां चाविवरत्वे इति। बहूनां चानंतरत्वे इतिकचित्पाठः। नत्वत्र विग्रहे एकमित्यादौ कमयोः संयोगसंज्ञा स्यात्कालव्यवायो
पि स्यादत्यंतदृत्यदोषः द्विर्वचनवदिति। एषामिति बहुवचनादिति नन्वत्रमितर्य। तस्य सूत्रे हलइतिवत्सत्वात्। अंतराशब्दे
नविग्रहेपितत्सत्वाच्च। अन्यथाद्वयोर्न स्यात्त्विंत्वंतरशब्देन विग्रहाद्बहूनांसमवधाने तेषामप्यनंतरत्वादिति भावः संसर्ग
विप्रयोगावेव भाष्ये दर्शयति। द्वयोश्चैवेति विद्यत इत्यंतं दृष्टार्थ अवत्सो धेनुरित्यादौ विप्रयोगोपि विशेषावगतिहेतुर्दृष्टः

अविद्यमानमिति। बहूनामविवरत्वे समुदाय द्विर्वचनवद्बहूनामेव संयोगसंज्ञा न तु द्वयोर्द्वयोः।
अविद्यमानाद्इति। मध्येय आधेयः सद्वयोरेव मध्ये भवतीति संसर्गवद्विप्रयोगस्यापि विशेषावग
तिहेतुत्वाद्बहुषु द्वयोर्द्वयोः संयोगसंज्ञा भवतीतिपक्षः। द्वयोश्चैवांतरेति। अंतरांतरेण युक्त इति द्वि
तीया कस्मान्नत्र भवति। उच्यते। यदा मध्यापेक्षया नियतावधिरूपता विवक्ष्यते त्वां च मां च अंतरा
कमंडलुः अग्नी अत्तराधव खदिरावंतरेति तदा द्वितीया॥

अंतराविद्यत इति। नविद्यत इतिवायत्तद्वयोरेवेत्यर्थः। नियतावधिरूपतेति। अवधित्वं हि अन्यासहितत्वे एवतयोर्नियमे
न भवति अन्यसाहित्ये तु न तत्रावधित्वस्य नियमेन प्रतीतिरवधित्व विवक्षायामेव च द्वितीयेति भावः यस्य च नियमेनाव
धित्वं तस्यैवावधित्वविवक्षाशब्देनेति तात्पर्यं नियतत्वमन्यासहितत्वं तद्विशिष्टेन या वधिरूपता सा विवक्षिता यदा भवतीत्य
क्षरार्थः अन्यथा अवधित्वविवक्षायां द्वितीया तत्त्वविवक्षायां षष्ठीत्यर्थस्यैव शब्दतो लाभेन नियतेति कथनमधिकं स्यात् इति बोध्यं॥ ११८

युक्तग्रहणादिति। न च तदभावे अंतरांतरेण शब्दाभ्यां द्वितीयाप्राप्तिः तयोरव्ययत्वेन विशेषाभावात् न च प्रथमाबा
धनेन सपूर्वा या प्रथमा या इत्यस्या प्रवृत्त्यर्थं व्यवस्थितविभाषयातस्य सुपरिहत्वात् तस्माद्युक्तग्रहणं संबंध विशेष
स्य प्रतिपादनाय अवधित्वस्य प्रतियोगित्वस्य वा तेन प्रयोगमंतरेणेत्यपि सिद्धं एवं च संबंधमात्र विवक्षायां षष्ठ्येवेति
भावः ननु भाष्ये द्वयोरिति षष्ठी द्विवचन निर्दिस्य द्वित्वा याङ्गीति बहुवचन निर्देशोनुपपन्न इति चेन्न। प्रष्ठ तद्वयोरित्यनेन

यदा तु नियतावधित्वं न विवक्ष्यते अपि तु संबंधमात्रं तदा षष्ठ्येव भवति। तदा हि न ज्ञायते किं तयोरेवावधित्वं
उतान्यसहितयोरित्यवधिनियमाभावात् द्वितीया युक्तग्रहणाद् नियतावधि विवक्षायामभावः। याङ्गीति।
एषामिति बहुवचननिर्देशादिति न बोध्यं बहुत्वस्याविवक्षणात्। अन्यथा शिक्षेत्यादौ द्वयोर्न स्यात्
तस्माद्योसावंतरेण सद्वयोर्भवति। नवेति यत्पुक्तं तत्रोच्यते। यदा द्वयोर्द्वयो रंतरा न भवति तदा बहवोनंत
रा इति तेषामेव प्राप्नोति॥ ॥

न केवलौ वर्णौ निर्दिष्टौ तथा सति तयोरवधित्वे द्वितीयाप्राप्तिः किं त्वन्यसाहितावपि। अत एव षष्ठी एवं च त्रयाणां समवधाने
द्वयोः समुदाययोरवधित्वविक्षणेन द्वयोः समुदाययोरनंतरत्वे तत्समुदायवर्त्ति हलां बहुत्वात् उपपत्तिः अनंतरा इत्यने
न च निवद्यते तरयोर्वर्णेतौ यौ च समुदायावंतरा न विद्यते तौ च गृह्येते एकशेषादि तिन दोषः तत्सर्वमभिप्रेत्याह। यदा
द्वयोरिति द्यवयक समुदाययोरित्यर्थः यान्वर्णान् द्वयोः समुदाययोरित्यर्थकषष्ठ्या प्रतिनिर्दिशतीति भाष्यार्थ इति भावः॥ ॥

भा॰कौ॰वि॰१ अनंतरा इत्यस्यात्र पक्षे व्याचष्टे दर्शयन् पूर्वोक्तमेवार्थं दृष्टांतेनोपपादयितुमाह। यदाहि बहूनामिति। नच स्त्रष्टे
११७ त्यादौ रेफषकारयोर्वर्णयोरंतराकस्यचित्त्वेपि सरौरषौ चेति समुदायौ तयोश्चांतरा न कश्चिदिति तेषां संयोगत्वं स्यात्
इति वाच्यं। वर्णयोरंतराविद्यमानत्वेनानंतरत्वाभावात्। सर्वविधानंतरत्वस्यैव निमित्तत्वादित्याहुः। अनुषंगो नकारः

यदाहि बहूनां मध्ये भिन्नजातीयो भवति तदा मा भूत् तत्तद्भावे तु प्रवर्त्तितव्यमेव। बहूनां संयोगसं
ज्ञया समुदाय द्विर्वचनवदित्यर्थः। अंत्यात्पूर्व इति। तत्रानुषंगलोपार्थमवश्यं कर्त्तव्यं। अंत्याद
चः परे नुमि सति अनुपधात्वान्मग्न इत्यत्र न लोपो न स्यात्। कृतेपि संयोगादिलोपे तस्यासिद्ध
त्वादनुपधात्वमेव नकारस्य। अविशेषेणेति। बहुष्वनंतरेषु द्वयोरपि भवति बहूनामपीत्ययमिदानी
मविशेषः। कार्यार्थत्वात्संयोगसंज्ञया विरोधाभावादेकया संज्ञया सर्वेषामनुग्रहो सिद्धो द्विर्वचनेन
वैधर्म्याद विशेषेणेत्युक्तं।

तद्धोपो निदितामित्यनेन। बहूनामपीति न्यायतः स्त्रात्। संभवमात्रेणेदमुक्तं न तु फलोदाहरणमस्य न्याय्यमस्ति १२०
ध्वनितं चेदमंगेन संयोगादिमिति ग्रंथेन भाष्ये। ननु द्विर्वचनन्यायेन समुदायस्यैव संज्ञा स्यादिति कथमेतत्पक्षोत्यानमत
आह वैधर्म्यमिति। शब्दस्यार्थप्रत्यायनांगत्वेन एकस्यावाचो बहवयवत्वं युगपद्विरुद्धं च। एकेन द्वित्वेन सर्वानुग्रहश्चेति वैषम्यं॥ ॥
x कार्यति। द्विर्वचनं हि श्रवणार्थमेव न शास्त्रीयकार्यार्थं। x१

ननु पक्षांतरेण व्यवधानाद्भासत्यभाव इत्यत आह। पा गेति। शब्दस्यार्थप्रत्यायनांगत्वेन गुणत्वात्तदीयः क्रम अर्थक्रमवि
रोधे दुर्बल इति भावः। पदधात्ववयवेति संयोगादेरित्यादावाद्यंत शब्दयोवयववाचितयेति भावः। अयमाशयः अं
गादेरादावंते बाध्यजनत्रयाभावात्। त्रयाणां फलाभावात्संज्ञाप्राप्तौ कथं द्वयोर्न स्यादिति। यद्यपि सामाना
धिकरण्यान्वये पि अंगाद्यवयवस्यैव संयोगस्याश्रयणं नान्यस्य अंगेन संयोगादि विशेषयिष्याम इत्यनुपप

बहूनां सन्निधौ बहूनामेव संयोगसंज्ञेति अस्मिन्पक्षे आश्रीयमाणे मस्जेर्दोषो त्यात्पूर्व इति परिहृत
दोषान्दोषान्परिहर्तुमाह॥ यदप्युच्यत इति। पाठक्रमादर्थक्रमो बलीयानिति मस्जेरंत्यात्पूर्वमित्य
स्यानंतरमिदं द्रष्टव्यं निर्लेयादित्यादिषु यद्यपि त्रयो हलः सन्निहितास्तथापि कार्यार्थत्वात्संज्ञाया
स्त्रिषु च कार्याभावादंगपदधात्ववयवस्य संयोगस्य तेषु तेषु लक्षणेष्वाश्रितत्वात्समुदाये कार्या
भावे चावयवानां स्वकार्यारंभात् द्वयोरेव संज्ञा प्रवर्त्तत इति भाष्यार्थः॥ ॥ ॥

नंतथापि संयोगरूपमादिं अंगेन परिच्छेत्स्याम अंगाद्यवयवसंयोगस्यैव बहुव्रीहिणाश्रयणमित्यर्थ इति न दोषः।
एवं च बहूनामपीत्याश्रयणे फलाभाव इति स्पष्टमेवोक्तं क्लिष्टकल्पनपाताद्धासंयोगानयनं तु न अनभिधानादित्याशयः अ
दादिषु सेत्वमेइत्येव पाठो न तु षसस्तस्त्विषन्नइति। एतञ्चाष्यप्रामाण्यात् ऊक्षित्यादिसूत्रस्थभाष्यप्रामाण्याच्चेति बोध्यं॥

व्याख्यानांतरमिति। पाठक्रमाबाधायैवं व्याचक्षतेन प्राप्नोतीतीत्यत्रेति शब्दो यस्मादर्थेन त्वरान्वयी यस्मा
दंगेन संयोगादिर्विशेष्यते ऽगावयवः संयोगो गृह्यत इत्यर्थः एवं च बहूनामेव संयोगत्वेयः संयोगो नासा
वंगावयवः पश्चांगावयवो नासौ संयोगस्तस्मादेत्वं न प्राप्नोतीति यदपि तदप्यसत् यतो विशेषेण संज्ञोच्य
त इति शेष इति। तत्राक्लिष्टं। शेषपूरणात्। इतः स्वरसतो वाक्यसमाप्त्यर्थतायाः प्रतीयमानत्वाच्च। एवं ता

व्याख्यानांतरमत्र क्लिष्टत्वान्नोक्तं। पचति पनसमिति। हल इति वचनाद्द्वाभ्यां सह सकारमकार
योर्माप्त्संज्ञा तयोरेव तु प्राप्नोति ततश्च सलोपप्रसंगः एकप्रतिषेधार्थमिति। अनंतरा इत्यने
न संज्ञाया विषयो निर्दिश्यते। यत्रानंतरव्यवहारस्तत्र संज्ञा न चैकाकिन्यनंतरव्यवहार इति भा
वः॥ एकप्रतिषेधस्य च प्रयोजनेद्य्येषेत्यादाविजादेरित्यामो निवृत्तिः॥

त्सर्वमांगं परिष्ठितमित्यस्यास्वारस्याच्च। हलइतीति। तद्धि असावित्यादौ स्कोरिति सलोपवारणायावश्यकमिति भावः।
न चेति आनंतर्यस्य सप्रतियोगिकत्वात् इति भावः प्रकृते चान्यस्य प्रतियोगिनो नुपादानादुपस्थित हल्त्वेव प्रतियोगि
त्वेनाश्रीयत इति बोध्यं भाष्ये। जवोषेतिप्रसंगो वारितः। तस्य विकल्पितात्मकत्वात् जवोरवेतिके वर्गद्वितीयांतो वा पाठः॥ १२१

दूयायेति। दूणल इत्यस्यामवस्थामवस्थाया व्यपदेशिवद्भावादिजादित्वमस्ति। गुरुमत्वं तु न। न चेयङि कृते
गुरुमदिजादित्वादाम् स्यात् इति वाच्यं। णिङ् धातुसंनियोगेन संपन्नस्य गुरुमदिजादित्वस्य तद्विघातक
त्वान्नावादिति भावः। कुलमत्र गृहं ब्राह्मणकुलमपीति तत्तद्रूपेण ग्रहणे तस्यापि विजातीयत्वादिति भा
वः भाष्ये नयोरंतरेतिष ष्युपादानादन्यसहितयोरवधित्वसूचनात्तत्तद्रूपेणाग्रहणाबोधनात्।

गुरुमद्वचनमियायेत्यादिनिवृत्त्यर्थं स्यात्। वृषलकुलमिति। यद्यपि ब्राह्मण
कुलमपि तयोर्व्यवधायकं तथापि भिन्नजातीयमव्यवधायकमिति यदुक्तं तदनेन निवर्त्यते।
ग्रामशब्दोयमिति। केचिदर्थभेदेन शब्दभेदमिच्छंति प्रत्यभिज्ञानं तु सामान्यनिबंधनं। अ
न्ये त्वेकशब्दत्वं॥ ॥

ब्राह्मणकुलस्याव्यवधायकत्वमेवेत्यन्ये। भिन्नजातीयेति तयोश्चांतरा नद्यश्च पर्वताश्च संभवंतीति भाष्येणेत्यर्थः।
ग्रामशब्दोयमित्यस्य तद्यः सारण्यक इत्यस्य चाविरोधायाह। केचिदिति अन्याय्यश्चानेकार्थत्वमिति तदाशयः।
सामान्यं च ग्रामशब्दत्वादि। अन्ये त्विति। व्यक्तिभेदकल्पनायां गौरवमिति तदाशयः॥ ॥७॥ ॥

कै०वि०१
१२२

तत्र चेति निरूपकभेदाच्छक्तिभेद इति भावः। एकेति। समवायैकत्वनये रसो रूपवानित्यादिप्रयोगवत् अन्यार्थबोधकाले अन्यार्थबोधो वारणीयः तदर्थसंबंधेन शक्तिग्रहात्। तत्तदर्थविशिष्टशक्तिभेदेन च नानार्थत्वव्यवहार इति भावः। तत्रपदेति। एकशक्तित्वपक्षे त्वर्थभेदादुपचारितभेदाश्रयमिति बोध्यं। ग्रामशब्दोऽयं बह्वर्थ इति तु मुख्यार्थमेव। अत्र सर्वार्थनिरूपि

तत्र चानेकशक्तियोग एकशक्तित्वं वेति दर्शनविकल्पः। तत्र यदा एकशब्दत्वपक्षः तदा तद्यः सारण्यक इति भाष्यं। शक्तिभेदादुपचारितभेदाश्रयं। भेदपक्षे तु ग्रामशब्दोऽयं बह्वर्थ इति भाष्यं अस्ति न सामान्यनिमित्तत्वाध्यवसायाश्रयं। तद्यः सारण्यक इति। ततश्च ग्रामशब्दार्थेन नद्यादीनां चांतर्भावात् व्यवधायकत्वाभावात् आनंतर्यं ग्रामयोरुच्यते। ग्रामे नाध्येयमित्यत्र तु ग्रामशब्दो वाटपरिक्षेपवृत्तिः भुचौ देशेऽध्ययनप्रतिपादनतात्पर्यात्। ततश्च सीमन्यन्यप्यधीयत एव॥

नद्यन्तर्नीवर्त इत्येकशब्दबोध्यत्वेनाबोधनादेकशक्तित्वपक्षो भाष्यबोधितः। तत्र वर्त्तनक्रियास्ति क्रियायाः कर्त्री। शालासमुदायादौ ग्रामशब्दस्य वृत्तिरस्तीत्यर्थः वाटपरिक्षेपो नाम शालासमुदायरक्षणाय सर्वतो मार्गप्रतिरोधकं यत्परितः क्षिप्यते तदुच्यते। सारण्यकससीमकवृत्तिस्तत्र न गृह्यत इत्याह। भुचाविति। सीमनीति च॥१॥ ॥ १२२

मुखनासिकावचनोऽनुनासिकः॥ ॥भाष्यं गत्वादिति। एतेनेतरेतरयोगद्वंद्वे रूपसिद्धिरित्यपास्तं। अर्थ इति॥ अस्मिमतोऽर्थ इत्यर्थः। सौत्रत्वादिति कुतो नोक्तमित्यत आह। प्रसंगेनेति। अबाधकत्वेति। पक्षे त्वित्यनेनाबाधकत्वस्वीकर्तृवृत्तिमतमसंगतमित्युक्तं। भाष्यकृदसंमतरूपापत्तेः बाधकान्येव निपातनानीति सर्वादिसूत्रे भाष्ये उक्तेः

मुखनासिकावचनोऽनुनासिकः॥ ॥भाष्यं गत्वात्समाहारद्वंद्वे ह्रस्वत्वेन भाव्यं। अव च नमिति नज्समासाश्रयणेऽर्थेऽसंगच्छेत इति प्रश्नः किमिदमिति। निपातनादिति। प्रसंगेनास्य लौकिकशब्दस्य साधुत्वं ज्ञाप्यते। निपातनानां च बाधकत्वान्मुखनासिकवचनं इति न भाव्यं। अबाधकत्वपक्षे तु भाव्यमेव। इष्व द्वचनमिति। भागस्य मुखेनोच्चारयाद्भागस्य च नासिकया। अस्मिन् पक्षे मुखनासिकवचन इत्यपि भवति। योऽहीषदुच्यते उच्यत एव सः यथेषच्छुक्लोऽपि शुक्ल एव॥

अस्मिन् पक्ष इति। आङ्‌रहितस्येति शेषः वस्तुत आद्यपक्षे कत्वाय आङ्‌रहिते तत्पदवचनपदाभ्यां समासस्यानभिधानमेवेत्याहुः ननु भागस्य मुखाद्युच्चार्यत्वेन मुखनासिकं वचनमुच्चारणं यस्य वर्णस्येत्यर्थको मुखनासिकवचन इति प्रयोगस्तत्रासंगतात आह। योऽहीति॥

सहायेति। अव्युत्पन्नो द्वितीयशब्दः सहायवाचीत्यर्थः शाकपार्थिवादित्वादुत्तरपदलोपे शब्दानित्यत्वाप
त्तिरत आह। तत्रेति। परंत्विदं चित्यं भाष्यकृता एवंरीत्या तदप्रत्याख्यानात्। मुखस्य चेति रूपशब्दसाम
र्थ्यादिति भावः। यद्यपि वचनशब्दे कर्मणि ल्युटि मुखनासिकेनावचनः मुखनासिकयावचनइति वात

मुखद्वितीयेति। मुखसहायेत्यर्थः तत्र नासिका मुखसाहचर्यान्मुखशब्देनोच्यते। मुखंच
तन्नासिका च मुखनासिका सा वचनं यस्येति। मुखोपसहितेति। मुखस्य नासिकायाश्च यदंतरालं
स्थानांतरमेवानुनासिकस्य दर्शयति। अत्र सामीप्यान्मुखं च तन्नासिका चेत्युभाभ्यामंतरालं व्यपदिश्य
ते। पदसंस्कारपक्षे च मुखनासिकापदनिरपेक्षं वचनमित्येतत्पदं लिङ्ग सर्वनाम नपुंसकाश्रये
ण संस्क्रियते पश्चात् स्त्रीत्वस्य पदांतरसंबंधेन प्रतीयमानत्वात् बहिरंगत्वात् ङीप्प्रत्ययो न प्र
वर्तते। यदा तु स्त्रीत्वाश्रयेण वचनीतिपदं व्युत्पाद्यते तदा मुखनासिकावचनीक इति भवत्येव॥ ॥

त्पुरुषोपि वक्तुं शक्यस्तथापि कर्मणि तस्य बाहुलकलभ्यत्वात्करणे ल्युटा बहुव्रीहिरेवाश्रितो भाष्ये तत्रांत्ययोर्नासिका
शब्दसामानाधिकरण्यात्स्त्रीत्वविशिष्टस्यैव करयात्विन ल्युटि ङीपि नद्यतश्चेति कवापत्तिरत आह। पदसंस्कारेति॥ ॥ १२३

भागस्य मुखेनोच्चारणाननुभवादाह। तत्रेति। तस्यादित इति सूत्र स्वरसात् वर्णानां सखंडत्वमित्याशयः येतु तत्तद्देशावच्छि
न्नवाय्वभिघातस्य तत्तद्वर्णजनकत्वात्स्थानानां करणत्वमेव। स्थानव्यवहारस्तु वर्णजनक वायुसंयोगाधारत्वा
द्वर्णाधारत्वमारोप्य एव अत एवोत्तरसूत्रे भाष्ये अस्यं त्यनेन वर्णा नित्या स्यमिति करणव्युत्पत्तिर्दर्शितेति वदंति तन्मते प्रा
सादवासिदृष्टांतासंगतेराह। न्याङ्गेराचिति। एतेन कवादिकं तु स्थानं नासिका तु करणमिति मंदोक्तमपास्तं॥ अत ए

तत्र चानेकं दर्शनमनुनासिकस्य पूर्वः परो वा भागो मुखेनोच्चार्यते भागो नासिकया तत्र नासिकावचनभा
गानुरागवशान्मुखवचनोपि भागो नासिकावचन इव लक्ष्यते। यथा संयंतेत्यत्रानुनासिकयकारोऽनु
नासिक इव प्रतिभाति। अत्र प्रासादवासिन्यायेनास्ति ~~पेसा ग्रस्येन मुखे~~ न नासिकया चोच्चारणात् न तत्स
मुदायस्य। अन्येषां तु दर्शने मुखनासिकांतरालं स्थानांतरमेवास्येति। अत्रापि नास्ति प्रासादवासिन्यायः।
यदा तु सर्व एव वर्णो मुखेनोच्चार्यते नासिकया च तदा प्रासादवासिन्यायेनत्वाप्यकारो मुखग्रहणात्प्रत्याख्
येय यथा त्वाङ्गयायां च पक्षे स्वरूपतः भाष्यां व्यपदिश्यते॥ ॥

वात्र सूत्रे हकारेणांसहि वर्णो न मुखेनैव नापि नासिकयैव चात्मवृत्तिं लभते किंतु वायुनाऽनुपरतशक्तिनाऽन्यतरकरणा
मस्तिहत्यान्यतरकरणोस्तिहन्यमाने आत्मव्यक्तिं लभते इत्युक्तं। यमो नाम वर्गपंचमे परे वर्गाद्यचतुष्टयान्यतमस
दृशो वर्णः। आदितश्चत्वारो वर्णा इति विरणोपि चतुःशब्दस्य चतुःसदृशे लक्षणा बोध्या॥ अत एवायोगवाहत्वप्र
तिपादकहयवरट्सूत्रस्य भाष्याविरोधः॥ ॥

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारकम्

न्यायानवतारेति। कपचटतपानामेवेत्येवकारोप्यत्रैव पक्षेनासिकाया आस्यबाह्यत्वापक्षेचबोध्यः। अप्रतिपत्ति
रिति। अत्र विद्वनोर्ग्मइतिवक्तुमशक्यं यतोनुनासिकइत्यत्रत्वप्रतिपत्तिः तत्र ञमिञम्वेत्युक्ते सकलेष्टासिद्धेः। च
कारलोपेतिनिष्टावत्वयोरसिद्धत्वात् पचेरनुदात्तोपदेशवनतीत्यनेनेतिभावः ननु प्रासादवासिन्यायेनमुख
ग्रहणप्रत्याख्यानवत्सूत्रमेवकुतोनप्रत्याख्यायतेइत्यत्रआह। अयमिति। योगेनह्युभयग्रहणंसरूढिप्र

यमानुस्वराणामेवेति। प्रासादवासिन्यायानवतारपक्षइतिभावः। तत्र विधिप्रदेशेषु यमानुस्वारा ए
वादेशाःस्युः। विड्वनोरनुनासिकस्यादित्यादिषु त्वनुवादप्रदेशेषु यमानुस्वाराणामसंभवादप्रतिपत्तिः
स्यात्। कचटतपानामिति। पक्कमितिचकारलोपप्रसंगः। ओदनपक्इत्यनुनासिकस्यक्विझ
लोःक्ङितीतिदीर्घप्रसंगः प्रासादवासिन्यायेनेति। अयंन्यायः क्रियाशब्देष्वेवनरूढिशब्देषु।
नैवदोषइति। अनुवाद्ययमानुस्वाराणामसंभव एव। विधावप्यांतरतम्यान्मुखवचनस्योभय
वचनोभविष्यतिनकेवलनासिकावचनः॥

नासीत्यर्थः। अनुनासिकशब्दस्यचरूढिशब्दत्वंतस्यक्रियाशब्दत्वंतुवक्तुमशक्यं अनुयश्वान्नासिकावाप्रि १२४
यतेयस्मिन्निति योगस्य ञमङणनेषु निरूपयितुमशक्यत्वात् विनिगमनाविरहेणयुगपदुभयोर्व्याप्तेः एते
नानुपश्चान्नासिकांगतइत्यर्थकोनासिकामनुगतइतियोगोपिपरास्तः यथाकथंचिद्योगोपपादनेतुरूढिरेवफलितेतिदिक्॥८॥

तुल्यास्यप्रयत्नंसवर्णम्॥ ॥ तत्पुरुषइतितुल्यास्यशब्दयोर्मयूरव्यंसकादित्वात्पूर्वपदार्थप्रधानस्तत्पुरुषः आस्यप्र
यत्नशब्दयोश्चसाधनंकृतेत्यनेनसमासः ननुस्थानादिकंनतुलयासंमीयतेऽतआह। व्युत्पत्त्यर्थमेवेति। किं

तुल्यास्यप्रयत्नंसवर्णम्॥ ॥ चत्वारोत्रपक्षाःसंभवंति। द्वंद्वगर्भोबहुव्रीहिस्त्रिपदोबहुव्रीहिः तुल्यास्यश
ब्दयोस्तत्पुरुषस्ततोबहुव्रीहिः आस्यप्रयत्नशब्दयोस्तत्पुरुषस्ततोबहुव्रीहिः तत्रद्वंद्वगर्भबहुव्रीहिपक्षेवार्त्ति
कस्यावतारइतितमेवभाष्यकारः पूर्वंदर्शयति। तुलयासंमितमिति। व्युत्पत्त्यर्थमेवतुलोपादीयते रूढिशब्दस्त्वयं
सदृशपर्यायः यथाप्रवीणःकुशलःप्रतिलोमोनुलोमइतिअवयवार्थाभावः एवंतुल्यशब्देपि। किंपुनरा
स्यमिति। किंमुखमथतत्रभवंताल्वादिकंस्थानमितिप्रश्नः। लौकिकमिति। पशुरपत्यंदेवतेत्यादिवत्प्रसि
द्धमित्यर्थः। यद्यपिताल्वादिकमपिलौकिकमास्यंतथापितत्रयोगवशादास्यशब्दोवर्त्ततइतिझटितिनत
त्प्रसिद्धमितिमुखमेवप्रसिद्धत्वाल्लौकिकमुक्तंतस्यैवचप्राथम्यात्ग्रहणंयुक्तमित्यर्थः। ओष्ठादिति।
काकलकंनामग्रीवायामुन्नतप्रदेशः॥ ॥

मुखमिति। तद्धितांतास्यशब्दविषयकसंदेहइत्याशयः तद्धितांतमपिलौकिकमेवनवैदिकमित्यतआह।
पशुरिति। झटिति। पदश्रवणमात्रेणेत्यर्थः॥ ॥छ॥ ॥ ॥

निमित्तवशात्। अत एवार्थवशात्। जातिस्फोटे तिवर्णानितिवर्णपदं बोधकपरं। तत्रजाते र्बोधकत्वे तस्यानित्यत्वादपि
व्यक्तिरसनंतदाश्रयव्यक्तीनांवाचकत्वेतूत्पत्तिरितिभावः। अत एव वर्णानितिबहुवचनं संगच्छते। एकैवव्यक्तिःतत
द्रूपेणाभिव्यक्तावानिकेतिपक्षेतदसंगतिः स्पष्टैव कश्चित्तुव्यक्तिस्फोटपक्षेऽभिव्यक्तिः जातिस्फोटपक्षेतूत्पत्ति
रितिभावः अयमेव सांप्रदायिकः भावः एकैव व्यक्तिर्वाचिकाकत्वादिकंतुध्वनिनिष्ठं ध्वनिविशेषव्यंग्यंवा साच

कथपुनरिति। यदिनिमित्तवशात् प्रवर्त्तते ततस्ताल्वादिष्वपिप्रवर्त्तिष्यतइतिप्रश्नः। अस्पंदत्पनेने
ति। सत्यपिनिमित्ते रूढिवशान्मुखएववर्त्ततेनताल्वादिष्वित्यर्थः। कृत्यल्युटइतिकरणेण्यत्। असन
मत्रजातिस्फोटपक्षेऽभिव्यक्तिर्व्यक्तिस्फोटपक्षेतूत्पत्तिः। अन्नमेतदिति। आङ्पूर्वात्स्पंदतेरन्येष्वपिदृ
श्यतइतिडः एतदास्यंकर्म अन्नंकर्तृ आस्पंदतेद्रवीकरोति। अन्नप्रक्षेपेणमुखस्यद्रवत्वोपादानात्। अथ
कःप्रयत्नइति। किंप्रयतनमथप्रारंभोयत्नस्येतिप्रश्नः। भावसाधनइति। भावेऽभिधेयेनङ्प्रत्ययः क्रिय
तेतेननशब्दस्येहभावः साधनंभवति॥

नित्येतिव्यक्तिस्फोटवादस्तदाभिव्यक्तिः स्पष्टैव। बहुवचनंत्वेकस्यैवबहुरूपत्वादारोपितबहुत्वमादायनेयंव्यक्तयो
नंताजत्यश्च। तत्रजातिरेवशक्तेतिजातिस्फोटवादस्तदानुत्पत्तिरित्यर्थः। अन्येष्वपीति दृशिग्रहणाद्धात्वंतरादपिसइति
भावः। ननुसाधनशब्देनकारकशक्तिरभिधीयतइतिभावस्यसाधनत्वमनुपपन्नमतआह। भावेनङ्इतियजयाचयतेत्पनेन॥ १२५

ननुतुल्यास्यप्रयत्नमात्रेयेषांजनकावित्यर्थेनासिकास्थान ञमङणादिनिवृत्त्यर्थमास्योपादानंस्यादतआह।
नासिकापीति। एवंचास्यग्रहणेकृतेपितध्यावृत्तेर्दुरुपपादेतिभावः वस्तुतस्तु अवधारणगर्भसमासे ह्रस्वाको
रादिभिर्ह्रस्वाकारादीनांसावर्ण्यानापत्तिः सज्जनकवायुसंयोगानामपितुल्यत्वात्। अवधारणागर्भसमासेत्वनु
नासिकव्यावृत्तिरपिदुरुपपादेवेतिभाष्याशयः। एवंचनासिकायाबाह्यत्वेपिनक्षतिः अत एव मुखनासिकेतिसूत्रे
मुखंचनासिकाचेतिमुखद्वितीयानासिकेतिचविग्रहप्रदर्शनंभाष्ये। नह्यवयवावयविविषयेएवंप्रयोगः सचेतसां।

किमास्योपादानइति। सवर्णनामास्यएवनिष्पाद्यादितिभावः नासिकापिनवाह्याववर्णोत्पत्तिनिमि
त्तंकिंतर्ह्यास्यांतश्चर्मवितत मस्तियणवच्चर्मवत्तत्संबद्धारेखानासिकातस्यांवाद्वन्निघाताद्वर्णो
त्पत्तिः विसर्जनीयस्यैकीयमतेनौरस्यत्वात्सावर्ण्याभावेपिनदोषः॥

सहस्तोदेवदत्तइत्यादौविद्यमानवाचीसहशब्दः अत एव वचनोनुनासिकइतीयत्युच्यमानेकचटपानामेव
प्रसज्येतितेस्वाप्येवशब्दः संगच्छते अन्यथायमादीनांचमुखवचनात्वात्तदसंगतिः स्पष्टैवआस्यान
तर्गतत्वेतुनदोषः मुखमात्रवचनत्वाभावात् प्रासादवासि ङादीनां न्यायप्रदर्शकभाष्येणापिध्वनितमेतत्। कै
यटोक्तास्यांतर्गतत्वपक्षेतुसूत्रेमुखपदंमुखावयवपरं ब्राह्मणवसिष्ठन्यायेनचनासिकातिरिक्तावयवग्रहणंएवकारोप्यर्थः दृष्टांतोप्येकांशेनबोध्यइति॥ ॥

कै०वि०१ नन्वेवमपि विसर्जनीयस्याश्वत्थे तत्स्यादत आह। विसर्जनीयस्येति। ततश्चान्येषां कंठादिस्थान एवेति भावः
१२६ उरस्यमतेप्याह। सावर्ण्यं त्वा वेपीति। ननु इदानीमेव किं नोच्यते तत आह। नास्येति। द्वंद्वे प्रयत्नस्यास्येनाविशेष
णादित्यस्योपयोगश्चिंत्य। अत्रेति। एतद्वर्णसमूहसाध्यप्रत्याहारे इत्यर्थः। ककर्अन्नंतस्माज्ज्ञाग ककर्जतः।
आस्येइति। देवविशेषणवैयर्थ्याभिप्रायेण प्रश्न इति भावः। न च नासिकाया आस्यान्तर्गतत्वपक्षे तद्व्यावृत्त

वक्ष्यतीति। नास्य परीक्षावसर इत्यर्थः। सवर्णसंज्ञायामिति। द्वंद्वे प्रयत्नस्यास्येनाविशेषणात् मुखप्रय
त्नयोस्तुल्यत्वाद्भिन्नस्थानानामपि प्रसंगः। षाष्ठे शकारः प्रत्याहारपाटवशात् पठितः। अत्र प्र
त्याहारे जबगडदशानां प्राप्नोतीत्यर्थः। शकारस्य तु विवृतत्वात् स्पर्शानां स्पृष्टत्वादप्रसंग एव ततकगर्ज
इत्यादौ झरो झरीति लोपप्रसंगः। एवमपीति। आस्ये येषां तुल्यो देश इत्यास्येन देशो विशेष्यते तत्र व्यभि
चाराभावादास्येन देशस्य विशेषणमनुपपन्नमित्यर्थः॥
येदेशविशेषणमावश्यकमिति वाच्यं। अनुनासिकाकारादौ कवादिषु वाय्वभिघातादभिव्यक्तेषु वर्णेषु नासिका
भिघाते नानुनासिक्यं धर्म उत्पद्यत इत्यनुस्वरेन दृढिरादेश्च तस्यात् भेदकत्वात् गुणस्येति वाच्यं आनुनासिक्यसं १२६
ग्रहार्थं तद्यथैकोयमात्मेत्यादिभाष्यकैयटात्तथैवलाभेनच तेषु नासिकापादेशत्वाभावस्य उक्तत्वात्। आ
दिष्वपि तथैवोत्पत्तिमानात् देशपदेन ताल्वादिस्थानमेवोच्यते इति जबगडादिषु न दोषः॥ ॥

भाष्ये। प्रयत्नविशेषणमिति देशप्रयत्नमिति द्वंद्वस्तु सौत्रत्वात्साधुरिति भावः। स्पृष्टेत्यादि। अस्यांतर्गततत्तत्स्था
नेषु तिकागादीनां वर्णाभिव्यक्तिजनकस्य शेषितस्पृष्टदूरावस्थान समीपावस्थानरूपाभ्यंतरकार्यकारिप्रयत्नविशे
षा एतैः पदैरुच्यंते तेषां चास्य वृत्तित्वमास्यांतर्गततत्तत्स्थानेषु वायुसंयोगजनकत्वेनेति बोध्यं। आस्येइत्य

प्रयत्नविशेषणमिति। तस्य संभवव्यभिचारसत्त्वादित्यर्थः। बाह्यप्रयत्नमुदासाद्युत्वार आभ्यंतरागृह्य
ते स्पृष्टेषत्स्पृष्टताविवृततासंवृतताख्याः। बाह्यंह्यास्यादिति। दुपजं तु स्थानमवर्णस्येक इच्छंति। सति
च बाह्यदेशसंभवे तद्व्यवच्छेदायास्येन देशो विशेष्यत इति प्रश्नः। सर्वमुखेति। अवर्णस्योत्पत्तौ सर्वमेव मु
खं व्याप्रियत इति नास्य बाह्यस्थानता। एवमपीति। अवर्णस्यास्यमेव देशो न त्वास्ये देशः। व्यप
देशिवद्भावेनेति। सर्वविस्यायुक्तमास्यशब्देनोच्यते देशशब्देन तु विशिष्टो वा वर्णोत्पादनहेतुः तत्र
बुद्धिकृतभेदाश्रयेण व्यपदेशः॥
स्य यत्कार्यं तज्जनक इति शेषो वा भाष्ये। नेहापिता इति। सवर्णसंज्ञा स्वनिमित्तत्वेन बाह्यान्प्रयत्नान् जहातीति तयाते
स्वनिमित्तत्वं हापिता तात्पर्यः। विवारसंवारौ कंठविलस्य विकाससंकोचौ। विवृतः कंठो यैः श्वासो नुप्रदीयते यैरित्यर्थः। एके।
उक्तवाक्ययोः प्रथमोपात्ताः नादो वर्णोत्पत्त्यनंतरभावी अनुरणनरूपशब्दः यथा तृतीया इत्यनेन तेषामल्पप्राणत्वं बोधितं॥ ॥

कौ०वि०१
१२७ देशविशेषणमप्यास्यग्रहणमावश्यकमिति गूढाशयेनाह भाष्ये। आनुनासिक्यमेषामधिको गुण इति॥ अयं भावः
अत्र देशपदेन ताल्वादिस्थानमुच्यते। स्थानशब्देन योगरूढ्या वर्णाभिव्यक्तिजनकवायुसंयोगानुयोगिताल्वा
द्युच्यते॥ तत्र यद्यपि। अकारादीनां गुणमात्रजनिका नासिका स्वरूपस्य कण्ठादिभिरेवाभिव्यक्तिसिद्धेस्तथापि
ञादीनां स्वरूपस्य न केवलताल्वादिनापि केवलनासिकयाभिव्यक्तिरिति विनिर्गमनाविरहादुभयावच्छिन्नवायुसं
योगस्यैव तज्जनकत्वात्तेषां नासिकापि स्थानं। न चैवं त्वं करोषीत्यादौ चरितार्थपरसवर्णशास्त्रं संयंतेत्यादौ न प्र
वर्त्तते। उक्तरीत्या ञादीनां नासिकास्थानत्वाभावेन स्थानतआंतर्याभावादिति वाच्यं स्थानेंतरतम इति सप्तम्यं
तपाठस्य दूषितत्वेनास्याः युक्तेर्गर्त्तस्त्वात्। अनुनासिकाकारादीनामपि सास्थानमिति त्वयुक्तमेव। एवं हि उत्पाद
कसामग्रीभेदात्कङयोरिव स्वरूपभेदस्यैवापत्तौ अभेदकगुणपक्षेपि निरनुनासिकस्यानुनासिकग्रहणानां
पत्तिः एवं च यावत्स्थानसाम्ये सवर्णसंज्ञेति सिद्धांते नासिकारूपदेशाभेदात्कङादीनामप्राप्तसावर्ण्यसि
द्धये आस्येन देशविशेषणमावश्यकं नासिकाया आस्यांतर्गतत्वेपि मुखनासिकेति सूत्रे नासिकातिरिक्ताव
यवकमुखस्यैव ग्रहणेन तत्साहचर्यादत्राप्यास्यपदेन तादृशस्यैव ग्रहणं बोध्यं॥ अन्यथा त्रस्थानेण त १२७

त्कयन वैयर्थ्यापत्तिः आस्यग्रहणं व्यावर्त्यानां सावर्ण्यानुपयुक्तानां प्रदर्शनमेव ह्यत्र प्रक्रांतं। न चेदं प्र
जुडु २ यत्नविशेषणास्य ग्रहणव्यावर्त्यमेवास्त। अनुनासिकयकारादीनां आदिभिः सावर्ण्यं च व्यावर्त्यं तत्फलं
च तं वृतें नमती त्यादौ अनुस्वारस्य ययीत्यनेन यकारलकारयोरनुनासिकयोरभावइति वाच्यं। अनुस्वार
स्य नासिकास्थानत्वेन स्थानतातरतमयोर्जनयोरेव प्रवृत्तेः अनुनासिकयादीनां तु उक्तरीत्या न नासिका
स्थानमित्यदोषात्। इदमेव ध्वनयितुं गुण इत्युक्तं गुणपदेन च सावर्ण्यानुपयोगिनआंतरतम्यपरीक्षोप
योगिनो विचारा दयन्त्यंते। एवं च तत्सादृश्यादत्रापि गुणशब्दप्रयोगः अत एव बाह्यप्रयत्नानुपक्रम्या
मोन नासिकानन्हाविति शिक्षायामुक्तं। अत एवोदात्तादिभिः सहैकादश बाह्यप्रयत्ना इति कैयटो वक्ष्य
ति। उदात्तादीनामपि वृद्धिसंज्ञासूत्रदोषे गुणत्वेन व्यवहारात्॥ अत एव एवमप्यवर्णस्य संज्ञान प्राप्नोति
बाह्यं ह्यास्यात्स्थानमवर्णस्यैव मपि व्यपदेशो न प्रकल्प्यते आस्ये येषां तुल्यो देश इति भाष्यं स्वरतः संगच्छते
अन्यथा प्रयत्नविशेषणमात्रस्योक्ते देशविशेषणत्वाभावेन तदसंगतिः स्पष्टैव॥ आस्येन देशविशेषणाभावान्न दो
ष इत्येव वक्तव्ये सर्वमुखेत्यादिसमाधानस्यापि निर्दजत्वापत्तिश्च। एके इत्यनेन सर्वमतं तत्तु कंठस्थानमिति ध्वनयति॥

व्यवहितस्येति। यद्यपि रूढिर्योगापहारिणी तथा प्यास्यपदोपादानसामर्थ्याद्व्यवहितस्यापि ग्रहणमिति भावः।
ताल्वादीति। शिक्षायां तेन रूपेणैव वर्णस्थानत्वकल्पनादिति भावः एतेन ताल्वादिषूर्ध्वाधरभागभेदात्तादीनां उ
सवर्णसंज्ञा न प्राप्नोतीत्यपास्तं आस्यपदशब्देन तद्रूपाछिन्नस्यैव ग्रहणेनादोषात् ननु प्रयत्नपदेनैव त
द्ग्रहणसिद्धिरत आह। जिह्वाया अग्रेत्यादि। प्रत्येकं त्विति। प्रत्येकनिरूपितसादृश्यग्रहणनिरासार्थमित्यर्थः

नहीति। प्राथमकल्पिकमित्यर्थः। यौगिकस्य तु व्यवहितस्य ग्रहणं। स्थानमिति। ताल्वादि। करणमिति।
स्पृष्टतादि जिह्वाया अग्रोपाग्रमध्यमूलानि वा। यद्येवं प्रयत्नग्रहणं न कर्त्तव्यं। तस्याप्यास्ये भवत्वादा
स्यग्रहणेन ग्रहणात्। सत्यमेतत्। प्रत्येकं तु व्यापारनिरासार्थमुभयोरुपादानं। तेन द्वयोस्तुल्य
त्वे सवर्णसंज्ञा भवति। अविशेषितद्विति। आस्येनेत्यर्थः। द्वंद्वपक्ष एवात्र क्लिते इति प्रश्नः। ततश्च बा
ह्याः प्रयत्ना न त्यक्ताः स्युः॥ ॥

यद्यपि ज्ञापकेनापि प्रत्येकव्यापारनिरासः सुकरस्तथापि यावदास्यभवैक्य विवक्षायां ह्रस्वदीर्घयोः सा
वर्ण्यानापत्तिः तत्तज्जनकवायुसंयोगानामतुल्यत्वात् अतः प्रयत्नपदमास्यपदेन स्थानमात्रग्रहणार्थं स्थानं करणं चेति भा १२८
ष्यकरणपदेन वायुसंयोगोपि। प्रयत्नग्रहणाच्चुनातिप्रसंग इति तात्पर्यं अत एव यावत्स्थानैक्यपरेण नैतौ तुल्यस्थानाविति भाष्येण न वि
रोध इति दिक्॥ ॥

भाष्ये। प्रारंभो यत्नस्येति। अत्र यत्नस्येति निर्धारणे षष्ठी जातौ चैकवचनं। आरंभ इति कर्मणि घञ् यत्नानां मध्ये
प्रथमं वर्णोत्पत्तेः पूर्वमारभ्यमाण इत्यर्थः। अत्रापि नासिकाया अग्रहणमुपपादितरीत्यैवेति बोध्यं। शब्दप्र
योगेछयोत्पन्नयत्नान्नाभिप्रदेशात्प्रेरितो वायुर्वेगात् मूर्द्धपर्यंतं गत्वा ततः प्रतिनिवृत्तो यत्नविशेषसहायेन तत्तत्स्थानेषु
जिह्वाग्रादिस्पर्शपूर्वकं तत्तत्स्थानान्याहत्य वर्णानभिव्यनक्ति ततो यत्नविशेषसहायेन परावृत्तिसमये गलविवरादी
नां विकासान् करोति। तत्र येन तत्तत्स्थानाभिघातः कायत्नास्ते आस्यांतर्गततत्तत्कार्यकारित्वादास्येप्रयत्ना इत्युच्य
ते। अभ्यंतरा इति प्रारंभ इति च। गलविवरादिविकासकराश्चास्यबहिर्भूतदेशकार्यकरत्वाद्बाह्या इति। एवं मात्रा

प्रारंभो यत्नस्येति। तत्र पूर्वं स्पृष्टतादयश्चत्वारः पश्चान्मूर्द्धनि प्रतिहते निवृत्ते प्राणाख्ये वायौ विवारादयो बाह्या एका
देशप्रयत्ना उत्पद्यंते। एवमपीति। संध्यक्षरेषु प्रथमभागस्याकारेण सादृश्यात्सवर्णसंज्ञाप्राप्तिरिति प्रश्नः॥ ॥

कालिकत्वादिकमपि वा ध्वल्पत्वकृतामिति नाभिप्रदेशात्प्रेरकयत्न एव कश्चिद्विलक्षणोल्पवायुं प्रेरयति कश्चि
दधिकमिति तस्य यत्नस्य वायुप्रेरणारूपं कार्यमास्यबाह्यदेशमिति तस्यापि व्यावृत्तिरास्यपदेनोक्ता अद्भुत एत
त्रे भाष्ये मूर्ध्नि प्रतिहते वर्णोत्पत्तेः पूर्वं स्पृष्टतादयः पश्चान्निवृत्ते प्राणे ख्ये इत्यन्वयः के यट। अत एव सोदीर्णो मूर्ध्न्यभि
हतो वक्त्रमापद्य मारुतः वर्णान् जनयतइति शिक्षया न विरोध इति दिक्। भाष्ये यदि प्रारंभ इत्यत्र यदीत्यस्य यद्यपीत्यर्थः। अकारे
णेति न तश्चवश्च सवर्णकारस्य तत्र सत्वेन तत्प्रागतुल्यस्थानत्वेनावर्णेङो ःसावर्ण्यमगम्यमित्यत्रेयस्येति लोप्रप्रसंग इत्यभिमानः॥

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारकम्

कै०वि०१ पांसूदकेति। श्लिष्टावित्यस्य ष्टकर्षेणाश्लिष्टौ मिलितावित्यर्थः ततश्च तदननुस्वेन केवलताल्वादिस्थानकत्वेन
१२८ तयोः सावर्ण्यप्राप्तिरिति भावः। विभागो त्रेति। एवं च पच तयोः सावर्ण्यप्राप्नोत्येवेत्यर्थः भाष्य एतदुत्तरं। वि
वृततरावर्णाविति। एवं च तदाकारतयोरपि विवृततरत्वेन प्रयत्नभेदाद्धस्वेन न सावर्ण्यं आकारस्य ततोपि वि
वृततरत्वात्तेनाप्यनयोर्न सावर्ण्यं फलाभावश्चेति भावः। एतयोरेवेति। यत्किंचित्स्थानसाम्ये सवर्णसंज्ञेत्य
भिमानः क्वचित्। अदसोसेर्दादुदोमइत्यादौ भाष्ये नैतौ तुल्यस्थानाविति तोलीतिपरसवर्णरहित

श्लिष्टावर्णाविति। नात्र भाग विवेकोस्ति पांसूदकवदित्यर्थः। अवर्णस्येति। विभागोत्र सुलक्ष इ
तिप्रश्नः। ततश्च नाव्यमितियस्येति लोपप्रसंगः। एतयोरिति। ततश्च एतऐ इत्यौकारोपि स्यात्
भाव्यमानस्यापि क्वचित्सवर्णग्रहणदर्शनात्॥

तद्धानासामितिनिर्देशात् यत्स्थानसाम्यमत्र विवक्षितमिति भावः यत्त्वेषां समुदितं स्थानमिति तन्न दं
त्योष्ठ्यो वस्मृतो बुधैः एऐ तु कंठतालव्याविति शिक्षायां प्रत्येकं तत्र भवइत्यधिकारस्य यदनापत्तेः दंतोष्ठ्य इति
पावस्त्व संगतः शरीरावयवसमुदायस्य शरीरावयवत्वाभावात् स्वांगसमुदायस्य स्वांगत्वाभावयत् स्वजन
कवायुसंयोगावच्छेदककंगस्वाधारत्वमारोप्य कंठे भवइत्याद्युपपत्तिः शरीरमेवं वेदनेत्यप्येवमेवेतादिक् ॥॥ १२८

उदात्तादीनांतर्हीति। पावस्ताने कृत्वतया वत्प्रयत्नेक्यविवक्षणादिति भावः स्वराश्चाउदात्तादि गुणाः एवं चात्र प्रयत्नशब्देनोदात्तादीनां न ग्रह
णमिति भावः भाष्ये उदात्तादीनां सवर्णसंज्ञान प्राप्नोतीत्यस्य आस्यप्रयत्नो विशेषितइत्यस्यन्नसमाध्यंतरमाहेकदेशी अथवा किंमएतेनेति।
नोस्माकमेतेनप्रारंभोयत्नस्येत्यर्थकप्रतिपेग्रहणश्रयणेनो किंमित्यर्थः क्लिष्टत्वादिति भावः बाह्यप्रयत्नभेदेपीति एवमुदात्तादिभेदेपि भविष्य

अभेदकाइति। लिंङ्गेन प्रतिपादितं न शास्त्रे एतेस्वराशेपादानमंतरेण कार्येषु भिद्यंतइति तेन प्रारंभभेदेष्वुदात्तादीनां मिथः स
वर्णसंज्ञा भविष्यति। यत्समानमिति। स्पृष्टत्वस्य समानत्वाद्वर्णानां बाह्यप्रयत्नभेदेपि सवर्णसंज्ञा भविष्यति। किंसतीति
। पृष्टताद्यभेदाद्विवारादिभेदेपि यथा भवति तथा स्पृष्टतादिभेदेपि विवारादिभेदान्नप्राप्नोतीतिप्रश्नः। सत्येवेति। ऋरो
ऋरीत्येवान्यथाभ्रूयात्। यथासंख्यनिरासार्थं हितत्र सवर्णकृताग्रिएढीत्यस्य ड कारस्य ढकारे परे लोपार्थं॥ ॥

ती। त्वपि बोध्यं यद्यपि सवर्णसंज्ञायामान प्रयत्नभेदगर्भत्वं तथापि ज्ञापकादेतदर्थसिद्धिरित्याह। ऋरोऋरीति॥ भाष्ये स
त्येव हि भेदे इति यत्किंचित्प्रयत्नभेदे सत्येवेत्यर्थः कुत एतदिति सूत्राक्षरैस्तदलाभ इति प्रश्नः समाधत्ते भेदाधिष्ठानाही
तियत्किंचित् प्रयत्नभेदेत्यर्थः॥

तत्र ज्ञापकमाह·यदि हीति सवर्णसंज्ञावचनमित्यस्य सवर्णपदोच्चारणमित्यर्थः संज्ञात्वऌदित्सवर्णस्येत्याद्यर्थमावश्यिके
ति बोध्यं·भेदादिति॥ बाह्यप्रयत्नभेदादित्यर्थः नन्वेवं यत्किंचित्स्थानैक्यादिकारौकारयोः सावर्ण्यापत्तिरिति चेन्न ज्ञापकात्प्रय
त्नांशे यावत्प्रयत्नसमत्वत्यागेपि स्थानांशे तत्यागे मानाभावइत्याशयात् यजुष्येकेषामित्यादिनिर्देशैः स्थानांशे
यावत्स्थानं तुल्यत्वविवक्षाणा च यत्तु तुल्यत्वस्य भेदघटितत्वात्सवर्णसंज्ञाभेदाधिष्ठानेत्यर्थ इति तत्तेन साव

यदि च यत्र सर्वसमानं तत्रैव सवर्णसंज्ञा स्यात् डकारढकारयोर्भेदात्सवर्णत्वं नास्तीति सवर्णग्रहणमनर्थकं स्या
त्सर्वमिति। वर्गाणां प्रथमद्वितीया इत्यस्यां शिक्षायां पठितं। अघोषत्वादिकरणं तु भिन्नं वर्णानां स्पृष्टत्वादि ग्रहणं विष्ट
तत्वात्सति च सवर्णत्वे निष्ठ्यूतनिष्टुरं निस्थानमिति फरोफरीति लोपः प्राप्नोति छन्नोनिष्क्रांतमिति प्रादिसमासः
।अनचि चेति शकारस्य द्विर्वचनम्॥

र्णानियामकप्रयत्नयोः स्थानयोश्च परस्परं भेदलाभेपि वर्णानां यत्किंचित्प्रयत्नभेदस्य ततो लाभात् स्थानानामंततस्तत्काल १३०
रूपोपाधिभेदेन भेदा बोध्याः भाष्ये यदि तर्हि सतिभेदे इत्यादि सिद्धांतिवचः शकारछकारयोरिति तस्मात्प्रारंभो यत्नस्येति आ
वश्यकमिति भावः ननु निरछन्नेत्यत्र हलः परत्वाभावात्कथं लोपप्राप्तिरत आह अनचि चेति॥ श्री ॥

तत्रैकदेशी श्रौढ्या समाधानमाह एवं तर्हीत्यादि स्वांगवाच्येवेति। अम्र्धेत्यादिषु पर्युदासादिवस्वांगेलब्धे स्वांगादिति पुनः श्रुति
रवधारणार्थेति भावः संज्ञाया मित्यनुवृत्तेर्न दोष इत्यन्ये नन्वेवं भिन्नस्थानामपि स्यादत आह। तद्धितांतास्येति आस्यपदोपादान
सामर्थ्याद् तद्ग्रह इति भावः। एकत्वं विवक्ष्यते इति तद्विवक्षां विनापि प्रत्यासत्या प्रयत्नयोरेकास्यभवत्वत्रित्वलाभ इत्यन्ये॥ त्रि
पद बहुव्रीहौ सप्तम्यंतस्य पूर्वनिपातापत्तेः पूर्वपदार्थप्रधानतत्पुरुषस्याप्यगतित्वाद्भाष्येतृतीयआश्रितः। रे फो

तुल्यआस्य इत्ति। तद्धितांत आस्यशब्देन स्वांगवाच्येवेत्यभई मस्तकादित्युक्तं भवति तद्धितांतास्यशब्दाश्रयणसा
मर्थ्यादास्य इत्येकत्वं विवक्ष्यते तेनैकस्मिन्नेव स्थाने ययोस्तुल्यः प्रयत्न इत्याश्रीयते। अथ वेति। मयूरव्यंसकादित्वा
त्सप्तम्यंतोत्तरपदस्तत्पुरुषः। तस्येति। यत्तदोर्नित्यासंबंधादाह यो यस्येति। अन्यथा वर्णांतरापेक्षयातुल्यास्य
प्रयत्नत्वेन सवर्णत्वे ल्वधेतदाश्रयमन्यस्यापि कार्यं प्राप्नोति सत्रारं भस्त्व रेफश्रणं व्याहृत्यर्थः स्यात्॥ तस्या
वचनमिति। तस्येत्ययमनुकरणशब्दः। तस्येत्यस्यावचनमित्यर्थः॥

ब्येति। रेषोष्मणां सवर्णा न संतीत्युक्तेरिति भावः॥ तस्यावचनमिति वात्ति के तच्छब्देनास्य परामर्शे तित आ
ह। तस्येत्ययमिति। तस्यावचनमित्यत्र षष्ठीतत्पुरुष इति भावः एवं चस्योन विभक्तिरिति लुगभावः
वस्तुतस्तच्छब्देन पूर्वोक्तस्य तस्यशब्दस्य परामर्श इति वक्तुं युक्तं॥ ॥

कै॰ वि॰ १ रेफस्यापीति। रेफोष्मणामित्येतद्विजातीयसवर्णाभावप्रतिपादनपरमित्यर्थः तत्र रेफांशे तुल्यास्यप्रयत्नासंभव
१३१ सु एवं ष्मतुना ऊलाविति निषेधादिति बोध्यं एवंच व्यावर्त्याभावेन सावर्ण्यसंज्ञावचनसामर्थ्यात् यस्य तस्येति ल
क्ष्यतइति भावः ननु सवर्णइति संज्ञाशब्दस्य कथं संबंधिशब्दत्वमत आह। तुल्यास्येत्यादि स्वार्थभिन्नप्रतियो

सवर्णसंज्ञावचनमिति। ननु रेफोष्मनिवृत्त्यर्थं वचनं रेफस्यापि रेफः सवर्णोस्त्वत्येव एवमू
ष्मसु द्रष्टव्यं। एवंच न सामर्थ्याद्दोषपरिहृत्य शाब्दन्यायेन परिहर्तुमाह ॥ संबंधिशब्दैरिति सं
बंधिशब्दाविति। तुल्यास्यप्रयत्नशब्दस्य संबंधिशब्दत्वात् समानार्थोपि प्रदेशेषु पातः सवर्णशब्दः
संबंधिशब्दः यथा तुल्याय कन्या दातव्येत्युक्ते न शम्भ्रद्रेण तुल्याय ब्राह्मणः कन्यां ददाति। अपित्वात्म
नात्तथे हायोत्पर्थः ॥ ॥

गिकसंबंधनिमित्तशाब्दः संबंधिशब्दइति भावः परंतु अत्र सूत्रे द्वंद्वनिर्देशात्तयोतुल्यास्यतुल्यप्रयत्नशब्दावित्य
वेक्षाप्यस्य सवर्णशब्दोहि प्रदेशेपि सवर्णपदवत्परोन तुल्यास्यप्रयत्नत्वप्रवृत्तिनिमित्तकइति तस्य संबंधिशा १३१
ब्दत्वं दुरुपपादमुभुपक्रमोपसंहाराभ्यां चेवमेवोचितं उपक्रमे हि तुल्यास्यं च तुल्यप्रयत्नं च सवर्णसंज्ञं भवतीत्युक्तमित्याहुः ॥

ऋकारऌकारयोरित्यत्र ऋत्यक इति प्रकृति भावः वार्त्तिकेप्येवमेव पाठइति प्राणिकाः सावर्ण्यप्रतियोग्यनिर्देशादा
ह। अत्र चेति। भाष्ये होतृऌकारः होतृकार इति ऌकारशब्दो देवतावाचीत्येके। विवृतस्य ऌदीर्घस्याभावाद्दकोरो दी
र्घउदाहृतइति बोध्यं। नैतदस्तीति। सवर्णसंज्ञायाइति शेषः नन्वाष त्स्पृष्टेन मुक्तेपि विवृतदीर्घः सवर्णसंज्ञां विनादु

ऋकारऌकारयोरिति स्यान्नेदान्नप्राप्नोतीत्याशंक्य अत्र चानयोरेव प्रकृतत्वान्मिथः सवर्णसंज्ञा विज्ञायते
नत्वेतयोरन्येन सहेति बोद्धव्यं। वक्ष्यत्येतदिति। तत्र ऌवावचनमित्यत्र दीर्घइत्यनुवर्त्तते। तत्र ऌवि ऌ
प्राप्ते विकल्पिते अप्राप्तएव पक्षे दीर्घो भविष्यति। सच भवन ऌवर्णस्य दीर्घाभावाद्वर्णस्यान्तरतमो दीर्घ
ऋकारो भविष्यति। तत्सवर्णइति। यद्यपि विधाय सवर्णसंज्ञां तदुच्यते। अग्मात्रस्य ऌनि तत्कार्यं स्यात्। द
ध्नृकारो मध्नृकारइति ॥ तस्माद्विधेया सवर्णसंज्ञा ॥ ॥ ७ ॥ ॥

र्त्तितोत आह। तत्रेति। भाष्ये तद्वचनद्वयारंभेपि सवर्णसंज्ञावश्यकीत्याह। तत्सवर्णैरिति। अग्मात्रस्येति। अचव्याप्त्यर्थं अ
कइति वर्त्तते। सवर्णसंज्ञाभावात्सवर्णइति नानुवर्त्ततइति भावः। खंडयति। पदेतदिति। भाष्ये। सवर्णइतीति आद्यवार्त्तिकं गम्लृ ऌकारेवोत
रवार्त्तिकं न प्रवर्त्तते। एवंइति दीर्घस्य ऋकारे पूर्वस्य तस्यैव ऌकारे उत्तरस्य चाप्रवृत्तिस्ततएवेति भावः ॥ ॥

कै०वि०१ रूपद्वयमिति। ईषत्स्पृष्टघटितं विवृतदीर्घघटितं चेति भावः। तत्रासंहितायामिति। समासे संहिता नित्या। असमासे
१३२ त्वीदृशं रूपं दुर्लभं होतृशब्दस्य विभक्तिश्रवणापत्तेः होतृशब्दस्य नपुंसके संबुद्धौ रूपमित्यप्यतिक्लिष्टमिति चिन्त्यम्। भाष्ये
तु ऌकार इति दीर्घ ॠ त्रियोग्यदर्शी ऌ ज्ञापकम्। इति स्थिते इति शेषः एवं शाकले होतृ ऌकार इत्यपि चिन्त्यं सवर्णत्वविधायक

ॠत इति वक्ष्यामि। ॠकारस्य ॠकार एव सवर्ण इति भत्येव भविष्यति। ततः ऌति ॠत इत्येव दृष्ट्वा सवर्णार्थितेन ऌतिरूपद्वयं सिद्धं तत्रासंहितायामृकारे होतृ ॠकार इति रूपं। संहितायामपि ॠत्यक इति शाकल प्रकृतिभाव एतदेव रूपं। शाकलाभावे तु होतृकारो होतॄकार इति रूपद्वयं। ऌकारे। असंहितायां संहितायां च शाकले होतृ ऌकार इति। शाकलाभावे तु होऌकारो होतॄकार इति। तन्न वक्तव्यमिति द्वरमध्ये तौ दीर्घौ ॠ ॡ इति तत्र ॠकारे कदाचित् ॠ इति दीर्घः कदाचित् ॠ ऌकारेपि ॠ ॡ इत्येतौ भविष्यतः सत्यां सवर्णसंज्ञायामिति भावः नचेति। अर्द्धतृतीयमात्रत्वादिति केचिदाहुः अन्ये त्वीषत्स्पृष्टकरणत्वादनयोर्ॠकार ऌकारयोश्च विवृतत्वात्तयोरग्रहणं न दोषः त्वमाहुः॥
वचनाभावे एतद्विचारसत्त्वेन तत्र ॠत्यक इत्यस्याप्राप्तेः इको सवर्ण इत्यपि न समास इति नित्यसिद्धं। नित्यग्रहणं तु तत्र भाष्ये प्रत्याख्यातमित्याहुः सवर्णसंज्ञावचनेनैकेनैव सिद्धे तद्द्वयं न कार्यमित्याह भाष्ये। तन्न वक्तव्यमिति। इतर आह। अवश्यमिति। अर्धतृतीयेति ता- १३२
वतापि स्थानप्रयत्नसाम्येन ताभ्यां ग्रहणं स्यादित्यरुचेराह। ईषत्स्पृष्टेति। विवृतत्वाभावेनपास्थितरेफीयप्रयत्नत्यागे मानाभावादिति भावः ताभ्यामिति असावर्ण्यादिति भावः॥

वचनद्वयप्रत्याख्यानवादी आह। ॠकारस्येत्यादि। सत्य भेद इति अयोगवाहेषु पाठात् इति भावः। नाच्कार्यमिति तस्य प्लुतसंज्ञा तत्स्थाने प्लुतश्चेति भावः अत्र पक्षेपि व्यवस्थित विभाषया ह्रस्व ॠकारद्वयस्थानिक दीर्घैकादेशातिरिक्त विषये आद्यस्य ह्रस्व ॠकार ऌकारद्वयस्थानिक दीर्घैकादेशातिरिक्त विषये द्वितीयस्य न साधुत्व

अन्वं वक्ष्यामीति सत्यं वत्वे दीर्घसंज्ञा तयोर्भविष्यति येषां तु दर्शनमर्द्धतृतीयमात्रावेताविति तेषां मते सत्यपि त्वे द्विमात्रत्वाभावादेतयोर्दीर्घसंज्ञा न प्राप्नोति। तस्माद्द्विमात्रावेवैतावभ्युपगंतव्यौ तच्चावश्यमिति। तथापि ॠवावचनं ऌवावचनेनानुवर्तात्वमनयोर्वक्तव्यं। अन्यथा हि विधानमात्रमेतयोः स्यात् न तत्कार्यं प्लुतः सवित्वं भेताभ्यां त्रिमात्रयोरपि सावर्ण्याग्रहणे सति प्लुतसंज्ञा भवतीति प्लुतासिद्धिः। किं पुनरिति एकैकस्मिन् संहितायां शाकलाभावपक्षे रूपद्वयं साध्यं तच्चोभयथापि सिध्यति तत्र सवर्णसंज्ञायामसत्यां यथापि ध्यति तत्र सवर्णसंज्ञायामसत्यां यथा सिध्यति तथा पूर्वमेवोक्तं सत्यां तु यथा सिध्यति तथोच्यते। इह द्वयोः ॠकारयो रेफद्वययुक्तत्वाद्विवृतत्वाच्च कदाचिद्रेफद्वययुक्त ॠकारो भवति कदाचिदकारांतरतम ॠकारः कदाचिल्ॡकारान्तरमऌकार इति साम्यमुभयोः पक्षयोः॥
मिति नातिप्रसंगः पक्षयोस्तु भ्यफलता चेति बोध्यं। तदेव धनयन्। पृच्छति भाष्ये। किं पुनरत्रेति। ॠकार इति विवृत इत्यर्थः ऌकार इति ईषत्स्पृष्ट इत्यर्थः भाष्ये दीर्घत्वं चैव हीति। ईषत्स्पृष्टविवृतरूपो दीर्घवर्ण इत्यर्थः च वा ... अपि चेत्यादि नाखद्व ऌकार इति होतृऌकार इत्यस्याप्युपलक्षणं॥

कै०वि०१
१३३ वचनस्य क्वाप्यदर्शनादाह। व्याख्यास्यामीति। अन्येतु लण्सूत्रस्यात्कारस्यानुनासिकत्वे। तोल्लांतस्येत्यत्र लग
वान्याणिनिर्लकारं नोच्चारयेत् प्रत्याहारेणैव निर्वाहात् तस्माद्पूर्ववचनं कार्यमित्येव भाष्याशयं उचितद्वित्याहुः।
आंतरेति। रऋतेरपरः लऋतेर्लपरइत्यर्थः सवर्णसंज्ञावादीदतःभाववादिनंप्रतितेवाप्यावश्यकंतदित्याह। तच्चा

ल्लपरत्वमिति। व्याख्यास्यामीत्यर्थः रपरइत्यन्नरइतिनकाद्राकारेणप्रत्याहार आश्रीयते तत्रांतरतम्या
दृकारस्याणपरोस्तवतिल्लकारस्यलपरः असत्यामिति। असत्यांचवर्णसंज्ञायांनुरण्पुरइत्यत्रल्रकारस्य
हणंकर्त्तव्यंज्ञापयतेप्रक्रुध्यमानमितिकृत्यइतिणत्वप्रसंगः। निनिश्चेति पूर्वस्मादयविशेषः पूर्वत्रश
रव्यवहृतोपिषकारः साक्षाणत्वनिमित्तत्वात्। व्यवधायकत्वेननाश्रीयतेइहततस्यानुपादानमेववर्णै
कदेशादिति। अवयवस्यव्यापारानिवर्त्तनात्। अग्रहणपक्षेतुकृत्न्त्रादेरांकृतिगणत्वाभावः शदि
तांल्रदितांचभेदेनानुबंधनिर्देशात्भेदेनचोपादानादनुबंधकार्येषुपरस्परग्रहणाभावाद्यतिकाराभावः॥

वश्यमितिल्लकारस्याण्रलपरइत्येतत्। साक्षादिति। रषाभ्यामितिवचनादित्यर्थः नन्वत्रलकाराभावइत्यतआह। भाष्ये।
वर्णैकदेशाइत्यादि। अग्रहणपक्षेलिति। प्रल्हीयमानमित्यत्रचेतिभावः आद्येकृत्यचइतिद्वितीयेत्तवर्णान्तस्येतिप्राप्तिः। भेदेनेति ओ १३३
एगम्लइतिभेदेनानुबंधनिर्देशः नाग्लोपिशास्वृदितापुषादिद्युताद्यृल्रदितइतिचभेदेनोपादानमित्यर्थः॥ ॥

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्यस्यस्मारकम्

नास्सलौ॥ अकारेत्यादि। एवंचहरिरित्यादौदीर्घःप्राप्नामित्यादौपणप्तिभावः अत एवेति पूर्वसवर्णदीर्घानिर्देशादित्यर्थः किंचैवं
सतिआकः सवर्णेइतिकृरिसवर्णेइत्यस्यासंगतिरित्यपिबोध्यं भेदाधिष्ठानत्वादित्यनेनैहितुल्यास्यप्रयत्नत्वासंभवइतिभावः।
ए सवर्णग्रहणेनेतिभाष्येसवर्णग्राहकेणएउदित्सत्रेणेत्यर्थः अत्रहिसत्रेइतिउच्चारितस्यैवप्रत्यायकत्वमत्रत्यपूर्वपक्षीनजानातिप्रत्या

नाज्झलौ॥ ॥अकारहकारयोरिकारशकारयोश्चतुल्यस्थानप्रयत्नत्वात्सवर्णसंज्ञाप्राप्ताप्रतिषिध्यते अतएवनिर्दे
शाद्चावाःश्भिर्हलांहल्भिःसवर्णत्वानिषेधः अझ्झलेरितिप्रकृतत्वात्सवर्णसंज्ञायाइतिबोद्धव्यं। शकारप्रतिषेधइ
तिद्विवचनात्तस्यसमासोभेदाधिष्ठानत्वात्सवर्णसंज्ञायाःइकारइति। अत्रहिसत्रेःजीतिकारोगृह्यमाणःसवर्णग्रह्णाती
तिशकारस्यापिग्रहणमस्तिस्वात्मनिक्रियाविरोधादत्रैवसंत्रेइदंनव्याप्रियतइतिसवर्णत्वनिषेधइकारशकारयो
नस्तियस्येति चेत्पादौतुशकारईकारेणनगृह्यते अनेनसवर्णत्वनिषेधात् इह तुस्वात्मनिव्यापारोनास्तिअस्तिच
पूर्वेणसवर्णत्वमिकारशकारयोरितिभावः॥
हारेषुजातिग्रहणमितिचनजानाति। ननुत्पत्निसवर्णत्वेइकारःशाकारंगृह्णीयात् तदेवचननाज्झलावितिनिषेधादतआह। स्वात्म
नीति। यद्यपिस्वाध्यायोध्येतव्यइत्यात्मानमपिविषयीकरोतीति एकस्यविषयत्वविषयित्वयोर्नविरोधस्तथाप्येतद्वाक्यार्थबोधोत्तरमत्रनि
षेधेपिस्ववाक्यार्थबोधात्प्राक्स्वघरकपदार्थोपस्थितिविलायांस्ववाक्यार्थबोधेकूपसावर्ण्यभावज्ञानाभावान्नानेनेकारशकारयोस्तद
भावबोधनमितिभावः॥

कौ॰वि॰२ अपवादस्यैवासंपत्त्येति। अपवादस्यनाज्झलावित्यस्यासंपत्त्यांप्राक् बोधाभावेनन्वस्वविषयेऽप्रवृत्तेततघटकपदोयस्थित्योरिकारआकारयोर्नापवादविषयत्वमित्यर्थः बहुलेतिमयूरव्यंसकादित्वात्सुप्सुपेतिवासमासइत्युचितं। ननुकथंआस्यद्वित्वं

१३४ ।अचिनेतिशरोचीतिवानिषेधापत्तेरतआह। शरोचीति। ननुप्रयत्नभेदेनान्त्वेत्सूत्रेमेवव्यर्थस्यादतआह। सूत्रेति॥भा

ष्यकव्यवायवादविषयमितिन्यायोन्ननास्ति। अपवादत्वस्यैवासंपत्त्यापदआत्रातानीति शतिशतान्यराणिआतादधिकानीत्यर्थः कर्तृकरणेइतिभावप्रकृताबहुलमितिबहुलवचनात्समासः पारस्कारादित्वात् सुडागमः सकारस्यश्चुत्वमनचिचेतिद्विर्वचनंझरोझरीतिलोपाप्रसंगात्त्रिशकारश्रवणप्रसंगः शरोऽचिअनचिचेत्यत्रत्विकारेणआकारोन्गृह्यते अनेनसवर्णत्वनिषेधाद्दिनिस्तिप्रकारस्यद्विर्वचनं। स्तिरूमनचत्वादितिसूत्रप्रत्याख्यानसाधारणमुक्तं प्रयत्नभेदादझल्लोः सवर्णसंज्ञायाः प्राप्तिरेवनास्तीत्यर्थः॥

घ्येईषदित्येति। एंङे चोः परस्परसावर्ण्याभावायविवृततव्याप्यानामपिसवर्णसंज्ञानियामकत्वस्यतत्रमतेप्यावश्यकत्वेनतदाश्रित्यसत्त्वानारंभएवज्यायात् किंचदीर्घप्लुताकारहकारयोःसावर्ण्यव्यावृत्तयेइदमपितस्यावश्यकमितिभावः॥ १३४

वाक्यापरिसमाप्तेर्वेति। अन्यथानाज्झलावित्यस्यनिषेधस्यस्वस्मिन्नपिप्रवृत्तौतवपूर्वपक्षस्यैवानुत्थानंस्यादितिभावः अनिष्पादमुपपादयति अस्मिन्हीति। सूत्रे। निष्पन्नेइति। जनितवाक्यार्थबोधेइत्यर्थः प्रवर्त्ततेइति। एतेपरस्परंसवर्णसंज्ञाइतिप्रमारूपंनिश्चयज्ञानंनिष्पद्यतइत्यर्थः। तदेवचलक्ष्यसंस्कारकमितिभावः। निष्पत्त्यवस्थायां। वाक्यार्थबोधावस्थायांसवर्णत्वेषुनिष्पन्नेषुतत्रसवर्णत्वनिष्पत्तिरिष्टविषयेसवर्ण

वाक्येतिन्नवतुवातुल्यास्यप्रयत्नत्वंतथापिइहहेकारणशाकारोनगृह्यतेसवर्णसंज्ञायाः। अस्मिन्सूत्रेऽनिष्पादात्। अस्मिन्सूत्रेनिष्पन्नेसत्यपवादविषयपरिहारेणेष्टविषयेसवर्णसंज्ञाप्रवर्त्ततेनत्वेतत्सूत्रनिष्पत्त्यवस्थायांततश्चउपदेशोत्संज्ञाप्रत्याहारसवर्णत्वेषुनिष्पन्नेष्वणुदित्सवर्णस्येत्येतदस्यज्ञावित्यादिषुप्रवर्त्ततेनत्वंगेषूपदेशादिषुनापिस्वात्मनि॥

पदवाच्यत्वग्रहः नापिस्वात्मनीतिनिष्पत्तेरितिभावः। अंगानिष्पत्त्या। अंगस्येष्टविषयसवर्णपदवाच्यत्वज्ञानस्यानिष्पत्त्या। भाष्योतोवत्। प्रथमं। उपदेशोत्तरकालेतिज्ञातस्यसंज्ञाविधानादितिभावः प्रत्याहारोत्तरकालासवर्णसंज्ञेत्यादेरिष्टविषयेसवर्णसंज्ञासंज्ञित्वग्रहणंतदुत्तरकालमणुदित्येतदकारादिभिःस्वसवर्णत्वेनज्ञातानांग्रहणंबोधयतिइत्यर्थः अपरिसमाप्तिश्चसवर्णनिर्णयाविनाततग्रहणबोधनासामर्थ्यमित्यर्थः तज्जन्येशक्तिग्रहेबाधकसंभावनादिनाप्रामाण्यसंभावनासत्वादितितात्पर्यं॥

कै०वि०१
१३५

यत्तु नाज्झलावित्यतः प्राक् तुल्यास्येत्यस्य बोधाभावेन सवर्णपदार्थज्ञानाभावात् अणुदिदित्यस्य वाक्यार्थबोध
इत्यर्थ इति। तन्न। अत्राव ज्ञाने प्रतियोगिज्ञानस्याकारणतया तुल्यास्येत्यतः प्राक् निषेधवाक्यार्थाभावेन तद्विप
रीतामित्यदोषादितिदिक्॥ सिद्धमिति अत्रत्याच्यदार्थोपस्थितिकाले वाक्यार्थबोधरूप सावर्ण्याभावज्ञानाभावा
दिकारशाकारयोः सवर्णत्वज्ञानेप्यणुदित्सूत्रजन्यस्वेष्टविषयेवाक्यार्थबोधरूपशक्तिग्रहस्याभावान्नेकारेणा
त्रशाकारग्रहणमितिभावः नन्वाक्यपरिसमाप्तिन्यायस्यास्मदादीन्प्रतिप्रवृत्तत्वेपिपाणिनेस्तत्तच्छास्त्रप्र

ततस्त्वात्रांगानिष्पत्याऽणुदित्सवर्णस्याप्रवर्तनमितीकारेणशाकारस्याग्रहणात्सवर्णत्वंशाकारयोः सिद्धं॥

णयनान्यथानुपपत्या तत्तद्विषयज्ञानस्यप्रागपिसत्वावश्यकत्वेनज्ञानस्यैतच्छास्त्रासाध्यत्वेन च नाज्झलावित्या
दौसवर्णाभिप्रायेण प्रयोगः स्यात् अस्मदादीनांबोधस्तु तत्तात्पर्यज्ञत्या स्यात् परंपरयाजक्षणयाप्तविष्यतीतिशा
कारयोः प्रतिषेधः एवमकारयोरपीतिचेन्न। ज्ञानसत्वेपितदभिप्रायेणप्रयोगेतात्पर्यग्राहकाभावात्। करिष्यमाणसं
ज्ञाद्यभिप्रायेणपाणिनिव्यवहाराभावस्यैवप्रतिपादनाच्च। अतएव हलंत्यसूत्रेइतरेतराश्रयमाशंक्य एकशेषेणसमाद्दिवभा १३५
ष्येऽन्यथापाणिनिनाहल्पदार्थस्यज्ञातत्वेनतस्यान्योन्याश्रयभावात्तेनतदभिप्रायेणप्रयोगेबोद्धबोधस्यजक्षणयैवोपपत्तौ ता
त्पर्यतिधावनमनर्थकंस्यात्। ममतुपाणिनेस्तथाव्यवहाराभावान्नदोषः॥ ॥

उक्तार्थज्ञापकमप्युपपन्नस्यादिति। एवमीकारोपीति। अत्रपक्षेदीर्घप्लुताकाराभ्यांहकारेसावर्ण्येवारणंतुप्रश्लेषा
द्बोध्यं। तत्रतात्पर्यग्राहकावेलास्त्वित्यादिनिर्देशाः प्रागुक्तं साध्यंचेतिबोध्यं। प्रदर्शनायबोधनायसाध्ये। यदे

एवमीकारोप्यत्रेकारेणनगृह्यतइतीकारशाकारयोः सवर्णत्वमस्तीतिकुमारीशेतइत्यत्रसवर्णदी
र्घत्वंप्राप्तंअचीत्यनुवृत्त्यानिवार्यते। तत्रक्वग्रहणकशास्त्रंप्रवर्तते। क्वनेतिविषयविभागंप्रदर्श
नायचोद्यंकरोति। यथैवतर्हीति। इकारस्यत्वत्राग्राहकत्वंदृष्टमितिअकःसवर्णेदीर्घइत्यत्रापिप्राप्त
मितिप्रश्नः। अनन्त्वमेववाक्यापरिसमाप्त्यासाध्यतेनतुप्रयत्नभेदेनेत्याह। अपरआहेति। अस्मि
न्पक्षइति। एकत्रहिसाध्योहेतुविकल्पोभवतिइहतुसाध्यभेदः सिद्धेरनत्वंहेतुरनत्वस्यावाक्याप
रिसमाप्तिः एतच्चेति। अस्त्ववाग्रहणमिकारेणशाकारस्येतिवाक्यशेषाध्याहारात्। प्रतिज्ञाविक
ल्पार्थोवाशब्दइत्यर्थः नन्वचेति। प्रकृतिकृतंभेदमभ्युपगम्योच्यते॥

तदिति। तद्बोधवेलायांवाक्यपरिसमाप्तेरितिभावः एकत्रेतितुल्यार्थानांविकल्पइतिन्यायादित्यर्थः। माबाभूदित्येतत्सूचित
प्रतिज्ञायाआशयमाह। अस्त्ववेति। नन्वयंजनपरस्यैकस्यानेकस्यवानोच्चारणेविशेषइतिन्यायात्कथंभेदइत्यतआह। प्रकृतिकृतमिति॥॥

कै॰ वि॰ १ भाष्येऽसति लोपे त्रिशाकारमिति वदन् प्रष्टव्यः किं द्विशाकारं न स्यादिति तदाशयं जानन् त्रिशाकारं स्यादिति आद्ये
१३६ आह । असत्यपीति द्विशाकारं त्वनवत्वेवेत्यर्थः द्वितीये आह । एवमपीति विभाषा द्विर्वचनेपीत्यर्थः एवमपीत्यनेन
भेद एवेत्युक्ता तदुपपादनावसरे यदि लोपो न स्यादिति वाच्यं किमुच्यते नित्यो लोपः स्यादिति अतः स्थित्वापि

स एष कथं भेदो नेत्यत्रैव छेदः भेद एवेत्यर्थः इतर आह स्याद्भेदो यदि नित्यो लोपः स्यात् । विभा
षा तु स लोप इति ततो नास्ति भेद इत्यर्थः द्विर्वचनमपि विभाषा परोऽनुनासिकेऽनुनासिको वेत्यनुवर्त्त
नाल्लोपोपि विभाषा ङयो ह्रोऽन्यतरस्यामित्यतोऽन्यतरस्यामित्यनुवर्त्तनादित्यर्थः ॥ ॥ इति श्रीम
द्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमाऽध्यायस्य प्रथमे पादे चतुर्थमाह्निकम् ॥ ॥

न्न कर्तृकत्वेन योजयति । स एष इति त्रिशाकारमिष्टमेवेति तात्पर्यात् संमोह इति इदं टात्तिरीत्या । भाष्यरीत्या
तु वावसान इत्यत इति बोध्यं ॥ ॥१०॥ ॥ञ॥ ॥ इति शिवभट्टसुतसतीगर्भजनागेशभ १३६
ट्टकृते भाष्यप्रदीपोद्योते प्रथमाऽध्यायस्य प्रथमे पादे चतुर्थमाह्निकं समाप्तम् ॥ ॥ञ॥ ॥

इदूदेद्द्विवचनं प्रगृह्यं ॥ ॥ व्यक्तिपक्षे ईदूतोस्तपरयोरुपादानं भिन्नकालनिवृत्तये वा गुणांतरयुक्तग्रह
णाय वा स्यात् तत्र नाद्य इत्याह । ईदूतोरिति । एवं चाणुदित्सवर्णस्य प्राप्त्यभावात् न तद्बाधकतपरसूत्रप्रवृत्ते
येत परत्वमित्यर्थः तपरसूत्रेऽण्ग्रहणाननुवृत्त्या तस्य प्राप्तावपि फलाभावान्न द्वितीय इत्याह । उदात्ता
दीनामिति ननु जातिपक्षे भिन्नकालनिवृत्त्यर्थं स्यात्तत्पक्षे हि तपरसूत्रं नियमार्थमेवेत्यत आह । जातीति ।

इदूदेद्द्विवचनं प्रगृह्यं ॥ ॥ किमर्थमिति ईदूतोस्तपरत्वाद्भिन्नकालनिवृत्त्यर्थं नोपपद्यते उदात्तादीनाम
भेदकत्वात् । गुणांतरभिन्नानां सवर्णानां ग्रहणार्थमपि नोपपद्यते जातिपक्षे दीर्घोच्चारणात् प्रयत्नाधि
क्यात् ह्रस्वानां न भविष्यति प्लुतानां चेष्यत एवेति दुष्टव्याघातं प्रत्युत तपरत्वं करोतीति प्रश्नः । तपर इति ।
व्यक्तिपक्षे भेदकाश्च गुणा इति भावः । केषामिति । प्लुतानामग्रहणप्रसंगात्प्रश्नः । उदात्तेति । कश्चिदनुनासि
कग्रहणमप्यस्ति तद्गुणप्रसंगे नोच्चारितं । नहि प्रगृह्योऽनुनासिकः संभवति । अणोऽप्रगृह्यस्यानुना
सिक इति निषेधात् । प्लुतानां त्विति । व्यक्तिपक्षाश्रयणादयं दोषो न तु तपरत्वात् ॥

प्लुतानां चेष्यत एवेति । एतच्चाग्रे भाष्य एव स्फुटं । दुष्टव्याघातमिति जातिपक्षे ईदूदंशोपि तपरत्वेनैव प्लुतव्यावृत्ति
रित्यभिमानः । भेदकाश्च गुणा इति भेदकत्वात्स्वरस्येति वार्त्तिकोक्ते अण्विषये भेदकपक्षोप्यस्तीत्यभिमानः इदं प्रयोजन
मीदूतोरेव न त्वेदंशे अणुदित्सूत्रे णैव सिद्धेः ननु तत्कालसवर्णसंग्रहार्थं तपरत्वमुक्तं नात त्काल व्यावृत्त्यर्थं तत्कुतः प्लु
तानां न प्राप्नोतीत्यत आह ॥ व्यक्तिपक्षेति । इदूदंशादिदम् । एदंशे तु तपरत्वादेव दोष इति बोध्यं ॥ ॥

ननु इति शब्दादिसमभिव्याहारे कार्यार्थं प्रगृह्यसंज्ञा प्रवर्तते रंतरंगत्वात् पूर्वं प्लुते तेन स्थानिनो निवृत्तत्वेन प्लुतासिद्ध
त्वेपि कथं स्थान्याश्रया प्रगृह्यसंज्ञेत्यत आह। शास्त्रेति। प्रवर्तेपि शास्त्रे। सिद्धवत्वेन तत्प्रवृत्तिबुध्यभावेन प्लुतबुध्य
भावाद्द्विमात्रविषयबुद्धेस्त्रिमात्रे सत्वात् द्विमात्रबुध्या त्रिमात्रस्य संज्ञेत्यर्थः एतेन शास्त्रासिद्धत्वात् शास्त्राप्रवृ
त्तौ स्थानिनः प्रगृह्यत्वेपि पुनः प्लुते तस्य तन्न स्यात् न वस्त्वानिवर्त्त्वं। अनच् विधाविति निषेधात् प्लुतस्याजवृत्ति

असिद्ध इति। शास्त्रासिध्याश्रयणाच्च प्लुतबुध्यावसत्यां प्रगृह्यत्वे विधीयमाने द्विमात्रविषया बुद्धिः
प्रवर्तते। तथा हि वक्ष्यति। असिद्धवचनमुत्सर्गलक्षणभावार्थमादेशलक्षणप्रतिषेधार्थं चेति। यद्यु
मिति। असिद्धत्वे प्लुतः प्रकृत्येत्येवमाश्रयणायोगात् कार्यित्वेनाश्रयणात् असिद्धत्वाभावोनुमीयते।
सामान्येन च स्वरसंधिप्रकरणाविषयासिद्धत्वं ज्ञाप्यते न तु प्रकृतिभाव एव यथा रोरुत्व एव सोत्सर्ग
सापवादं प्रकरणमिति प्रकृतिभावेपि प्रगृह्यत्वहेतुके सिद्धत्वमुच्यते॥ ॥

धर्मत्वात् एवं चागच्छत मग्नीद्इत्यादावणो प्रगृह्यस्येत्यनुनासिकः स्यादित्यपास्तं ननु प्राधान्यात्कार्यासिद्धत्व
मेव स्यादत आह॥ तथा हीति। उत्सर्गः। स्थानी। सामान्येनेति तदुत्सर्गेपीत्यर्थः॥ ननु प्रकृतिभावो न स्वरसं
धिप्रकरणस्थस्तत्राह॥ सोत्सर्गमिति॥ तदुत्सर्गनिरूपिताऽपवादत्वस्याऽत्रापि सत्वेनेदमपि तत्प्र
करणस्थमेवेति भावः प्रगृह्यत्वहेतुके प्रकृतिभावेपीत्यन्वयः॥ ॥छ॥ ॥ॐ नमः शिवाय॥ ॥ १२७

प्रकृतिभाव एवेति प्लुतप्रकृतिभावद्इत्यर्थः भाष्ये एतस्येत्यस्य स्वरसंधिप्रकरणाविषयत्वेन ज्ञापनस्येत्यर्थः। कार्यार्थत्वादिति।
तदेकवाक्यतापन्नसंज्ञासूत्रं तत्प्रकरणस्थमिति भावः। प्रतिषिद्ध इति। अप्लुतवद्भावेन बाधित इत्यर्थः भाष्ये। प्रगृह्यप्लुत
प्रतिषेधेति प्रगृह्याश्रये प्रकृतिभावे प्लुतप्रतिषेधप्रसंग इत्यर्थः प्रगृह्याश्रयस्यापि कुतो न निवृत्तिरित्यत आह। अन्येनेति।

किमेतस्येति। प्रकृतिभाव एवाश्रयणात् सिद्धत्वमस्त्विति प्रश्नः। इतरो लाघवं दर्शयति। अप्लुतादिति। सिद्धे हि प्लु
ते अतीति तपरत्वादेवोत्वाप्रसंगः। किमत इति। यथोद्देशे संज्ञापरिभाषे प्रगृह्यसंज्ञा स्वरसंधिप्रकरणमध्य
पतिता न भवतीति प्रश्नः॥ कार्यकालमिति। कार्यार्थत्वाद्गुणानां कार्यस्य प्राधान्यात् प्रधानदेशत्वस्य न्याय्य
त्वादित्यर्थः। उपस्थिते हीति। उपस्थितमनार्ष इतिकरणः अग्नी इतीत्यत्र प्लुताश्रये प्रकृतिभावद्इष्यते तदाह
पठिष्यतीति। यत्र प्रगृह्यसंज्ञा नास्ति स प्लुताश्रयप्रकृतिभावप्रतिषेधविषयः। देवदत्ता३ इति देवदत्तेति।
यदि पुनरिति। ननु व्यक्तिपक्षाश्रयणात् प्लुतानां न सिध्यति न पुनस्तपरत्वात्। अयमत्राशयः। आकृति
पक्ष आश्रयिष्यते दीर्घोच्चारणाद्यप्रयत्नाधिक्याद्ध्रस्वानां न भविष्यति प्लुतानां तु प्रवर्त्तिष्यत इति॥ ॥

प्रगृह्यः प्रकृत्येत्यनेनेत्यर्थः ननु ईदृशेपि विषये प्रगृह्याश्रय प्रकृतिभावे सति प्लुताश्रय प्रकृतिभावप्रतिषेधो प्लुतवदि
ति बोधितो व्यर्थ इत्यत आह। यत्रेति। न पुनस्तपरत्वादिति। यद्यप्यतिभाष्ये दीर्घाणां वोच्यमानात् प्लुतानां न प्राप्नोतीति। प्लुतानां त्विति।
तपरत्वाभावे इत्यर्थः तपरत्वे तु तपरसूत्रस्य जातिपक्षेनएपि नियमार्थत्वान्न स्यादिति भावः। ईत्वादि। इत्वाद्यनतिरिक्तं मन्यते॥ ॥

आकृतिरिति। विनाव्यक्त्युच्चारणं जातिनिर्देशाभावादवश्यंव्यक्त्युच्चारणीयायांलाघवाय ह्रस्व एव प्रयोक्तव्ये गुरुर्दीर्घोच्चारणे न तत्व्यक्तेरूपलक्षणत्वं विहाय विशेषणत्वस्यैवाश्रयणाद्विशिष्टव्यक्तिस्थैव जातिर्गृह्यत इति न्यूनकालव्यक्तिगताया इवाधिककालव्यक्तिगताया अपि न ग्रहणमिति भावः भिन्नव्याप्यजातिस्वीकारे तु निर्दिष्टव्याप्यजातेः प्लुतेऽभाव एवेत्यपि बोध्यं। एत्व जातेस्तु प्लु

एवमपीति। अयंभावः। आकृतिपक्षे यथा ह्रस्वानां यत्नाधिक्यान्न भवति। तथा दीर्घोच्चारणसामर्थ्या
द्विशिष्टव्यक्तिस्थैवाकृतिर्गृह्यत इति प्लुतानां न स्यात्। यथा स्थूलं गायमानयेत्युक्ते न कृशस्यानयनं भ
वतीत्याकृतिपक्षेपि विशिष्टैव दीर्घाव्यक्तिर्गृह्यत इति। तथा चानत्वादी इतौ ग्राहकौ न स्यातां। यदिपु
नरिति। ह्रस्वासाहचर्यादिकारोपि ह्रस्वशब्देनाभिधीयत इति ह्रस्वानामिति बहुवचनः तत्र ह्रस्व
निर्देशोऽयत्वादाकृतिपक्षे यत्नाधिक्याभावाद्भिन्नकालानां ग्रहणं सिध्यतीत्यर्थः॥ ॥

तेसत्वात् तेन प्लुतग्रहणं भवत्येव। ततो लघुव्यक्तेरभावाच्च। नन्वेवं भाष्येन चूत्वादिति हेतुरसंगतोत आह। आकृतिपक्षेपीति। ई
दृशो विषये तत्तदित्वादिजातिविशिष्टव्यक्तिरेव गृह्यत इत्यर्थः। जातिप्राधान्येफलाभावात् व्यक्तिद्वाराकार्यसंबंधाश्रयणे गौरवाच्च तस्या युक्तत्वाच्च।
तद्विशिष्टव्यक्तिग्रहणे अणत्वाभावान्नतो ग्राहकाविति भावः। भाष्ये। तस्माद्दीर्घाणामेव तपराणामिति। गुणांतरयुक्तसंग्रहाय संदेहाय चेत्यर्थः॥ ॥ १३८

कर्मधारयभ्रमं व्युदस्यति। प्लुतोभावीति। यद्यप्याश्रयासिद्धत्वेनापि सिध्यति। तथापि शास्त्रबाधापेक्षयालक्षणाश्रयणमुचित
मिति भाष्याभिप्रायः। प्रकृत इति प्लुतशब्देन बोधित इत्यर्थः। बुध्येति शास्त्रीये कार्येऽसिद्धत्वं न चायं व्यवहारः शास्त्रीयं कार्यमिति
भावः। कार्यकालपक्षमाश्रित्येति अयंभावः तत्र पक्षे संज्ञाशास्त्राणां न पृथक्बोधकत्वं पूर्वत्रासिद्धमिति चातिदेशः कार्यार्थः का
र्यज्ञानं च वाक्यार्थबोधोत्तरमिति यद्देशवाक्यार्थबोधस्तद्देशस्थत्वमेव तस्य। किंच। पूर्वत्रासिद्धमित्यस्याधिकारत्वेन पूर्वत्रेदम

प्लुतभावीति। प्लुतोभावी यस्य स प्लुतभावी स्थानी प्रकृतः तस्यैव प्रकृतिभावः। ननु प्लुतस्यासिद्धत्वात्स्थान्यपि
प्लुतभावित्वात्प्लुतव्यपदेशं कथं लभते। नैषदोषः। प्लुतोस्य भावीति बुद्ध्या प्रकल्पनमेतत्। न च तत्र प्लु
तस्यासिद्धत्वं। अन्यथा प्लुतोऽसिद्ध इत्ययमपि व्यवहारो न स्यात् कार्यकालपक्षमाश्रित्याह। एवमपीति।
ततश्चाग्नी इत्यत्राप्रगृह्यस्येत्यनुनासिकप्रतिषेधे क्रियमाणे प्लुतस्यासिद्धत्वात्प्रगृह्यत्वाभावाद
नुनासिकः स्यात्॥ ॥

सिद्धमिति तदर्थः तत्र कार्यकालपक्षे तत्तद्देशोपस्थितसंज्ञापरिभाषाणामप्यसिद्धत्वबोधनं एवं च प्लुतदृष्ट्याऽनुनासिक
विधेरसिद्धत्वेन देकवाक्यतापन्नस्यापि तद्दृष्ट्यासिद्धत्वेन प्लुतशास्त्रे नुवृत्तपूर्वत्रासिद्धमित्यत्र त्वपूर्वग्रहणेन अदसोमादि
त्यस्य ग्रहीतुमशक्यत्वमिति यथोद्देशे तु स्वातंत्र्येण संज्ञादीनां कार्यबोधकत्वात्तत्प्रति प्लुतासिद्धत्वबोधनं शक्यमेव। एतेन कार्यका
लपक्षेपि पाठकृतपूर्वत्वाभावतिरित्यपास्तं। भाष्ये। यत्सिद्धे प्रगृह्येति प्लुते सिद्धकांडस्येयत्प्रगृह्यकार्यमित्यर्थः यत्प्रगृह्यकार्यं दृष्ट्या प्लुतः सि
द्धस्यादिति यावत्॥ ॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

कै०वि०१
१३९

यथोद्देशेति। नन्वत्र पक्षेऽग्नी इत्यादौ प्लुतस्यासिद्धत्वेन ततः प्रागेव प्लुताभावपक्षे नुनासिकप्रतिबंधेन फलवत्यां संज्ञायां ततः प्लुते तद्विमात्रत्वेन पश्यंत्या अपि संज्ञायाः पुनः प्रवृत्तौ बीजाभावात् अल्विधित्वेन स्थानिवत्वाभावाच्च प्रगृह्यत्वेनानुनासिकः स्यादिति चेन्न। संज्ञायाः कार्यार्थतया पुनः प्रवृत्तौ कार्यसिद्धिरूपबीजसत्वेन पुनस्तस्याः सुलभ

यथोद्देशपक्षाश्रयेणायं परिहारः। कथं पुनरयं पक्षः यावता कार्यार्थत्वात् संज्ञापरिभाषयस्य कार्यकालतैव न्याय्या। नैष दोषः। यदानुद्दिश्य प्रयोजनविशेषं प्रयोजनमात्रमपि संधाय न विष्यति किंचिदनेन प्रयोजनमिति संज्ञापरिभाषं प्रणीयते तदा संभवत्येवायं पक्षो यथाश्रुतग्राहि प्रतिपत्रपेक्षः। महावाक्यार्थपर्यालोचनप्रवृत्त प्रतिपत्रपेक्षस्तु कार्यकालपक्षः। कथं पुनरिति। ईदादयो यदि संज्ञिनः तद्विशेषणं तु द्विवचनं तदा द्विवचनांतत्वमीदादीनां न संभवतीति द्विवचनानामेवेदादीनां संज्ञायां प्राप्त्यां। अथ द्विवचनं संज्ञि तद्विशेषणमीदादयः तदा तदंतविधिरप्रधानेन प्रधानस्येतीदाद्यंतं द्विवचनमिति पक्षः। अत्र उभयोरपि पक्षयोर्दोषदर्शनात् प्रश्नः॥

त्वात्॥ एतदेव ध्वनयता प्लुतस्यासिद्धत्वात्तत्कालाएवन्नवंतीत्येवकारः प्रयुक्तः प्लुतात्प्राक् संज्ञायां च तत्कालाएवेति तदर्थं इत्यलम्॥ प्रणीयते। बोध्यते। ईदादय इति। प्रांचम्यादस सोमादित्यनेनैकरूप्याच्चेतिभावः। तदेति। अंतराद्वोवयवचनस्तदंतस्येति बहुव्रीहिरित्यर्थः। अथेति संज्ञाया आनंतर्याद्येन विधिरित्यस्यानुग्रहाच्चेतिभावः॥ ॥ १३९

भाष्ये। तस्येति द्विवचनांतस्य वर्णस्येत्यर्थः। गौणस्येति। जघन्यत्वसामान्यात् लाक्षणिकमपि गौणपदेन गृह्यत इति भावः। प्रथमोपस्थितेतीत्यरित्यागेन एकारांतोदाहरणदानेबीजमाह। ईदूतोरिति। नाश्रितमिति वार्त्तिक

पचेते इति। एकारोत्र द्विवचनं न भवत्यपितु तस्यांतः वचनादिति। द्विवचनावयवे द्विवचनशब्दो वर्त्तिष्यत इत्यर्थः। अस्तीति। मुख्ये संभवति गौणस्य ग्रहणमन्याय्यमित्यर्थः। खट्वे इति। अंतादिवदित्यादिवद्भावादेकारो द्विवचनं। एकस्येति। असहायस्येत्यर्थः। ईदूतोः केवलयोरेव संभव इति वचनसामर्थ्यात्तयोरेव सिध्यति। एकारांतस्य तु द्विवचनस्य पचेते इत्यादौ संभवात्। खट्वे इत्यत्र न सिध्यतीति दोषः। येन विधिस्तदंतस्येत्यत्र स्वस्य रूपस्येति नाश्रितमिति दोषोपन्यासः। अथवेति। प्रत्ययग्रहणे यस्मादिति द्विवचनेन तदंतविधिः पश्चाद्द्विवचनांतमीदादिभिर्विशेष्यत इत्ययं तृतीयः पक्षो भवति ईदाद्यंतं यत् द्विवचनांतमिति। ननु संज्ञाविधौ प्रत्ययग्रहणे तदंतविध्यभावः सुप्तिङंतमित्यंतग्रहणेन ज्ञापित इति। कथमेतत्पक्षोपपत्तिं चतुर्थपक्षप्रतिक्षेपाय वक्ष्यत्येवैतद्भाष्यकार इति नेदमपूर्वं चोद्यं॥ ॥

कृतेति शेषः॥ तदंतविधिरिति अस्मादेव वचनाच्छब्दस्वरूपं विशेष्यमादायेति भावः॥ इत्ययं तृतीयः पक्ष इति व्यपदेशिवद्भावानाश्रयणमस्य बीज॥ ॥ ॐ श्रीमन्महात्रिपुरसौंदर्यै नमः॥ ॥

तदंतविध्यभावोत्रनोक्त इति। ईदादिभिः श्रूयमाणत्वेन द्विवचनविशेषणमेवन्याय्यमित्येतत्पक्षासंभवरूपो दोषो नोक्त इ
त्यपि बोध्यं। आदेशेनेति। एकार्थयुष्मदादेर्विहितेन तवकाद्यादेशेनेत्यर्थः। प्रकृतिभावेनेति अन्यथानुपपद्यमानेनेत्यर्थः
एवं हि सिद्धांते प्रगृह्यत्वाभावेन द्वित्वव्यंजकाभावादस्य प्रयोगस्यासाधुत्वापत्तिरसाधुप्रयोगे च भगवतो भ्रंशयतापत्ति

दोषांतरेणेदं पक्षं निराकर्तुमाह। लुकि प्रतिषेध इति। दोषसद्भावेनैवास्य पक्षस्य निराकरणात्तदंत
विध्यभावोत्र नोक्तः। कुमार्यगारमिति। कथं पुनरत्र द्विवचनांतस्य समासः यावता वृत्तौ संख्यावि
शेषो न गम्यते। नैष दोषः। यथा तावकीन इत्यादौ आदेशेन संख्याविशेषो व्यज्यते तथेहापि स
त्यां प्रगृह्यसंज्ञायां प्रकृतिभावेन द्वित्वं व्यज्येतेति दोषोपन्यासः॥ सप्तम्यामिति। इदूतौ सप्तमीत्ये
व तदंतविधौ सति प्रत्ययलक्षणेन सोमो गौरी अधिश्रित इत्यादौ सिद्धायां प्रगृह्यसंज्ञायामर्थग्रहणं ज्ञा
पयति प्रगृह्यसंज्ञाप्रकरणे प्रत्ययलक्षणं न भवतीति। तत्तर्हीति। आद्यंतवद्भावानाश्रयणाय तृतीयः
पक्षः परिगृहीतः तत्र दोषप्रतिविधानार्थमधिकमर्थग्रहणं ज्ञापकार्थं कर्तव्यं भवतीति सुतरां गौरवं भवतीत्यर्थः॥

एतः पूर्वं पदार्थतावच्छेदकरूपेणैव बोधो न तु संख्यावत्त्वेनेत्येव भाष्यसंमतं अतो वृत्तौ संख्यानवगमे
प्यनेकार्थप्रतीत्या तथाविधे बाधकाभाव इति बोध्यं॥ सुतरामिति। अकरणात्करणं गुरु तस्य च ज्ञापक
त्वेनाश्रयणमिति सुतरां गौरवमित्यर्थः। ईदादिभिरिति भाष्ये कृतेन संबंधो न्याय्य इति भावः॥ ॥ १४०

साक्षात्। द्विवचनमनपेक्ष्य। समुदायस्य प्रत्ययांतस्य। नन्वत्र पक्षे न द्विवचने नेदादि विशेष्यत इति कथमीदादिर्द्विवचन

ईदादिभिरिति। अत्र पक्षे कुमार्यगारमित्यत्राप्रसंगः नह्यत्र ईदूदेदंतं द्विवचनं किं तर्हि औ अस्तीति
सकारांतं। तदंतमिति। द्विवचनांतमित्यर्थः। ईदाद्यंतमिति। ईदादिभिः साक्षात्समुदायस्य संबंधासंभ
वादीदादिशब्देनेदाद्यंतमुच्यते तेनेदाद्यंतांतमित्यर्थः। श्री ज्ञात्वेति। श्रीशब्दात् द्विवचनमौ
तस्य नपुंसकाच्चेति शीभावः ततः क्त्वाप्रत्ययः शीशब्दस्य सुप इति लुक्। अस्य चावितीत्वं तद्द्विवांतत्वात्सु
स्तस्यान्ययत्वाद् लुक्। तत्र शीशब्द ईकारांतं द्विवचनं तदंतश्च समुदायः प्रत्ययलक्षणेनेति प्रगृह्यसं
ज्ञा प्राप्नोति॥ अत्र हीदादि द्विवचनमिति। ईदादिशब्देनेदाद्यंतमुच्यते। कश्चित्तु पाठः ईदाद्यंतं च श्रू
यत इति। तत्रैवं व्याख्येयं। ईदाद्यंतं च श्रूयते सूत्रे तदंतविधिरीदादिभिर्द्विवचने नाश्रीयत इत्यर्थः।
अस्त्वयमस्य ज्ञावितीकारः स द्विवचनस्य न कश्चिदिति न तदभिप्रायेण भाष्यं व्याख्येयं॥ ॥

मितीत्यत आह। ईदादीति। तदंतत्वं चास्य व्यपदेशिवद्भावेन बोध्यं। श्रूयते सूत्र इति। यत् श्रूयते द्विवचनं तदीदाद्यंतमिति भाष्ये योजनेत्याशयः॥

कै०वि०१ आनित्यत्वेपिलुकः शीभावोनित्यश्चेत् अतुल्यबलत्वात्परत्वदितिपूर्वोक्तमनुपपन्नमतोभाष्येशीभावोप्यनि
१४१ त्यइत्युक्तंकृतेलुकितदप्राप्तिस्तत्प्रसंगरूपषष्ठ्यर्थस्याभावादितिभावः। अमीइतीतिस्वदेइत्यस्याप्युपलक्षण

अथापिकथंचिदिति। स्थानिविशेषानपेक्षयाकृताकृतप्रसंगित्वेनलुक्शास्त्रस्यप्रवर्तनादित्यर्थः।
अथवानित्यत्वेनबाधकत्वंलक्ष्यतेतेनांतरंगानपीतिशीभावस्यलुग्बाधकइत्यर्थः। एवमपिदोषइति॥
पक्षस्योत्थानमेवनास्तीत्येतत्पक्षासंभवएवदोषः। अवश्यमिति। यदाश्रयणस्तयादयंपक्षोंगीकृतः
तस्यायंतवङ्भावस्यास्मिन्नपिपक्षेअवश्यमाश्रयणमंगीकृतं। अग्नीइत्यत्रहीकारएवद्विवचनंन
त्वीकारांतं। तस्मादिति। द्वितीयएवपक्षोस्त्वित्यर्थः। मणीवादीनांप्रतिषेधोवक्तव्यइतिभाष्यवार्त्तिक
काराभ्यामपठितत्वादप्रमाणमेतत्। मणीवोष्ट्रस्येतिप्रयोगोवाशब्दस्योपमानार्थस्य॥ रोदसी
वेत्यादिस्तुछांदसः छंदसितुसर्वेविधयोविकल्प्यंतइति॥ ॥७॥ ॥

मेतत्। द्वितीयइतिप्रत्ययांशेतदंतविधिसत्वेनपक्षद्वयस्यैकत्वबुध्यातस्यमध्यमत्वोक्तिरितिबोध्यं। एतदितिवृत्तिकारोक्त १४१
मित्यर्थः॥११॥

अदसोमात्॥ ॥अस्मिन्निति। मात्परघटितेइत्यर्थः। यदितुअदसोमादित्युच्यतेतदात्परश्चपूर्वोत्तरसाहचर्याद्वर्णभिन्नो
नुओकारेकाररूपएवतदानस्यादोषइतिभावः। इदमेवध्वनयितुमदसः प्रगृह्यसंज्ञायामितिनोक्तंनन्वीत्वोत्वयोरसि
द्धत्वेपिअदसोमादित्यत्रेदूदितिनिवर्त्यमात्परौकारैकारयोरपिप्रगृह्यत्वान्नायादिप्रसंगोतआह। चशब्दान्मत्वस्ये
ति। एवंचैदैतोर्मात्परत्वाभावोदेवमपिनप्रगृह्यत्वप्राप्तिरितिभावः। नन्वीत्वादीनामसिद्धत्वेपितन्निवर्तितौकाराद्यभावेन

अदसोमात्॥ ॥मात्प्रगृह्यइति। अस्मिन्सूत्रन्यासइत्यर्थः। ऊत्वस्यचेति। चशब्दान्मत्वस्यापिशास्त्रस्या
सिद्धत्वात्स्थानिलक्षणमेवकार्यंप्राप्नोति नादेशलक्षणमित्ययादिप्रसंगः अमीआसतइत्ययादेशः।
अमूआसातेइत्यत्रावादेशः। अमीअत्रेत्यत्रैकादेशः। ननुचाद्विपदाश्रयत्वाद्बहिरंगाअयादयोंतरं
गेष्वीत्वादिसिद्धाइतिपूर्वाभावेकथंपूर्वत्रासिद्धमितिईत्वादीनामसिद्धत्वंस्यात्। नैषदोषः। नाजानंत
र्यइतिबहिरंगपरिभाषायानिषेधात्॥

कथमयादिप्राप्तिः किंवायादीन्प्रत्यसिद्धत्वेपिप्रगृह्यसंज्ञायामाश्रयासिद्धत्वेनतत्संज्ञायांतत्सामर्थ्यान्नायादयो
तआह। शास्त्रेति। नादेशलक्षणामितिप्रकृतिभावइत्यर्थः प्रगृह्यत्वंत्वनुनासिकपर्युदासेनचरितार्थमिति
भावः। एकादेशः। एङः पदांतादतीति॥ नजानंतर्यइति। उत्तरकालप्रवृत्तिकेअपवादाजानंतर्यादितिभा
वः त्रैपादिकेंतरंगेबहिरंगपरिभाषाअप्रवृत्तेर्विसर्जनीयसूत्रभाष्येवक्ष्यमाणत्वान्नदोषइतिपरे॥ ॥

यथोद्देशेति। नन्वाश्रयात्सिद्धत्वेन प्रगृह्यत्वेन प्रगृह्यत्वेपि मूत्वादेरसिद्धत्वात् आयादिकं स्यादेवेति चेन्न एवम
पि संज्ञाशास्त्र वैयर्थ्यादत्र त्वाश्रयणेनापादिकं प्रत्यपि सिद्धत्वं ज्ञाप्यतद्भ्याशयात् भाष्ये यत्सिद्धेद्वेति न च
तत्र पूर्वसूत्रेणैव सिद्धिः अद्विवचनेतदप्रवृत्तेः पूर्वसूत्रविषये यथोद्देशस्यैव भाष्यकृतांगीकाराच्च नन्वीदाद्युपजी

ननु चेति। यथोद्देशपरिभाषापक्षे आश्रयात्सिद्धत्वं न विष्यतीत्यर्थः। कार्यकालपक्षमाश्रित्याह।
वचनार्थोहीति। वचनस्य प्रयोजनमित्यर्थः। नैकमिति। अनेककार्यसिध्यर्थं संज्ञासूत्रं नैकेन प्रयुज्य
तद्वत्यर्थः। अन्यत्र सूत्रमेकेनापि प्रयुज्यते मुड्डादणित्यादि। तत्रैवायमिति। न च तत्रेदूदेद्ग्रहणं
कर्त्तव्यमादितिवायस्मादणोऽवसानेऽनुनासिको विधीयते पूर्वेणाचणकारेणा पर ग्रहणमिति। असौ अमुके
अमुकाभ्यामित्यादावनुनासिकस्याप्रसंग एव तदेवं कार्यकालेपि संज्ञापरिभाषे प्रकरणोत्कर्षेणावि
धीयमानप्रगृह्यसंज्ञा सर्वप्रगृह्यकार्यार्थासती असिद्धत्वं बाधिष्यत इत्यर्थः॥

वनापात्रकरणमित्यत आह। नचेति। हे ऽमुक अमुकाद् इत्यादौ तु अदसद्दृत्यावर्त्यनविद्यते दस्य स्थाने सोयस्य तादृ १४२
शादसद्वत्यर्थेनानुनासिकः स्वमतेपि न वत्येवेति भाष्याशयमाहुः। तादृशानामनन्निधानमेवेत्यन्ये। प्रकरणोत्क
र्षणेति॥ संज्ञाप्रकरणेनुत्कर्षेण गुरूकृतन्यासेनेत्यर्थः। सर्वेति प्रकृतिभावानुनासिक प्रतिषेधेत्यर्थः॥॥

भाष्ये। विप्रतिषेधाद्वेति। अंतरंगत्वान्मूत्वादौ कृते पदांतरसमभिव्याहारेऽपादिभ्यः परत्वात्संज्ञा सिद्धौ तत्साम
र्थ्यान्मूत्वादिकं प्रकृतिभावं प्रत्यपि नासिद्धं आश्रयाच्च संज्ञां प्रत्यपि नासिद्धमिति भावः। ननु प्रगृह्यसंज्ञाभिनिवर्त्त
माने त्यादिवक्ष्यमाणप्रकारेण घटत एव विरोध इत्ययुक्तमेतदित्यत आह। दूष्टेति भाष्ये। परैवेति। पूर्वपाठेपि तत्र
वाक्यार्थबाधभावेनेति भावः। कथमिति। पाठकृतं स्वगतं पूर्वत्वमनयगतेमिति प्रश्नः। उत्तरयति। कार्यकालमि

विप्रतिषेधाद्वेति। अथावेकादेशप्रतिषेधोवावक्तव्यः विप्रतिषेधाद्वा प्रगृह्यसंज्ञेति विकल्पार्थोवाश
ब्दः। नैकंप्रयोजनमित्यादिस्तु परिहारो भाष्यकारेणोक्तो न वार्त्तिककारेणेति न तदपेक्षो विकल्पः।
नैषयुक्तद्वति। दूष्टसिद्धयद्वतिभावः। करिष्यतद्वति। आश्रयिष्यतद्दूत्यर्थः। दूत्तरोगृहीताभिप्राय
आह। सूत्रविपर्यासद्वति। अभिप्रायं प्रकाशयितुमाह। एवं तर्हीति॥

ति तत्पक्षे संज्ञाशास्त्रस्य प्रदेशदेश एवार्थबोधस्तदुत्तरं च विरोधोपस्थितिस्तत्कार्यज्ञानं चेति तत्र त्यपरत्वमेव विप्रतिषे
धसूत्रप्रवृत्तौ बीजमिति भावः। परैवेत्यन्वकारेण पाठकृतं पूर्वत्वं विद्यमानमपि विप्रतिषेधसूत्रप्रवृत्तौ न नियामकमिति सू
चितं। परिभाषाणां तु तत्पक्षेपि तत्तद्देशेर्थबोधोत्पत्त्येवेति तद्विषये विप्रतिषेधसूत्रप्रवृत्तौ पाठकृतमेव तन्नियाम
कमिति तात्पर्यं आकडारस्थं च संज्ञायाः कार्यकालत्वपरं भाष्यत्वेकदेश्युक्तिरिति तत्रैव निरूपायिष्यामः॥ ॥

कै०वि०१ १४३ परेतुपरैवेत्यस्यसंज्ञापदेनतत्कार्यप्रकृतिभावउच्यतेइतिभावः आशयानभिज्ञस्यप्रश्नः कथमिति एकदेशिनउक्तं कार्य
कालमित्यादीत्याहुः एतेनकार्यकालपक्षेपिपाठकृतपरत्वमयादीनामेव अन्यथाङमोह्रस्वादचीत्यादौत्रिपादीस्थेका
र्यकालपक्षेएवपरिभाषाप्रवृत्यापरत्वात्तत्र तस्मादित्युत्तरस्येत्येवेतिसिद्धा तासंगतिस्तयोरप्येकदेशस्यत्वेनपरत्वासं

द्विकार्ययोगोहीइति। द्वाभ्यांकार्याभ्यांयोयुज्यतेसविप्रतिषेधविषयत्वाद्विप्रतिषेधः। असंभवोपी
ति। असंभवएव विप्रतिषेधः सतुकदाचित् द्विकार्ययोगेभवतिकदाचित्केवलोपितथाहसतिसं
भवे द्विकार्ययोगेनविप्रतिषेधः। यथाएकस्यदधातेरडागमद्विर्वचनेभवतः अदधात्। क्वचि
देकस्यद्विकार्ययोगाभावोपि असंभवोभवति यथात्र पूणामित्यत्रनुमूनटोः प्रकृतिप्रत्ययभक्त
योः परस्परनिमित्तव्याघातात्। अयादीन्बाधतइति। प्रकृतिभावविधानात्। निमित्तमिति। ईत्वमूत्वंच॥

भवादित्यपास्तं। द्वाभ्यामिति। योगइतिकर्मणिघञ्। द्विकार्यशब्दस्यपात्राद्यंतत्वादस्त्रीलिंगस्ययोगशब्देनकर्तृकरणेकृतेति
समासः ईदूतोः प्रगृह्यसंज्ञेत्यस्यतत्कार्यप्रकृतिभावइत्यर्थः। कदाचिदिति एवंचप्रकृतेकेवलासंभवरूपः सइत्यर्थः केवलद्विकार्ययो १४३
गोनसर्वथाविप्रतिषेधइत्याह। तथाहीति। ईत्वमूत्वंचेति। तद्विघातेनसंज्ञाभावेतत्कार्यप्रकृतिभावविघातः स्पष्टएवेतिभावः॥

केचित्तुसंज्ञाकार्यस्यअयादिभिर्विप्रतिषेधोऽयुक्तः वाक्यसंस्कारपक्षेमूत्वादितः पूर्वमेवअयादिप्राप्त्यामूत्वाद्युत्तरं
संज्ञायांतत्प्राप्त्यायुगपत्प्राप्त्यभावात् तस्मात्प्रगृह्यसंज्ञाशब्देनतज्जनकमूत्वादिकंलक्षयित्वातस्यायादिभिर्विप्र
तिषेधइतिवार्तिकार्थस्तमपिदूषयतिभाष्यं। एवमपीति। कार्यित्वेनाश्रयणादितितत्सामर्थ्याद्यादीत्वत्यपिसिद्धत्वमि
त्यर्थः यथोद्देशइदंकथंकार्यकालमितितुप्रकृतिभावायादिविप्रतिषेधविषयमिदानीतुसनेतिस्पष्टमेव। असिद्धत्वाभावा

आश्रयात्सिद्धत्वमिति। प्रगृह्यसंज्ञायांकार्यित्वेनाश्रयणादसिद्धत्वाभावादीत्वादीनांतेषामयादीनांचविप्र
तिषेधोनिरूप्यते। तथाहिसतोर्हि विप्रतिषेधोभवतीतिपूर्वपक्षेइत्वादीनामेव विप्रतिषेधआक्षिप्तः तत्राया
दीनांचयनंलावकः अग्नेत्रेत्यत्रावकाशः। ईत्वादीनांतुयत्रायादीनामप्रसंगः सोऽवकाशः अमीस्थिताः अ
मूस्थितौअन्यास्पदइति अमीअत्रेत्यादावुभयप्रसंगेपरत्वादीदायएवभवंति। अत्रव्याख्यानांतरं क्लिष्टत्वा
न्नोपन्यस्तं॥ ॥

दिति। ईत्वादीनामसिद्धत्वाभावादित्यन्वयः सामान्यतएवासिद्धत्वाभावबोधनादित्यर्थः। तेषांईत्वादीनां। परत्वादितिईत्वा
दिषुजातेषुतेषामसिद्धत्वाभावाद्यादीनामप्रसंगएवेतिभावः। व्याख्यानांतरं हेतिप्रगृह्यत्वकार्यप्रकृतिभावेनायादीनां
विप्रतिषेधपरमेव भाष्यं। सतोरित्यस्ययुगपत्प्राप्तयोरित्यर्थः वाक्यसंस्कारपक्षे ईत्वादीनामसिद्धत्वेननततः
प्रागेवतत्प्राप्तिः कृतेत्वीत्वादावस्येतिनतयोर्युगपत्प्राप्तिरितिभावः॥ ॥ॐ नमः शिवाय॥ ॥

Dr. BHAU DAJI MEMORIAL

कै०वि०१
१४४
तदाह। नचात्रेत्यादि। अत्र। आयादिप्राप्तिकाले। असत्वेहेतुः। नुम्यमसिद्धमिति पूर्वत्रासिद्धेनेतिशेषः परिहरति। आश्रयादि
दितिपदसंस्कारपक्ष एवात्राश्रीयत इति भावः। एवंचोभयोर्युगपत्प्राप्तिः प्रगृह्यसंज्ञायां तत्कार्ये च तयोः सिद्धत्वादयादीन्प्रति चा
सिद्धत्वादित्युपपन्नो विप्रतिषेध इति वाक्यसंस्कारपक्षे कृतस्य पूर्वपक्षस्य पदसंस्कारपक्षाश्रयेण परिहार इति क्लेशः। परेत्व
नुक्तेरादिविप्रतिषेधखंडनं तत्समर्थनपरत्वेन व्याख्यायेक्षयेदमेव युक्तं पक्षांतरे ऽपि परिहारकरणादित्याहुः। रोः सुपीत्य
स्यानंतरमिति न चैवं हस्ति चेत्यस्येतदुत्तरत्वात् गौरीति द्रष्ट्या सिद्धत्वापत्तौ मनोरथासिद्धिः ढ्रोढेलोपः रोरीत्यनयोर्यरोनुनासिक

नपुनर्यत्रैवेति। रोः सुपीत्यस्यानंतरं अत उरतीति वक्तव्यं एवं चासिद्धत्वं च न बाधितं भवति। अत्रपावक्र
मे सिद्धत्वस्याप्राप्य भावात् प्लुतस्य चोत्वे सिद्धत्वात्तत्काजत्वाभावादप्लुतादप्लुत इति न वक्तव्यं
भवति। अथवेति। यथोद्देशपक्षाश्रयेणैतदुच्यते॥

इत्यतः पूर्वपाठः कार्य इत्याशयात्। अनुनासिकपर्युदासेन चारितार्थ्यमाशंक्याह। यथोद्देशेति। एतत्वचनसामर्थ्यादि
ति वार्त्तिकं तद्व्याख्यानभाष्यं चेत्यर्थः पूर्वभाष्यस्य व्याख्यांतरवादिनस्तु वाक्यसंस्कारपक्षेप्याह। अथवेति। वस्तुतस्तु प्रकृतिभा
वोपस्थितसंज्ञायां तयोर्निमित्तत्वेनाश्रयणरूपवचनसामर्थ्याद्यादीन्प्रत्यपि सिद्धत्वं ज्ञाप्यत इत्यर्थ इति कार्यकालेपि न
दोषः किंच यथोद्देशे संज्ञां प्रति निमित्तत्वेनाश्रयणात्त्वदृष्ट्या मीत्वस्यासिद्धत्वेन संज्ञाया अनुनासिकप्रतिबंधेन चारितार्थ्यम १४४
स्त्येव प्रकृतिभावविषयकसंज्ञोपजनसामर्थ्याश्रयणे तु किं विशेष्य यथोद्देशाश्रयणेनैवमुपक्रमस्तु भाष्येपि बोध्यमित्याहुः॥॥

भाष्ये योगविभागादिति वार्त्तिकं व्याचष्टे। अथवेति। अदस इत्यस्य पंचम्यंतत्वमुत्तरत्र मादित्यस्य विशेषणानापत्तिरत आ
ह। संबंधेति। यत्तु त सिद्धे इति मत्वे इति शेषः यत्र कार्ये मत्वं सिद्धं तत्प्रगृह्यकार्यमित्यर्थः अपरो। पद सिद्ध इति यत्र मत्व
मसिद्धं तदित्यर्थः ननु समस्तत्वात्समुदायानुवृत्तिः स्यान्नत्वकमेतो निवृत्तिः अत आह। इदूतोरेवेति नान्यथेति। सिद्धां

कार्यकालतायामप्याह। अथवेति। अदस इति संबंधसामान्ये षष्ठी अदसः संबंधिन ईदूदेत इति। इहापी
ति। अदसटाओसः अत्वं टाप् सवर्णदीर्घत्वं आङि चाप इत्येत्वं अदे आ अदे ओस् इति स्थिते अदस इत्यत्र
समादिति विशेषणाभावात्प्रगृह्यसंज्ञायां सत्यामयादेशाप्रसंगः। अमुके ऽत्रेति। अदस इत्यनेन प्राप्नोति। एदं
तमिति। ईदूतोरेव स्वरितत्वप्रतिज्ञानादिति भावः। अननुवृत्तिरेव चानिवृत्तिः। यद्येवं माद्ग्रहणं न कर्तव्य
मेद्ग्रहणनिवृत्तौ चामुके ऽत्रेत्यत्राप्रसंगात्। नैतदस्ति। सति माद्ग्रहणे योगविभागो भवति नान्यथा। एक
योगे परिहारांतरमाह॥ अथवेति॥ ॥
तेतु व्यर्थमेव मात्ग्रहणमिति भावः भाष्ये मार्षादीदाद्यर्थानां वेति वार्त्तिकं व्याचष्टे। अथवाहेति ननु एवं सति अदे ऽदो इत्यस्या
मवस्थायां प्रगृह्यत्वेपि मीत्वमुत्वयोः कृतयोरीकारादीनामप्रगृह्यत्वादेतद्वैयर्थ्यम्॥ अल्विधित्वेन प्रगृ
ह्यत्वाभावादिति चेन्न॥ प्रदेशे प्रगृह्यस्यानिकस्यापि लक्षणया ग्रहणेनादोषात्॥ ॥छ॥ ॥

द्वितीयेति।द्वितीयपदस्येचिल्कार्यंतत्रासिद्धत्वंनेत्यर्थः।अन्येत्वथवावचनसामर्थ्यादित्यादिभाष्यंभाष्यकृतएवोक्ति
रतएवसांप्रतपुस्तकेषुवार्त्तिकापाठइत्याहुः।अन्येतुअत्येतुक्तंवेत्यस्यवार्त्तिकंमत्वाकोशेवार्त्तिकपाठेन्त्रष्टइ

माथादिति।माथएवस्यानीमत्रादेशेनोक्तः।ईदूदेदर्थञ्चेदूदेदिति।नन्वास्मांकल्पनायामसिद्धत्वंभवतिबुद्धि
संकलनायामसिद्धत्वाभावस्योक्तत्वात्।उक्तंवेति।असिद्धत्वमेवात्रप्रतिषिद्धमित्यर्थः।स्वरइति।अर्था
त्यर्थः।बहिष्पदलक्षणइति।द्वितीयपदव्यवस्थितइत्यर्थः।तेनैकपदव्यवस्थिते।ऽचिअसिद्धेईत्वोत्वेते
नामुयाऽमुयैरित्यत्रायादेशोभवत्येव।प्रगृह्यसंज्ञायांचेति।प्रगृह्यसंज्ञायामेवासिद्धत्वेनासिद्धेजक्ष्येप्र
पंचार्थः।पूर्ववाक्योपन्यासः।तत्रसाकिंदोषइति।मात्स्यरंयदीदाद्यंतमितिदोषोपन्यासः।पूर्वत्राद्दितदंतंगृ
हीतमितीहापितदंतस्यैवानुवृत्तिरितिभावः।स्वरितत्वेनशब्दमात्रमनुमीयतइत्युत्तराभिप्रायः।तत्रमाङ्ग्रह
णेनगृह्यमाणमीदूदेद्विशेष्यतेतेनामुकेत्रेत्यत्रव्यवधानाद्दोषाभावएव।योगविभागेदोषप्रसंगादेदंतामि
तिनिवृत्तमित्युक्तंएकयोगेतुतन्निवृत्यानकिंचित्प्रयोजनमितिनवाग्रहणाविशेष्यत्वादित्युत्तरमुक्तम्॥ ॥

त्याहुः।असिद्धेइतिप्रगृह्यत्वेसिद्धत्वमयादीन्प्रातिसिद्धत्वंविनासप्रयोजनंनेतिसामर्थ्याज्ज्ञात्प्रत्यपितोऽसिद्धाविमिभावः।विशेष्या १४५
संनिधानेकथंतदंतविधिरतआह।पूर्वसूत्रेइतिअर्थाधिकारादितिभावः।शब्दमात्रमिति।एवंचविशेष्याभावान्नतदंतविधिरितिभावः॥१२॥

शे॥ ।प्रत्यक्षमेवेति।एवंचेहेतिभाष्यस्यइहैवेत्यर्थः।(शक्तिग्रहनिरपेक्षप्रतीतिकत्वेनांतरंगत्वं।अर्थप्रतीतावपिप्र
× युष्मेइति।सुपांसुलुगितिविभक्त्यादेशः।शेशब्दइत्यर्थः।शेश्चासावर्थवांश्चतस्यग्रहणादित्यर्थः। ×तीयमानत्वमहेपत्वं

शे॥ ॥इहकस्मादिति।अत्रहिप्रत्यक्षमेवशेइतिरूपंयुष्मेअस्मेइत्यत्रतुशकारस्यानुबंधस्याश्रयणाद
नुमेयमितिप्रश्नः।शेऽर्थवद्ग्रहणादिति।स्वंरूपंशब्दस्येत्येवांतरंगत्वादहेयत्वादसाधारणत्वाच्चरूपप
रिग्रहेसिद्धेरूपवदर्थस्याप्यंगीकरणार्थंरूपग्रहणंकृतं।अत्रचशब्दोऽनर्थकः सप्तम्येकवचनंत्वर्थवत्त
याः समुदायोऽर्थंतिराभावादुर्भावादनर्थकः।एवमपीति।अत्रहिमत्वर्थीयसप्तम्येकवचनयोरर्थवतोःसमुदा
योऽर्थवानेवअवयवधर्मानुविधानात्समुदायस्येतिप्रश्नः।लक्षणेति।प्रतिपदोक्तेष्टाटितिप्रातिपत्तिर्भवति
लाक्षणिकेतुलक्षणानुसंधानद्वारेणबहिरंगेतिनतस्यग्रहणं।अथवेति।अर्थवत्समुदायस्यापिकस्य
चिदनर्थकंयथादशदाडिमादिवाक्यस्यपदार्थानांपरस्परसमन्वयाभावादिहापिहरिशब्दवाक्यार्थगत
संख्याधिकरणशक्तिप्रतिपादनायप्रवृत्तासप्तमीनराप्रत्ययमात्रप्रतिपाद्येनार्थेनान्वेतीतिशेशब्दस्यानर्थकंम्॥ ॥

शब्दांतरे — प्रत्यायनादसाधारणत्वं॥अप्रादुर्भावोप्रतीतिमत्वर्थीयोलोमादिशः।आनर्थक्यमिति।प्रत्य
क्षानुमानिकन्यायापेक्षयारूपग्रहणानुगतार्थवित्यरिभाषाप्रबलेतिभावः॥१३॥ ॥७॥ ॥

निपातएकाजनाङ्॥ ॥आनर्थक्यादिति।अर्थवत्त्वानिश्चयादित्यर्थः।तत्रहेतुःकल्पितरूपत्वादितिततः।किंतत्राह।कल्पना
यादृति।अतएवकेचिछतिपंअन्येशक्तियोवदंति।तत्रेयतोर्थवत्त्वमितिननिश्चेतुंशक्यतइत्यर्थः।ननुनिपातग्रहणाभावेएकाजि
तिवर्णग्रहणादर्थवत्परिभाषायाअप्रवृत्तावर्थवत्ग्रहणेमानाभावइतिचेन्नबहुव्रीहिरित्याशयात्।गौणमुख्यन्यायस्य
तुनेहप्रवृत्तिः।पर्युदासेनैवाज्ग्रहणेलब्धेएकाग्रहणस्यगौणमुख्यसंग्रहार्थत्वात्न्यायानित्यत्वाच्चएतेनसत्यपिधाने
निरिस्वत्तइईअपवदित्यादौप्रगृह्यत्वंनस्यात्गौणमुख्यन्यायादितिपरास्तंअतएवोतइत्यत्रैवज्ञांतप्रतिषे

निपातएकाजनाङ्॥ ॥निपातइतिकिमर्थमिति।निपातस्यैवैकाचोऽर्थवत्त्वात्प्रत्ययस्यकेवल
स्याप्रयोगाभावादानर्थक्यात्कल्पितरूपत्वात्कल्पनायाश्चनियमाभावात्प्रश्नः।चकारात्रेति।अन्व
यव्यतिरेकाभ्यांप्रत्ययस्याप्यर्थवत्त्वमितिभावः॥

धआरब्धः।अन्वयेतिव्याकरणानुसंधानानुगृहीताभ्यामित्यर्थः।तस्यैवन्वासमछाभ्रप्रवृत्त्युपयोगित्वाद
तिभावः।वस्तुतोनर्थकनिपातेपिअस्यप्रवृत्तेरोत्सूत्रेभाष्येवक्ष्यमाणत्वादत्रार्थवतएवग्रहणमितिननियमः
प्रश्नाशयस्तुअनाङितिपर्युदासादप्रत्ययस्यग्रहणमिति॥उत्तराशयस्तुपर्युदासेनतथाश्रयणेनमानंनि
पातग्रहणादेवतेनप्रत्ययानुकरणेएतत्प्रवृत्तिरिति॥अआगच्छेत्यत्रापिनप्लुतेप्रकृतिभावोदुर्वारइ
तिप्लुताभावेकथंचिदुदाहरणत्वंयदिसवर्णदीर्घेत्याबोधः॥ ॥छ॥ ॥ ॥ १४६

एकग्रहणेति।स्वांगसमुदायेस्वांगत्वाभाववदचुसमुदायेचुत्वाभावेनैकग्रहणंविनापिकर्मधारयार्थलाभा
दितिभावः।अंतरंगत्वेहेतुमाह।वर्त्तीतिभाष्येइह।कस्मादितिअजंतोनिपातइत्यर्थः।इतिप्रश्नः।अजेवय

निपातोपिकेवलोनप्रयुज्यतेद्योतकत्वादितिसाम्यमेवनिपातप्रत्यययोः॥अततेर्डः।अःआग
छआगच्छेत्यपिप्रत्युदाहरणं।एकाजितिकिमर्थमिति।एकग्रहणसामर्थ्याद्बहुव्रीहिमन्यतेत
तश्चप्रेदंब्रह्मेत्यनिष्टनिवृत्तिर्नस्यतेतिप्रश्नः।तत्पुरुषोयमिति।अंतरंगत्वाद्वृत्तिपदार्थप्रा
धान्याच्चेतिभावः।ननुपुनरोहिरितिहलंतस्यप्रकृतिभावाभावेरुत्वंतस्यात्।नैषदोषः।प्रगृ
संज्ञायांरुत्वस्यासिद्धत्वात्सकारस्याचकार्यंतिराप्रसंगात्उत्वेतुतत्वमाश्रयात्सिद्धं॥ ॥

इति।निपातेनाविशेषणादित्यर्थः।किंवक्तव्यमितिनिपातस्यन्यायप्राप्तविशेष्यत्वाभावायेत्यर्थः।यदिहीतिअजंतग्र
हणेनग्रहणवैकल्यमितिभावः।प्रगृह्यसंज्ञायामिति।ननुसांतस्यप्रगृह्यत्वेएकदेशविकृतन्यायेनरांतस्यापितत्वात्प्रकृति
भावःस्यादितिचेन्न।प्रकृतिभावेप्यासिद्धत्वात्॥

अथनिपातस्यविशेष्यतयाअजंतइतिव्याख्यानेपिअज्ग्रहणसामर्थ्यान्मुख्याजंतपरिग्रहेणकेवलाज्रू
पव्यावृत्तिरज्ग्रहणस्य फलं स्यादितिमनसिनिधायपृच्छति।एवमपीतिभाष्ये।अन्यतरनिवृत्त्येतिनिपातस्य
विशेषणत्वेतदंतपरिभाषाऽप्रसक्तिरेवनिवृत्तिः विशेष्यत्वेत्व जितिविशेषणसामर्थ्यात्तदंतस्यैवग्रहेणमु

एवमपीति।अन्यतरनिवृत्त्याज्ग्रहणस्यचार्थवत्त्वादज्मात्रंगृह्यतेतदंतंनिरस्यतेविपर्य
यस्तुनभवतीतिविशेषाभावात्प्रश्नः।पाराशर्यसाम्यात्संज्ञातिदेशौपरिभाषाशब्देनोक्तौ।साव
काशयोरिति।निरवकाशस्यबाधकत्वादेवमुक्तं।तत्रतदंतविधेरवकाशःऔरावश्यकेपा
च्यंजाव्यमिति।आद्यंतवद्भावस्यावकाशः मिदचोंत्यात्परः तानियानीति।अत्राहिसा
क्षादंत्यग्रहणमस्तीतितदंतविध्यभावः।।समवस्थितयोरिति।।द्वयप्राप्तयोः।। ।।

ख्याजंतपरिग्रहात्आद्यंतवदित्यस्य निवृत्तिरितिभावः विपर्ययः निपातस्यविशेष्यत्वेनाजंतपरि
ग्रहः केवलाचो निवृत्तिरिति।।इतिविशेषाभावादिति।।अत्रचकारणाभावादित्यर्थः संज्ञा
येनाविधाविति अतिदेश आद्यंतवदिति।।लाव्यमितिजङ्शब्देइत्यतआवश्यकेएषदनभिधानान्नेतिभावः।। १४७

यदितर्हीति।एवंचइदमिहभवतीतिभाष्यमनुपपन्नमितिभावः ननुपूर्वंप्रवृत्तस्यपश्चात्परित्यागापेक्षयाऽप्र
वृत्तौलाघवमित्यभिप्रेत्याह।अथवेति।ननुएकग्रहणाभावेऽच्समुदायस्यस्यादितितन्निवृत्त्यर्थमेकग्रहणं

आचार्यप्रवृत्तिरिति।यदितर्हिलिंगेनतदंतविधिर्निराक्रियतेतदातन्मूलाद्यंतवत्परिभाषाक
थंप्रवर्त्तते।नैषदोषः।आद्यंतवदित्यस्योपस्थानायतदंतविधिःप्रथमंसन्निधीयतेपश्चात्तु
लिंगात्परित्यज्यते।अथवालिंगादज्ग्रहणंनिपातेनविशेष्यतेविशेष्येणचतदंतविधेरभावात्
अतिदेशस्यापिभाक्तत्वप्रवृत्तिस्तत्फलसंपत्त्यात्तत्परिभाषाभविष्यतीति।एवंतर्हीति।संज्ञा
याविधीयमानत्वात्प्राधान्यात्संज्ञिनोगुणत्वात्पशुनायजेतेतिवत्संख्याविवक्षायांसिद्धायामेक
ग्रहणमन्यत्रजातिसंप्रत्ययार्थंअच्समुदायग्रहणशंकानिरासार्थंह्येकग्रहणंज्ञापनफलं
संपद्यते।। ।।छ।। ।।

तत्राह।संज्ञायाइति।गुणत्वादितिसंज्ञ्युपकारकत्वादित्यर्थः।पशोरपियागोपकारकत्वाद्गुणत्वंनहियागःपश्व
र्थःअपितुयागार्थःपशुःसंग्रहंसंमार्ष्टीत्यादौतुग्रहार्थत्वात्संमार्गस्यग्रहस्यप्राधान्यमितिनतत्रसंख्याविवक्षितेतिभावः।।

कै०वि०१
१४८

परेतुसंज्ञास्वकार्यद्वारासंज्ञ्युपकारिकानतुसंज्ञीसंज्ञोपकारकः अन्यथाग्रहोपिकर्मत्वेनसंमार्गोर्थः स्यादितिविधे
यविशेषणंविवक्षितमनुवाद्यविशेषणमविवक्षितमितिमीमांसकमर्यादेवज्यायसीत्याप्यसंमताचेतीदंचिंत्यत
स्मात्स्वांगसमुदायेस्वांगत्वाभाववदसमुदायेत्वाभावान्नतद्ग्रहणप्रसक्तिरित्येकग्रहणंविनापिसिद्धिरिति
तज्ज्ञापकमितिसाध्याशयमाहुः।जातिग्रहणमित्यस्यतज्जात्याश्रयानेकव्यक्तिग्रहणमितिभावः अन्यथा

किंपुनःस्यातयद्यत्राचसमुदायस्यग्रहणंस्यात्। उच्यते।इह अइउअवहीतिसमुदायस्यैकासं
ज्ञास्यान्नावयवानामेकाज्द्विर्वचनवदिति अंत्यस्यैवप्रकृतिभावनायणादेशोनस्यात्॥पूर्वयो
स्तुस्वरसंधिः स्यात् अच्समुदायपरिग्रहानुरोधित्वाच्चनिपातसमुदायोगृह्येतएकनिपातस्या
समुदायस्याभावात्।अनाङितिकिमर्थमिति।ङिदङितोराकारयोर्विषयविभागप्रदर्शनायप्रश्नः।
इहकस्मादिति।अनुबंधनिनिवृत्तौविशेषापरिज्ञानात्प्रश्नः।अर्थविशेषाद्विशेषावसायइत्युत्तरं॥॥

जातिग्रहणेपिनातिरेकैकव्यक्तिर्व्यंग्यतयाऽसंगतिरेवप्रवृत्तिनिमित्ततयाजातिग्रहणस्यसर्वत्रसत्वेनतस्यावक्त
व्यत्वाच्च।इहेत्यादि अत्रेदंचिंत्यंसमुदायसंज्ञयावयवानामनुग्रहान्नात्राद्विर्वचनन्यायःनापिनिपातसमुदायस्यनि
पातग्रहणेनग्रहणंस्वांगसमुदायस्यस्वांगग्रहणेनेव। एकैकत्रसूत्रचारितार्थ्यात्इति।तस्मात्तित उशब्दैकादेशअउश
ब्दानुकरणेउक्तसमुदायानुकरणेचानितिपरेनिपातसंज्ञकेऽउअकरोदित्यादौप्रगृह्यत्वंसातद्वारणायैकग्रहणमितितत्वं॥ ॥ १४८

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

भाष्ये।दंभेरिति।दंभेःसनिदंभइच्चेतीत्वे सनीवंतेतिइडभावपक्षेइकःसमीपेनकारोनततो हलादिः
सन्परःयतश्चपश्चात्परःसन्नसइकःसमीपइतिहलंताच्चेतिकित्वाभावेऽनिदितामितिकित्वेधिप्सतीति
सिद्धिरित्यर्थः अनेनसामीप्यमव्यवहितेएवेतिसूचितं॥ x मितिनलोपो नस्यादितिचोद्येजात्याश्रयानेक
x स्यकसमीपत्वंमनश्चतस्मात्परत्व x शोधः २

ईषदर्थेआउष्णंओष्णमितिआङीषदर्थइतिचोक्तं।क्रियायोगेआइतःएतःप्रादिषुहिङित्य
युतेआङ्मर्यादाभिविध्योरितिचसमासविधौङिन्निर्दिष्टः।आउदकांतात् ओदकांतात्
आअहिछत्रात् आहिछत्रादिति विनातेनेतिमर्यादा सहतेनेत्यभिविधिः। पूर्वप्रक्रांतस्यवा
क्यार्थस्यान्यथात्वद्योतनायाकारःप्रयुज्यते।ततःस्मृतौर्थोआएवंतुमन्यसेनैवंपूर्वममंस्थाः सं
प्रतिमन्यसेइतिवाक्यारंभसूचनायाकारइत्यपरे। तथास्मृतेःसूचकआकारःप्रयुज्यते ततः
स्मृतोर्थोनिर्दिश्यते।आएवंकिलतदिति॥

प्रदर्शनायप्रदर्शनंकारयितुमित्यर्थः किंचिद्विधानायोपात्तस्यान्यविधानायपुनरुपादानमन्वादेशःप्रकृ
तेचविधानद्वयाभावात् एतमित्येनादेशोनक्रतइत्याहुः॥विनातेनेत्यादिर्यथाआकाशीह
ष्टोदेवइत्यादौकोशीमभिव्याप्यकाशीवर्जयित्वेतिवार्थः॥ ॥१४॥ ॥छ॥ ॥

कै०वि०१ ओत्॥ ॥दर्शनादितिवेदे॑वादीनांपादपूरणार्थानांचलोकेपीत्यादिःअर्थस्तेदाभावेपि।तत्रानात्वाभावेपिअवय
१४८ वाअनर्थकाःनिपातसमुदायएवार्थवानितिभावः।उशब्दोत्र निरनुबंधकःतेनउञ्इत्यनेनसिद्धिरितिन
त्रमितव्यं।पर्युदासेत्विति॥वस्तुतः पर्युदासेपिदोषःआङ्भिन्नत्वस्याशास्त्रीयत्वात्तंनचस्वाश्रयमाङ्भिन्न

ओत्॥ ॥निपातसमाहारोयमिति।अनर्थकानामपिनिपातानांकमीमिदुइत्यादीनांदर्शनाद
र्थस्तेदाभावेपिनिपातसमाहारत्वमुक्तं।एवंतर्हीति।चादिषुतथापाठादितिभावः।ओश्रुयात
मिति।आङओइत्यत्रांतवद्भावाङ्वत्ययमाङितिअनाङितिप्रतिषेधःप्राप्नोति।पर्युदासेतुनदो
षः।तत्रह्याङ्भिन्नत्वेंश्चोकारस्याङासहैकादेशआदिवद्भावादुकारग्रहणेनगृह्यतइतिसिध्य
त्येवप्रगृह्यसंज्ञातस्याश्चप्रयोजनंकचिच्छाखायामोआयातमितिपाठेप्रकृतिभावः॥ ॥छ॥

त्वंआङ्त्वस्यपूर्वांतवत्वेनातिदेशो।तिदिश्यमानविरुद्धस्वाश्रयधर्मप्रयुक्तकार्यस्यनिवृत्तेरतिदेशस्वभाव
सिद्धत्वात्नचांतवत्त्वमेवंदुर्लभंशास्त्रीयकार्याभावादितिवाच्यं।तत्रापिप्रतिषेधस्यगम्यतयाशास्त्रतात्पर्यविषयत्वेनप्र १४९
गृह्यत्वाभावस्यशास्त्रीयतयांतवत्त्वप्रवृत्तेरितिबोध्यं।तस्याश्चेति।प्रतिगृह्येषुपदस्थावेइतिशब्दप्रयोगनियमादपिफलेविशेषोबोध्यः॥

भाष्ये।ओत्श्चीति।पूर्वसूत्रवदत्राप्यर्थाधिकाराद्गौणमुख्यन्यायस्याप्रवृत्तिरित्याशयः।प्रतिषिद्धार्थत्वादितिप्रतिषि
द्धसंज्ञाकपदेप्रतिषिद्धपदेनोच्यते।परत्वादितिनिषेधाश्चबलीयांसइत्यस्यतुनायंविषयःतस्यपूर्वेणसह
पाठात्तन्निषेधकत्वादितिभावः।प्रतिपदोक्तस्येति।नचप्रतिषिद्धार्थोयमारंभइतिपूर्वभाष्यासंगत्यात्रैते

अदोषस्तवदिति।व्यंतत्वेनात्रनिपातत्वं।ऊर्यादिच्वीत्यत्रनिपाताधिकारात्प्रतिषिद्धार्थत्वादस्यकथमत्र
प्राप्तिरितिचेत्उभयार्थत्वाददोषः।तस्यनिपातस्यप्रगृह्यसंज्ञाविधीयमानाप्रतिबंधाभावाददोषस्तवादित्य
त्रापिभवतु।ओश्रुयातमित्यत्रापिपरत्वादनाङितिप्रतिषेधंबाधतइतिप्रतिषिद्धार्थमपिस्यात्इति
कोविरोधःओकारस्यप्रतिपदोक्तस्यग्रहणमित्युत्तरं।एवमपीति।ओकारस्यात्रप्रतिपदोक्तत्वमस्ति
गमेर्डेइतिसाक्षादुच्चारणात्।यस्यहिसाक्षादुच्चारणंनास्तिआङुयादित्यादिसामान्यलक्षणेनयद्रूपं
निष्पाद्यते तल्लाक्षणिकमित्युच्यते।एवंतर्हीति।गुणादागतोगौणः यथागोशब्दस्यजाड्यादि
गुणनिमित्तोर्थोवाहीकः।मुखमिवप्रधानत्वान्मुख्यं॥

स्यरिक्षाषाया अप्रवृत्तिरेवानित्यत्वादुचितेतिवाच्यं।अस्यैकदेशयुक्तित्वात् तद्धनयन्भाष्येआह॥एवमपीति
ननुलक्षणेनप्रतिपादितत्वादिदमपिलाक्षणिकमतआह॥यस्यहीतिप्रधानत्वात्॥अर्थांतरप्रतीतिनि
रपेक्षतयाप्रतीयमानत्वात् तादृशार्थबोधकत्वाच्छब्दस्यापिगौणत्वंमुख्यत्वंचबोध्यं॥ ॥छ॥ ॥

गौणमुख्यन्यायवीजंदर्शयितुमाह। तत्र स्वंरूपमितिप्राप्यप्यतेवोपपादयति। गोणेहीतिआरोपायद्दिपूर्वंतदुपस्थिति
ति रावश्यकीभावः। मुख्याथ॑ः पेणेति। आरोपितसिंहत्ववान्माणवकादिसमभिव्याहारेसिंहशब्दाप्रयोगद्दितिभावः मुख्यस्यैव
ग्रहणेयुक्त्यंतरमाह। अनियतश्चेति। सिंहशब्दस्यमाणवकबलीवर्दादिषुप्रयोगादितिभावः एतेनवर्णग्रहणेलक्षणप्रति
पदोक्तपरिभाषाऽप्रवृत्तेरीकारस्यलाक्षणिकत्वमित्यादिचिंत्यमित्यपास्तंअनयैवतस्यापिवारणात् क्वाचामश्चेत्या
देस्तत्ज्ञापकस्यलक्षणप्रतिपदोक्तपरिभाषाऽनित्यत्वमात्रज्ञापकतयावर्णग्रहणेसर्वत्रतदप्रवृत्तौमानाभा

तत्रस्वंरूपमित्यत्ररूपग्रहणेनार्थपरिग्रहस्यज्ञापितत्वादर्थवतः कार्येणभवितव्यं। सचार्थःप्रा
यप्यान्मुख्यएवगृह्यतेगौणेह्यर्थेशब्दः प्रवर्त्तमानोमुख्यार्थारोपेणैवप्रवर्त्तते अनियतश्चगौणोऽ
र्थः। तस्माल्लौकिकोयंन्यायोगौणमुख्ययोरिति॥

वाच्यनन्वेयमपि अर्थवत्परिभाषामूलकत्वात्तद्वदेवविशिष्टरूपोपादानविषयेतिकथमत्रवर्णग्रहणेप्रवर्त्ततां
तत्रैवार्थोपस्थितेः सत्वादितिवाच्यंनिपातइतिविशिष्टरूपोपादानसत्वात् निपातसंज्ञाहिचादिपदोपस्थितचा
दीनांसतिसंभवेर्थवतामेवेतियेसार्थकास्तेषांनिपातपदेनापितत्तदर्थविशिष्टानामेवोपस्थितिरिति प्रकृतसू
त्रस्थनिपातपदेनमुख्यार्थकनिपातानामेवग्रहणंनतुगौणार्थकानामितिभावः एवंचकार्यकाल १५०
पक्षेपिच्व्यंतानिपातइत्यस्यात्रानुपस्थितेरेतत्परिभाषावशात् विशिष्टरूपपदेनचार्थवद्रूपमेवोच्यते॥ ॥

प्रकृतेगौणत्वमुपपादयति। जाड्यादिनेतिआरोपेवीजमाह। प्रकृतेः कर्त्तृत्वमिति। एवंचगोभवदित्यस्यगोभिन्नकर्त्तृ
कंगोसदृशरूपेणाभवनमर्थः यत्रचयोगीश्वरशापादिनामुख्यगोरूपप्राप्तिस्तत्राच्विर्नेष्यतेइतिगोसदृशरूपेणाभवनप्र
तीतेस्तस्यगौणत्वमितिभावः ननुसुवर्णपिंडः खदिरांगारसदृशेकुंडलेभवतइतिभाष्येविकृतेरपिकर्तृत्वदर्शनादुक्त
वृत्ताविति। एवंचच्व्यंतेप्रकृतेरेवकर्तृत्वमितिभावः प्रकृतेरेवकर्त्तृत्वेहेतुमाह। संधीभवतीति। ननुशब्दाश्रयेचेति

गोभवदित्यत्रचजाड्यादिनाधर्मेणगोत्वमारोपितमितिगौणत्वमर्थस्यगोभवदित्यत्रचच्वौप्रकृतेःकर्त्तृत्वं
संधीभवतिब्राह्मणइतिबहुवचनदर्शनात्। प्रकृतौचगोत्वमारोपितंनतुमुख्यमितिप्रगृह्यत्वा
भावः। शब्दाश्रयेचेति। स्वार्थवृत्तात्प्रातिपदिकाद्धिनक्तावुत्पन्नायांकार्यप्रकृतेषुशब्दांतरसान्निधाना
द्गौणत्वंप्रतीयते॥ ॥छ॥ ॥श्रीः॥ ॥श्रीः॥ ॥

भाष्यस्यार्थरहितवर्णमात्राश्रयेइत्यर्थः प्रतीयतेसचायुक्तः सर्वनामस्थानाम् शसाक्षिप्तप्रातिप
दिकस्यौतइत्यनेनविशेषादनयोरपिविशिष्टशब्दाश्रयत्वादतआह॥ स्वार्थेइति॥ स्वार्थादिप्रयुक्त
कार्यपूर्णस्यपदस्यार्थप्रतिपादनायप्रयोगार्हस्यपदार्थांतरान्वयेबाधप्रतिसंधानेगौणार्थप्र
तीतेरितिभावः आक्षेपेआक्षिप्तस्यवाशाब्देन्वयेमानाभावाच्च॥ ॥छ॥ ॥ ॥

कै०वि०१
१५१

गौणापेक्षयेति मुख्यशब्दस्य गौणापेक्षया संबंधिशब्दत्वात् गौणाभावे गौणस्य बुध्यसंनिधाने मुख्यव्यपदेशस्य
मुख्यपदस्याभावादित्यन्वयः एवं च शब्दाश्रये चेति नाम्यस्य मुख्यव्यपदेशरहितस्वार्थबोधकप्रातिपदिकरूपश
ब्दाश्रये इत्यर्थः पदव्यपदेशरहितस्य कार्यित्वेनाश्रयणमिति फलितमिति तात्पर्यं न नु द्वितीयादेः कर्मत्वाद्यर्थ
कस्य कारकत्वज्ञानसापेक्षतया गां वाहीकमानयेत्यादौ विशिष्टस्य क्रियासंबंधेन कर्मत्वे पि तदभिधानाय जाय

तस्य च स्वार्थस्य मुख्यव्यपदेशो नास्ति गौणापेक्षया संबंधिशब्दत्वात् । मुख्य
व्यपदेशस्य गौणाभावे ऽभावाच्छब्दाश्रये चेत्युक्तं न त्वत्रार्थो निरपेक्ष्यते । तत्र यथा
श्वेतं छागमालभेतेति गुणद्रव्ययोः श्रौतः क्रियासंबंधः ॥ ॥छ॥ ॥

मानाद्द्वितीयासमुदायस्याप्रातिपदिकत्वात्प्रत्येकं प्रवर्त्तते ततश्च पूर्वमेव गौणत्वादात्वं न स्यादत आह ।
तत्रेति ॥ श्रौतः क्रियासंबंध इति द्वितीयाश्रुत्यनुपपत्त्या कल्पित इत्यर्थः विभक्त्यर्पितेन हि रूपस्थितो
र्थस्य क्रियान्वय इति ततः प्राक् गुणे साक्षात्परपरासाधारण्येन द्रव्ये च साक्षात्सामान्यतः क्रिया १५१
जन्यफलाश्रयत्वादिविवक्षयोभयत्र विभक्तिरिति भावः ॥ ॥छ॥ ॥श्रीः॥ ॥

वाक्यीयात् । आकांक्षादिमूलकशक्त्या । पश्चात् । विभक्त्युत्पत्त्यनंतरं । एवमिति द्वितीयादेः सामान्यतः क्रि
यासंबंधज्ञानापेक्षत्वात् तज्ज्ञानमूलकद्वितीयाद्युत्पत्तौ गोपदार्थस्य वाहीकान्वयः पश्चादेव एवं च कर्मणो
रेव विशेष्यविशेषणभावः न तु विशिष्टस्य कर्मत्वमिति भावः यत्तु विभक्त्यर्थस्य क्रियाकारकसंबंधरू
पत्वेन तयोः संबंधबोधः श्रुतिकृत इति श्रुतेर्वाक्यापेक्षया शीघ्रप्रवृत्त्या प्रथमं तयोरन्वयबोधः पश्चाद्गुण

वाक्यीयात्न्यायात्पश्चात्परस्परेण ॥ एवं गां वाहीकमानयेति
पूर्वं क्रियासंबंधापेक्षया विभक्त्युत्पन्नायां ॥ ॥छ॥ ॥

द्रव्ययोः परस्परान्वयबोधः एवं गां वाहीकमानयेत्यादावपीति कैयटार्थं व्याख्याय दूषयंति गां वाहीकं
पाठयेत्यादौ गौणार्थप्रादुर्भावं विना क्रियासंबंध एवासंभवी तत्र पूर्वमेव गौणत्वावगते रात्वाद्यनापत्ते रि
ति तदेतेन परास्तं । विभक्त्यंतस्यैव प्रयोगेण ततः उपस्थितानामर्थानामितरान्वयेन प्रातिपदिकमात्रा
र्थेन पूर्वमन्वय इत्यस्य वक्तुमप्यशक्यत्वाच्च तादृशबोधकद्वयकल्पने गौरवाच्च अननुभवाच्च ॥ ॥छ॥

कै०वि०१
१५२ किंचअपदस्याप्रयोगेणवोक्तिः सर्वत्रपदस्यैवगौणार्थत्वग्रहेणअत्वंसंपद्यतेअमहान्भूतःत्वङ्गव
तीत्यादौभाष्यप्रयोगेत्वाद्यादेशादीर्घादीनांकरणेनचास्यन्यायस्यपदकार्यमात्रविषयत्वंकुत्रापि विशि
ष्टरूपकेत्यपिबोध्यंअतएवातदूत्रित्यादेःश्वश्रुरसदृशस्यापत्यमित्यर्थेपिप्रवृत्तिः किंचगामित्युक्तेसर्वा
क्रियाप्रसक्तेत्याद्यर्थवत्सूत्रस्यभाष्यबलातसंस्कृत्यसंस्कृत्यपदान्युत्सृज्यंतेतेषांयथेष्टमभिसंब

वाक्यीयात्तन्यायात्सामानाधिकरण्याद्गौणार्थप्रादुर्भावोभवतीतिपदकार्ये
ष्वेवायंन्यायोमप्रातिपदिककार्येष्वित्युक्तं॥शब्दाश्रयेचेति॥ ॥

धोभवतिआह रपात्रंपात्रमाह रद्रूतिरद्धि सूत्रस्यभाष्याच्च सामान्यतःक्रियाजन्यफलाश्रयत्वादेरे
वद्वितीयादिनियामकत्वेन मदुक्तव्याख्यैवतस्योचिताप्रयोक्तापिपदान्येवार्थेमुख्यगौणेवाप्रयुयुक्ष १५२
ति॥नतुप्रातिपदिकादिक मेणेति॥सू धृच्यतेपदकार्येष्विति॥सामानाधिकरण्यादतिद्रु
दमुपलक्षणंपवनादिक्रियादित्यपिबोध्यं॥१५॥ ॥१६॥ ॥ॐनमःशिवाय॥ ॥

उञः ऊं॥ ॥प्रश्नइति।एवंचात्रऊंआदेशःप्राप्नोतीतिभावः।संज्ञासिद्धिरितिनिपातएकाजित्यनेनेत्यर्थः।स्थानिवद्भा
वेनतुनैतत्त्रयं।एकादेशस्यस्थान्यलवृत्तिधर्मत्वात्एकादेशेस्थान्यल्मात्रवृत्तिधर्मस्यनायंउञितिसमुदायेपिस
त्वात्॥तेनांतवद्भावेनताद्रूप्यानतिदेशेपिनदोषःभाष्ये।यद्युञइति।सामान्येनज्ञापकमितिभावःवलान्नावपक्षोक्त
आदेशोनस्यादित्यपिदोषोबोध्यः।नित्यैवेतिआदेशाभावपक्षेइत्यर्थः।नन्वितीति।नचउञइतीत्यस्यानिरनुबंधकोका

उञःऊँ॥ ॥इहकस्मादिति।निपातसमाहारंमत्वाप्रश्नः।यदयमिति।एकादेशेकृतेआदिवद्भावात्संज्ञा
सिद्धिः।इहरूपत्रयंसाध्यं।उइतिविति ऊंइति।तच्चैकयोगेनसिध्यति।एकयोगेह्युञइतिप्रकृतिरादेशेन
प्रकृतत्वात्संबध्यतेनप्रगृह्यसंज्ञयासातुनिपातएकाजनाङितिनिवास्यन्नवति।शाकल्यग्रहणत्यनुवृत्या
चादेशोविकल्पितेरूपद्वयंस्यात।उइति।ऊंइति।नन्विवितीतितदर्थमाह।उञइति।योगविभागइति।उ
ञइत्यत्रशाकल्यस्येतोप्रगृह्यमितिचानुवर्त्ततेतत्रप्रगृह्यसंज्ञैवशाकल्यस्यमतेनविधीयतेनान्य
षामितिप्रत्यंतरानुसंधानद्वारेणविभाषासंपद्यते उइति विति॥
रमादायासिद्धत्वेनशाकल्यानुवृत्तिसामर्थ्यात्पक्षेविवितीतिन्नविष्यतीतिवाच्यंमयःपरत्वेकिम्वितीत्यादौभकारसहितनि
रनुनासिकवकारघटितरूपासिद्धिप्रसंगात्शाकल्यानुवृत्तिसामर्थ्यान्निपातेतिप्रगृह्यत्वाभावेमयइतिवत्वस्यासि
द्धत्वेनकोयणचीतिवत्वेऽनुस्वारापत्तेःउइतीत्यतःसानुबंधकबोधस्यापीष्टत्वेनतदनापत्तेश्चेतिभावः॥ ॥ख॥

कै०वि०१
१५३

अन्येतु अनेनप्रकरणात्तप्रगृह्यस्य ऊं आदेशस्य च विधानेन तस्य निपातइतिप्रगृह्यसंज्ञापवादत्वादेतदादेशविकल्पे कं
इति वितीति सिध्यति नतु ऊइति अतो योग विभागः। नचापवादे विशिष्टे ऊं आदेशे असति निपाते प्रतिगृह्यत्वंस्यात्
अप्रवर्त्तमानापवादस्योत्सर्गबाधकत्वाभावादत एवपारेमध्येइत्यव्ययीभावाभावे उत्सर्गः षष्ठीसमासोभवतीतिवा
च्यं। प्रगृह्यपदस्यसर्वत्र साक्षादुद्देशसंबंधस्य क्लृप्तत्वेनात्रविशेषणत्वमानाभावात्सह विधानेनवाक्यभेदस्या
प्यभावात् स्थानिवद्भावेन च ऊइत्यस्यप्रगृह्यकार्यबोध्यमेवं च पक्षे प्रगृह्यत्वाभावेप्यस्येतात्पर्यान्नैतद्भावेनिपा
तइत्यस्यप्रवृत्तिरित्याहुः। प्रगृह्यस्येति। अनुवर्त्तमानप्रगृह्यपदस्यादेशेनसंबंधे उञ यात्रस्यनित्यंप्रगृह्यसंज्ञक

ऊँइत्यत्रच यद्विशाकल्यस्येतिनापेक्षते तदाप्रगृह्यस्योञोनित्य
मादेशःस्यात्। ततश्च वितिऊंइतिइत्येते द्वे एवरूपेस्यातां॥ ॥

स्य ऊंभावस्य विधानापत्तौ योगविभागेन प्रगृह्यसंज्ञाविधानस्यवैयर्थ्यापत्तेरनुवर्त्तमानप्रगृह्यपदं षष्ठ्यंततयावि
परिणमय्य स्थानिनासंबध्यतइतिभावः। द्वे एवेति नचउइतीतिरूपमपि निरनुबंधकोकारमादायसिद्धं। सानुबं
धकप्रतीत्यनापत्तेः मयः परत्वाकिंवितीत्यादौमकारसहितनिरनुनासिकवकारघटितरूपासिद्धिप्रसंगाच्च। वस्तुतस्तु
उञइत्यस्यानुवृत्तस्यार्थाधिकारादप्रगृह्यपरतैव। प्रगृह्यमितिचादेशविशेषणमेव॥ तथैवभाष्यस्वरसादितिऊंइ १५३
तिऊंइति च रूपेस्यातां नतु वितीति तदर्थंविकल्पानुवृत्तिः ऊंइति दीर्घोच्चारणात्प्रगृह्यपदस्यात्रसंबंधइतिसर्वमनवद्यं॥

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

किमर्थो योगविभागइति। प्रगृह्यत्वादेशयोः शाकल्यमते एवयाप्राप्तएकप्रयोगएवप्रवृत्तिःस्यादेवं च ऊंइति वितीति चरूपे
तेचैकयोगेपि सिध्यतइतिप्रश्नः एवंचैकयोगे वितीतिनसिध्यतीतिप्रागुक्तं कैयटश्चिंत्यएवेति बोध्यं। शाकल्येति एवं च
योगविभागसामर्थ्यात् शाकल्यानुवृत्तिसामर्थ्याच्च तन्नयथाश्रुतं किंतुविकल्पमात्रतात्पर्यकमितिविकल्प

तस्माच्छाकल्यग्रहणानुवृत्त्या आदेशविकल्पे सति त्रीणिरूपाणिसि
ध्यंति। ऊं वा शाकल्यस्येति। शाकल्यश्रुतेरेवफलं वाग्रहणेन प्रतिपाद
यति। एतदेवव्याचष्टे शाकल्यस्य विभाषायया स्यादिति प्रगृह्यसंज्ञा
देशाश्च॥ ॥७॥ ॥

द्वयेन सकलेष्टसिद्धिरितिभावः एवंच शाकल्यमत एव विकल्पः फलितः तदाहभाष्ये। शाकल्यस्य विभाषेति।
शाकल्यमते ऊं आदेशविकल्पे यत्फलंतद्दर्शयति। प्रगृह्यसंज्ञादेशश्चेति तन्मते पर्यायेणोभयं सिध्यतीत्यर्थः॥

कै॰वि॰१ ननुप्रगृह्यमित्यस्यप्रथमान्तस्यकथमुन्नइत्यनेनषष्ठ्यंतेनान्वयइत्यतआह। यद्यपीति। फलरूपतयेति। फ
१५४ लंसंज्ञायाबोध्यंतयासंज्ञिनः तेनचतद्बोधकंपदंलक्ष्यतेतद्रूपतयातत्समानविभक्तिकतयेत्यर्थः द्विवच
नाद्यभिधेयइतिबहुव्रीहिः प्रगृह्यशब्दवदभिन्नंद्विवचनादीतिबोधः प्रगृह्यशब्दवत्वेनचद्विवचनादि
प्रगृह्यपदाभिधेयमितिबोध्यं। स्वरूपपदार्थकइतिउओवाचकंप्रगृह्यपदमित्यर्थादितिभावः वस्तुतः पू

"तत्रयद्यपिपूर्वसूत्रेफलरूपतयानिर्देशात्प्रदेशेष्विवप्रगृह्यशब्दोद्वि
वचनाद्यभिधेयःतथापीहोन्नइतिषष्ठीनिर्देशात्स्वरूपपदार्थकःसंपद्यते॥ ॥

र्वत्रापिशब्दपरएवशब्दार्थयोरभेदात्सामानाधिकरण्यंपटःशुक्लइतिवत्। प्रकृतेतुपटस्यशुक्लइत्यत्रे
वोक्तरीत्यावैयधिकरण्येनान्वयइतिनकश्चिद्दोषः केचित्तुप्रदेशेष्वपिपदाभिन्नाअर्थइतिउपस्थितिः
संज्ञावाक्येतुतथाशाब्दबोधःद्विवचनाद्यभिधेयइत्यस्यद्विवचनादिविशेष्यकबोधजनकइत्यर्थः १५४
षष्ठीसमभिव्याहारेतुविशेष्यतयास्वरूपपदार्थइतिकैयटयोजयंति॥१७॥ ॥छ॥ ॥

ईदूतौच॥ ॥ईकारोकारात्मकसप्तम्याअसंभवमत्वाह। सप्तमीसहेत्यादि। तात्पर्यानुपपत्त्याचलक्षणेतिचभावः
सप्तम्यांचेतिसप्तमीतिपदंलुप्तसप्तमीकव्याख्यास्पतइतिभावः जघन्यवृत्तिकल्पनापेक्षयेदन्याय्यमितितात्पर्यं।
लुप्तायामपीतिनलुमतेतिनिषेधस्तुअनित्यत्वान्नसप्तम्यांपरतइत्यर्थपीतिभावः ननुप्रत्ययग्रहणेनतदंत
विधौईकाराद्यंतंयत्सप्तम्यंतमित्यर्थेप्रत्ययलक्षणेनासिद्धंसोमोगौरीइतितत्राह। संज्ञेति। सप्तम्याएवेतिस

ईदूतौचसप्तम्यर्थे॥ ॥ईदूतौसप्तमीत्येवेति। सप्तमीसहचरितंयदीदूदंतंसप्तम्यांवापरतस्तत्प्र
गृह्यसंज्ञंभवतीत्येवंप्रत्ययलक्षणेनलुप्तायामपिसप्तम्यांसोमोगौरीअधिश्रितइत्यादौनविष्य
तिप्रगृह्यसंज्ञेतिप्रश्नःलुप्तइति। संज्ञाविधौप्रत्ययग्रहणेतदंतविधिप्रतिषेधात्दसत्यर्थग्रहणे
सप्तम्याएवसंज्ञित्वादसत्याश्चकार्याभावात्॥ ॥

प्तमीपदस्यलुप्तसप्तम्यंतत्वेसप्तमीसहचरितलाक्षणिकत्वेचनमानमितिभावः यद्यपीकारोकारसप्तम्योर
संभवएवतत्रमानंतथापिवचनादित्यादिनासद्भक्ष्यतीत्यत्रतात्पर्यं। असत्याश्चकार्याभावादितिप्रगृह्यसंज्ञा
कार्यंहिसंधिकार्याभावफलकप्रकृतिभावः लुप्तेषष्ठ्यर्थप्रसंगस्यनिरूपयितुमशक्यत्वेनसंधिकार्या
प्राप्त्याप्रकृतिभावानुपयोगात्तत्कार्याभावइत्यर्थः॥ ॥छ॥ ॥श्रीः॥ ॥

तदेवाह। प्रत्ययनिमित्तमित्यादिना। पूर्वसवर्णेइति सचसुपांसुलुगित्यनेन। एकादेशमिति। परत्वाद्धाणादांग
स्यवलीयस्त्वाच्चेतिभावः एवंचङ्यंते गौरीत्यादौ लुकआवश्यकत्वेनतदर्थमर्थग्रहणमितितात्पर्यं। सर्वत्रेवेति। ननु
ययीत्यादिभ्योङेोदीर्घोतिनूइत्यादौओस्सुयोः पूर्वसवर्णादेशेचईदूदंतसप्तमीसंभवात्कथमेतदितिचेन्नइ

प्रत्ययनिमित्तंयत्रान्यस्यकार्यंविधीयतेतत्रैवप्रत्ययलक्षणास्यसङ्गावाङौरीइत्यत्राप्रसंगादर्थग्रहणंकृतमर्थग्रहणेसतिअर्थनिमित्तासंज्ञेयंभवतिनप्रत्ययश्रवणानिमित्तेतिलोपेपिसिध्यति॥ पूर्वसवर्णइति। सतिचपूर्वसवर्णएकादेशेचादिवङ्गावाङ्गवतीकारः सप्तमीतिसिद्धासंज्ञा। आडामूभावइति। एकादेशंबाधित्वाडामौस्यातां। वचनादिति। सर्वत्रैवसप्तमीलुप्यतइतिवचनसामर्थ्यात्सप्तमीशब्देनसप्तमीसहचरितस्यग्रहणान्मुख्यकल्पनासंभवे गौणीकल्पनागृह्यतेइत्याश्रयणात्सिध्यतीतिभावः॥ ॥

इत्सप्तमीप्रगृह्यंअदसःएच्चद्विवचनमित्येवसिद्धेस्यलांतरेईदूतौसप्तमीतिगुरुवचनसामर्थ्येनसप्तमीसहचरितग्रहणमितिभाष्याशयान्नदोषःइतिकेचित् तन्ननवास्तिसप्तमीईदूतावितिभाष्यासंगतेः तस्मादेतद्भाष्यप्रामाण्यात्तेषामनभिधानमितितत्त्वं॥ ॥ठ॥ ॥ १५५

सरस्शब्दादिति। सरस्शब्दस्यासुनंतत्वेपिस्वरव्यत्ययात्इतिनञ्श्र्ङ्कसरसीशयानमित्यत्रसरसीत्यस्यांतोदात्तत्वंबोध्यं निराकर्त्तुः संशयार्थोयदिशब्दोनुपपन्नइत्यतआह। संभावनायामिति। शास्त्राणिचेत्प्रमाणंस्युरितिवदसंदिग्धेदिग्धवचनमिदं मितिभावः सरसीशब्दोयदिङीषंतस्तदांतोदात्त

मुख्यकल्पनासंभवत्येवेत्याह। यत्रेति। सरसीति। अत्रसँशब्दात्परस्य ङिःशब्दस्य याडियाञीकाराणामुपसंख्यानमितीकारेकृतेभवतीकारःसप्तमीतत्रैवस्यान्नतुगौरीइत्यत्रेतिभावः। सरसीयदीति। यदीतिसंभावनायांतस्मात्किलेत्तमेतद्वचनात्सर्वत्रलुप्तायामपिसप्तम्यांभविष्यतीतिनार्थग्रहणेन॥ ॥

त्वंन्यायसिद्धं असुनउगंतत्वात्ङीवंतत्वेतुस्वरव्यत्ययादेवनत्वं। वस्तुतोलुकेवोक्तप्रयोगेसिद्धेइयादितिवावार्त्तिकईकारादेशोनविधेगइतिभाष्याशयः तस्मात्पूर्वोक्तरीत्यावचनसामर्थ्याद्लुप्तेपिसिद्धिःसप्तमीसहचरितत्वंचप्रत्ययलक्षणेनबोध्यंभाष्ये। कुमार्यगारमितिश्लुक्त्वा स्तामित्यादेरुपलक्षणंबोध्यं॥ ॥

कै०वि०१
१५६

संज्ञायामितीति।अतएवाग्रेभाष्येजहत्स्वार्थावृत्तिरितिसंगच्छते।नचवाक्येनसंज्ञानवगमादस्यनि
त्यसमासत्वेवाप्यामश्वइतिविग्रहोनोचितइतिवाच्यं वाक्यात्संज्ञिनोनवगमेननित्यसमाससदृश

ज्ञापकमिति।इदूदेदित्यत्रतृतीयचतुर्थपक्षयोरित्यर्थः।इहप्रगृह्यसंज्ञात्प्रकरणेयदिप्र
त्ययलक्षणंस्यात्तदेदूतौचसप्तमीत्येवसप्तमीसहचरितसप्तम्याचापरतोयूदीदूतंदेतत्प्र
गृह्यमितिप्रत्ययलक्षणेनलुप्तयामपिसप्तम्यांसंज्ञास्याविष्यतीतिकिमर्थग्रहणेनतत्क्रियमाणंप्र
त्ययलक्षणाभावंसूचयति।संज्ञाविधौप्रत्ययग्रहणेतदंतविधेरभावात्तदंतपक्षस्तत्रनैवास्ति
तइतिज्ञापनफलाभावात् आह।मावेति।वाप्यश्वोनद्यातिरिति संज्ञायामितिसमासेकृ
तेसप्तमीसहचरितमीकारांतंपूर्वंपदमितिस्यात्प्रगृह्यसंज्ञेतितदर्थमर्थग्रहणं॥ ॥

त्वेपिनतद्विधायकेवाग्रहणासंबंधइतिसमासघटकीभूतानांतद्विषयेविग्रहाभावेमानाभावात्।ध्वनितं १५६
चेदंद्वितीयतृतीयेतिसूत्रेभाष्येइतितत्रैवनिरूपयिष्यते।सप्तमीसहचरितमिति।प्रत्ययलक्षणेनेतिभावः॥ ॥

वर्णवदानर्थक्यादिति।संज्ञायामितिसमासेऽस्यरूढिशब्दत्वादवयवार्थाप्रतीतेरितिभावः।वाप्यामश्वइतिवि
ग्रहप्रदर्शनंतुरथंतरादिपदानांरथेनतरतीत्यादिविग्रहप्रदर्शनवद्बोध्यम्।अतएवजहत्स्वार्थातुतत्रैव
यत्ररूढिविरोधिनीतिकैयटेरुक्तं।भाष्ये।ऽथाजहत्स्वार्थायामिति।सुश्लुपेतिसमासेनकेवलयौगिकेइत्य
र्थः।प्रधानार्थमपीति।अश्वपदशक्तिसमुदायशक्तिसहकारेणगृहीतशक्तिकाद्वापीपदात्स्वार्थ

अथेति।अस्त्येवात्रसप्तम्यर्थइतिप्रश्नः।जहत्स्वार्थेति।समासस्यैवार्थवत्त्वात्पूर्वोत्तरपदयो
र्वर्णवदानर्थक्यात्सप्तम्यर्थोनास्तीत्यर्थः।समुदायार्थइति।वृत्तौहिपूर्वपदंस्वार्थमभिधत्ते
प्रधानार्थमपीतिस्वार्थसंसृष्टस्यप्रधानार्थस्याभिधानात्पांसूदकवत्स्वार्थस्यविवेकानव
गमात्समुदायार्थोवृत्तौसंसृष्टरूपेणैवाभिधीयते॥

विशिष्टप्रधानार्थस्यैवोपस्थितेरित्यर्थः।तत्रसमुदायशक्तिःसंसर्गांशएव।तदाह।स्वर्थसंसृष्टस्येत्यादि।
विवेकानवगमात्।पृथगनुपस्थितेरित्यर्थः।पांसूदकंमिलितंयथासंसृष्टमेवज्ञानविषयोनतुपृथ
क्तथासमासात्संसृष्टएवोपस्थितविषयोनतुपृथगितिअर्थः॥ ॥७॥ ॥

के॰वि॰१ यावानित्यस्यविवरणंकेवलइतिकेवल्यंविवृणोति।असंसृष्टउद्भूतइति।असंसृष्टत्वंविशेषणाविशिष्टत्वं उद्भूतत्वंइ
१५७ तराविशेषणत्वामितिबोध्यंसमुदायरूपोर्थः पूर्वपदार्थविशिष्ट उत्तरपदार्थोभिधीयते।अभिधाभिः परस्पर
सहकारेणोपस्थाप्यतइतिभाष्यार्थः अर्थग्रहणसामर्थ्यात्सप्तम्यर्थमात्रपर्यवसन्नार्थकमर्थग्रहणमिति

सप्तम्यर्थग्रहणेनयावानार्थोवाक्येसप्तम्यर्थेनाभिधीयतेकेवलो
संसृष्टउद्भूतस्तस्यैवेहग्रहणमितिसमासेनभवतिप्रगृह्यसंज्ञा॥ ॥

भावः गौरीत्यादौत्वस्त्येवगौर्यादिपदानांसप्तम्यर्थपर्यवसन्नत्वं।समभिव्याहृतपदांतरार्थानन्वयित्वेनोपस्थितिविषय
त्वस्यैवसप्तम्यर्थपर्यवसन्नत्वरूपत्वात्नाचार्थग्रहणेपिगौरीत्याद्यासिद्धिः सप्तम्यर्थेईकाराद्यभावात्। ईदाद्यंतमित्यर्थ १५७
स्तुदुर्लभोविशेष्याभावातइतिवाच्यं।सामर्थ्यातशब्दरूपंविशेष्यमादायैयतदंतविधिरितिभावात्॥१८॥
१८

दाधाघ्वदाप्॥ ॥दाधाशब्दयोरितिप्रयोगेदाधारूपाणामेवसूत्रेनुकरणादितिभावः।दोदेङ्धेटामेजंतानामिति।ए
षांचात्रप्रकृतिवदनुकरणंभवतीतिन्यायाद्दाशेतीतिप्रसज्यप्रतिषेधाश्रयणाद्बात्वमितिभावः अत्रचपक्षेलक्षणा
प्रतिपदोक्तपरिभाषानिरनुबंधकपरिभाषादीनांनप्रवृत्तिः सर्वेषांस्वरूपेणैवानुकृतत्वात्दारयतिधारयत्यो

दाधाघ्वदाप्॥ ॥दाधाशब्दयोर्घुसंज्ञाविधीयमानारूपांतरयुक्तानांदोदेङ्धेटांनप्राप्नोतीत्याह।घुसंज्ञाया
मिति।किंप्रयोजनमिति।दोदेङ्धेटामेजंतानामनुकरणानिव्यवस्थाप्योत्वेकृतेदधातियच्छतिदधात्यनु
करणानांचैकशेषेकृतेद्वंद्वनिर्देशात्सिद्धादोदेङ्धेटामपिघुसंज्ञाकृतात्वानांचैषांस्यानिवङ्गावे
नासिद्धेतिप्रश्नः।आत्वकृतानामिति।भवतेः प्रात्यर्थादाप्यषाद्धेतिविधाषितणीतिचकर्त्तरि
कर्मणिवाक्तप्रत्ययः।आत्वंकृतआत्वेनवाकृताआकारांताइत्यर्थः।नतुलक्षणेनकृत्वात्वाइतिविज्ञेयं॥

श्चनातिप्रसंगः तयोरनुकरणेआत्वासंभवेनेहदधइत्यनयोरनुपात्तत्वात् दीङोपिनेहग्रहणं।एज्विष
यात्वाविनतदनुकरणेआत्वासंभवात् इतिबोध्यं॥ नत्वात्वकृतानामित्यस्यजातात्वानामित्यर्थेदा
णादीनांसंज्ञानस्यात् ।निष्ठायाः पूर्वनिपातश्चस्यात्अतआह।भवतेरिति।प्राप्तात्वानामित्यर्थः॥ ॥

कै॰वि॰१
१५८

प्रमाणत्वाभावादिति। प्रयोगार्थत्वाच्छास्त्रस्योपस्थितप्रयोगस्यानुकरणे संभवति अनुपस्थिते जंतानुकरणे प्रमाणाभा
वइत्यर्थः गौरवाच्चेति। दीङः स्तृजादावात्वेकृते प्रणिदाते त्यत्र नेर्गदेति णत्वानापत्तेश्चेत्यपि बोध्यं। एकशेषस्य सर्व
दाधारूपाणां मानत्वेन ज्ञानासंभवात् दुर्ज्ञेयत्वमप्याह। सामान्येति। ननु समाहारद्वंद्वे दाधमिति स्यादन्यत्र दाधा
विति स्यादत आह। एचश्चपदमिति। असोरुत्वे यत्वे लोपे च निर्विसर्गं साधु विकृतानां दोद द्घोरिति सूत्रे धेट्

अस्याप्ययमभिप्रायः एजंतानुकरणत्वे प्रमाणाभावात् प्रक्रियागौरवाच्च प्रयोग एव ये आकारां
ताः प्रयुज्यंते तदनुकरणानामयमेकशेषनिर्देशः सामान्यानुकरणं वादादूतिधादूति एच चपदं निर्दि
ष्टमिति। प्रणिदयइति। घुसंज्ञायां सत्यां गदेति णत्वं भवति प्रणिदातेति। धेते र्देङो वा रूपं प्राणिधा ते
ति धेटः। लक्षणेति॥ लाक्षणिके लक्षणानुसंधानद्वारेण प्रतिपत्तिर्बहिरंगा प्रतिपदोक्ते त्वंतरं
गा। कथमिति। दाधाप्रकृतयइतिषष्ठीसमासः कर्मधारयोवा उभयथाप्यव्याप्तिरितिप्रश्नः॥ दाधाः प्रकृ
तयइति। दीयतइत्यादावात्वादेः। आत्वभूतानामिति। दाण् दाम् धाञ्॥ ॥छ॥ ॥

निरुत्यर्थदाग्रहणपर्यालोचनया धुत्वं सुलभमिति मत्वा वार्त्तिके शिदर्थमित्युक्तं नारद्वाजीयैस्तु तावद्विवेकासमर्थान्प्रति
विकृतार्थमित्युक्तं प्रणिदातेत्यादेर्लाक्षणिकत्वं स्फुटयति। धते र्देङो वेति प्रकृतयइत्यस्य सापेक्षत्वादाह। इत्वादेरि १५८
ति। दाणिति आत्वभूताइत्यनेनेन उपदेशे आकारांता एवोच्यंते न द्विलक्षणास्तेनात्वभूताइति भावः॥ ॥

प्रत्यासत्त्येति। एवं चैषामिति विना पूर्वमिति भावः एतत्सामर्थ्यादेव लाक्षणिकानामप्यनुकरणमनुमास्यतइति
तात्पर्यं। नन्वेकवाक्यत्वे दारयत्याधेकदेशानर्थकव्यावृत्त्यर्थमेव तस्यात् नत्वन्यरूपप्रापकमत आह। एत
द्वितीयमिति। अर्थवत्परिभाषयैवानर्थकव्यावृत्तौ सिद्धायां अर्थग्रहणानुवृत्तिर्वाक्यभेदार्थैवेति भावः। भाष्ये।
श्रीयातीति यथा पितृभ्यः श्रीयातीत्यादौ। ननु तत्रोभयान्वयाय प्रकृतिग्रहणद्वयकर्त्तव्ये ऽत्रैव करणं युक्त
मत आह॥ तदुभाभ्यामिति घुप्रकृतिमाशब्दानां द्वंद्वे संनिधानाविशेषादुभयप्रकृतिर्गृह्यतइति प्रणिदय

प्रकृतयश्चैषामिति। प्रत्यासत्त्यैषामिति लभ्यते। अर्थइति। एतद्वितीयवाक्यं सन्निधानाद्धुदाधामर्थयोर्वर्त्तते
सघुसंज्ञइति प्रकृतीनामपि सिध्यति। तत्पुरस्तादिति। घुमाशब्दयोर्मध्ये प्रकृतिग्रहणं कर्त्तेमतदुभाभ्यामपि संब
ध्यते। प्रतिमिनोतीति। मीनातिमिनोतिदीङां ल्यपि चेत्यात्वविधानाद्भवति माप्रकृतित्वमनयोः॥ ॥

तेप्रणिमयतइति उभयत्रापि णत्वं सिध्यतीत्यर्थः। आत्वविधानादिति। एज्विषये इकारांतानामात्वविधानादि
ति भावः भाष्ये। एवं क्रियमाणेपीति णत्वविधौ माङ् स्पतीति निर्देष्टव्यमिति भावः यद्यपि लक्षणप्रतिपदोक्तप
रिभाषया मीनातिमिनोत्यादेशानां ग्रहणं त्वावेवक्तुं शक्यं तथापि मेङो ग्रहणवारणाय गामादाग्रहणेष्वविशेषइ
त्युक्तेर्माग्रहणेन तदप्रवृत्तिर्मामाने इत्यस्य योगेण णत्ववारणाय च ङित्पाठ आवश्यकइति तात्पर्यं॥ ॥छ॥ ॥

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी इत्याख्यस्मारकम्

सामान्येति। एतत्सूत्रगृहीतदाधापेक्षयापरिभाषागृहीतगाद्यपेक्षयापरिभाषाद्वयापेक्षयाचेत्यर्थः। निरनुबंधकेतिसूत्रदो
वखंडनइत्ययं। धेटोयीतिअन्यथास्यलाक्षणिकत्वात्तद्ग्रहणाप्रसक्तिः यत्तुसानुबंधकत्वादितितन्नतिरनुबंधकस्यधाइत्य

गामादाग्रहणेष्विति। अस्यचार्थस्यदैपःपित्त्वमदाविति पित्प्रतिषेधेसामान्यग्रहणार्थलिंगं। अन्य
थास्यलाक्षणिकत्वादत्रग्रहणंनप्राप्स्यतीतिकिंप्रतिषेधार्थेनपित्त्वेनसामान्यापेक्षयाचनिरनुबं
धकग्रहणेइतिलाक्षणप्रतिपदोक्तयोरितिचपरिभाषाद्वयानुपस्थानमिहज्ञापयतीतिधेटोपसि
ध्यति। दोदद्घोरित्यत्रदइत्येतत्धेट्निरत्यर्थंसत्धेटोपिघुसंज्ञांज्ञापयति। नहिदधातिनिवृत्त्यर्थंदइ
त्येतत्। अस्यदधातेर्हिरितिह्यादेशविधानाद्दद्धोवाप्रसंगात्। समानशब्दानामिति। समानश्रुतीना
मित्यर्थः। प्रनिदारयतिप्रनिधारयतीति। इङ्ध्वङोर्लिचिरूपाव कारेकतेदाधाशब्दौसंपद्येतेतौचार्थवंतौप
श्चात्तुरपरत्वंक्रियमाणमागमभक्तत्वादनर्थकत्वंनकरोतीतिप्राप्तिः। अर्थवद्ग्रहणादिति। अर्थवद्ग्रहणेनानर्थक
स्येत्यस्यस्वरूपमित्यनेनज्ञापितत्वात्। उरण्रपरइतिचाण्विधीयमानएवरपरोभवतीतिसिद्धिःक्रि
यमाणआगमवतीतिदाधारोवार्थवत्त्वंनतदवयवयोरितिनास्तिघुसंज्ञा॥ ॥

स्याप्रसिद्धत्वात्। येतुदाविषयमेवतज्ज्ञापकमन्यंतेतन्मतेधेटंशोज्ञापकांतरमाह। दोददिति। समानत्वंनार्थतइत्याह। श्रुतीनामि १५८
ति। नौवेति। एतेनानर्थकत्वात्तयोर्घुत्वंनेत्यपास्तं। यश्चादिति। प्रणिदापयतीत्यत्रयुगिवेतिभावः आगमभूतत्वात्। आगमस्वरूपत्वात्।

अभ्युपगम्येतिअदाविति प्रतिषेधार्थेनदैपःपित्त्वेनदोददित्यनेनचपरिभाषामात्रानुपस्थानज्ञापनसंभवादिति
भावः। किंत्विति तयोरेवक्रियावाचित्वादितिभावः नाप्ये। तद्गुणीभूतइति। यमुद्दिश्यागमोविहितःसतद्गुणीभूतः
शास्त्रेणतदवयवत्वेनबोधितोनस्तद्ग्रहणेनतद्ग्राहकेणतद्बोधकेनगृह्यतेबोध्यतेआगमविशिष्टइतिपरि

अनुपसर्गाद्वेति। अभ्युपगम्यघुसंज्ञांदोषंपरिहरतिघुसंज्ञापेक्षयायस्योपसर्गत्वंतस्मात्परस्यने
र्घोपरतोणत्वंविधीयते। अत्रदाधापेक्षयानास्तिप्रशब्दस्योपसर्गत्वंकिंतुदाधारपेक्षयेत्यर्थदोषः। इहा
पितर्हीति। अत्रापिपुकिकृतेपुकारांतोऽर्थवान्नकेवलोदाशब्दःपुगंतमेवचप्रत्युपसर्गत्वंनदाशब्दं
प्रतीतिप्रश्नः। नवार्थवतइति। लब्धात्मकस्यभावस्यनिमित्तवशादुपचयापचयौव्यपदेशहानिंनकु
रुतःयथादेवदत्तोंगाधिकोगच्छेदो॥ इहाप्यंतरंगत्वात्कृतायांदाधोर्घुसंज्ञायांपश्चादुत्पन्नपुगागमो
घुव्यपदेशंननिवर्त्तयतिनाप्यर्थवत्त्वमित्यदोषः॥

भाषार्थःतदाह। लब्धात्मकस्येति। तेनदाधारोर्व्यावृत्तिः सूचिताअपचयइतिदृष्टांतार्थं। अंतरंगत्वादितिइदं
यथोद्देशेकार्यकालेतुणत्वदेशासंज्ञाऽसिद्धास्यादितिबोध्यं। वस्तुतःकार्यकालपक्षेपूर्वंपुकप्रवृत्तावपि
दायोदाशब्देनग्रहणात्घुत्वंसुलभमेवेतिचिंत्यं। घुव्यपदेशंननिवर्त्तयतिनाप्यर्थवत्त्वमितीति। स्वपिशिष्टयोरानयनादितिभावः॥

आकाराकारयोरितिरेफविशिष्टयोरित्यर्थः। इहत्वितिघुसंज्ञासूत्रेइत्यर्थः अत्रेदंबोध्यं। अंगावयवाकारस्यगुणवि
धायकानेगुणातिसूत्रांतेनसामर्थ्येनकश्चिद्वर्णग्रहणेनास्याः प्रवृत्तिः तेनदिदीयेइत्यादौपणादिकंन। अयमेवार्थो
भाष्येऽर्थवत्ग्रहणेनधन्यतइत्याद्युः। प्रयोगेतिइदंचिंत्यंआगमवत्प्रत्ययादेरपिप्रयोगसंपादनेउपकारकत्वे
नतेषामपिप्रकृतिग्रहणेनग्रहणापत्तिर्मूलयुक्तेस्तुल्यत्वात् अस्यमूलयुक्तित्वाभावेतुतत्कथनवैयर्थ्यापत्तिः

अनर्थकस्याप्यागमोव्यपदेशहानिंनकरोतियथासत्यपिरेफेअकाराकारयोर्गुणवृद्धिव्यपदेश
हानिं। इहत्वर्थवतोग्रहणादर्थवतइत्युक्तं। ग्रहप्रकृत्यर्थः ग्रणविशेष्यतेतदायंपरिहारः। एयर्थविशेष
णत्वेतुप्रस्यदाधोप्रत्यनुपसर्गत्वाण्णत्वंनप्सवत्येव। तद्गुणीभूतइति। प्रयोगसंपादनेउपकारकइ
त्यर्थः॥ युक्तंपुनरिति। ततश्चानित्येष्वागमविरोधात्तद्द्वारेणादेशविधानाद्दाप्शब्दएवार्थवान्न
दाशब्दइतितदवस्थोदोषइतिभावः॥

स्तस्मान्मदुक्तव्याख्यैवज्यायसी। भाष्ये। यन्नित्येष्वितिवियदादिवत्वर्णप्रकृतिप्रत्ययपदवाक्यादिरूपः सर्गा
द्यकालिकोत्पत्तिमंतः प्रलयकालिकनाशवंतश्चेतिपक्षइतिभावः दाप्शब्दएवार्थवान्नदाशब्दइति। सतुनदाशब्दइति १६०
अर्थः एवंचधुत्वाभावात्तदवस्थोदोषइतिभावः श्रोतस्थानषष्ठ्यभावात्स्थानित्वस्यनैतद्विषयेप्रवृत्तिरितितात्पर्यकूटस्थ
त्वंमाचष्टेभाष्ये। ऽविचालिनइतितद्विवरणमनपायेत्यादि। द्वंद्वान्मत्वर्थीयेपश्चान्नञ्समासः॥ ॥

नन्वेतावतापिस्वपक्षास्थापनाद्वैतंडिकत्वमस्यस्यादतआह। यश्चेति। प्रसंगवाचीतिषष्ठीस्थानइत्यत्रत्यः प्रसं
गश्चबुद्धेरितिभावः। सांतएवप्रयोगेनित्याइति। आदेशरूपाइत्यर्थः बुध्युन्मज्जननिमज्जनेयथाक्रममादेश
स्यस्थानिनश्च। भाष्ये। शब्दांतरेइति। तद्बुद्धौप्राप्तायामित्यर्थः। आदेशास्तर्हीमेइति। इमेआगमत्वेनव्यवह्रियमा
णाअपितथाविधीयमानाअपिआदेशास्तत्सदृशात्तविष्यंतीत्यर्थः आद्यंतावित्याद्येकवाक्यतयाआर्द्धधा

अप्ययुक्तमिति। तत्रापिस्थानिनमपनीयादेशः क्रियतइत्यनन्यत्वप्रसंगः। यश्चोभयोर्द्दो
षोनतमेकश्चोद्यः बाढमितिप्रसंगवाचीस्थानशब्दोनविवृत्तिवाचीततश्चसंतएवप्रयोगेनि
त्याः शब्दाबुध्युन्मज्जननिमज्जनद्वारेणप्रतिपाद्यंते। आगमस्त्ववस्थितस्यापूर्वः क्रियमा
णोनित्यत्वंविरुणद्धि॥ ॥

तुकस्याप्यवयवइत्यर्थेवृत्तेनित्यत्वानुपपत्तिमूलकवाक्यांतरकल्पनेनकेवलतव्यबुद्धौप्रसक्तायांइको
रादिः साधुरितिबोधः तेनात्रापिबुद्धिविपरिणाममात्रस्यैवसत्वेननित्यत्वहानिरितिभावः। यदागमाइति। न्या
यस्यभावात्रापिपक्षेसत्वात्त्रपिरापयतीत्यादौनदोषः येत्वत्रपक्षेआगमत्वंनास्त्येवेतिवदंतितेमान्याः अनागमकानांमित्या
दिव्यवहारासंगतेः निरवयवकबुद्धिनिमज्जनसावयवकबुध्युन्मज्जनेनागमत्वव्यवहारस्यापिनिर्बाधत्वात्॥ ॥

कै॰ वि॰ १ तत्कथमिति प्रश्ने तुल्यन्यायत्वादाह । सर्वे सर्वपदेति । यथा एच इत्यादौ अवयवयोः श्रौतस्यान्यादेशभावेपि
१६१ नित्यत्वानुपपत्तिमूलकः समुदाययोरपि स कल्प्यते एवं अवयवत्वेन विधानेपि अर्थापत्तिमूलक वाक्यांतरक
ल्पनेन निरवयवसावयवबुध्योर्विपरिणाममात्रेणादेशत्वव्यवहारो गौणो नित्यत्वरक्षणाय कल्प्यत इ
ति । यथा च तत्र कल्प्यमानस्यान्यादेशभावेन श्रौतावयवस्थानादेशभावस्य न त्याग एव वाचः परस्मि
न्नित्यादीनामुक्तिसंभवः तथात्रापि श्रौतावयवावयविभावस्य न त्याग इति यदागमाद्युत्येतत्प्रवृत्तिर

आदेशा इति । इड्भवतीत्यनेन द्वारेणातव्यस्येतव्यः देशः क्रियते । सर्वे इति । आगमा अपीत्यर्थः ॥ ॥

त्याद् तैवेति । ईदृशस्यान्यादेशभावस्यानित्यत्वस्य न प्रवृत्तिः स्थानिवदिति श्रुतेः श्रौतस्यान्यादेशभावानु
पपत्तिमूलकतया कल्प्यमानस्थान्यादेशभावके एच इत्यादाविव तत्प्रवृत्तेः न त्वत्र केवलानुमानिके । अत एव लावस्थाया
मडिति पक्षे डादिविशिष्टस्यापि वदित्याशेन पि वाद्यादेश इति दिक् तदुक्तदाह । इड्भवतीत्यत द्वारेणेति आगमा
अपीत्यर्थ इत्यस्य तथेत्यादिः अत एवाग्रे वक्ष्यति बुद्धिविपरिणाममात्रं स्थान्यादेशागमागमिभावद्वारेण क्रि १६१
यत इति एतेनागमा अपीत्येवं सर्वपदव्याख्यायामेकदेशविकारे हीति वाक्यशेषविरोधः आदेशत्वोपपादिकाया वि
कारव्यापकीभूताभावप्रतियोगित्वरूपनित्यत्वानुपपत्तेः सकलपक्षावृत्तित्वादित्यपास्तं ॥ ॥

प्रतीयमानमिति कार्यवत्तया प्रतीयमानं प्रकृत्यादीत्यर्थः सर्वपदेत्यत्र घञर्थकः सर्वशब्दश्चावयवकार्त्स्न्यवाची ।
यद्येवमिति । एवं चैतदवयवस्यानर्थक्यान्न संज्ञा पुकः पूर्वं दाद्दुत्यस्य तु न संज्ञाकार्यकालपक्षे संज्ञायाणत्वदेशस्थ
त्वेन पुक् दृष्यासिद्धत्वात् । न च पुग्विशिष्टस्य दाग्रहणेन ग्रहणं । यदागमाइत्यस्याभावात् । पूर्वोक्तरीत्या स्थानिव

सर्वपदादेशा इति । पदशब्देन न सुप्तिङंतं गृह्यते अपि तु कार्यं प्रति यत्प्रतीयमानं प्रकृतिप्रत्ययादि तत्स
र्वं पदं । एकदेशविकारे हीति । यद्यपि सर्वविकारेष्वनित्यत्वं यथापि विरुद्धस्य पयसः पाकादिषु तथापि
विकाराभावप्रतिपादनेपरमेतत् । बुद्धिविपरिणाममात्रं स्थान्यादेशागमागमिभावद्वारेण क्रियत इ
त्यर्थः । यद्येवं दाशब्दस्य दाप्शब्द आदेशः क्रियत इति दाशब्दस्यानर्थक्यात् प्रसंगः । नैष दोषः । नि
त्यतासमर्थनायादेशपक्ष आश्रितः । प्रक्रियायां तु कल्पितायामागमागमिभाव एव । अन्यथाग
मादेशयोर्नैदिन व्यवहारो न स्यात् । दीङ इति । उपादीसत इति स्थितेमीनाति मिनोतीत्यात्वे कृते
तेन दादारूपत्वाद्घ्वत्वाद्घुसंज्ञाप्रसंगः ॥ ॥

त्वाप्रवृत्तेश्चेति भावः । आदेशपक्ष इति । बुद्धिविपरिणामपक्ष इत्यर्थः कल्पितप्रक्रियादशायां तु न कल्पिताग
मत्वादिव्यवहारस्त्याग इति यदागमाद्युत्यादेः सत्वेनात्रापि पक्षे न दोष इति भावः सन्निपातपरिभाषया दीङ
आत्वे दारूपाश्रयघुत्वं न प्रकृतिग्रहणस्य प्रत्याख्यातत्वान्न तन्निबंधनमपि इति गूढाशयः पृच्छति भाष्ये । कुतः पुनरिति आ
शयमविदुषन्नत्तरं रूपग्रहणादिति ॥ ॥

के०कि०१
१६२

इहखलुप्रकृतिग्रहणादिति। घुसंज्ञासूत्रेप्रकृतिग्रहणेऽयंदोषोजायतेतस्तत्रप्रकृतिग्रहणंदुष्टमितिभावः अथै
कदेशीएनंदोषंपरिहर्तुमाह। नचेयमित्तितद्व्याचष्टे। एचएवेतिमीनातीत्यस्योपदेशकालेप्रवृत्तिमसौनजाना
तिएवंचसाक्षाद्वाप्रकृतिसंनिवेव्यवहितप्रकृतेर्नग्रहणमितिभावः अतिफल्गुत्वात्तेतन्मतदूषणानक्तानि
वेशोभाष्यकृतइतिद्रष्टव्यं। यत्विदंवार्त्तिकमतं। नचैतत्पक्षेऽवदानवृत्यादावादंतत्वनिबंधनयुजाद्यसिद्धिः तत्रा
कारांतलक्षणप्रत्ययविधाविति वचनेनैवतत्तत्सिद्धिःभाष्येतद्वचनप्रत्याख्यानायेज्विषयेआत्वंसिद्धांतिमित्य

इहखल्विति। एचोविषयेआत्वविधानात्‌दीशब्दएवदाप्रकृतिरितिदोषः। नचेयमिति। एचएव
स्थानेआत्वविधानादित्यर्थः। सन्निपातेति। अकित्वसन्निपातेनात्वंक्रियते यदिचात्रघुसंज्ञा
स्यात्स्थाघ्वोरिच्चेतिकित्वंस्यात्‌इत्यकित्वस्यव्याघातः स्यादितिघुसंज्ञाप्रतिनेवाकारआत्मानं
दर्शयतीतिघुसंज्ञानप्रवर्त्तते॥ ॥

न्यदितितन्न। तादृशवार्त्तिकस्यानुलंभात्‌विपरीतंमीनातीतिसूत्रेउपदेशवचनंकर्त्तव्यंवाघजर्थमुत्त्वसिध्यर्थ
मितिवार्त्तिकंतत्रोपदेशएवइतिविरुद्धमित्याशंक्यएज्विषयइतिभाष्यकृताव्याख्यातेनतत्सवदुक्तवार्त्तिकंतत्प्र
त्याख्यानंवाभाष्येदृश्यतेएवंचप्रकृतिग्रहणघुसंज्ञायांवार्त्तिककारोक्तंदुष्टमेवनतुतदनुरोधेनगुरुसूत्रवच
नांतरकल्पनाप्तिनिवेशः कार्यः नह्येकदेश्युक्तमेतत्परिष्कारेगुरुप्रकारेणक्रियमाणेकिंचित्फलमित्याहुः। अकित्विति।
एचोविषयस्याऽन्यथाऽसंभवादितिभावः। कित्वमितितद्भावसंनियोगशिष्टत्वादित्वमपिनेतिकार्याभावात्घुत्वस्याप्रवृत्तिरिति १६२
भावः॥॥

प्रणिदातेति। ननुप्रणिदीयतेइत्यत्रनित्यणत्वप्रसंगःणत्वविधौप्रकृतिग्रहणादितिचेन्न। इष्टापत्तेः। अन्येत्वाहुरि
ति। अत्रारुचीजंतुवार्त्तिकभाष्यविरोधात्‌नतथासूत्रतात्पर्यमिति। अगुणेति। गुणानिमित्तप्रत्ययाप्रसंगाभावादित्य
र्थः। इत्यस्यैवेति। ननुदेपइत्यर्थःतस्यपकारेश्रूयमाणेआत्वायोगादितिभावः ननुपकारेलुप्तेपिकथमात्वंउपदेश
काजेएजंतत्वाभावात्‌नानुबंधकृतमित्याद्याश्रयणेतुप्रकृतेपिनदोषइतिचेन्न। उपदेशइतिषष्ठ्यर्थसप्तम्याः स

अत्रकेचिदाहुःदीङःस्थानाभावात्वेकृतेघुसंज्ञानवत्येवेतिप्रणिदातेतिणत्वंभवति। अतएववार्त्तिक
कारेणस्थाघ्वोरित्वइतिविषयविशेषोनिर्दिष्टः। अन्येत्वाहुः। निर्देशएवैजंतानामनुकरणानामात्वे
कृतेदावदाञ्‌धाञांचैकशेषेद्वंद्वेचदाधाइतिनिर्देशादीङोनास्तिप्राप्तिः। नहितदनुकरणस्यात्वमस्ति
अगुणविषयत्वात्‌। दाप्‌प्रतिषेधइति। दाप्लवनेइत्यस्यैवनिषेधःस्यादित्यर्थः। अवदातमिति। तत्वमत्र
प्राप्नोति। शक्यंतावेदिति। दाप्‌दैपौधातुषुवांतौपठितव्यौ॥ ॥छ॥ ॥

त्वेनोपादिश्यमानस्यैजंतस्येत्यर्थनलुप्तेआत्वप्रवृत्तेः [illegible] एजंतत्वाभावात्‌यस्मात्परोनास्तितत्रैवांतशब्दप्र
वृत्तेरितिदिक्। तत्वमिति। अचउपसर्गात्तइत्यनेनेत्यर्थः भाष्येऽनेकांताइति। एवंचपकारसत्वेपिएजंतत्वान्पापादात्वप्रवृत्तिरिति
भावनतद्वावदर्पमित्यादिविघटयितुंभाष्ये। शक्यंतावदितिलक्षणप्रतिपदोक्तपरिभाषयानुपुगतेऽदाविति निषेधोनशक्योवारयितुंगा
मादाग्रहणेऽविशेषात्‌दाविलपिपकारोपलक्षितदाग्रहणमेवेतिभावः वांतपक्षेपिचर्त्वेनपस्यासिद्धत्वान्नास्तिसूत्रभेदः॥॥

कै॰वि॰१
१६३

स्त्रंतर्हि इति अपि दितिन्यासे इत्यर्थः शंकते। नह्ययमिति। उत्तरयति। भूतपूर्वेति दात्वं भूत्वापकारवैशिष्ट्यं तु अनयेतिना वः। इत्संज्ञायामिति। उपदेशोत्तरकालं ज्ञाता भ्यामेवेत्यर्थः। मेङ इति। अंतरंगत्वाद्व्यतीहार नित्यसंबद्ध एव गृह्यते न तु पदोत्तरसंनिधानेन बहिरंगव्यतीहारवृत्तिरिति भावः। केचित्तु माङो न संनिधाना द्वा प्रत्ययानुत्पत्तिरिति न तस्य ग्रहण मित्याहुः। उदीचां माङो मे इति भुंजीमा [illegible] त्यस्याप्युपलक्षणमिदं न चानुबंधसत्वे मेङ इत्यस्य धातुत्वाभावात्कथमात्व

नावृत्येवेति। इत्संज्ञायां सत्यामेव प्रयोगे दाशब्द एवायं पित्कार्यं तु जन्यते इत्यर्थः। अपवेति। अनुबंधाना मेकांतत्वपक्षे उपदेशे एजंतानामात्वमुच्यमानं देपोन प्राप्नोतीति ज्ञापकोपन्यासः। माङ इति मेङो ग्रहणं न माङ इति मेङो व्यतिहारे ण नित्ययोगात् माङः स्क विवक्षावशात् व्यतिमितीतद्वृत्तिकादाचित्कत्वाद्व्यतिहारयोगस्य प्रणिदानं व्यतीहार इत्येकोऽर्थः। उदीचां मेङ इति तु न कृतं एवं हि नानुबंधकृतमनेजंतत्वमिति न ज्ञापितं स्यात्॥ अपवेति। दिवादिषु दाप् शोधने इति पठ्यते इत्यर्थः॥ ॥छ॥ ॥

मनुबंधलोपे एव धातुत्वमित्यर्थस्य न धातुलोपसूत्रे भाष्यकैयटयोः स्पष्टत्वादिति वाच्यं आत्वविधायके धातोरित्यस्या संबंधात् गवादिशब्दानामुपदेशाभावान्नात्वं दूरे प्रकृतीनामुपदेशोपि तेषामशित्परत्वाभावात् नात्वप्रसज्य प्रतिषेधेपि प्रत्यासत्त्या शित्प्रत्ययपरत्वयोग्यानामेजंतानामेव ग्रहणान्न दोष इति दिक्। दिवादिष्विति नुनु तीछीलिके वा न प्रादायमान इत्यत्र स्वरभेदः श्यनि धातोरुदात्तत्वं शपि चानशो नोदात्तत्वमिति चेन्न सति शिष्टादपि विकरणस्वरात् सार्व
धातुकस्वरस्यैव बलीयस्त्वोक्तेः रुन्नयथाप्यंतोदात्तत्वानपायादिति दिक्॥२०॥ ॥

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारकम्

१६३

आद्यंतवदेकस्मिन्॥ ॥बहुष्वपीति यद्युप्युत्तरा संख्या पूर्वसंख्याबाधिका तथापीतरेषां बुद्धिविषयत्वाभावे बहुमध्यस्थस्याप्येकत्वांगीकारान्न दोषः यथा शतेपंचाशदिति भावः। किमेकस्मिन्नित्यनेनेति। तद्धिसमासं नयनेन वद इत्यर्थेना कारस्यादित्वेत्स्य वृद्धत्वेन प्राप्तस्याभावार्थं दरिद्रातेरिवर्णांतलक्षणाचोऽभावार्थं च। अत्र च स्वरे विशेषः। उपमेये सप्तमी सत्वे सप्तम्यंताद्वतौ मानमाह। द्वयोरिति। उपमानोपमेययोरिति। प्राकारपदवाच्येनेति शेषः। आधाराधेयसंबं

आद्यंतवदेकस्मिन्॥ ॥एकशब्दोऽसहायवाची न संख्यावाची। बहुष्वपि व्यवस्थितस्यैकत्वसंख्यास्तीति किमेकस्मिन्नित्यनेन कृतं स्यात्। एकस्मिन्निति उपमेये सप्तमीनिर्देशादाद्यंतवदित्युपमानात्सप्तम्यंताद्वतिर्विज्ञायते। तथा मथुरावत्पाटलिपुत्रे प्राकार इति द्वयोरुपमानोपमेययोराधाराधेयसंबंधप्रतिपादनाय वाक्यं प्रयुज्यते। यदि च तयोर्भिन्नविभक्तित्वं स्यात् उपमानोपमेयभाव एव न गम्येत। सर्वातिदेशानां कार्यातिदेशस्य प्राधान्यात्तस्यैवेहाश्रयणं। किमर्थमिति। व्यपदेशिवद्भावेनैव सिद्धत्वान्न कर्तव्यमित्यर्थः॥

धेति आधारत्वाधेयरूपत्वसंबंधप्रतिपादनायेत्यर्थः॥ न गम्येतेति। उपमानप्रकारकोपमेयविशेष्यकबोधे समानविभक्तिकत्वस्य तंत्रत्वादिति भावः। सर्वातिदेशानामिति। रूपनिमित्ततादात्म्यशास्त्रव्यपदेशकार्यातिदेशानां मध्ये इत्यर्थः॥ प्राधान्यादिति सर्वेषां कार्यार्थत्वादिति भावः॥ ॥छ॥ ॥

कै०वि०१
१६४ मुख्येव्यपदेशानि।गौणोव्यपदेशिसदृशो।नचाद्यंतवद्भावादितिनवतिः सत्यन्यस्मिन्मुख्याद्यंतत्वात्।नापिमतुप्आ
द्यंतशब्दवच्छास्त्रसद्भावस्यपरपूर्वसत्वानपेक्षत्वेनसत्यन्यस्मिन्नित्यस्यायोगादतआह।आद्यंताविति।आद्यंतश
ब्दावित्यर्थः एवंचाद्यंतवद्भावादित्यस्याद्यंतपदवच्छास्त्रप्रवृत्तेरित्यर्थः।क्वचिदिति।आद्यंतव्यवहारादिति।तदर्थः।
सर्वकार्येति।आद्यंतापदिष्टाद्यंतानपदिष्टसर्वकार्यसिध्यर्थंगुर्वपिव्यपदेशिवदितिआद्यंतादित्यस्यस्थानेकार्यमि

इतरोमुख्यसंभवतिगौणेनस्यादित्याह।सत्यन्यस्मिन्निति।आद्यंतौविद्येतेयस्मिन्शास्त्रेतदा
द्यंतवत्तस्यभावात्प्रवर्त्तनादित्यर्थः।क्वचिदाद्यंतभावादितिपाठः।तत्रव्यपदेशिवद्वचनमिति।
सर्वकार्यसिध्यर्थंव्यापकंकर्त्तव्यमित्यर्थः।तत्रनिमित्तसद्भावान्मुख्योव्यपदेशोयस्यास्तिसव्यपदे
शी।यस्तुव्यपदेशाहेत्वभावादविद्यमानव्यपदेशःसतेनतुल्यंवर्त्तकेकार्यंप्रतीतिव्यपदेशिवद्भवतीत्युच्यते॥

तिभावः।सतेनेति।तेनतुल्यमितितृतीयायांसर्वनिसत्त्वपर्यंतभावात्तृतीयांताद्वतिरुक्तइतिबोध्यं।भाष्ये।तस्मिन्क्रिय
माणइतितस्मिन्नाश्रीयमाणइत्यर्थः।पपाचेति।नन्वत्रधातुरेवप्रथमएकाचूनतुधातोःप्रथमएकाजितिकथमत्र १६५
व्यपदेशिवद्भावंविनाप्राप्तिरितिचेन्न।आदित्वपर्यायप्रथमस्यसूत्रेणैवातिदेशात्सिध्यातत्रव्यपदेशिवद्भावारंभस्यमुख्यप्रयो
जनमित्याशयात्इयायेत्यादौतुद्विर्वचनेचीतिरूपस्थानिवत्वादजव्यतिरिक्ताभावेननैकाचूत्वमितिबोध्यं॥ ॥

अवयवषष्ठ्येवेति।प्रत्ययांशोइतिभावः।एतस्मिन्क्रियमाणइतिअवयवषष्ठीत्वेआश्रीयमाणेइत्यर्थः विज्ञानशब्दोव्यवहा
रवाचीत्याह।व्यवहारादिति।तत्फलितव्याख्यानंभाष्ये।तर्हैवेति।यथालोकेव्यवहारोवचनंविनैवसिध्यतितथाशास्त्रेपिवचनं
विनासिध्यतीत्यर्थः॥अगादित्यादिइणोगाल्लुङिलोगमिरवोधनइत्यादेशे।एकोचूअसहायोजित्यर्थः

वक्षदिति।वचलेइतिपू।इतश्चलोपइतीकारलोपः।लेटोऽडाटावित्यडागमः।सिपूकत्वंअत्रसका
रमात्रंप्रत्ययोनतुप्रत्ययस्यावयवःसकारइतिषत्वंनस्यात्।अवचनादिति।अवचनंवचनरहितंय
ल्लौकविज्ञानंतस्माल्लौकव्यवहारादित्यर्थः।इहतावदियायेतिइणधातुःप्रयोगस्तदाद्यकुरूपःएतिइ
तःयंतिअयनं।आयकःअगातगमयतीतितस्यायमेकोऽवयवलक्ष्यते।अथवार्थवतोधातोरयंवर्णरू
पएकोजितिअर्थस्यत्यागोपादानाभ्यांनवतिव्यपदेशः।एकाजिति।एवंशिलापुत्रकस्यशरीरमिति
अनेकक्रियाविषयस्यावस्थातुरिदमेकावस्थायुक्तंशरीरमित्यास्तिव्यपदेशः॥ ॥छ॥ ॥

नन्वेकाचोऽवयविनोद्विर्वचनमितियस्यायमवयवस्तस्यबहुरूपस्यप्रवृत्तिवर्त्तव्यंद्वित्वेनेत्यतआह।अथवेति।
काल्पनिकस्तेदेनव्यवहारेदृष्टांतमाह।एवमिति।व्यपदेशःस्तेदनिबंधनसंबंधव्यवहारः॥ ॥छ॥ ॥

शास्त्रेपीतिलोकप्रसिद्धत्वमेवतत्यागेवीजंतच्चनप्रकृतेइतिभावः।पादपर्यायइतिवर्णसमुदायःपदमित्यत्रतुपद
शब्दोयथाप्रकृतएव।पदादीनामिति।एकवर्णंविदमित्यादौननुअर्थस्यपदत्वंकथमतआह।अभेदेतितदुपचारश्चश

एवंसिप्रत्ययइट्सहितोऽपिदृष्टोजोषिषदित्यादौकेवलोऽपीतितस्यायंसकारइतिव्यपदिश्यते।लोके
निरूढश्चायंव्यवहारइतिलोकवच्छास्त्रेपिव्यवहारात्गौणमुख्यन्यायोऽत्रनावतरति।पदसमु
दायइति।पादपर्यायःपदशब्दःतथाचैकपदाक्रांगोतिपादएवविवक्षितःनतुऋचःकस्याश्चिदेक
मेवपदंभवति।अत्राप्यर्थेनेति।पदादीनांयोऽर्थःसोन्यपदार्थः।अभेदोपचाराच्चार्थएवपदादिभिर
भिधीयते।अयमेवमेज्येष्ठइति।प्रथमरूपताध्यवसायात्मध्यमकार्यकरणाच्चमध्यमइतिव्य
पदिश्यते।अन्योनजनितेति।बुध्याकनीयानितिव्यपदिश्यते।असूतायमिति।बहुकृत्वोपिप्रसू
ताप्रथमपुत्रेणकाचिदुच्यतेतथाचयाप्रसोष्यतेसापिकदाचित्पूर्वोत्पन्नेनपुत्रेणादन्यत
इति।उभयोपादानं।नापिप्रसूतानापिप्रसोष्यतेकुक्षिस्थितेनैवगर्भेणाहताप्रथमगर्भेणहतेत्युच्यते॥

कार्थयोरनादिरत्तिबोध्यं।पदादिभिःपदशब्दादिभिःप्रथमेतितस्मात्पूर्वस्याभावादितिभावः।मध्यमकार्यंतत्संबं
धजमुखादिकं।बहुकृत्वोपीति।यथापरशुरामेणरेणुका।तथायेति।संप्रतिगर्भिणीत्यर्थः।गर्भस्थमादाय तत्रापिप्रथमव्यव
हारइत्यर्थः॥ ॥ १६५

ननुयासूतासानगर्भेणहतास्भवतिकिंत्वपत्येनेतिगर्भेणहतायांतद्व्यतिरेकप्रदर्शनमयुक्तमतआह।अपत्यपर्यायइ
तितच्चोदरस्थंबहिर्भूतंवेत्यन्यत्तत्रप्रथमव्यवहारेवीजमाह।तस्याएवेतिस्त्र्यंतरेषुबहुप्रसववतीषु।तथाविधस्येति

अपत्यपर्यायोगर्भशब्दःतत्रतस्याएवयोग्यताध्यवसानेनभाविगर्भविवक्षयाप्रथमगर्भेणहतेत्युच्यते।
स्त्र्यंतरेषुवाबहुपुत्रत्वेसतिआद्यगर्भस्यप्रथमव्यवहारदर्शनात्तथाविधस्यप्रथमगर्भव्यपदेशः।अने
त्येति।बहुकृत्वोप्यागतःपूर्वमागमनंस्मृत्वाप्रथमव्यपदेशंतत्रमुख्यंकरोत्येव।आजिगमिषुरत्रभावीन्या
गमनानिबुध्याव्यवस्थाप्यकुर्यादेवप्रथमव्यवहारं।यस्तुसकृदेवागतःसोऽपिकरोतिप्रथमव्यवहारमि
तिप्रतिपादनार्थमनेत्यानाजिगमिषुरित्युपात्तं।तत्रान्यसंबंधिषुबहुष्ववस्थितेषुआद्यस्यप्रथमव्यव
हारदर्शनात्तथाविधत्वादेकस्मिन्नप्यागमनेप्रथमव्यवहारव्यपदेशः।इदानींयोगंप्रत्याख्यातुमाह॥
अपूर्वेति।यद्यपिबहुष्ववस्थितेषुआद्यंतशब्दौप्रयुज्येतेतथाप्यपूर्वेतरत्वमात्रमेतयोःप्रवृत्तिनिमित्तंतच्चै
कस्मिन्नप्यस्तीतिनार्थःसूत्रेण॥ ॥

अविद्यमानपूर्वगर्भस्येत्यर्थःनन्वागमनंविनेदंमेप्रथममागमनमितिव्यवहारासंभवात्।अनेत्येदंमेप्रथममागमनमि
त्यसंगतमतआह।बहुकृत्वइति।अनेत्येत्यस्येनःपूर्वमितिशेषइतिभावः।तथाविधत्वादिति।अविद्यमानपूर्वागमनत्वादित्यर्थः॥

कै० वि० १
१६६ परेतुपदत्तगादिपदानिअर्थशब्दसमुदायवृत्तानितस्यशब्दमात्रारूपवर्णपादात्तगाद्यवयवइत्येवव्याख्यार्थः नतुअ
द्धोर्थअपदार्थइति। तथाऽप्रतीतेः एकद्वैसूत्रंपठेत्यादिव्यवहारानापत्तेश्चएवंचार्थवतोधातोरयमेकोवर्णरूपइति
कैयटोक्तंचिंत्यं एतद्भाष्यरीत्यातस्यमुख्यव्यवहारेत्वेन व्यपदेशिवद्भावाविषयत्वात्। कैयटरीत्या अर्धार्थस्यान्य
पदार्थत्वेऽपितथैवास्तुशब्दार्थयोरभेदाद्वेशब्दोपितत्वमिति अत्रापिनव्यपदेशिवद्भावप्रयोजनम्। किंचैकाजि
तिबहुव्रीहिणाप्रथमस्यैत्युपस्थितावयवस्यविशेषणंतस्यवानर्थकत्वमित्यर्थस्योपादानत्यागावसंबद्धोएतदेवध
नयतापदंनामार्थइतिभाष्येउक्तंधात्ववत्वंतुकैयटोक्तरीत्यावक्तुंशक्यं। अतएवबहुव्रीहिशानुपपत्तिरेवव्यपदेशिव
दित्याश्रयणेपीत्यर्थस्यत्यागोपादानाभ्यांनवितव्यदेशएकाजितीजमुक्तंअत्राप्यर्थेनेतिभाष्यस्यपदादिशब्दापस्यार्थेनयुक्त
त्वादित्यर्थः। अर्थशब्दोभयवृत्तिपदत्वरूपकत्वादीत्याशयः पदंनामार्थइत्यादेरर्थोपीत्यर्थः। यथातर्हीति। यथैकस्मिंस्तत्तद्ध
र्मारोपेणयुगपज्ज्येष्ठत्वादिव्यवहारस्तथैकस्मिन्नारोपितानेकावस्थाभिः समुदायरूपत्वस्याप्यारोपेणैकाचुत्वादि
व्यवहारोपपत्तिर्द्वितीयेतृतीयेचदृष्टांतेनप्रथमेत्वुपलक्षणंचरमस्यापि। तृतीयेकदाचिच्चरममागमनमि
त्यव्यवहारात् आद्यंतवद्भावस्यशक्यो। वक्तुमित्यस्यप्रकारांतरेणापीतिशेषइत्याहुः वस्तुतस्तुद्दृष्टशेषुपातं १६६
जलोक्तंविकल्पात्मकंवस्तुशून्यमेवज्ञानमित्यारोपानुपयोगएवलोकव्यवहारवत्तेनापिशास्त्रीयोव्यवहारइतितत्वं॥॥

गोनर्दीयपदंव्याचष्टे। भाष्यकारइति। अनपेक्षितप्रतियोगिनोः अनपेक्षितपरपूर्वयोः। आद्यंतयोः आद्यंतरूपा
र्थयोः। प्रवृत्तिः आद्यंतरूपार्थयोः शब्दप्रवृत्तिरित्यर्थः। तथापीति। वस्तुतोलोकनिरूढत्वात् गौणत्वमेवात्रनास्तीत्य

भाष्यकारस्त्वाह। सतित्वन्यस्मिन्निति। नह्यनपेक्षितप्रतियोगिनोराद्यंतयोः प्रवृत्तिरित्यर्थः। त
स्मादेकस्मिन्मुख्यआद्यंतव्यपदेशोनास्तीतिकर्तव्योयोगः। पर्यायलौकिकेनव्यपदेशिवद्भावेना
द्यंतव्यपदेशएकस्मिन्नपिसिध्यति तथापिगौणत्वात्कार्येणनभवितव्यमितियस्यपक्षांतिः स्या
त्तंप्रतियोगोयमारब्धः। प्रत्ययग्निदाद्युदात्तत्वेइति। प्रत्ययस्याद्युदात्तत्वंग्नितिवाद्युदात्तत्वमि
त्यर्थः। कथंपुनर्ष्णिन्निविषयोर्द्वेइः। उच्यते। प्रत्ययस्ययदाद्युदात्तत्वंतस्यप्रत्ययोविषयइतिप्रत्य
योपितदुच्यते। यद्वाग्निदाद्युदात्तत्वंतत्ग्नितोपिसंबंधिभवतीति नास्तिषिन्नविषक्तित्वं। ऋदोरबि
त्याद्युदात्तनिवृत्त्यर्थात्पित्वात् ग्रेशादेकाचोपिप्रत्ययस्याद्युदात्तत्वंभविष्यतीतिचेत् अकारविषयमेवलिंगंस्या
दितीकारोकारयोः प्रत्यययोराद्युदात्तत्वंनस्यात्। विशेषणार्थंवापितत्करणंस्याधादिसूत्रेइत्यज्ञापकंस्यात्॥॥

र्थः। कथमितिभिन्नविभक्तिकत्वयोरसमप्रधानत्वेनुसाहित्याप्रतीतेरित्यर्थः। इकारोकारयोरिति उपाधिः चिकीर्षुरित्यादो
सामान्यापेक्षज्ञापकत्वेप्याह। विशेषणार्थंवेति। अहिंबुचकात्प्राचामदृष्टादितिफिन्। अग्निवेश्य द्वा. गोदिवत्॥॥

कै०वि०१
१६७ स्वरविधाविति नन्वस्य स्वरोद्देश्यके विधावित्यर्थो वा हलः स्वरप्राप्ताविर्त्यथो वा उभयथापि नेह प्राप्तिरिति चेत्सत्यमत्र
सूत्रे अंतरायेक्षमेवादित्वं गृह्यते अंत्यस्याच एवतद्यावर्त्यत्वे नोपस्थितत्वादिति भाष्याशयात् किंच सूत्रे एणमि
त्यादावाद्युदात्तत्वं नस्यादिति दोषः भिन्नं तु स्वध्यर्थतया सावकाशं बोध्यं ॥ क्ङिन इति। अनेकाजस्त्वस्तु चारिजिर्यादि

गार्ग्य इति। अत्र परत्वाद्यस्येति लोपे कृते आदित्वाभावात् प्रकृतेराद्युदात्तत्वं न प्राप्नोति। स्वरविधौ
स्थानिवद्भावप्रतिषेधाद्व नास्ति द्यच्त्वं। स्वरविधौ व्यंजनस्याविद्यमानत्वान्नास्ति हलपेक्षमप्यादि
त्वं। कृतिरिति। क्ङिनो नित्वं ताशो चानतिकृत्यतावित्येवमर्थं स्यात्। सो वर्यः सप्तम्यस्तदंतसप्तम्य इत्येतद
नाश्रित्ये तद्युक्तमजो षिषदिति। लिटूडूटई टीतिच ज्ञापकं सिन्न विषयमेव स्यादिति सियडुण् स्यात् ॥
यस्मिन्विधिरिति। स्वस्य च रूपस्येति नानुवर्त्तत इति प्रयोजनत्वे नोपन्यासः। अजाद्या इति त्व। सूत्र
कारापेक्षया प्रयोजनोपन्यासः ॥ वार्त्तिककारस्तु अजादीनामटा सिद्धमित्याह ॥ ॥

भ्यो नन्विधानात् क्ङिन्नावइतिनावः ननु तदंतसप्तमीत्वे गार्ग्यादौ समुदायेमुख्य एवादिः संभवतीति न दोष इत्यत आह। सौव १६७
र्य इति लेडिति। सि बहुलं लेटी तिसिषु इडई टीति न च यमरमनमामित्यत्र वलादेरित्यस्य संबंधे फलाभावात् क्यमेतत्ज्ञापकं रूपादिस्य
इति सूत्रे बलादेरित्यस्य संबंध सत्वेन मध्येपि संबंधस्यैवन्याय्यत्वात्। अत एव सप्तमे भाष्ये एकावस्तौ वलीति वित्युक्तं ॥ ॥

येन विधिरिति। तेनैव ह्रीदूदेद्द्विवचनमित्यत्र तदंतविधिरित्तिभावः। अर्थवतेति। तत्रह्यर्थस्यत्यागोपादानात्यां भेद
सुकर इति भावः इदं चिंत्यं। यद्यप्यव्यपदेशिवद्भावेना सिध्यति तथापि गौणत्वान्नेति यस्य त्रां तिस्त्रं प्रतिसूत्रारं
भ इति पूर्वग्रंथ विरोधात्सूत्रकारेण तदज्ञानात् तदुदाहरणसंभवाच्चार्थवतेति वा सहायत्वस्यैवोपलक्षणं स सहाय

अंतवदिति। येन विधिस्तदंतस्येत्यनेनैव गतेप्रपंचार्थोयमुपन्यासः। कुरुत इति। अर्थवता व्यप
देशिवद्भावात्तशब्दाकारस्यानर्थकत्वादिह प्रयोजनत्वेनोपन्यासः। आत्मामिति। अत्र द्वेअंतवत्वेउ
पयुज्यते अकारांतस्यांगस्य अतोत्यस्य दीर्घो भवतीति इष्टपकप्रयोजनोपन्यासः। एयमिति। इड्कोरू
पं ॥ दूणस्क इत्यमिति ॥ ॥

न
स्य प्रायेणार्थकत्वात् तशब्दाकारश्चा सहाय एव सहायेनावामंतत्वस्य बहुव्रीह्यर्थस्य चोपपत्तिस्तादृश सहाया
भावात् अन्यथाद्यंतवद्भावोपि न स्यात्। विजातीयकन्यादिसहायसत्वेप्येकपुत्रस्यायमेव ज्येष्ठ इत्यादिव्यवहारा
त् ईदृशस्यलेपि लोकसिद्धत्वामित्याहुः। इत्यमिति। एतिस्तु शास्तिति कपयोविधानादित्यर्थः ॥ २१ ॥ ॥ श्रीः ॥ ॥

तरप्तमपौघः॥ ॥प्रकरणोत्कर्षेणेतिप्रकरणेसंज्ञाप्रकरणेनत्कर्षेणगुरूच्चतन्यासेनेत्यर्थः।स्वार्थेइति।अनाति
शायिकस्यापिसंज्ञाविधानार्थमत्रसूत्रेसचानिर्दिष्टार्थत्वात्स्वार्थतस्यसंज्ञायांफलंचोच्चैस्तरामित्यादौकिमेतिङ
व्ययघादित्याम्सिद्धिरितिभावः।द्व्यादुरितिअत्रारुचिबीजंतुभाष्यानुक्तिः।ननुनायंतरवित्यतआह।सर्वे

तरप्तमपौघः॥ ॥आतिशायनिकप्रत्ययप्रकरणेएवतादीघःपितौघइतिवावक्तव्येप्रकरणोत्कर्षे
यासंज्ञाकरणंस्वार्थेपितरवस्तीतिसूचनार्थं तेनाल्पान्तरमितिसिद्धंभवतीत्याद्व॥ नदीतरइति।तरतेऋ
दोरबित्यप्।सर्वत्रचानुबंधाःस्मर्यमाणाएवकार्यप्रतिहेतुत्वंजनंतद्वतिघसंज्ञाप्राप्तिः।साहचर्यचेदव्य
वस्थाहेतुःशब्दोपिकृत्वोर्थएवग्रहीष्यतइतिकिंकृत्वोर्थेग्रहणेन।अप्रातिषेधइति।नप्रतिषेधइतिप्रति
षेधनक्रियानआनिषिध्यते।भाष्यकारस्तुवस्त्वर्थव्याचष्टेअनर्थकःप्रातिषेधइति।। ॥

त्र्चेति।ननुतमप्साहचर्यात्तद्धितएवतरोग्रहीष्यतेइतिनास्त्येस्सेबंतेतरेप्रसक्तिरतआह।साहचर्यमितिप्र
त्ययाप्रत्यययोरितिपरिभाषापिनाश्रितेतिबोध्यं।इह।शास्त्रे।वस्त्वर्थमितितात्पर्यार्थमित्यर्थःअसंदेहइतिवत्प्रति १६८
बंधस्याभावइत्यर्थकोनञ्समासएवंचानर्थकइतिभाष्योक्तेर्मध्यमपदलोपीसमासइतिनभ्रमितव्यमितिभावः॥ ॥

तरप्ग्रहणंतरप्शब्दऔपदेशिकउपदेशकंप्रयोजकइत्यर्थोभाष्यस्यतदाह।उपदेशः प्रयोजनमिति।प्रयोजकइत्यर्थः
नचेष्उपदेशेतरप्शब्दइतिभाष्यस्वरसादाह।उपदेशः तत्रवाभवइति।उपदेशेइतिभाष्येभवइतिशेषः सर्वेषां
वसानुबंधकग्रहणेष्वितिभाष्यंप्रकृतात्तिप्रायंशब्दमात्रग्रहणेपिस्वंरूपमित्यनेनरूपाश्रयणादितिबोध्यं।यत्रास्ये
तद्रूपंतत्रघसंज्ञेत्यर्थः एवंचोपदेशएवघसंज्ञाप्रयोगेतुस्यानिवद्भावेनसेतिबोध्यं।काल्पनिकमिति।ऋदोर

औपदेशिकमिति।उपदेशःप्रयोजनमस्यतत्रवाभवमौपदेशिकं।यत्रास्येति।अनुबंधयुक्तमित्य
र्थः नचैषइति।काल्पनिकमस्यतरस्वंनतुसाक्षान्निर्दिष्टः।समानाधिकरणेष्विति।आतिशायिक
श्चस्वार्थिकत्वात्समानाधिकरणः।यद्यातर्हीति॥ननुतार्थेरितिभवितव्यं।एवं।तर्हितीर्यतइतित
रइतिसामान्येनपदंसंस्क्रियतेपश्चात्तद्याविशेष्यतइत्यदोषः॥ ॥ ॥

वितिसूत्रपर्यालोचनावगतत्वेनानुमानिकमित्यर्थः।स्वार्थिकत्वात्प्रकृत्यर्थहितद्योतकत्वात्।समानाधि
करणाः।प्रकृत्यासमानविषयइत्यर्थःसामानाधिकरण्यंचेकविशेष्यकबोधजनकत्वमितिबोध्यं।ननुतीर्थे
रिति।ऋतःपरस्यक्तिनोनिष्ठावद्वचनान्नत्वं।सामान्येनेति।अनिर्धारितकर्मविशेषेणेत्यर्थःअतएवपुंस्त्वद्यञ्
ऊपाः पुंसीत्युक्तेः॥ ॥

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्याख्यस्य स्मारकम्

कै॰वि॰१ महिषीरूपमिवेति नन्विदमसमस्तं समस्तं वा। नाद्यः उत्तरपदाधिकाराद्रूपशब्दस्य चातथात्वादप्राप्तेः किंच रू
१६९ पशब्देनाकृत्यभिधानात्कस्याकृतिरिव महिषीति साकांक्षं स्यात्। नान्त्यः षष्ठीतत्पुरुषे वैयधिकरण्याद्बहुव्री
प्राप्तेः विशेषणसमासे तु पूर्वनिपातवैपरीत्योपपत्तिः तस्मादुपमागर्भसमासस्य विग्रहवाक्यमिदं। स च समा
सो नोपमानानि सामान्यवचनैरित्यनेन रूपशब्दस्योपमेयवाचकत्वेपि साधारणधर्मावाचकत्वात् साधार

स्त्रीलिंगं चेति। स्वार्थिकः प्रकृतिलिंगानुविधानात् स्त्रीलिंगम्। महिषीरूप
मिवेति। इवशब्दोऽस्मिन्क्रमः तेनायमर्थः महिषीइवेयमाकृतिरिति॥
तत्र सुपूसुपेति समासे कृते ह्रस्वत्वं स्यात्॥ ॥छ॥ ॥

णधर्मस्य चात्र विसंष्ठुलत्वादिः नाप्युपमितं व्याघ्रादिभिरिति। रूपशब्दस्योपमेयवाचित्वेन पूर्वनिपातवैपरीत्या १६९
पत्तेः तस्योपमानवाचित्वे तु कस्य रूपमिति विशेषणस्य सापेक्षत्वाद्वृत्तिर्न स्यादत आह। इवशब्द इति। सुप्सुपेति ह्रस्वत्वं स्यादि
ति। अप्रत्यययोरपि घत्वेतस्माद्वर्याद्वयादेः प्रत्ययस्यापि ग्रहणं स्यादिति भावः यद्यपि रूपमित्युक्ते कस्य रूपमिति अस्त्याकांक्षा तथापि प्र
धानस्य साकांक्षत्वान्न दोषः॥२२॥

बहुगणवतुडति संख्या॥ ॥ संख्यात्वेन संप्रत्ययस्य लोकत एव सिद्धेराह। एकादिकाया इति संख्यासंप्रत्ययेति
वार्तिकेति संख्येति संप्रत्यय इत्यर्थः एकादिकायाः संख्यायाः संख्याप्रदेशेष्विति शेषपूरणं बोध्यं। संख्येत्येष इ
ति नाप्यस्य संख्येत्येतच्छब्दान्निन्न इत्यर्थः शब्दार्थप्रत्ययानामितरेतराध्यासात्संकर इति पातंजलसूत्रात् एत
त्पातंजलसूत्रवृत्तावुपपादितमस्माभिः नारद इत्ययं बोधि इत्यादावप्येवमेव एवं च कर्मत्वाप्रसक्तिरेव संख्या

बहुगुणवतुडति संख्या॥ ॥ संख्यासंप्रत्ययार्थमिति। संख्याया एकादिकायाः संख्याप्रदेशेषु संप्रत्य
यार्थमित्यर्थः। ननु चेति। यथा पश्य रवत्यं देवतेति लौकिकोऽर्थो गृह्यते तथैकादिकापि संख्या ग्रहीष्यत
इत्यर्थः। कृत्रिमा। कृत्रिमयोरिति। न्यायोऽयं तथाहि सर्वार्थाभिधानशक्तियुक्तः शब्दो यदा विशिष्टेऽ
र्थे संव्यवहारायनियम्यते तदा तत्रैव प्रतीतिं जनयेति नान्यत्र। नदी योगमासीति। यूस्त्र्याख्यौ नदीति
संज्ञाविधानात्संज्ञिनो ग्रहणं प्राप्तं न तु स्वरूपस्य अशब्द संज्ञेति निषेधात्॥ ॥
शब्दजन्य इत्यर्थे संख्येत्याकारक इत्यर्थश्च एवशब्दान्वयानुपपत्तिस्तदुपादानवैयर्थ्यं चेति बोध्यं। संख्या ग्रहीष्यत इति।
सूत्रं त्वधिकसंग्रहार्थमिति भावः। न्यायोयमिति अभ्यासाम्रेडितादिसंज्ञाविषये चेतन्यायोऽप्ययोगो द्रष्टव्यः। नियम्यत इ
ति सर्वार्थबोधकत्वेपि लोके तत्रैव गृहीतशक्तिकतयान्यत्र प्राप्त्यग्रहेणाच अधिकसंग्रहार्थत्वाद् गृहीतशक्तिग्राहकत्वाद्वा
स्य नियमत्वं चिंत्यं न्यायवीजं तु प्रकरणामिति भाष्ये एव स्फुटीभविष्यति॥ ॥छ॥ ॥ॐ नमः शिवाय॥

नियमार्थमितिनियमश्चसामान्यविषयएवनकालवाचिविषयो व्याख्यानादतोगौर्यादौतेपिनदोषः नन्वनदीसंज्ञकेभ्योपि ख
लघ्वादिभ्यऋकारांतेभ्यस्यादतआह। ऋकारग्रहणेनेतिवस्तुतस्तुदोषग्रस्तनियमापेक्षयानदीशब्देकृत्रिमाकृत्रिमन्या
यबाधज्ञापनमेवन्यायः भाष्ये। तद्विशेषेभ्यस्तर्हीतिप्रायोगिकीशंकांताव्याचष्टे। गंगादिभ्यइति। अपरगंगंपरियमुनमि
त्युदाहरणे। अत्रहिटच्चिअंतोदात्तत्वं। तदभावेपरिप्रत्युपापावर्ज्यमानाहोरात्रावयवेष्विति पूर्वपदप्रकृतिस्वरत्वमि

पौर्णमासीति। नियमार्थंपौर्णमास्याग्रहायणीग्रहणमीकारांतानांस्यादितिचेत्। एवमप्यपौर्णमास्या
ग्रहायणीभ्यइतिवक्तव्यंस्यात्। ऋकारग्रहणेनचनदीसंज्ञकमेवोकारांतंपौर्णमास्याग्रहायणीशब्द
साहचर्याद्गृहीष्यते। तद्विशेषेभ्यइति। गंगादिभ्यः। यदयमिति। जित्यार्थः पाठइतिचेत्। व्यवस्थितविभा
षयाविपाट्शब्दस्यनित्यत्वंच भविष्यतीत्यदोषः। बहुवचनेति। अन्यथायनद्यांइत्यादौ यथैकवचनेन
~~निर्देशस्तथेहापि~~ निर्देशस्तथेहापिकर्तव्यःस्यात्॥

त्याद्युः। नित्यार्थइतिनदीपौर्णमासीत्यत्रान्यतरस्यांग्रहणानुवृत्तेरितिभावः। व्यवस्थितेतिअत्रचज्ञापकपरमिदमेवभाष्यमानंकेचिदस्मा
द्भाष्यान्नदीतिसूत्रेन्यतरस्यांग्रहणंनिवर्त्तयंति। बहुवचननिर्देशादेवेतितस्मादपीत्यर्थः अशब्दसंज्ञेतिनिषेधादित्यपिबोध्यं। १७०
तत्प्रत्याख्यानेत्वयमेवहेतुः अतोस्मान्निषेधान्नदीपौर्णमासीत्यादौस्वरूपग्रहणमपिदुर्लभमित्यपास्तंलक्ष्यानुसारेणातत्प्रत्याख्यानेन
सामर्थ्येनतस्यात्राप्रवृत्तेः नदीभिश्चेत्यादौतुलक्ष्यानुसारादेवार्थग्रहणेनतद्वाचकानांग्रहणमितिदिक्॥ ॥

अस्यन्यायत्वादकृतमित्यधुक्तमतआह। अनाश्रितमिति। स्वरूपेति। नचैवंबह्वादिसामानाधिकरण्यानुपपत्तिः शब्दा
र्थयोरभेदारोपेणतदुपपत्तेरितिभावः। संज्ञिनिर्देशेनेतिसंख्याशब्दबोध्यपंचादिशब्दपरेणसंख्याशब्दनिर्देशेनेत्यर्थः।
सामान्येति। अर्थशब्दोक्तसामान्यंप्रतिइहार्थायिस्येत्यस्यविशेषत्वादित्यर्थः भाष्ये ऽर्थादित्यादि। लोकेकृत्रिमग्रह
णेनकृत्रिमत्वंकारणं किंत्वन्यदेवेतिभावः अर्थः सामर्थ्यंतदेवदर्शयति। अर्थापास्येतिअस्यवाक्यस्यार्थोध्याय

नचेदमकृतमिति। अनाश्रितमित्यर्थः। उत्तरार्थंचेति। अयंहिसूत्रोपात्तः संख्याशब्दः स्वरूपपदार्थकः
उत्तरत्रसंज्ञिनिर्देशेनप्रयोजनं। इहार्थेनेति। इहार्थायिस्येतिसामान्यविशेषभावान्नयोनसत्त्वं। आतश्चेति।
इतश्चेत्यर्थः। अर्थः सामर्थ्यं यथागोपालकमानयमाणवकमध्यापयिष्यतीतियष्टिहस्तस्याध्यापना
संभवात्संज्ञिनोग्रहणं। प्रकरणंप्रस्तावः यथाभोजनप्रकरणेसैंधवमानयेतिलवणेप्रतीतिः गमनप्रक
रणेत्वश्वे। ग्रामामिति। ऋहितुमसमर्थं। पांसुलपादमिति। अविरोधितंअतएवाप्रकरणज्ञं॥

नादिरूपंप्रयोजनं एवंसंज्ञकेनभवतितत्रास्यैवसामर्थ्यमित्यर्थः। प्रकृतंवेतिइदमेवंसंज्ञकेनकर्त्तव्यमितितत्र
प्रयोजनंप्रकृतंबुद्धिस्थंभवति संज्ञायाबुद्धिस्थत्वादित्यर्थः इदमन्येषामपिपदार्थनियामकानामुपलक्षणंयद्य
पिरूढिर्योगापहारिणीत्यप्यत्रसंभवतितथापिप्रकरणादिसहकृतोयोगोपिबलवानित्यभिप्रेत्येदमेवो
क्तं॥ अन्वयमुक्त्वाव्यतिरेकेणाव्यर्थादेर्हेतुत्वंप्रतिपादयितुंभाष्ये। आतश्चेति॥ ॥७॥ ॥

कै०वि०१ उभयगतिरुभयविषयकं ज्ञानं तात्पर्यसंदेहरूपमित्याशयेनाह। किं संज्ञेयमिति। वक्तृतात्पर्यविषयसंदेहवा
१७१ नित्यर्थः नन्रूढेर्योगार्थापहारकत्वेन कथं संदेह इति चेन्न। तत्रत्युरूपं प्रतिप्रसिद्धरूढ्यर्थस्यैव योगापहारक
त्वं नान्यस्येति भावात्। तदेव ध्वनयन्नाह। साधीय इति क्रियाविशेषणमव्ययं वा सम्यगर्थकं यः स्पष्टिह स्तगमिष्यति
तद्विषयमेव तात्पर्यं ग्रहीष्यतीत्यर्थः ननु संज्ञाकरणस्य नियमार्थत्वाद्योगार्थप्रतीतिः श्रोतुस्त्रमिद्धत्यत आह।

उभयगतिरिति। किं संज्ञेयं यस्य कस्यचिन्निर्दिष्टा स्यात् उत यस्मिहस्तोस्य विवक्षितः स्यादिति संदेहवा
न्भवतीत्यर्थः। साधीयो वेति। यो मम प्रसिद्धः सोऽनेनेचोदितः न च समेव संज्ञकः प्रसिद्ध इति। एवं मन्य
ते। लोके च गोपालक शब्दः संज्ञिनि नियम्यमानः संज्ञ्यंतरं निवर्त्तयति क्रियानिमित्तं त्वर्थं न निरस्यति। तु
ल्यजातीयविषय एव हि नियमो भवति। एवमिहापीति। बद्धादय एवात्र संख्यात्वेन प्रकृता इति भावः। न यथा
लोक इति। संख्याशब्दो हि बद्धादिप्रतिपादनीय संज्ञात्वेन विनियुक्तो न त्वेकादिसंख्यानिरसनाय अधि
कार्थप्रतिपत्त्यर्थत्वादिह संज्ञाकरणस्य॥
एवं मन्यते लोक इति। इदमपि स्वरीत्या अत्र शास्त्रे प्रकृताः। बुद्धौ संनिहिताः। अनेनात्रापि प्रकरणमस्तीत्युक्तं
भवति। बुद्धिसंनिधिरेव प्रकरणं। संज्ञात्वेन विनियुक्त इति ज्ञापिताज्ञातशक्तिक इत्यर्थः अत एव न नियमार्थतेत्याह।
नत्विति तुल्यन्यायेन संज्ञासूत्रस्य नियमार्थत्वाभावः सूचितः इह। संख्याप्रदेशा अधिकार्थेत्यादिनान्वेति। भाष्ये। न यथे १७१
त्यादि। व्याख्यातृपरंपरावगतत्वव क्तृ तात्पर्यनिरुपपत्त्या प्रकरणाद्यनादरेणोभयगतिरिति भाष्यार्थ इत्यन्ये॥ ॥

कर्मणि संख्यायामिति कर्मगतसंख्यायामित्यर्थः। नवेति तस्या अद्रव्यत्वेन द्रव्यधर्मलिंगाद्ययोगादिति भावः यद्य
पि रूपवादिसत्रस्थत्वाख्यादेकत्वं क्रियायामस्ति तथापि द्वित्वाद्यन्नावद इति तात्पर्यं। कारकं। शक्तिमद्द्रव्यं साक्षात्क्रि
यायामित्यस्य क्रियायामेव न तु कर्मकारक इत्यर्थः अन्यथा साक्षात्पद प्रयोजनं चिंत्यं स्यात्। न हि धातोः परंपरया
पि कारके वृत्तिरस्ति येन तत्व्यावृत्त्या चारितार्थ्यं स्यात् इत्याहुः धातुसंज्ञा कपडं तस्य सनाद्यंता इत्यनेन साधने कार

कर्मणि द्वितीयेति ङ्याप्प्रातिपदिकाद नभिहिते कर्मणि संख्यायां द्वितीया विधीयते। न च क्रियायाः संख्या
संभवतीति सामर्थ्यात्कारकस्य ग्रहणं। कर्त्तरि कर्मव्यतिहार इति। अत्र धातोः साक्षात्क्रियायां वृत्त्या क्रियाग्र
हणं कथमेधेस्पः करणाइति। तव्यादिप्रत्ययोत्पत्त्यर्थं धातुसंज्ञा क्रियते क्रियावाचिनश्च तव्यादयः साधनेऽ
त्पद्यंत इति सामर्थ्यात्क्रियाग्रहणं। विप्रतिषिद्धमिति। द्वंद्वावयवानां प्राक्त्यनभिधायित्वादधिकरणद्रव्यं गृह्य
ते। तद्वदतिदेशोऽयमिति संख्याकार्यातिदेशोयमित्यर्थः यदि हि संज्ञा स्याद्वृद्धि नादिसंज्ञावदकाक्षराक्रिये
[redacted] तेति लौकिकार्थाभिधायी संख्याशब्द उपादीयमानोतिदेशार्थत्वमस्य बोधयति॥
केतव्यादयो इतः कारकापेक्षितक्रियावाचिन एवोत्पद्यंत इत्यन्वयः एवं सर्वसंज्ञाविषये समाधाय प्रकृतवि
षये समाधानांतरावयाह। यथेति ब्रह्मदत्त इत्युक्तिविषयस्या ब्रह्मदत्तत्वं स्फोरयितुं ब्रह्मदत्तव्यक्तिं निर्दिशति
एष ब्रह्मदत्त इति॥ ॥

कै॰वि॰१ असंख्यासंख्येत्यादेति। नियतविषयपरिच्छेदहेतुर्हि संख्या। एवं च बहुत्वादेरसंख्यात्वमिति भावः बहुत्वद्वि
१७२ त्र्यादिसंख्याव्यापकमखंडोपाधिरूपं गृह्यतेतिनन्वतिशदंतायाइति लिंगात्कल्पितोकृत्रिमा न गृह्यते तिचेन्न
शास्त्रबाधापेक्षया ग्रहणज्ञापकत्वस्यैवौचित्यादिति भावः। नैषइति। अतिशदंतायाइत्यस्य बहु
व्रीहि गर्भतत्पुरुषत्वेन संख्याविशेषणं तया विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वाच्च तत्पदजन्यो

अथवेति। गुरुसंज्ञाकरणादेकादयः संख्याशब्देन प्रदेशेषु गृह्यंतइति लिंगेनाप्यनुमीयतइ
त्यर्थः॥ अर्थवत इति नन्वयसंनिवेद्यं परिभाषोपतिष्ठतेइत्यंताच्च कृत्रिमास्तिइतेश्चातिश
ब्दोऽनर्थक एवेति तस्यैवनिषेधः स्यादित्यज्ञापकत्वं तायाः प्रतिषेधः। नैषदोषः। अतिशदं
तायाइत्युच्चारणकाल एवार्थवत्त्वस्य शब्दस्य ग्रहणमिति प्रतीतिरिति ज्ञापकत्वमेव प्रतिषेधस्य॥

पस्थितिकालेऽर्थवदनर्थकयोः संभवेन पूर्वमर्थवत एव ग्रहे निर्णीते पश्चात्संख्यापदार्थान्वयवेलायां ज्ञाय १७२
मानानुपपत्तिज्ञानेन ज्ञापकत्वमेव कल्प्यतइति भावः। एतत्पक्षद्वये महासंज्ञाया अनुग्राहकत्वं वक्तुमयुक्तं त
न्मूलकपक्षांतरस्याग्रेवक्ष्यमाणत्वात् इत्यन्ये भाष्ये। संज्ञा च नामेति। नामप्रसिद्धमेतत्। यतो न्यत्लघीयो न भवति सा संज्ञेति॥
घी

तदर्थानुगतानामिति। संख्यानकरणात्त्वसमानाधिकरणसंख्याशब्दवदभिन्ना बह्वादयइत्यर्थादिति
भावः। कथं स्यादिति। महासंज्ञाकरणस्य चरितार्थतया कृत्रिमन्यायबाधे मानाभावादिति भावः। स
र्वइति। नियतानियतसंख्यावाचीत्यर्थः। आक्षिप्यतइति। संख्येति विभक्त सूत्रइति शेषः एवं च संख्या

अथवेति। ननु महत्याः संज्ञायाः करणात्तदर्थानुगतानामुपात्तानामेव संज्ञिनां भवतु संज्ञा
यथा सर्वादीनामेव सर्वनामसंज्ञा न त्वधिकानां तेन बहुगणशब्दयोः संघवैपुल्यवचनयोः सं
ज्ञाभावः एकादीनां तु कथं स्यात्। नैषदोषः इहान्वर्थसंज्ञाकरणेन तावदनुरूपः संज्ञी सर्व
आक्षिप्यते नैकादीनां तावद्ग्रहणं भवति पश्चाद्बहुगणवतुडतीति न्यर्थादिनिवृत्त्यर्थं नियमा
र्थिया ख्यायते। अतएव संघवैपुल्यवृत्त्योर्बहुगणशब्दयोः संज्ञा न भवति॥
नकरणीभूताः संख्यासंज्ञकाइत्यर्थः संख्याकांक्षतया तद्वाचकं पदं उपस्थितान्वर्थवाचकमेव कल्प्य
तइत्ययमेवात्राक्षेपइति भावः। नियमार्थमिति बहुगणेति द्वितीयसूत्रे संख्येति वर्त्तते अनियतसंख्यावाचि
नां चेद्बह्वादीनामेवेति भावः। अतएवेति अन्वर्थत्वाश्रयणादेवेत्यर्थः। संज्ञा न भवतीति प्राप्तेरेवाभावादिति भावः॥ ॥

कै०वि०१
१७३

संख्यावाचिनोरेवेतिबहुगणयोरित्यर्थः। नियमायेति। नियमफलकइत्यर्थः परेतुपरस्परसाहचर्यात्संख्याख्या
ख्यापकार्थसंख्यावाचिनोरेवबहुगणयोर्ग्रहणंननुसंघवैपुल्यवचनयोरितिव्यर्थान्वर्थसंज्ञातस्मात्प्रदेशेषुलो
कप्रसिद्धेषुकेवलयोगार्थस्यापिग्रहणार्थमहतीसंज्ञेतिभाष्याशयः असंख्यासंख्येत्यादेतिभाष्येणाबह्वादिषु
संख्यापदयोगार्थाभावबोधनाद्वेतियोगविभागोव्यर्थः एकादिकयाचापिसंख्यायतेइत्यस्यएकादिकया

अतिदेशपक्षेपिपरस्परसाहचर्यात्संख्यावाचिनोरेवपक्षेयोदिनिवृत्तयेनियमायातिदेशः क्रियतइ
तिअतिप्रसंगोभवति। संज्ञिविशेषणेनार्थइतिभांतेत्यनेनविशिष्टंसंज्ञिनंप्रतिपादयितुमुपयोगइत्य
र्थः नचान्यार्थमिति। एकशब्दत्वदर्शनइतिभावः॥ ननुतर्हिप्रतियोगंशब्दभेदइत्याह। नखल्वपी
ति। यथागोधादेशांतरगमनमात्रेणगोधात्वंनजहातिएवंशब्दोपिरूपांतरंनगृह्णातीत्यर्थः॥ ॥

चसंख्यायतेसापिसंख्याप्रदेशेषुयथागृह्येतेतिमहासंज्ञाकरणमित्यर्थः वस्तुवाक्यालंकारेऽसावपिवाक्या
लंकारएवा पक्षेबह्वादिकयापिसंख्यायतेसंख्याप्यन्वित्वादिद्वारेणेत्यर्थः वत्वतइत्यतयोर्यदादिशब्दकति ७७३
शब्दयोर्यद्यपिसाक्षात्संख्यानकरणीभूतार्थविषयप्रश्नार्थकत्वेनप्रतिपादकत्वमुपपादयितुमशक्यंतथापि
कतीत्यत्रसंख्यानकरणीभूतार्थविषयप्रश्नार्थकत्वेनतत्त्वं एवंवत्वंतेपूह्यमित्याहुः॥ ॥

भाष्ये। संज्ञार्थमिति संज्ञाशब्दस्वरूपंतदर्थकमित्यर्थः संज्ञिनिरूपितसंख्याशब्दनिष्ठशक्यवगमार्थंस्वरू
पपरमितिभावः ननुदर्शितेत्यनेनसंख्यापिविशेष्यतइतिसंज्ञिविशेषणंसंख्याग्रहणमित्युक्तमतआह। भां
तेति। भाष्येषड्संज्ञासंज्ञीविशेष्यतेस्वेतरव्यावृत्ततयाप्रतिपाद्यतेयेनेत्यर्थः ननुस्वरितत्वबलेनानुमीयमानस्यश
ब्दांतरत्वाच्छब्दभेदेनार्थभेदस्यसत्वेननचान्यार्थमित्ययुक्तमतआह। एकेतियस्यस्वरितत्वप्रतिज्ञाततदे

संज्ञिविशेषणेनार्थइति। भांतेत्यनेनविशिष्टंसंज्ञिनंप्रतिपादयितुमुपयोगइत्यर्थः। नचान्यार्थ
मिति। एकशब्दत्वदर्शनइतिभावः॥ ननुतर्हिप्रतियोगंशब्दइत्याह। नखल्वपीति। यथागोधा
देशांतरगमनमात्रेणगोधात्वंनजहातिएवंशब्दोपिरूपांतरंनगृह्णातीत्यर्थः॥ ॥

वानुवर्त्ततेनतुतज्जातीयंशब्दांतरमितिभावः अर्थाधिकारएवचान्यथाहित्तत्तदर्थस्यचायोग्यत्वादिहासं
बंधइतिभावः। इत्याहेतिइत्याशंक्याहेत्यर्थः भाष्ये। नखल्वपीतिप्रकृतमनुवर्त्तिनादेशांतरगमनादन्यद्भवती
तिनखल्वित्यन्वयः। यथेतिसर्पणस्योभयत्रतुल्यत्वेनप्रसक्तमाहित्वंगोधायानदतिनार्थः सर्पणास्याहिश
ब्दप्रवृत्तिनिमित्तत्वाभावात्किंतुदेशांतरगमनंनान्यत्वापादकमित्यर्थइतिभावः। रूपांतरं। अर्थभेदं॥ ॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

कै०वि०१ पदानामितिद्वंद्वः शक्तिवैचित्र्यात् अनेकशक्तित्वादित्यर्थः ।एवं च पूर्वत्रोतयाशक्त्या स्वरूपपरस्यापित
१७४ त्तरत्रान्यथाशक्त्यायोग्यतावशादर्थपरत्वे बाधकाभावः शास्त्राधिकारोत्र लक्ष्यानुरोधाच्छास्त्रीयत इति भावः ॥
भवेत् द्रव्येषेतदेवं स्यादिति ।स्यादिति संभावनायां लिङ् ।भवेदिति प्रार्थनायां द्रव्यविषये पूर्वोक्तोर्थकर्तृको

अन्यार्थमपीति ।पदार्थानां शक्तिवैचित्र्यात् ।शब्द स्त्विति स्वरितत्वाद्वाक्यांतरे शब्दांतरं वाक्यार्थानुग्राहक
वस्तु प्रतिपादनयोग्यमनुमीयते साहश्यात्तु तत्वाध्यवसाय इत्यर्थः ॥ सापेक्षोऽयमिति स्त्रीलिंगेनानिर्देशः
कृतस्तत्र प्रकृतत्वादन्यपदार्थत्वेन संख्या स्वरितत्वेन विनाप्यपेक्ष्यत इत्यर्थः ।अध्यर्द्धग्रहणं चेति वा
र्त्तिके संख्याग्रहणं कर्त्तव्यमिति स्थितं तदपेक्षया समुच्चयार्थश्चशब्दः विध्यर्थं चेदं ग्रहणम् ।अध्यर्द्धशब्द
स्य ।त्रिभागचतुर्भागादिशब्दवदसंख्यावाचित्वात् ।अर्द्धशब्दश्चैकदेशवाची न संख्यावाची एकदेशादिशब्दवत्
तस्याधिशब्देन समासे कृते योगिको अर्थः प्रतीयते न संख्या ।अध्यर्द्धशूर्पमिति ।अध्यर्द्धेन शूर्पेण क्रीतमिति द्विकसं
ख्येइत्यनुवर्त्तमाने तद्धितार्थेति समासः ततः शूर्पादञन्यतरस्यामिति अञ् ष्टञो वा अध्यर्द्धपूर्वेति लुक् ।अध्यर्द्धक
मिति ।संख्यया अतिशदन्तायाः कन्निति कन् ॥
संभावितासत्ताभवत्वित्यर्थः शब्दस्तेदनयेपि न क्षतिरित्याह ॥ शब्द स्त्विति ।येन येन विशेषयोत्ति ।विशेष्य
त इति विशेषः परिच्छेद्यं ॥ विशेषकः परिच्छेदकः तत्परिच्छेदकोर्थवानन्य एव शब्दोस्त्ववतीत्यर्थः तदुपपादय
ति ॥ स्वरितत्वेनेति अध्यर्धस्यासंख्यावाचित्वमुक्तमुपपादयत्यर्द्धशब्दश्चेति ॥ ॥८॥ ॥ १७४

ननु समासकन्नसिद्धये विधीयमाना संज्ञा कथं लुको निमित्तमत आह ।समासेति ।समासपदेन ।द्विगुसमास
एव ।तस्यैव संख्यानिमित्तकत्वात् तन्निमित्तकमपि द्विगुनिमित्तकमेवेत्याह ।तेनाग्विति ।भाष्ये ।अधिकग्रहणं चे

द्विगोरित्येवासिद्धमिति ।समासविध्यर्थमिति संबंधसामान्ये षष्ठी तेन समासे विधीयमाने समासनिमित्ते वान्यस्मि
न्कार्ये विधीयमान इत्यर्थः तेन द्विगुनिमित्तो लुगपि लभ्यते ।अन्ये त्वाहुः ।अध्यर्द्धशब्दः संख्यावाच्येव तथा ।हि
गण्यते एकोऽध्यर्द्धो द्वौ अध्यर्धौ अर्द्धतृतीय इति ।तन्मते नियमार्थमध्यर्द्धस्यैव संख्यात्वेन ग्रहणं यथा स्यात्
सार्द्धादीनां मा भूदिति वाक्यभेदेन चाद्वितीयो नियमः तस्य च समासकविध्यर्थं संख्यात्वं न कार्यांतरार्थमित्य
र्थः ।अधिकषाष्टिकइति ।अधिकया षष्ट्या क्रीतमिति संख्याविशेषणमधिकशब्दो न संख्येति वचनं ।तद्धि
तार्थेति समासः प्राग्वतेष्ठञ् ।अलुकीति वचनाल्लुकि कर्त्तव्ये संख्यासंज्ञा नास्तीति ।अध्यर्द्धपूर्वेति लुङ् भव
ति ।ततः संख्यायाः संवत्सरसंख्यस्य चेत्युत्तरपदवृद्धिः ननूत्तरपदवृध्यर्थमिति वचनाल्लुङ् भविष्यति
किमलुकीत्यनेन ।नैतदस्ति अर्हत्यर्थात्परे घखुयः प्रत्ययस्तस्य लुगभावात् तत्रैवोत्तरपदवृद्धिः स्यात् ॥ ॥

तिलुग्भिन्नसंख्याकार्यसिध्यर्थमधिकग्रहणं संख्यासंज्ञायां कर्त्तव्यमित्यर्थः ॥ नन्विति ।ज्णेदादिषु तद्विधानादिति भावः ॥
परेधर्यविति तमधीष्ट इत्यादिष्विड् इत्यर्थः नियतसंख्यावाचित्वमिति ।नियतविषयपरिच्छेदहेतुत्वरूपसंख्यावाचित्वमित्यर्थः ॥ ॥

कै०वि०१
१७५

१७५

भाष्ये त्रियाष्टन इति प्राप्नोतीति । इत्येव प्राप्नोतीत्यर्थः अन्यथाऽपकर्षाभावेपि आत्वस्य वैकल्पिकतया तस्य दुर्वारत्वेन भा
ष्यासंगतेः ननु जसि ज्ञापकसिद्धात्वप्राप्तेः शस्प्राप्तेराह । यत्रेति । बहुवचननिर्देशादिति भावः षड्भ्य इत्येतत्सा
हचर्यादस्य प्राधान्ये एव प्रवृत्तिरिति भावः तस्य च यथा प्रकारांतरेण गौणेऽप्रवृत्तिस्तथा सर्वादिसूत्रे नुपपादयि
ष्यते ॥ अष्ट इत्यत्र लक्षणैकचक्षुष्कस्यात्र पूर्वपक्षित्वमिति तात्पर्यं । औश्त्वे नेति औश्त्यर्थः त्व प्रत्यय प्रयोगस्तु

यद्येवमिति हलादावुच्यमानमात्वमौजसोर्न प्राप्नोति यत्राष्टार्थस्य प्राधान्यं तत्रौश्त्वेन भवितव्यं । तत्रैव चौ
श्त्वेनात्वमनुमीयत इति जस्यप्यात्वमत्र ज्ञापकान्न प्राप्नोति । विभक्तिमात्रे त्वात्वं विधीयमानमौजसोः सिध्य
ति । अष्टन आ विभक्तावित्यत्र पदांगाधिकारे तस्य च तदुत्तरपदस्य चेति तदंतविधिसंज्ञावाद बहुवच
ननिर्देशाभावाद्गुणाभूतेऽप्यष्टार्थे आत्वेन भाव्यमित्यत्रापि सिध्यतीति प्रश्नः ॥ ॥७॥ ॥

अनुकरणात् अनुकार्यरूपे भावे इति बोध्यं । आत्वे इत्यादि भाष्य प्रयोगात् । औश्त्वेनेति तद्विधायकसूत्रस्यात्वनिर्दे
शेनेत्यर्थः अत्रा गौणे । ज्ञापकात् इति । अस्य प्राप्तियोग्यमपीति शेषः क्वचित्तु ज्ञापकादिति दृश्यते । नन्वनपकर्षपक्षेपि अष्ट १७७
नो विहितमात्वं कथं तदंते स्यादत आह । पदांगेति । बहुवचननिर्देशाभावादिति साहचर्याभावादित्यपि बोध्यं ॥ ॥

लक्षणैकचक्षुष्कस्यैवोत्तरमिति मत्वा व्याचष्टे तदत्र मा भूदात्वमि । पक्षांतरेपि अनभिधानादात्वाभाव एव बोध्यः यत्तु
भवत्येवात्रात्वमित्यर्थ इति तन्न । अपकर्षपक्षे आत्वसाधकोपायाभावेन फलभेदापत्तेः नन्वयं भाष्यार्थो न युक्तः तथा
हि सतीष्यत एवैतदित्येव ब्रूयात् । किं चाप्रयुक्ते इति वाक्यशेषोऽसंगतः प्रयुक्तेपि लक्षणानतिक्रमसत्वात् प्रयुक्तानां
हीदमन्वाख्यानमिति भाष्योक्तेश्चेत्यरुचेराह । नैव वेति । लक्षणस्याभावोऽलक्षणं तस्य योग्यता यथा लक्षणमित्य
व्ययीभावः । अप्रयुक्ते लक्षणाभावस्य योग्यता न नु लक्षणस्येत्यर्थः एवं च तादृशप्रयोगोऽसाधुरिति भावः किं च

यथालक्षणमिति । यस्य विशिष्टः प्रयोगो न स्मर्यते नापि प्रयोगनिषेध स्मृतिः तद्यथालक्षणमनुगंतव्यं त
दत्र मा भूदात्वमित्यर्थः नैव वा लक्षणमप्रयुक्ते प्रवर्त्तति प्रयुक्तानामेव लक्षणेनान्वाख्यानात् ॥ ॥

भाष्यकारस्य लक्षणैकचक्षुष्कतया इयमेव व्याख्या ज्यायसी एवं च हरदत्तादीनां प्रियाष्टन् शब्दादिषु आत्वादिप्रवृ
त्तिविचारो न्यस्य तत्प्रयोगविचारः प्रामादिक एवेत्यवधेयं । एतेन पूर्वव्याख्याने स्य साधुत्वमुत्तरव्याख्यानेऽसाधुत्वमिति
विरुद्धार्थकव्याख्यानद्वयमयुक्तं किं च अष्टाभ्य इति निर्देशात् कृताकारादेवाष्टनो जश्शसो रौशिति तद्विषयेणात्वं
अन्यथाऽष्टन इत्येव ब्रूयादिति साम्प्रतिकभाष्ये एकवचननिर्देशात् प्रधान एवौश्त्वे इति प्रश्नाशयोपि चिंत्य इत्यपा
स्तं गौणे प्रियाष्टादीनामनभिधानमित्यत्रत्य सिद्धांतानुसारेण तद्भाष्यसत्वात् । अरुच्यैव व्याख्यानांतरप्रवृत्तेश्च ॥
॥२४॥

कै०वि०१ डतिच। नाष्ये। यदितावदिति। ष्णांताच षडिति सूत्रं तत्र चकाराद्यत्नात्स्वरितलिंगासंगादनुवर्त्तमानं डतिग्रह
१७८ णं संभवत्यतद्गति भावः। नलुपातेरिति। एवं चार्थाधिकारादिहापि तद्धितस्यैव ग्रहणमिति भावः। संख्येति म
हासंज्ञासामर्थ्यात्तित्र संख्याप्रश्नविषयडतेरेव ग्रहणमित्यपि बोध्यं भाष्ये। डतिश्चेत्यत्रेति। चकारात्षट्
संज्ञानंतरं करणाच्चानेन संज्ञाद्वयस्यापि विधानमित्यर्थः। अन्वर्थत्वाच्चेति। संख्यायते नायेति हि सं

डतिच। यदितावदिति। तत्र च वतुना साहचर्यात्तद्धित एव डतिर्गृह्यते न पातेर्डतिः।
अथेति। तत्र संख्यासंज्ञाया। अनुवर्त्तनादन्वर्थत्वाच्च संज्ञायाः संख्याप्रश्नविषय एव गृह्यते न
त्वौणादिकः॥ ॥

न च तस्यार्थश्च डत्यंते संभवः संख्याप्रश्नविषयत्वं तु न तदर्थ इति चिंत्यमेतत् तस्मादुणादीनामव्युत्पन्नत्वा
न्न तत्र डतिरिति तस्या ग्रहणमित्युचितं व्युत्पत्त्वावपि पातेः कतिनापि सिध्यतीति न तत्र डति नियम इति बोध्यं। १७८
संख्याप्रश्नेति। संनियोगशिष्टन्यायाच्च षट्संज्ञापि तस्यैवेति भावः॥ २५ ॥छ॥ ॥ॐ नमः शिवाय॥ ॥

क्तक्तवतू। आनुबंधानां नित्यलुप्ततया विशेषणत्वासंभवादुपलक्षणत्वे च तशब्दमात्रस्योपलक्ष्यत्वं मन्यमानो
वार्त्तिकमारभ्य तद्दूष्यन्नाह। इहेति सारूप्यं प्रयोगे इति शेषः। मन्यत इति। निश्चिनोतीत्यर्थः नियतं संनिधानं येषामि
ति विग्रहः। कारकेति। न तशब्दमात्रं लक्ष्यं किं त्वर्थविशेषाद्यवच्छिन्नमिति भावः। तद्दर्शनादिति कालादिज्ञाना
दित्यर्थः। तत्प्रत्ययांत इति। ककारानुपलक्षितः प्रयुक्त इति निश्चिनोतीत्यर्थः। भाष्ये। नष्टं गृहमिति अज्ञात

क्तक्तवतू निष्ठा। इहानुबंधाः कार्यार्थमुपादीयंते प्रयोगस्त्वेषां लुप्तत्वान्नास्ति यत्र च सारूप्यं तत्र संदेहः। कथमस्यानुबंध
कार्यं कृतमस्य तु न कृतमिति पूर्वपक्षाभिप्रायः सिद्धांतवादी तु मन्यते। अध्रुवेणानुबंधेन नियतसान्निधाना: अर्थाः कारकका
लादयो लक्ष्यंते तद्दर्शनादनुबंधस्मृतौ च तदुपलक्षितानां कार्याणां साधुत्वं विज्ञायते तत्र यज्ञदेवदत्तेन लूनः शालिरिति क्
श्चित्प्रयुक्ते तदा लक्षणज्ञः कर्मभूतकालावगमात् क्तप्रत्ययं मन्यते यदा तु लूनवानिति प्रयोगस्तदा मेषवाचिलो
तशब्दस्तत्प्रत्ययांतः प्रयुक्त इति मन्यते। सिद्धविपर्यास इति। सिद्धो विपर्यासः संशय इत्यर्थः। इदं तत्कृतमिति। बु
द्धेरनवस्थितत्वं मनेन प्रतिपाद्यते न त्वेतत् द्विर्वचनं वीप्साद्यर्थाभावात्॥

मित्यर्थः। नष्टः प्रत्यय इति। अज्ञातानुबंधः प्रत्ययो भवतीत्यर्थः। सानुबंधकस्येति। पूर्वयः ककारवान् तस्येत्यर्थः। उद्देश।
ऊर्ध्वं देशांसिद्धा। विपर्यासश्चेति च त्वर्थे। सिद्धस्य विपर्यास इत्यर्थः यद्यपि विपर्यासो भ्रमात्मकं निश्चयस्तथा
प्ययपार्थत्व सामान्यादिह संशयो विवक्षित इत्याह। संशय इति। बुद्धेरनवस्थितत्वमिति संदेहाद्विनय इत्यर्थः। वी
प्सादिति। पदार्थविषयव्यापीच्छाप्रयोक्तृधर्मो हि वीप्सेति भावः॥ ॥

न्याष्ये।कारकेतिकालातिरिक्तक्तप्रत्ययार्थपरे।वेदिकांपुंडरीकंचेतिभाष्ये।एवंचसाक्षादितरव्यावर्त्तकंविशेषणं।स्वो
पस्थाप्यार्थद्वाराइतरव्यावर्त्तकमुपलक्षणमितिभावः।प्राकीर्ष्टेति।यद्यत्रनिघातप्रवृत्तेर्नंनिष्ठात्वकृतोविशेषस्तथा
पियन्मांप्राकीर्ष्टेत्यस्योपलक्षणमिदं।अत्रहिनिपातैर्यद्यदीतिनिघातेनिषिद्धेनिष्ठात्वद्यजनादितिनित्यमाद्युदात्तत्वं
स्यात्।असंज्ञायामपितत्प्रवृत्तिमन्यतेआदिःसिचइतिविकल्पस्त्विष्यतइतिभावः।सिचोत्रजुष्टत्वेनादर्शनादाह।आदि

प्राकीर्ष्टेति।अत्रन्यूतकालोऽस्तीतिभावः।दृश्यंतेऽन्वेतिसिजादीतिआदिशब्दःप्रकारेतत्रप्रास्थित्तघटंदेव
दत्तइतिप्रयोगेकर्त्रेकत्वाद्यवगमात्लुङ्स्त्यायंप्रयोगोननिष्ठांतस्येतिप्रतिपद्यते।अंतिघ्राशिभ्यःक्त
इत्यस्यनिष्ठासंज्ञानस्यवति।उणादीनामव्युत्पन्नत्वात्।बाहुलकाद्वाअन्यथानिष्ठात्वद्यजनादित्याद्युदा
त्तत्वंस्यात्॥ ॥इतिश्रीमद्भगवत्पतंजलिविरचितेव्याकरणमहाभाष्येप्रथमस्याऽध्यायस्यप्रथमेपादेपंचम
माह्निकम्॥ ॥छ॥ ॥

शब्दइति।अंजिघृक्षीति।यद्यप्यत्रोपलक्ष्यकालकारकाद्यज्ञानवस्तथापिगुणाभावदर्शनात्क्तोयमित्यवगतिरेवंचस
नादिरित्संज्ञकनकारोपलक्षितःप्रकृत्यपन्निवारीइच्छार्थोवासकारोभवतीत्यर्थः।अनुवादेसन्यतइत्यादौतादृशकारोपल
क्षितसकारइत्यर्थःअतएवाद्भ्वेत्यादेःसार्थक्यं।अन्यथायत्रसत्रेआङ्नतत्रवृद्धिरिष्यतेयत्रचेष्यतेप्रयोगेनतत्राङिति
द्वैयर्थ्यस्पष्टमेवेतिसर्वमवदातं॥२६॥ ॥इतिशिवभट्टसुतसतीगर्भजनागोजीभट्टवि०प्रथमस्यप्रथमेपंचममाह्निकम्॥ १७९

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यास्यस्मारकम्

सर्वादीनि॥ नन्विति आदिशब्दस्यनित्यपुंस्त्वेनएकवचनांतत्वेनसमासांतरेनपुंसकत्वबहुत्वानुपपत्तेरितिभावःप्रकृ
तेतत्पुरुषःकर्मधारयःदृष्टांतेषष्ठीतत्पुरुषः।नत्वस्येतिकर्मधारयघटकस्येत्यर्थः बहुव्रीहेरेवशेषेयुक्तिभाव॥
तत्रनपुंसकमिति।तत्पुरुषस्तुपुंलिंगइतिभावः।स्वरभिन्नानामिति।स्वरेणविलक्षणानांसरूपाणांमध्येनतरस्य

सर्वादीनिसर्वनामानि॥ ॥कोऽयमिति।ननुनपुंसकबहुवचननिर्देशादेवबहुव्रीहिनिश्चयात्समासां
तराशंकैवनास्तीतिप्रश्नानुपपत्तिःएवंतर्हि किमयंबहुव्रीहिरेवाहोस्विद्बहुव्रीहितत्पुरुषयोरेकशेषः
यथाकृतंतेभ्यःकएवादिस्स्यदितिप्रश्नःतत्रसोरूप्यार्थंसर्वश्चासावादिःसर्वादिरित्यत्रादिशब्दउपादीय
तेनत्वस्यप्रयोजनांतरमस्तीतितत्रनपुंसकमनपुंसकेनेतिवास्वरभिन्नानांयस्योत्तरःस्वरविधिःसप्ति
ष्यतइतिवाबहुव्रीहेःशेषःवक्ष्यमाणेनन्यायेनविनाप्येकशेषेणसर्वशब्दस्यसंज्ञासिध्यतीतिमत्वाह।बहु
व्रीहिरिति।एवमपिसंदेहःकिंप्राथमकल्पिकोबहुव्रीहिरथबहुव्रीहितत्पुरुषयोरेकशेषेबहुव्रीहिरितिएकं
ति।कोऽस्यविग्रहइति॥ ॥

त्रेणयस्यस्वरविधिरित्यर्थःकर्मधारयःसमासस्येत्यंतोदात्तःपरस्तुबहुव्रीहौप्रकृत्येतिपरशास्त्रेणांतोदात्तपूर्वपदइ
तिबोध्यं।तत्राद्यसर्वशब्दस्यसंज्ञानप्राप्नोतिअत्येतुसिध्यतीतिविशेषः।वक्ष्यमाणेन।तद्गुणसंविज्ञानेन।प्रा
थमकल्पिकःएकशेषनिरपेक्षत्वेनप्रथमप्रतीतःवक्ष्यमाणन्यायानभिज्ञस्यप्रश्नइतिभावः॥ ॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यास्यस्मारकम्

विग्रहप्रश्नोत्तरे तानीत्याद्यधिककथनमयुक्तमत आह। अन्यपदार्थस्येति। नेष्यत इति प्रथमांतानामन्यपदार्थप्रा
धान्येबहुव्रीहिविधानादिति भावः ननु इमपि तानीत्येव सिद्धे इमानीति व्यर्थमत आह। सर्वनामद्वयेति। सर्वनाम
द्वयोपादानेन तद्गुणसंविज्ञानं सूचयतीत्यन्वयः। प्रत्यक्षेति उद्भूतावयवभेदस्य गणपठितस्य समुदायस्येद
मा परामर्शात्तत्र च सर्वशब्दस्यांतर्भावादिति भावः गुणत्वं दर्शयति। उपलक्षणानीति। प्रकारतयान्वयीनीत्यर्थः

तानीमानीति। अन्यपदार्थस्य प्राधान्यं प्रदर्श्यते अन्यथा यथा चित्रा गावो ऽस्येति गवां विशेष्यत्वं तद्वत्तस्य
विशेषणत्वं अवगम्यते तथेहाप्यवगम्येत अत्र चार्थे बहुव्रीहिर्नेष्यते। यदा तु स्वामिनः प्राधान्यं गवां वि
शेषणभावः तदा बहुव्रीहिः। अत एव यस्य स चित्रगुरिति स्वामिनः प्राधान्यं प्रदर्श्यते तानीमानीति स
र्वनामद्वयोपादानेन प्रत्यक्षविषयत्वादिदंशब्दस्य गणपठितेषु सर्वशब्दस्यांतर्भावात्तत्र गुणसंविज्ञा
नं सूचयति। तस्यान्यपदार्थस्य गुणा उपलक्षणानि तेषामपि कार्यसंविज्ञानं तद्गुणसंविज्ञानं॥ ॥

कार्यसंविज्ञानमिति। तच्च द्वेधा। क्वचित्तु विशिष्टस्य क्रियायां संनिधानमात्रेण यथा क्रियायोगाभावेपि शुक्लवाससं १८०
भोजयेति क्वचित्तु विशेषणस्यापि क्रियायोगेन यथा शुक्लवाससं पश्येति। कार्ययत्र तद्भावस्तावित्तत्र तद्गुणत्वमित्यर्थः
फलितः एवं तद्गुणसंविज्ञाने तद्विशिष्टस्येतरान्वयः अन्यत्र तदुपलक्षितस्येत्यपि भेदः अयं शब्दशक्तिस्वभावागम्यः॥॥

अंतर्भावः कार्यित्वं। कार्यसंनिहितत्वं वा। एवं च यत्र संयोगसमवायान्यतरसंबंधेन संबंध्यन्यपदार्थः तत्र तद्गुणः अन्य
त्रातद्गुण इत्युत्सर्ग इति गोलार्थः ननु प्रकृते न संयोगो नापि समवाय इत्यत आह। इहापीति एवं च समवायेन संबं
धिनो ऽन्यपदार्थत्वेन तद्गुणत्वमेवोचितमित्यर्थः बहुवचनोपपत्तये आह। उद्भूतावयवभेद इति। अवयवगतसंख्या
रोपेण बहुवचनमिति भावः नन्वेवं समुदायस्यैव संज्ञा स्यादत आह। तस्य चेति युगपत्प्रयोगाभावात् पृथक्

तत्र चित्रगुरानीयतामिति स्वस्वामिसंबंधः इत्यर्थ इति स्वविशेषोपलक्षितस्य स्वामिन एवानयनं न तु
गवां दंडी विषाणी। आनीयतामित्यत्र तु संयोगसमवायोपलक्षणेन संबंधेन संबंधिनि कार्ये विज्ञायमा
ने उपलक्षणस्याप्यंतर्भावो भवति। इहाप्यादिशब्दस्यावयववाचित्वात् उद्भूतावयवभेदः समु
दायः समासार्थः तस्य च समुदायस्य युगपदन्यत्र प्रयोगाभावात्तदंतर्भूतानामेव पृथक्प्रयोगत्वा
त्कार्यार्थया संज्ञया भवितव्यमिति सर्वशब्दस्यापि भावसिध्यति। तथा देवदत्तशालायां ब्राह्मण आनीयता
मित्युक्ते देवदत्तोपि यदि ब्राह्मणो भवति स्वशालास्थश्चेत्तदासोप्यानीयत एव॥

प्रयोगसत्त्वाच्च कार्यार्थया संज्ञया तदंतर्भूतानामेव प्रवृत्तिरिति व्यमित्यन्वयः पृथक्प्रयोगत्वादिति पाठे बहुव्रीहेस्त्वो बो
ध्यः सिध्यतीति विनिगमनाविरहादिति भावः नन्वेवं सर्वशब्दस्य संबंधविशेष्यत्वाभावात्कथं तस्य सर्वनामत्वमत आ
ह। यथेति स्वरूपेणोपलक्षणमिति सर्वशब्दः समुदायांतर्भूतत्तया संबंधविशेष्योपि यथा देवदत्तत्वेन विशेष
णामपि देवदत्तो ब्राह्मणत्वेन विशेष्य इति भावः। अन्यपदार्थत्वादिति भाष्यस्यान्यः पदार्थो यस्य तत्त्वादित्यर्थः॥ ॥

कै॰वि॰१ ननु सर्वनामशब्दो यदि व्युत्पन्नस्तदा संज्ञोपसर्जनप्रतिषेधवार्त्तिकारंभानुपपत्तिः नो चेत्पूर्वोत्तरपदविभागाभावा
१८१ त्पूर्वपदादिति णत्वाप्राप्तिरत आह। राजेति। संतमन्वर्थसंज्ञायां। असंतं श्रुत्यरूढेरपंतरादो आश्रित्येति। द्वितीयवि
षये आरोप्येत्यर्थकं सामविशेषेरथकरणकतरणकर्त्रत्व मारोप्यसाधुत्वान्व्याख्यानं यथा सर्वार्थवाचकत्वरूपार्थ
मारोप्यप्रवृत्तेपीति न वार्त्तिकानुपपत्तिर्नापि णत्वाप्राप्तिरिति भावः ननु शब्दनित्यताविरोधात्कथमसतो णत्वस्यापा
दनमत आह। प्रयोगे चेति ननु संज्ञा चेत्कृत्रिमा तदा शब्दार्थसंबंधनित्यता हानिः संज्ञा चेन्न णत्वप्राप्तिरत आह। स

णत्वं प्राप्नोतीति। राजपुरुषादिवत्संज्ञाशब्दा अपि शास्त्रप्रक्रियायां सत्तमसत्तं चावयवार्थमाश्रित्यव्यु
त्पाद्यंत इति णत्वप्रसंगः प्रयोगे च सणत्वा अणत्वाश्च नित्या एव शब्दास्तत्र संज्ञायां सणत्वा एव साधवो
संज्ञायां त्वणत्वा एवेति शास्त्रव्यापाराणत्वं प्राप्नोत्येव सर्वार्थाभिधानयोग्यस्य च शब्दस्य शक्तिनि
यममात्रं संज्ञाकरणमिति शब्दार्थसंबंधनित्यत्वस्यापि न विरोधः॥

वोध्यति शक्तिनियमनं शक्तिसंबंधबोधनमेवेत्याहुः न च नृभोसंज्ञायामिति सूत्रे भाष्ये पदेतत्संज्ञायां विधीयते तत्र
न संज्ञायामस्ति धेयामित्यर्थः किं तर्हि तत्तत्कार्यविशिष्टेन चेत्संज्ञा गम्यत इत्यर्थ इति वक्ष्यते तश्चात्र कथं णत्वप्राप्तिः न
हि कृतणत्वेन संज्ञावगतिरत एव रघुनाथादिशब्देन णत्वमिति वाच्यम् आधुनिकविनियोगस्थले शास्त्रानुगतस्यै १८१
व विनियोग उचित इत्याशयात् अत एव महत्याः संज्ञायाः करणे एतत्प्रयोजनमिति वक्ष्यमाणं संगच्छते अनादिविनियुक्तसं
ज्ञास्थले तु यथा विनियुक्तानामेव साधुत्वमिति रघुनाथादेर्णत्वाभावो धपरिमाणसंज्ञास्तु तगवृत्तिशब्दे च न वलोपः संज्ञात्वं गापत्तेरिति दिक्॥

सौत्रत्वादित्येव कुतो नोक्तमत आह। लोकेति। साम्यं दर्शयति। सर्वत्रैवेति। निपातनं चेति। भावाभावयोरेकत्र वि
रोधादिति भावः। न त्विति। प्रयोगभेदेन च भावाभावविरोधपरिहार इति भावः भाष्ये। किमन्येपीति अन्येपि विध
यः किमेवं एवं जातीया इति वक्ष्यमाणाभिप्रायेण प्रश्नः आशयानभिज्ञ उत्तरयति। भवंतीति। यथास्यानिव

निपातनादिति। लोकेप्ययं णत्वरहित एव प्रयुज्यते तस्यात्र प्रसंगेन साधुत्वं प्रतिपाद्यते। किमेत
दिति। नभवत्वस्य साधुत्वं णत्वप्रतिषेधेत्वस्य तात्पर्याभावाद्विकल्पः प्राप्नोतीति भावः। इतरः प्र
तिषेधेन साम्यं प्रतिपादयितुं पर्यनुयुंक्ते। अथक इति। सर्वत्रैव स्थप्राप्त्यनुमानबाधः निपातनं
चापि णत्वाप्राप्त्यनुमानमिति भावः। ननु चेति। प्रतिषेधस्य हि निवृत्तावेव तात्पर्यं निपातनस्य तु तद्रू
प साधुत्वप्रतिपादनेन तु रूपांतरनिवृत्ताविति भावः। इको यणचीति। यणो हि साधुत्वं प्रतिपाद्यते नाभि
द्विनिवृत्तिरित्यर्थः। षष्ठ्यात्रेति तत्तश्च संहिताविषये स्वाभाविको प्रयोग इकः षष्ठीनिर्देशेन प्रतिपाद्यते।
यथा दर्शाणां स्थाने शरः प्रस्तरितव्यमिति न तत्र दर्भाः प्रस्तीर्यते।

स्यादेशादित्येतद्विषये स्थानिप्रयुक्तं न वृतिर्यथाप्राप्तस्यादेशाप्रयुक्तस्य निवृत्तिरिति भावः शाकतो इको यणचीति। अस्य य
दि भवंतीत्यादिः ततश्च संहितेति स्थानिनो निवृत्तिर्नामितत्साधुत्वबुद्धेर्निवृत्तिः सा च संहितायां शाकलाभावेदिति भावः
प्रस्तीर्यंत इति किंतु तत्स्थाने शराः प्रस्तीर्यंत इति शेषः तथा च स्थानषष्ठीनिर्देशेनापि यत्रापि तात्पर्यमिति भावः॥ ॥

विकल्पाइति।स्यानषष्ठ्यन्तावेनोन्नयत्र तात्पर्यान्नावादितिन्नावः।परदेशस्येति।विकरणाविधौधातोः परश्चेत्यधि
कारेणधातोःपरोविकरणःश्रयोक्तव्यइत्यर्थादितिन्नावःननुधातोःपरोविधातव्यइत्यर्थेपूर्वंश्यनिविहितेपश्चाच्छव
विस्यात्।तिङ्विकरणवत्।सार्वधातुकइतिचविषयसप्तमीस्यादतआह।धात्विति।साहाय्यकं।कार्यंसाध्यो।वि
हितं।प्रत्ययइतिशप्रूपःप्रत्ययइत्यर्थःननुश्यन्नादीनामादेशत्वेस्यानिवद्भावात्पित्वेकरोतीत्यादौविकरणस्यानु
दात्तत्वंस्यात्नचसतिशिष्टस्वरबलीयस्त्वस्यविकरणान्यविषयत्वेनोप्रत्ययस्यकथमुदात्तत्वंसिद्धांतेपीतिवाच्यं

इहतर्हि।विविकल्पःप्राप्नोतीतिन्नावःसमुच्चयस्तुनन्नवत्येकेनपरदेशस्यावष्टब्धत्वात्सार्वधातु
कयोश्यार्थाभिधानएकेनैवसाहायकस्यसंपादनात्।शबादेशाइति।श्यनश्चनिल्करणंज्ञापकंस्यानि
वद्भावान्नावस्य।तेनकरोत्युप्रत्ययस्यापित्वादनुदात्तत्वंनभवति।कुर्वतीत्यत्रश्नपूश्यनोर्नित्यमिति
नुमागमोनभवति।आदित्यधिकाराद्वा॥

सार्वधातुकस्वरापेक्षयैवविकरणस्वरस्यतेनदुर्बलत्वकथनादतआह।श्यनश्चापि ल्करणमिति नचशित्वंनियमार्थं
स्यात्।शिदेवनपिदितिशित्त्वस्यनियमार्थत्वकल्पनापेक्षयातिदेशबाधस्यौचित्यात्अतिदेशबाधश्चतवाप्याव
श्यकएवकथंचित्तुनिल्करणमितिभावःतद्धिप्रत्ययाद्युदात्तत्वबाधेनञ्नितीत्यनेनादिदत्तस्याद्युदात्तत्वायस्थानिवत्वात्
पित्वेनानुदात्तत्वेतुलसार्वधातुकस्यापिआद्युदात्तत्वशादित्यनुदात्तत्वेधातोरुदात्तत्वात्सिद्धमेवेतितद्व्यर्थंसत्ज्ञाप
कमितिभावःपरंत्वयंपाठःस्थानिवत्सूत्रस्थकैयटविरुद्धःआदित्यधिकाराद्वेतितुदतीत्यादौनित्यनुमभ्या
वृत्तयेपूर्वोक्तसमाधिरेवावश्यकःश्यपूशानोरितिसूत्रस्थश्यनग्रहणमप्युक्तार्थज्ञापकमितिबोध्यं॥ ॥ १८२

नन्वेवंशपःपरःश्नम्स्यादतआह।रुधादिभ्यइति सार्वधातुकइतिसप्तम्यारुधादिभ्यइतिपंचम्याषष्ठीकल्पना
तेषामेवात्यादचःपरःश्नमिति भावःतृणइहइतिनिर्देशश्चरुधादीनामागमित्वेलिंगं।नन्वेवंशपःश्रवणंस्यादतआ
हायथाचेति।शपइत्यस्यषष्ठीकल्पनसामर्थ्यादितिभावः।एकार्थत्वादितिअज्ञातादेरकेनद्योतितत्वान्नद्वयोःसमु
च्चयइतिन्नावःयेननाप्राप्तिन्यायेनाकजादीनांबाधकत्वेपरेणोक्तेसिद्धांतीतेनैवन्यायेननिपातनोनामपिबाधं

रुधादिभ्यःश्नमित्यत्ररुधादीनांश्रुतत्वात्तेषामेवान्त्यादचःपरःश्नम्भवतिनतुशपःयथाचन्द्रस्तोरोपध
योरमन्यतरस्यामितिरमागमोरोपधयोर्निवर्त्तकःएवंशपःश्नमइहतर्हीतिदेशात्तदाद्विरोधाभावेपिकाक
चोरेकार्थत्वाद्विकल्पएवचोद्यतेनसमुच्चयः।कर्त्तव्योत्रयत्नइतिलुपेदवश्यमइत्ययंश्लोकोऽन्यार्थमव
श्यंपठितव्यस्तेनैवसततंसंततमितिवासिध्यतिनतुनिपातनेनेत्यर्थः।सातत्यमितिवानभिधानात्प्र
त्तस्यप्रयोगान्नावःपुराणशब्देनपुरातनशब्दस्यबाधःप्राप्तःपृषोदरादित्वान्नभवति॥ ॥

कत्वमेवेत्याह।निपातनमपीतिभाष्ये।एवंदितिसततंसंततमित्युभयमित्यर्थः।श्लोकोन्यार्थमवश्यमितिएकदेशानु
मतिद्वारासातत्यइतिनिर्देशेनसएवश्लोकोज्ञाप्यतइत्यर्थः।नान्वितिनिपातनेनसततमितिनसाध्यतइत्यर्थःनन्वेवं
संततात्प्यत्रसांतत्यमित्यपिस्यादतआह।इतिचानभिधानादिति।अएवभगवतासंततमितिनसिध्यतिइत्येवोक्त
नतुसूत्रोच्चारितसजातीयंसातत्यमितिनसिध्यतीत्युक्तं।पुराणशब्देनेति।पुराणप्रोक्तेष्वित्यत्रनिपातितेनेत्यर्थः।
पृषोदरादित्वादितिएवंचतेनैवोभयोरपिसाधुत्वंनतुनिपातनेनेतिभावः॥ ॥छ॥ ॥

कै॰वि॰१
१८३

च्विप्रत्ययेति गणपठितेभ्यः संज्ञोपसर्जनानां नेदात्संज्ञायाः अप्राप्तौ प्रतिषेधानर्थक्यमिति शंका व्युदासाय नाप्योरूपात्तद्
तिभावः तत्तत्पदत्वारोपवत् तदर्थउपसर्जनत्वमप्यारोपितमिति च्विरूपपत्तिरितितात्पर्यम् ॥ पदकार्येष्विति न च संज्ञा
तथेतिभावः इदमेव वार्त्तिकं तस्य न्यायस्य पदकार्यविषयत्वे लिंगमितितात्पर्यम् । अत एवोक्तिव्यक्तपदार्थायेदु तिन्या

संज्ञोपसर्जनीभूतानामिति येविषयांतरेदृष्टास्त एवेमामवस्थां प्राप्ताइति विवक्षया च्विप्रत्ययनिर्देशः।
सर्वापदेहीति। पदकार्येषु गौणमुख्यन्यायोनतिप्रातिपदिककार्येष्वितिशंकाश्रयेचरम्यात्वेद्दुत्पत्रोक्त
मितिप्रसिद्धिवशात्संभवन्नपीहत्वनोक्तः समासकृत्तद्धिताव्ययसर्वनामासर्वलिंगाजातिरेकद्रव्योपनि
वेशिनीसंज्ञेत्येतदनपेक्ष्यसंज्ञाप्रतिषेधः तत्रह्यपेक्षिते परत्यात्पूर्वसंज्ञाबाध्यतइति संज्ञासंज्ञयावा
धनात् प्रसंगाभावः ॥ ॥

यस्याप्यत्राप्रवृत्तिरितिबोध्यम् ।अत्र न गुणयोगेन लाक्षणिकत्वरूपं गौणत्वमत आह। प्रसिद्धीति तन्मूलं प्रसि
द्ध्यादिकमत्रापि तुल्यमित्यर्थः।समासेति। अनेन क्रमेणैताः संज्ञा एकसंज्ञाधिकारे कार्याइतिवक्ष्यत्वात्कडारसूत्रेतद १८३
नपेक्ष्यायं संज्ञाप्रतिषेधइत्यर्थः एकद्रव्योपनिवेशिनीतिलौकिकसंज्ञालक्षणमेतेन सर्वनामादिसंज्ञास्वनेकविषयादिकमव्याप्त
मितिपरास्तं ॥ ॥ ७ ॥ ॥

नन्विति सर्वस्य गणे पाठाभावात्संज्ञासूत्रे विशेष्यासंनिधाने न तदंतविधेरभावाद्बहुकथमत्र प्राप्तिरत
आह। प्रयोजनमिति शब्दरूपं विशेष्यमादाय तदंतविधिरितिभावः एतत्तदंतविधिफलत्वेन परमसद्
त्यस्योपन्यासः क्वचिद्दृश्यते स वित्यः त्यदादीनामद्व्यादावंग विशेषणत्वमूलक तदंतविधिनास्ति

अतिसर्वायेति। प्रादिसमासोयं। बहुव्रीहौ संज्ञाप्रतिषेधात् प्रयोजनं सर्वनामाव्ययसंज्ञाया
मिति तदंतविधिः परमसर्वस्मात् इत्याद्यर्थ आश्रितः पाठादिति। यथा तिङो गोत्रादीनीत्यत्र
कुत्सनाभीक्ष्ण्यग्रहणं गोत्रादिपाठविशेषणं तथेहापि सर्वापि सन्निवेशो विशेष्यते असंज्ञोप
सर्जनानि सर्वादीनि गणसन्निविष्टानि नान्यानीत्यर्थः। किमविशेषेणेति। किं यत्सर्वेषां सर्वा
दीनां कार्यं तदर्थमेवेति प्रश्नः॥ ॥
त्वात् स्मैभावे तु विहितविशेषणमिति बोध्यं। यथेति। यथा तत्सूत्रं निघात विधायकं वाक्यभेदेन पाठ
विशेषणं च तथेहापीत्यर्थः यद्यविशेषेणात्यस्य सर्वकार्यार्थत्वादिनेत्याह विशेषेणेवेत्युत्तरं यथा संग
तिरत आह। किं यत्सर्वेषामिति। यद्यपि स्मायाद्यपि न सर्वेषां कार्यं त्रिभिन्नवद्दोदावसंभवात्। तथाप्यंतर्गणा
नाश्रयणेन विधीयमानकार्यमिति तदर्थो बोध्यः॥ ॥

कै॰वि॰१
१८४

न संनिवेशेनेति। न सामान्यविशेषसंनिवेशापेक्षमित्यर्थः। अविशेषेणेति। संज्ञोपसर्जनयोरपीत्यर्थः। नग
णेति। गणपठितत्वाकारेणेत्यर्थः नाप्ये। सर्वादीनां तदंतत्न्र्तानां त्यदादिप्रकृतीनां। आनंतर्येण। गणपठितत्वा
कारेणेत्यर्थः। साध्ये। आनंतर्योपलक्षिततत्यदादीनामित्यादिरूपेणेत्यर्थः। किंप्रयोजनमिति किंप्रयोजन
मित्यर्थः असंज्ञायामिति योगविभागो गणसूत्रे नाष्टाध्यायीस्थे तस्य जसि विभाषा विधायक

विशेषेण चेति। चशब्दाद विशेषेणेत्यर्थः यङ्गणपाठोपलक्षि[illegible]कार्यं त्यदादीनाम्ः। अदु
तरादिभ्य इत्यादि तदर्थमपि पाठविशेषणमित्यर्थः यत्तु कार्यं युष्मदस्मद्भ्यां ङसोशित्यादि
स्वरूपमात्राश्रयं न सन्निवेशणपेक्षं तदविशेषेण भवति। तत्राहि न गणपठितयोर्युष्मदस्मदो
र्निर्देशोऽपि त्वौणादिकयोः॥ ॥

त्वादिति बोध्यं। स्वमज्ञातीत्यादावपीदमनुवर्त्तत इति न दोषः। सर्वादीनीत्येवं यानीति। सर्वादीनि श
ब्दरूपाणि इत्येवं सर्वविश्वेत्यादिक्रमेण यानि पंचत्रिंशदनुक्रांतानि तानीत्यर्थः। प्रत्याख्यायत इति॥ १८४
स्त्रीप्रत्ययकरणस्य मपि सूत्रं तत्रानुपयुज्यमानं कार्यांतरार्थं परिभाषारूपं ज्ञातव्यमिति भावः॥ ॥

नन्विति। अन्यथा समासप्रत्ययविधौ तदंतविधिप्रतिषेधात् प्रत्ययग्रहणे च प्रत्ययग्रहणपरिभाषया
प्रत्ययांतादेव स्यान्न तु तदंतादिति भावः। अनेन चोत्तरत्र तदंतविधौ ज्ञापितेऽनुपसर्जने निषेधात् प्रधान
एव सफलवानिति प्रधानेनेत्युक्तं। कौंभकारेय इति। आर्यंतत्वेन कारभशब्दादेव ङीपि कारीशब्दस्यैव स्त्री
प्रत्ययांततया तत एव स्त्रीभ्यो ढकितस्यैव वक्योगत्वा वृद्धिः स्यात्। न कुंभस्येति भावः तदंतविधौ तु

अनुपसर्जनादिति न तु प्रधानेन तदंतविध्यर्थो योग आरब्धः कौंभकारेय इति यथा स्यादिति।
न चाणि तिकृत्ग्रहणं तद्धितोप्यण स्तीति। नैतदस्ति। स्त्रीप्रत्यये चानुपसर्जनेनेति तत्सादि निय
माभावात् कारशब्दादपि ङीपि कुंभकारीशब्दात्। स्त्रीभ्यो ढगिति ढक् भविष्यति॥ ॥

समुदायान् ङीपि तत एव वृद्धि समुदायस्यांगत्वात् कुंभशब्दे वृद्धिः सिध्यति न नु कृत् ग्रहणे गतिकारक
पूर्वस्यापि ग्रहणात् तदंतविध्यभावेपि कौंभकारेयः प्रसिद्धोऽत आह। नचेति कृत एव ग्रहणे सानत्कृदक
त्ग्रहणद्भ्रूति भावः। नैतदस्तीति। न च कदाचित् कारीशब्दादपि स्यात् कुंभेनेकार्थ भूतस्य निष्कृष्यापत्येना
न्वयाभावात्॥ ॥

नन्वेवं कुंभकारीत्यत्र ङीवेव न स्यात्। कुंभेनैकार्थीभूताणं तस्य केवलस्य स्त्रीत्वेनायोगात्। अत एव सू
त्रारंभेन कदाचिदपि कारशब्दान्ङीप्। यस्य च विशिष्टस्य स्त्रीत्वेन योगो न तदणंतमिति चेन्न। अमहत्पूर्व
ग्रहणेन तदंतग्रहणाज्ञापनात्। न चैवं बहुकुरुचरेत्यादावितिप्रसंगवारणायायं निषेधोपि सार्थक इति वा
च्यं। टिड्ढाणञित्यादौ उपात्तस्य टिदादेरेव स्त्रीत्वेन विशेषयेनादोषात्। पूर्वत्रोपात्तं तदंतं च स्त्रीत्वेन वि
शेष्यते। उत्तरत्र चोपात्तमेवेत्यत्र व्याख्यानमेव शरणमिति वदंति। परे तु प्रत्याख्यायते इत्यस्य वार्त्तिकस्ये
ति शेषः अनुपसर्जनग्रहणमनर्थकं प्रातिपदिकेन तदंतविधिप्रतिषेधादिति हि तत्र वार्त्तिकं तद्रीत्या ऽ
स्य तेन सिद्धिरित्याशयः अनुपसर्जनादिति किमर्थं बहुकुरुचरा तदंतविधिनाप्राप्नोति अतउत्तरं पठति
अनुपसर्जनग्रहणमनर्थकमिति तत्र भाष्यकृदवतारयोनात्र त्यभाष्येण च तस्य वार्त्तिकस्य सिद्धांतत्वप्र
तीतेः यत्तु तदुत्तरं वचनद्वयं ज्ञापकं तु पूर्वत्र तदंताप्रतिषेधस्यातिधीवरी पूर्वसूत्रनिर्देशो वा पिशलाब्रा
ह्मणीति तत्त्वाचार्यदेशीयस्य। तत्राद्यस्य पूर्वत्र तदंताप्रतिषेधेपि उत्तरत्र तदंतविध्यभावेन बहुकु १८५
रुचरादाव प्राप्त्यास्य सार्थक्यानुपपादनात् दुक्तित्वं। अंत्यं तु स्त्रियामित्यस्याविशेषणत्वात् स्त्रि
यां यो विहितद्त्यादिना भाष्य एव दूषितं तेनाद्यस्यैव वार्त्तिकस्य सिद्धांतत्वबोधितं इदंतर्हि प्रयोजनं प्र

धानेन तदंतविध्यर्थमिति तु तत्र भाष्यकृता स्वयं सूत्रप्रयोजनमुक्तमिति न विरोधः अयं हि तत्र भाष्याश
यः अनुपसर्जनस्त्रीप्रत्यये तदादिनियमाभावेपि कदाचित्कारीशब्दादपि स्यादिति पक्षे कुंभकारेय इत्य
स्यापत्तिः यदुक्तं कुंभेनेत्यादि तत्तुच्छं तिष्ठ ष्यापत्ये नैकार्थीभावाभावेपि समुदायेनैकार्थीभावे ऽवयवेना
पि तस्यैव सत्वात् सामर्थ्याक्षतेः विशिष्टसंबध्य पत्ये विशेष्यसंबंधस्याव्याहतत्वश्च अनभिधानेन प्रत्याख्या
नं तु न चमत्कारि अत एव परमगार्ग्यस्यापत्यमित्यर्थे तदेकदेशगार्ग्यशब्दात्प्रत्यये परमगार्ग्यायण इति
येन विधिरिति सूत्रे भाष्ये उदाहृतमिति तत्रैव निरूपयिष्यामः न च तदंतविधावपि व्यपदेशिवद्भावेन
केवलादपि ङीप् दुर्वारः अनुपसर्जनादित्येतत्सामर्थ्येन व्यपदेशिवद्भावाप्रवृत्तेः मुख्यापदेशिनोऽभावे
एव तदतिदेशप्रवृत्तेश्च। न च स्त्रीप्रत्ययेषु तदादिनियमाभावेन कारीशब्दस्यापि स्त्रीप्रत्ययांतत्वा
नपायात्तस्मादपि कदाचित् ढक् स्यादेवेति वाच्यं। यतः प्रत्ययग्रहण इति नियमेनाधिकस्यैव व्यावृत्ति
र्न न्यूनस्य। अस्य युवापत्यम् इञः एरपत्यमित्यर्थे यञितोश्चेति फकोनापत्तेरेवं च तन्निषेधेनानेन त
स्यैव संग्रहो न त्वेतद्व्यावर्त्यस्य न्यूनस्य। अयमधिकारो प्यत्रार्थे ज्ञापक इत्याहुः॥ ॥

एकपदत्वेनुद्देश्यविधेयत्वानुपपत्तेराह। सुपामिति। अअअदित्यत्र अद्इति लुप्तपंचम्यंतं। तदाह अका
राद्दिति। अकारांताद्दितिसाध्येंतग्रहणं तु फलितार्थपरं यथाकथंचित् नत्वत्र तदंतविधिरितिभ्रमितव्यं

अनुपसर्जन अअदिति। सुपांसुलुगिति षष्ठ्यालुक् अअअदिति अकारेणाकारात्काराै विशेष्येते अका
रात्परौ यावकारात्कारौ तावनुपसर्जनस्येत्यर्थः पंचम्या अदित्ययं तु युष्मदस्मद्भ्यामनकारांताभ्यां वि
धीयत इति परिभाषानुपस्थानादुपसर्जनाभ्यामपि नवतित्यदादीनामइत्यय मकारात्परस्य हलः स्था
ने विधीयेत इति अकारांतात्परो अकारो भवतीति परिभाषोपस्थानादतितदित्यत्र न भवति एवं तु
प्रियो द्वावस्येति बहुव्रीहौ कृते अकारांताद विधानात् परिभाषानुपस्थानादत्वं प्राप्नोति। तदोः ससावि
ति चसत्वमविशेषितमित्युपसर्जनस्यापि प्राप्नोति। तत्रायं समाधिः त्यदादीनामइत्यत्र त्यदादि
षु परिभाषोपस्थानादनुपसर्जनानां तेषां ग्रहणं तत्साहचर्यात् द्विशब्दस्तथाविध एव गृह्यते सत्ववि
धौ च तथाविधानामेवानुवृत्तिरित्यत्रापि न दोषः अतिसर्वायेत्यादौ त्वविशेषकार्यमपरिहृतमेव॥ ॥

विशेष्यासंनिधानात् प्रायेण साध्येपि अकारात्कारात्कारावित्येव पाठः शेषे लोपस्यांत्यलोपत्वपक्षे विधानोत्तरमका १८६
रात्परत्वसंभवादाह। विधीयत इति तदुक्तं नाष्ट्यध्याष्यमाणावितिअपरिहृतमेवेति एवं चैतदपरितोषाद्भाष्येपक्षा
तरमिति नावद्इति केचित्॥ ॥

परे तु इदं समाधानं सर्वाद्यानंतर्यकार्यार्थं प्रतिषेधो वक्तव्य इत्यस्यैवार्थस्य डतरादिविषयेनस्य प्रधानेपि तदंते
प्रवृत्तिरिति विशेषं बोधयन् तद्द्वारक युक्तौ चोपसर्जनेपि प्रवृत्तिरित्येव रीत्या तत्फलकत्वाभावमुपसर्जनप्रति
षेधस्य बोधयितुमेकदेशी पक्षांतरमादाऽथवेति। अंत्यं समाधानद्वयं तु साधारणमित्याहुः स्वार्थद्वारेणेत्यादेर्वि
वरणं। तदर्थगतेत्यादि। गृह्यमाणविभक्तेरिति संबंधसामान्ये षष्ठी तेन विभक्तौ विधीयमानत्यदाद्यत्वस्यापि

गृह्यमाणविभक्तेरिति। गृह्यमाणानां त्यदादीनां चार्थद्वारेण संबंधिनी या विभक्तिस्तदर्थगतसंख्या
कर्मादिवाचिनी तस्या इत्यर्थः। यद्येवमिति गृह्यमाणात् या विहिता विभक्तिरित्येवं संबंधमन्वानस्य
प्रश्नः आर्थः संबंधोऽत्रे गृह्यत इत्युत्तरे त्वभिप्रायः यद्येवं पचकाः शकुनय इति कनः स्वार्थिकत्वाज्ज
सो लुक् प्राप्नोति। उच्यते। कनिकृते शब्दांतरत्वान्नांतत्वाभावान्नायं षट्संज्ञक इत्यदोषः युष्मद
स्मद्भ्यां ङसोऽशित्यत्र त्वंगेन विभक्तिर्विशेष्यत इत्युपसर्जनाभ्यामपि सिध्यति॥

संग्रह इति भावः षट्त्र्यद्इति षष्ठ्यर्थे पंचमीति मन्वानः शंकते। यद्येवमिति। कनः संख्यायाः संज्ञासंघेत्यनेन वि
हितस्य। कनीति। कनिकृते कनंत एव संख्यावाचीन प्रकृतिः स च ननांत इति षट्त्वाभावात्ततः परस्य जसो न
लुगित्यर्थः। षट्त्र्यद्इति पंचम्येव षड्भ्यः परयोः प्रत्यासत्त्या षडर्थगतसंख्याभिधायिनो र्लुगित्यर्थः इति भा
वः युष्मदित्यादि सिध्यतीत्यंतग्रंथोत्र पुनरुक्तः अनुपदमग्रे वक्ष्यमाणत्वात्॥ ॥छ॥ ॥

परंतु गृह्यमाणविभक्तेरित्यस्य गृह्यमाणाद्विहितविभक्तेरित्येवार्थः अदड्विषयमेतत्। कतरांतस्यानन्तिधानो मन्तिप्रेत्य तत्राददड्भाव एवेष्टइत्यभिप्रेत्य वातुल्यन्यायात् षड्भ्य इत्यत्रापि विहितविशेषणमेवेति तत्रातिप्रसंगं शंकते। यद्येवमिति परमपंचेत्यादेर्लोके गणनायां व्यवहाराभावेन षड्त्वाभाव इति। लुगप्राप्तिरिति प्रश्नः संख्याप्रकारकसंख्येयविशेष्यकबोधजनकत्वेन विशिष्टस्यापि षट्त्वमस्त्येव। गणनायां

प्रियसक्थ्नेति सक्थिशब्दः शकटावयववचनोत्रेति बहुव्रीहौ सक्थ्यक्ष्णोरिति समासांतो न कृतः। प्रकृतविभक्ताविति। अंगार्थसंबंधिन्यां विभक्तावित्यर्थः तत्रापीति गृह्यमाणविभक्तेतिसप्तमीनिर्दिष्टे यदुच्यत इति च॥

प्रसिद्धानामेव संख्यावाचिनां ग्रहणमित्यत्र न मानमित्युत्तरं पंचम्यंतस्यत्वदुक्तसंबंधेन विभक्त्यान्वयो दुरूपपाद आह तौमानाभावश्च षट्प्रधान इत्यस्य त्वदुक्तिमतषडर्थप्रधानोऽतः समुदायोपि षट्संज्ञ इत्यर्थः पंचम्यंतस्थलेपि विहितत्वसंबंधेनान्वय इत्याशयेन शंकते। इह तर्हीति वैषम्यमुपपादयन्स्वाशयमाह। इहतावदित्यादिनेति भाष्यार्थमाहुः। शकटेति। स च तस्यांगमिति भावः अंगार्थेति प्रकृतशब्देनांग एतत्रापीतिवक्तव्ये तच्छब्दनिर्देशाद्व्यवहितपरामर्शोपि नाऽव्यवहितस्य चेत्याह। गृह्यमाणेत्यादि॥ । १८७

अर्थद्वारकमिति। उत्तरादिभ्यो विहितो धर्मत्वप्रतिपादकस्वमोरित्यर्थः तदर्थकप्रत्ययविधाने धर्मस्यापि विधानमस्तीत्यन्निमानः उत्तरादिभ्य इत्यस्य पंचम्यंतत्वे धर्मतुन्निन्नविभक्तित्वादिति भाष्यविरोधः। परंतु विधानस्य सर्वथानाश्रयणो नार्थद्वारकं विधानमाश्रयितव्यमिति स्वग्रंथविरोधस्तस्माद्विहितविशेषणमिति यथाश्रुतमेव भाष्यं परमकतरदित्यत्राददादेशेन भाष्यांतरं मानमस्ति प्रकृतभाष्यं तु विपरीतं तदभावबोधकमेवेति शब्दामालिकाः त्यदादिप्रकृतिकविभक्तावित्यर्थमत्वाशंकते। यद्येवमिति। उक्ताशयेनाह। त्यदादिप्रधान इति अंगस्येति सू

उत्तरादिभ्यो यो विहित इति। अर्थद्वारकं विधानमाश्रयितव्यं। तेन परमकतरदित्यत्रापि न वाति। युष्मदस्मद्भ्यां ङसोऽशित्यत्र तु प्रकरणे अंगेन विभक्तिर्विशेष्यते अर्थद्वारेण युष्मदस्मद्भ्यां तु परत्वमात्रेणैत्वात्ति युष्मदित्यादावपि कार्यं भवति॥ ।

त्रेतो भिस ऐसित्यादो विभक्तित्वादसंबंधमाशंक्यांगनिमित्तयो भिसिति संबंधं वक्ष्यति तेन न्यायेनात्रापि संबंधसंभवादियमेकदेशयुक्तिस्तस्माद्भाष्यानुसारात् षड्भ्यो उत्तरादिभ्य इति सूत्रद्वये विहितविशेषणं भाष्यसंमतं तत्स्यार्थस्य लक्ष्यविरोधेन भाष्यकृता दूषणाकरणादित्याहुः। भाष्ये अकारविषयेपि समाधानं वक्तुमाह। इहेति। इहतावदिति। लक्ष्यानुसारश्च तत्र तत्र तथा तथा व्याख्याने बीजं अंगस्य विभक्तावित्यादेश्चांगार्थगतार्थप्रतिपादकविभक्तावित्याद्यर्थः पंचम्यंतत्वेन तथान्वयस्य दुरुपपादत्वादिति भावः॥ ॥छ॥ ॥

कै०वि०१ तत्र समासेपीति उत्तरपदार्थप्रधानत्वादितिभावः अतिकतरदित्युक्तरीत्याचिंत्यमेव अत्रापिपक्षे अतिसर्वायेत्यादौ दोषएव। परमसर्वतदृत्यादिसिद्धये नदंतस्यापि सर्वनामत्वावश्यकत्वेन सर्वनाम्नोविहितस्य ङेः स्मैट्
१८८ त्यर्थेपि स्मैत्वावस्यदुर्वारत्वात् अतोप्येकदेश्युक्तिरियं पक्षद्वयमतः सर्वसाधारण्यां समाधिमाहन्नाष्ये। पर्वा
नेदमितिद्वंद्वेचेत्यादिनिश्च सर्वादित्वस्यैव निषेधस्तत्त्व युक्तकार्याभावेपर्यवस्यति। एवं किकल्पोपीत्यभिमानः
ननुसर्वार्थवाचकत्वं नपूर्वादिशब्दानामित्यसंगतमेतदत आह। स्वविषयेति। लोकनिरूढप्रवृत्तिनिमित्तेन

अतिसइतिशोप्सनः सइतिप्रादिसमासः नञासमासेप्युसः अषट्अकतरदितिन्न
वति। सर्वेषांयानीति। स्वविषयापेक्षयासर्वनामत्वबोध्यं यथागोत्वादेः स्वविषयापेक्षं
सर्वगतत्वं नतुसर्वादीनिपरस्परंपर्यायतां यांतिभिन्नार्थत्वात्॥ ॥छ॥ ॥

याअभिधेयाव्यक्तयस्ताः स्वविषयः ननुसर्वादिगणपठितानांशब्दानांसर्वेषांसर्वार्थकत्वेनपर्यायत्वाद्
पायंव्याख्यानंक्लेशोत आह। स्वविषयेति। नत्वितिनन्वेवंघटादिशब्दानामपिस्वविषयापेक्षसर्वनामत्वात्
घटायेत्यादौ स्मैभावापत्तिरितिचेन्नतद्विधायकेषुसर्वनामग्रहणसामर्थ्येनसकृद्गृहीतशक्तै १८८
वस्वप्रवृत्तिनिमित्ताश्रयविरुद्धानेकजातीयार्थबोधकानामेवसर्वनामपदेनग्रहणात् एतदेवध्व
नयितुंसर्वेषांनामानीतिबहुवचनात्पूर्वपदकोविग्रहो दर्शितोभाष्य॥ ॥छ॥ ॥

संज्ञोपसर्जनत्वेपिसंज्ञात्वेकद्रव्यनिष्ठत्वान्नसर्वेषांनामोपसर्जनेमिपिपदांतरार्थसंसृष्टार्थवृत्तित्वान्नप्राधान्ये
नसर्वेषामुपस्थापकं नामपदस्वारस्येनतथैवजातादित्यर्थः उपसर्जनांशेविशेषइत्यविशेषणेदृत्यर्थः भा
ष्ये। एतेषांचापीतिदूषणांतरं। एतेषांचापि। घटादिशब्दानामपि। एकैकस्य। तस्यापि। सासविषयः सर्वाद्यर्थोवि
षयः। तस्मिन् तस्मिन्विषये। सर्वाद्यर्थरूपेविषये। योयः शब्दो। घटादिशब्दो वर्त्ततेतस्यतस्यघटादिशब्दस्यस

एतेषांचापीति। ततश्च सर्वस्मिन्नोदनइत्योदनशब्दस्यापिसर्वनामकार्यं
प्राप्नोतिसामानाधिकरण्यादनयोः ननुप्रतिनियतवस्तुगतानिनिवेशितत्वा
च्छब्दानां सर्वत्वमोदनशब्देनाभिहितं। ओदनत्वमपिसर्वशब्देनेति। कु
तोयंप्रसंगः तत्रेदंदर्शनं॥ ॥

र्वाद्यर्थेवर्त्तमानस्येत्यक्षरार्थः तद्व्याचष्टे। ततश्चेति। पदैः पदार्थानभिधायाकांक्षादिमूलकशक्तिवशात्संसृष्ट
वाक्यार्थप्रतीतिर्जन्यतइत्यभिहितान्वयवादेशंकते। नन्विति। गुणद्रव्यादिसमुदायात्मकेवस्तुनिप्रतिनि
यताये भागाः प्रवृत्तिनिमित्ता स्व्यास्तदभिनिवेशित्वात्तद्वाचकत्वाच्छब्दानामित्यर्थः योग्येतरान्विते
पदानांशक्तेः स्वार्थवत्पदांतरार्थोपिस्ववाच्यइत्यन्विताभिधानमाश्रित्यपरिहरति। तत्रेति॥ ॥

कै०वि०१
१८० अवग्रहः क्रोडीकारः न प्रतिपद्यते। निश्चिततत्पेतिशेषः रूपसादृश्यादिति ओदनव्यतिरिक्तार्थान्वययोग्यसर्वशब्द
रूपस्य तुल्यत्वादित्यर्थः। तत्प्रतिपत्त्यर्थं। निर्धारितविशेषप्रतिपत्त्यर्थं। अपरे तु पदे पदैकदेशप्रयोगवत् यदा स
र्वस्मिन्नोदनेइति वाक्ये प्रयोक्तव्ये ओदनेइति वाक्यैकदेशः प्रयुज्यते प्रकरणाच्च तत एव पदात्तादृशवाक्यार्थबोध
स्तत्रदोषइतिनोऽप्याशयः यथा च पदशक्तिग्रहकाले पदैकदेशस्यापि तत्र शक्तिग्रहइतियस्य प्रायां कैयटेनोक्तं

सर्वशब्दे ओदनार्थावग्रहेण प्रवृत्त ओदनशब्दोपि सर्वशब्दार्थावग्रहेण प्रतिपत्तात् केवला
त् सर्वशब्दात् विशेषं न प्रतिपद्यते रूपसादृश्यात् नाप्योदनशब्दादिति तत्प्रतिपत्त्यर्थमुभयो
पादानं तत्रैकस्य सर्वनामकार्यं स्यवतिनापरस्येति प्रमाणाभावादतिप्रसंगं तङ्कावितः॥ ॥७॥

तथा वैयाकरणमते विशेषणविशेष्यभावे वाक्यस्य शक्त्यंगीकारेण तत्र तत्तत्पदालिंगिते समुदितस्य शक्तिग्रहका
लेऽवयवभूतैकैकपदस्यापि तत्र शक्तिग्रहेपौकैकपदादपि तादृशविशिष्टार्थबोधइति इग्यणइति सूत्रे भाष्ये ध्वनि १८२
तं आकांक्षावादे च मंजूषयां निरूपितमित्याहुः॥ अतिप्रसंगं तङ्कावितइति। न च सर्वनाम्नः स्मेइत्यादौ स
र्वादेः स्मैइत्याद्येवसूत्राणि संत्विति न कृत्स्नादिषु दोषः अपाणिनीयत्वापत्तेः भाष्ये। एवं तद्युक्तयमिति॥ ॥

सहेति। एकैकस्योद्देश्यत्वं विधेयत्व स्तत्त्वात्सह विवक्षाभावइत्यर्थः अर्थद्वयबोधेच्छया एकस्य सकृदुच्चारणा
मिह तंत्रं अतो उच्चारणं तंत्रेण वोध्यबोधस्तु पुनरनुसंधानेनेत्याशयेनाह। वृत्तिर्वेति आवृत्तिश्चेत्यर्थः। प्रत्या
ख्यातमिति लौकिकप्रयोगांगत्वेन न निराकृतमित्यर्थः। प्रसिद्धप्रवृत्तिनिमित्तेति। तच्च सर्वशब्दस्य थ्यवत्वं।

एकशेषनिर्देशइति न नु सहविवक्षाया अभावात् कथमेकशेषः एकशेषफलत्वात्तत्र न्यायआ
वृत्तिर्वैकशेषशब्देनोच्यते। अथवा आकृत्यभिधानपक्षे एकस्यैव प्रयोगोस्तिद्वे प्रत्याख्यातमेकशे
षशास्त्रं संज्ञापरिभाषावच्छास्त्रप्रक्रियासंपादनार्थं नवतीति सहविवक्षामंतरेणापि भवत्येकशेषः।
संज्ञोपसर्जनेचेति। यदा सर्वशब्दः संज्ञात्वेन विनियुज्यते तदा प्रसिद्धप्रवृत्तिनिमित्तपरित्यागेन स्व
रूपमात्रोपकारी प्रवर्त्ततइति विशेषणएवावतिष्टते उपसर्जनमपि जहत्स्वार्थं अजहद्वातिक्रांतार्थ
विशेषणतामापन्नमतिक्रांतार्थविशेषणतामापन्नमतिक्रांतार्थवृत्तिभवत्यतिसर्वायेत्यत्र वाक्येन
संसृष्टार्थत्वात् स्वार्थमात्रप्रतिपादयतो न विशेषेऽवस्थानं॥

इदमुपलक्षणं। अनेकार्थसाधारणशक्तिग्रहसंस्कारेण स्वविषयाणां सर्वेषामर्थानां प्राधान्येन बोधकत्वं सर्वनामत्व
मित्यस्यार्थस्य। स्वरूपमात्रोपकारीति स्वरूपमात्रप्रवृत्तिनिमित्तकइत्यर्थः। अतिक्रांतार्थविशेषणतामिति। एवं च प्रा
धान्येन सर्वार्थोपस्थापकत्वमिति भावः जहत्स्वार्थत्वे तु सर्वोपस्थापकत्वमेव नेति बोध्यं॥ ॥७॥ ॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्याख्यस्य स्मारकम्

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्याख्यस्य स्मारकम्

कै॰वि॰१
१९०

न्नाष्ये। अथवा महतीति। अयंभावः अनेकार्थसाधारणशक्तिग्रह सहकारतः प्राधान्येन स्वविषयसर्वार्थोपस्थितिज
नकत्वसमानाधिकरणसर्वनामपदवत्वेन बोधकमहासंज्ञया तादृशसर्वादीनामेवगणेनुकरणं तत्र संज्ञायामन्वाभा
वः स्पष्टएव। उपसर्जनस्यापिन प्राधान्येन तदुपस्थापकत्वं नामपदस्वारस्येन तथैवजाभात्। उपसर्जनं हि द्वृत
रविशेषणात्तयैव स्वार्थोपस्थापकं। सर्वादीनितदंतानि च सर्वार्थवाचकत्वसमाधिकरणसर्वनामपदवंतीत्यर्थः।
सूत्रस्य तदंते च तत्प्रधानसमासेऽवयवीयतादृशशक्तिसहकारेण स्वविषयसर्वबोधकत्वं विशेष्यतयास्से वे

यतोनलघीयइतिशब्दस्यव्यवहारोलघुः ततोपिलघीयोनाम। तत्रगुरुसंज्ञाकरणात्सर्वादीनां विशि
ष्टधर्मोनुमीयते। नूनमेतानिसंज्ञाप्रवृत्तिनिमित्तेन सर्वनामत्वेनयुक्तानियतस्तदनुरूपातेषां संज्ञाक
तेतिसर्वनामकार्यमंतर्गणकार्यं च सर्वनामत्वयुक्तानामेवभवतिनसंज्ञोपसर्जनानां॥ ॥ ॥

तिदिक्। ततोपिलघीयोनामेति। संज्ञेत्यर्थः तन्नामसंज्ञायतो न्यत् लघुतरं नास्तीत्यन्वयो भाष्ये।
यद्वीसंज्ञा च नामेतिपर्यायप्रदर्शनं। तच्च यतोनान्यद्ध्रधीयस्तत एवं च संज्ञायां संवृतिः शब्दव्य
वहारत द्ध्रधीयस्त्वसिद्धं। लघ्वर्थमित्यस्य लाघवेन शास्त्रप्रवृत्त्यर्थमित्यर्थः ननु न्वर्थसंज्ञात्वं ना १९०
म योगरूढत्वं तत्र योगार्थस्य रूढ्यर्थे नैवान्वय नियमात् पृथक्‌उद्देश्येनानन्वयान्न कथं सर्वा
र्थवाचकानामेव संज्ञेत्यत आह। अनुमीयत इति। नूनमेतानीति गणेपाठितानीत्यर्थः॥ ॥

न्नाष्येऽयोभस्येति। उभयतद्धत्यादेरुभयशब्दपाठेनैवसिद्धेरितिभावः। ननु टाबंते सर्वनाम्नः स्यादित्याद्यन्य
सर्वनामकार्यसंभवो भस्येवेत्यत आह। टाब्विषयत्वमपीति। अन्यभाववृत्पत्र हेतुत्वेनोपादानादितिभावः एवं
चोभयशब्दः केवलद्विवचनविषयष्टाभ्भहितद्विवचनविषयोवेत्यर्थइति टाप्ग्रहणमनुवादमात्रं नापूर्वमिति
तात्पर्यं द्विवचनटाब्विषयत्वेउपपत्तिमाह। तत्रेति द्वित्रिभ्यामिति सूत्रस्थवेत्यस्यास्वरितत्वादेवानुवृत्तौत
पप्रस्थातिकत्वेनायचः तद्धिकल्पेनैववाक्यसिद्धौ फलाभावेन महाविभाषायाअप्यसंबंधसिद्धौ प्रत्ययांतरत्व

अन्याभावद्वृति। टाब्विषयत्वमपिनद्विवचनादन्यत्र बोध्यं तत्रोभादुदात्तो नित्यमित्यत्र नित्यग्रहणस्येदं
प्रयोजनं वृत्तिविषयेउभयशब्दप्रयोगोमाभूत् उभयशब्दस्यैव यथास्यात्। इत्युभयपुत्रइत्यादिभव
ति। द्विदंष्ट्रादिभ्यश्चेत्यत्र तु निपातनाद्‌भावाद्वित्यादयः साधवः॥ ॥ ॥

पक्षेतन्निवृत्तोदोषाच्च नित्यग्रहणंयोगविभागेन स्वार्थिकानादेशभूतायच्प्रत्ययांतरविधायकमितिभावः अ
त्र चानित्यशब्दस्य वीप्सार्थविरोधाद्विकल्पाननुवृत्तिः। अयमप्याद्युदात्तएव प्रत्ययसंबंधोदात्तग्रहणान्वृत्तेः। वृ
त्तिविषयेइति अतएवोभोभाभ्यासस्येतिनिर्देशः संगच्छते इदं च सूत्रयोगविभागस्यैष्टसिद्ध्यर्थत्वात् उभावितिनिर्देशाच्च उ
भयोन्यत्रेतिवार्त्तिकाच्च द्विवचनाश्रयणंयत्र तत्रैव प्रवर्त्ततेनान्यत्र तेन नातिप्रसंगः द्विवचनविषयत्वादितिभाष्य
य स्य द्विवचनसत्वेएवोभशब्दः साधुस्साधुरित्यर्थः द्विवचनासत्ताववृत्तिविषयएवेत्याशयेनकैयटे वृत्तिविषये इत्युक्तं॥

कै॰वि॰१ कदृत्तानीमिति। अस्योभशब्दस्यार्थप्रतिपादकः कः शब्दोऽन्यत्र तसिलादिविषये द्विवचनाभावे न वर्ततीत्यर्थः। उभयोन्यत्रेति द्वि
१९१ वचनविषयत्वाभावसंभावनायामिति भावः लुक्विषये लुकाविषयस्येवापहारान्नदोषः संभावनानिवेशात्त्रोभयस्यपा
गभावेप्युभयइत्यादिसिद्धिः अन्यथोभात्तासिलादेः कर्तुमशक्यतया द्विवचनस्य लुगभावेन तद्विषयस्यैवसत्वेना
यजनापत्तौ उभयइत्याद्यसिद्धिः म यत्तु यद्यत्र तसिलादिस्यात् तर्हि लुगपिस्यादितिसंभावनया विषयाभावसंभा
वनास्त्येवेति न दोषः इदमेव ध्वनयितुं विषयपदमुपात्तं। उभयेति वार्त्तिके उभयशब्देन स्वार्थिकायजंतस्यावयव्य
र्थकायजंतस्य च ग्रहणमिति भावः। रूपे इति नन्वकचि उभशब्देन तद्विशिष्टस्य ग्रहणादुभयकावयवोयस्येत्य

कश्चेदानीमिति। रूपे स्वरे च नास्ति विशेषः। अवग्रहे च नास्त्यादरो न हि लक्षणेन पदकारा अनुवर्त्याः
उभकाभ्यां हेतुभ्यां उभकयोर्हेत्वोरिति षष्ठी तृतीये सिद्धे निमित्तकारणहेतुषु सर्वासां प्रायदर्शनादिति वचनात्॥

ये उभकयोर्मणिरिति प्रयोगः सिध्यति केतुनेति फले विशेषः स्पष्टः एवमज्ञातो भयोर्घटइत्यर्थे अकचि उभक
घटइति रूपं। केऽयचि उभयकइति स्यादिति रूपे विशेषः स्पष्ट एवेति चेन्न। भाष्यप्रामाण्येनानभिधानाद
त एव हरिणा उभयोन्यत्रेति वार्त्तिकमूलकं तत्रोभयस्य द्विवचनटापूर्वलोपश्च यस्येति व्याकरणांतरसूत्रमुदा १९१
हृतं॥ तन्मते ह्येषां प्रयोगाणामभावः स्पष्ट एवेति बोध्यं। स्वरे चेति। चित्स्वरप्रत्ययस्वराभ्यामुभयत्राद्युदा
त्तोदात्तत्वस्यैव सिद्धेरिति भावः उभकाभ्यामित्यादि वचनादित्यंतो ग्रंथप्रक्षिप्तः पुनरग्रे दर्शनात्॥ ॥

श्रूयमाणइति। विषयशब्दमभ्योयमर्थः श्रूयमाणत्वं च साक्षाद्भावरूपादौ। व्यवहितद्विवचनपरस्य साधुत्व
वारणाय कविषये इति। एवं चैतद्वचनाकरणलाघवार्थमुभयशब्दपाठ इति भावः न्याय्यो एवमाप्यपीति टापाव्यव
धानादिति भावः। अंतरेणपीति दीर्घतद्विशिष्टस्यांतवद्भावेनोभशब्दत्वमिति भावः। अवंतादेकवचनाद्या

उभशब्दोयमिति द्विवचनेऽनंतरे श्रूयमाणे उभशब्देन साधुना भाव्यं न लुप्तेन व्यवहितेके पुनः
सतीति पूर्वस्य द्विवचनस्य लुप्तत्वात्परस्य केन व्यवधानात् तत्र कविषये व्यवहितद्विवचनवि
षय उभशब्दः साधुर्भवतीति वक्तव्यं। यथैव तर्हीति ननु द्विवचनटाब्विषयत्वादित्यत्र टाप उ
पात्तत्वात् चोद्यानुपपत्तिः एवं तर्हि टाब्विषयत्वमेकवचनबहुवचनयोर्मा भूदित्येतदर्थमाप्य
पि द्विवचनपरता वक्तव्येत्युक्तं। अवचनादिति। स्वार्थिकत्वाट्टाप उभार्थस्याहानादापि सिद्धा द्विव
चनपरतेत्यर्थः॥ ॥
पन्निस्तुनेत्याह। स्वार्थिकत्वादिति एवं च तत एकवचनादौ द्विवचनविषयत्वं कथमित्ति न वक्तव्यमिति भा
वः। किं वक्तव्यमेतदित्यादि रंतादिवद्भावेनेत्यंतो पाठः अवचनादापीत्यस्य वक्तव्यत्वाभावेन किं वक्त
व्यमिति प्रश्नासंगतः तथाप्त्रमममूलको वा प्रश्न इति बोध्यं॥ ॥छ॥ ॥ ॐ श्रीसायनमः॥

द्यर्थेति। कृत्रिमाकृत्रिमन्यायस्य तु नेह प्रवृत्तिः तस्य इह शास्त्रेनाश्रयणस्य संख्यासंज्ञासूत्रे भाष्ये उक्तेः अ
स्य लोकसिद्धव्यवस्थाबोधकत्वेन तत्र न्यायाप्रवृत्तेश्चेति भावः ननूभकावित्तिवदुभतद्दत्याद्यपिप्रसज्ये
तेत्यत आह। उभयतद्दत्यादि। तयोरव्ययत्वेन विभक्त्यंतीय स्वार्थिकत्वेन वाधिकरणापादानशक्तिविशेष्य
कबोधजनकत्वात् द्विवचनत्वंच संख्याप्रकारकसंख्येयविशेष्यबोधजनकत्वं। अतो द्विषयोद्वृत्तिविषयः।

केपितुल्यमिति। द्विवचनविषयत्वादित्यत्र द्विवचनशब्देन प्रत्ययो न गृह्यते किं तर्हि द्व्यर्थाभि
धानसमर्थ इत्यर्थः। उभयत उभयत्रेति त्रतसोरव्ययत्वात् द्वित्वाभिधानसामर्थ्यं नास्तीत्यभेदवि
ष उभयशब्द एव प्रयुज्यते न तूभशब्दः॥

उक्तमर्थं प्रश्नपूर्वं व्युत्पादयति भाष्ये। कथं स्वार्थिकादितियतः स्वार्थिकाः प्रकृतितो विशिष्टा अन्यार्थविशेष्य
कबोधाजनका अतः प्रकृतिर्गृह्यते नेनेति प्रकृतिग्रहणं तेन प्रकृतिभूतो न शब्दः स्यात् केण द्विवचनशब्देन तत्प्र
कृतिकानां स्वार्थिकानां कादीनामपि ग्रहणमित्यर्थः तेनोभयत इत्यादेर्व्यावृत्तिः प्रकृतिग्रहणेन त्वनेन कृ
त्रिमाकृत्रिमन्यायाप्रवृत्तिर्ध्वनिता द्विवचनं वटाभ्यां साहचर्यात् प्रत्यय एव गृह्यते। एतदर्थमेव टापूग्रहणं
तेनोभयोरूभाविति त्र समासे भवत्येवायचू इत्याहुः॥ ॥७॥ ॥ ॥ १८२

एवं प्रत्याख्यातइति। किंच अकच्मात्रार्थत्वे उभाव्ययसर्वनाम्नामकजित्येव पाठेनास्तिद्वे संज्ञाप्रयोजके गयो
पाठो व्यर्थः साहचर्यात्त्रि संज्ञादिव्यावृत्तिरिति बोध्यं। इदं त्विति भाष्ये आदिपदसंग्राह्यमित्यर्थः। भावतायु
निरिति सति पाठे त्यदादीनि चेति रूपत्वे उदीचां वृद्धादिति फिञ्। नवइयङिति। विभक्वेयोश्चटेरिति

एवं प्रत्याख्यातोकजर्थ उभशब्दस्य पाठः सर्वनाम्नस्तृतीया चेति षष्ठी तृतीयार्थः पाठ इति केचि
त्। निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति वचनात्तदर्थोपि पाठोन कर्त्तव्य इत्यन्ये। अप्य
भवतइति। अनकारांतत्वात्स्मायाद्यभावात्प्रश्नः शेषइति। पाठेसति त्यदादित्वाच्छेषो भवति।
तृतीयादयोपीति। निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमित्यनपेक्ष्यैतदुक्तं। इदं तु प्रयोजनं।
नवइयङ् नवन्मयः पूर्वनिपातश्च नवन्मित्रः नवतध्वकछसावितितृद्धत्वात् वकछसो गुणवच
नसंज्ञाबाधनं चान्नवतोभावोभावत्यमिति भाष्यत्॥७॥

चेन सर्वनाम्नोनुकर्षणादद्यादेशः। नवन्मये नित्यंवृद्धेति मपटूभवान्मित्रेव बहुव्रीहौ सर्वनामसंख्ययो
रिति पूर्वनिपातः। भवतष्ठगिति शत्रंतनिवृत्तये ष्टग्रहणात्तत्रानुवर्त्तत इत्यर्थः। गुणवचनेति एक
संज्ञाधिकारे सकलप्रातिपदिकविषयगुणवचनसंज्ञातः परा सर्वनामसंज्ञेति भावः॥ २७॥ ॥

विभाषादिक्समासेबहुव्रीहौ॥ ॥एकस्मिन्निति। सर्वत्र मा सत्त्वात्प्रतिषेधे विकल्प वैयर्थ्यं। सर्वत्र वा विकल्पे भावा
भावयोस्तेनैव सिद्धत्वात्प्रतिषेधानर्थक्यमिति तयोरेकविषयत्वासंभव इति भावः। भाष्ये। गुपदिष्टे इति दिक्शब्दो च्चार
णेन विहित इत्यर्थः। बहुव्रीहावितिशेषः। व्याप्यधर्मातिदेशो व्यापकधर्मस्याप्यतिदेशात्समासो व्ययमत आह। मुख्य इ
ति दक्षिण्याः स्येइति आबाधे चेति द्विर्वचनबहुव्रीहिवद्भावौ। नावयवानामिति। नबहुव्रीहावितिवद्वंद्वे चेत्यपीति ने
त्यर्थेन। यद्यपि द्वंद्वेपि तद्भूतावयवभेदसमुदायस्य प्राधान्येन तत्प्रतिबहुव्रीहेरिव द्वंद्वस्य गुणत्वेन तदप्राप्तेरयमेवो

विभाषादिक्समासेबहुव्रीहौ॥ ॥दिक्ग्रहणमिति। एकस्मिन्विषये विकल्पप्रतिषेधयोरसंभवात् सा
मर्थ्याद्विषयभेद आश्रयितव्य इति प्रश्नः वचनमंतरेणाभिमतो विषयभेदो न लभ्यत इत्युत्तरं। समासे एवे
ति मुख्य इत्यर्थः अन्यस्तु तत्कार्यं जायत व्यपदेशं लभत इत्यमुख्यः। दक्षिणोत्तरपूर्वाणामिति द्वंद्वे चे
चेत्यनेन सर्वाद्यंतस्य सर्वनामसंज्ञाप्रतिषेधो नावयवानामिति। सर्वनाम्नो वृत्तिमात्र इति पुंवद्भावः॥ ॥

चितस्तथापि त्यदादीनां द्वंद्वाभावेनादंतेकाकचो र विशेषेण फलाभावात् अन्यपर्यायत्वछब्दस्य सर्वनामत्वेन भा
नं बह्वसंमतत्वात् गणोतत्पाठस्य विभाषाजसीत्यस्यासंगतेश्चेति भावः एवं चेदं सूत्रमुपसर्जनप्रतिषेधानु
वादकमेव सूत्रकृता तदनभ्युपगमाद्वाकृतं ततः अत एव कुक्कुटमयूर्यावित्यादावनुपसर्जनह्रस्ववारणाय द्वं १०३
द्वेनेतिवचनमारब्धं गोस्त्रियोरिति सूत्रे भाष्ये इति बोध्यं। पुंवद्भाव इति इदं चिंत्यमाग्रहणेन सिद्धेः॥ ॥

ननु यथा बहुव्रीहौ द्वंद्वे चेत्यप्राप्तावपीयं प्रवर्त्तते तथा द्वंद्वे नबहुव्रीहावित्यप्राप्तेपीति किमुच्यते न चाप्राप्ते इती
त्यत आह। अयमत्रार्थ इति। एवं नवाप्राप्ते इत्यस्य भाष्ये बहुव्रीहावित्यादिः द्वंद्वे चेत्यस्य तु द्वंद्वे इत्यादिः एवं
च बहुव्रीहौ सर्वत्र निषेधप्राप्तिर्द्वंद्वे चेत्यस्य सर्वत्र प्राप्तिर्जसि विभाषया बाधादिति भावः। सर्वः स्वविषय
इति। सर्वो दिग्बहुव्रीहिरित्यर्थः। नव्याप्त इति। सर्वो दिग्द्वंद्व इति शेषः युक्त्यंतरमप्याह। यदि वेति।

येन नाप्राप्त इति। अयमत्रार्थः नबहुव्रीहावित्यनेन सर्वः स्वविषयो व्याप्तः द्वंद्वे चेत्यनेन तु न
व्याप्तः विभाषा जसीति जसि विकल्पविधानात् यदि वा नेन द्वंद्वे विभाषा स्यात् जस्यनुवाददोषः
प्रसज्येत बहुव्रीहौ त्वनुवाददोषमजस्मानाकृतार्था सती परत्वादियं विभाषा द्वंद्वे चेत्यनेन बाध्यते॥

भाष्ये। पापूर्वासोत्तरेति यद्यपि वाक्ये यत्तच्छब्दाभ्यामुद्देश्यविधेयत्वं प्रतीयते या पूर्वत्वप्रकारकज्ञान
विशेष्या सा प्रसिद्धोत्तरा यस्या इत्यर्थात् एवं चोत्तराशब्दस्य पूर्वनिपातः प्राप्नोति तथापि समासे तदप्र
तीत्या पूर्वपदस्य न विशेषपर्यंतलक्षकत्वेन गुणवाचकत्वात् विशेषणत्वेन पूर्वनिपात इति बोध्यं॥ ॥

के॰ वि॰ १
१०८ त्वेतेहि दिक्शब्दोस्तीति नचशेषग्रहणेनानेकग्रहणेनवासिद्धेरुभयोपादानेनपुनर्विधानद्वारा सर्वत्रविशेष
विहितत्वात्सोपिप्रतिपदोक्तः स्पष्टंचेदमान्महतइत्यत्रभाष्येइतिवाच्यं। पूर्वशब्दउत्तरशब्दः समस्यतेइत्येव
विधानकल्पनेपिदिक्शब्दः समस्यतइत्येवंविधानकल्पनेमानाभावेनतत्रादिक्शब्दाभावादितिभावः भाष्ये।

लक्षणप्रतिपदोक्तयोरितिदिक्समासइतिव्यपदेशोदिङ्नामानीतिविहितस्यन्याय्यस्तत्रहिदि
क्शब्दोस्ति॥ वस्त्रांतरेति। उपसर्जनप्रतिषेधोवार्त्तिककारस्यसूत्रकारस्यनबहुव्रीहाविति
त्यारंभादितितन्मतेनेदंप्रयोजनमुक्तं॥

अवयवभूतस्यापीतिप्रधानाप्रधानन्यायेनास्यनस्यात् अस्यसमूहंप्रतिगुणत्वादितिभावः तदेतदवयवपदेन
सूचितं। समूहावयवत्वाद्वर्त्तिपदार्थस्येतिबोध्यं। वसनशब्दोगृहवाचीतिनैकशेषः। अंतशब्दस्यसर्वनामत्वेपिपरनि १०८
पातोराजदंतादित्वात्बोध्यः तन्मतेनेतिकिंचावयवयोसर्वनामत्वेपिद्वंद्वस्यतत्वाभावेनसर्वनाम्नो विहितत्वाज्जसोनदोषइत्ये
कदेश्युक्तिरिदंभाष्यं॥ २८॥

नबहुव्रीहौ॥ ॥नियमः कथमितिसंख्यायाअपितेनपूर्वनिपातविधानादितिभावः। प्राप्तेइतिसप्तमीविशेष
णइत्यनेन। नैषइति। लक्ष्यानुरोधादितिभावः नचैवंवार्त्तिकेसंख्याग्रहणंव्यर्थंविशेषणत्वादेवतस्यपूर्वनि
पातप्राप्तेरितिवाच्यं॥ परिच्छेदकत्वरूपविशेषणतायाअन्यत्रापिसंभवात्भाष्येवृत्तिकारोक्तं

नबहुव्रीहौ॥ ॥प्रियविश्वायेतिप्रियशब्दस्यविशेषणत्वात्पूर्वनिपातमन्यतेग्रन्थायेति। सं
ख्यायाः संख्येयपरतंत्रत्वाद्विशेषणत्वंसर्वनाम्नएवेतिनियमः। कथमितिचेत्। उच्यतेविशे
षणत्वात्संख्यायाः पूर्वनिपातेप्राप्तेएवमर्थमुपसंख्यानंस्यात्सर्वनामसंख्ययोः संनिपातेसर्व
नाम्नएवपूर्वनिपातः स्यादिति। वक्ष्यत्येतादिति। नैषवाक्यार्थोयस्त्वयाकल्पितइत्यर्थः। व्यंज
नांतेष्विति। उपलक्षणमेतत् द्विकपुत्रोद्विकिपुत्रइत्यत्रापिविशेषदर्शनात्। कथंपुनरिति॥
अंतरंगत्वात्संज्ञानिमित्तेनाकचाभाव्येपश्चात्पदांतरसन्निधानेवर्त्तिपदार्थविशेषणान्यपदा
र्थविवक्षायांबहिरंगेनबहुव्रीहिणेत्यर्थः॥
सूत्रमाह। नखल्वपीति॥ अस्यार्थस्ययथालाभस्तथावक्ष्यते॥ बहिरंगव्युत्पादनायपदांतरेत्यादि।
वर्त्तिपदार्थविशेषणेति। बहुव्रीहिः बहुव्रीहिणेतिततोबहिरंगबहुव्रीहिनिमित्तकेनानिषेधेनेतिशेषः॥ ॥

सामान्येनेति। नलुग्विषयमेवेतिभावः उत्तरपदग्रहणं चात्र ज्ञापकं अंतर्वर्तिसुपाप्रत्ययपरत्वेनैव सिद्धेरित्यादिस
प्तमे निरूपयिष्यामः गोमत्प्रियइत्यत्र लुकाहल्ङ्याब्ादिलोपो बाध्यते ते ननु मा ही यौ नेतिभाः भाष्ये। ननु वेहापीति
वैयधिकरण्येन संबंधाश्रयणे सामर्थ्यादंतरंगस्यापि निवृत्तिरित्यर्थः प्रथमार्थे सप्तम्याश्रयणेन सामानाधिकर
ण्येनैव संबंधो न तु विद्यत्यध्याहारेणेत्याशयेनाह। अस्त्यन्यदिति। अत्र हीति बहुव्रीहेर्विनिवृत्त्युत्पत्तौ सर्वनामका
र्यस्मायादिप्राप्तेरितिभावः तत्रावयवनिषेधसामर्थ्यादंतरंगस्यापि बाध इति तात्पर्यं। ननु एतत्प्रकरणस्थस

अंतरंगानपीति। प्रत्ययोत्तरपदयोश्चेति सामान्येन ज्ञापकं बहिरंगोपि समासाश्रयो विधिरंतरंगं
बाधत इत्यस्यार्थस्येतिभावः। क्रियते तत्रेति। लुग्विषयमेव तज्ज्ञापकमित्यर्थः। अस्त्यन्यदिति।
अत्र हि विधिप्रतिषेधौ समानकालौ कार्यकालत्वात्संज्ञायाइति मन्यते। अयं खल्वपीति सूत्रोपारूढ
एवायमर्थ इति प्रतिपादयति॥ ॥

प्तमीनिर्देशः प्रथमार्थाः अत एव द्वंद्वे चेति निषेधः समुदायस्यैव। एवं च वाच्यवृत्त्या सर्वाद्यंतस्य निषेधो न लस्य
तइत्यत आह भाष्ये। अयं खल्वपीति एतेन बहुव्रीहावित्यत्र चिकीर्षितइत्यध्याहारेण सिद्धे बहुव्रीहिपदस्य लक्षणा
प्यर्थेति परास्तं। तद्व्याचष्टे। सूत्रेति। भाष्ये एकपद्यमेकार्थीभावः एककारकशक्तियोगो वा एकविभक्तित्वं वा १९५
र्थः तादर्थ्यात्ताच्छब्द्यं यतयः लक्षतेतस्येदंग्रहणमित्यन्वयः। तद्यत्र तादर्थ्यादिति पाठः क्वचित्। तत्र बहुव्रीह्य
र्थवाक्ये संज्ञाया अप्राप्त्या तत्स्य पदपर्यंतं लक्षणा बोध्या। तदेतद्बहुव्रीह्यर्थानि पदानीत्यनेन सूचितं॥ ॥

ननु वाक्ये निषेधश्चेत् अहकंपितेति प्रयोगो न स्यात् किंच सुपरत्वाभावात्त्वादेो न स्यातामत आह। प्रयोगेति। तदेतद्वृत्ति
कारोक्तं दूषयति। अकच् स्वरौत्विति एषा स्मृतिः अविशेषात्सर्वप्रकरणाविषया। सूत्रप्रत्याख्याने तिसमुदाये नि
षेधस्य महासंज्ञया उपसर्जनप्रतिषेधेन वा सिद्धत्वादितिभावः एवं च महासंज्ञासिद्धार्थानुवादकं प्रपंचार्थं

अप्रयोगस्तमवाप्रियांत्प्रक्रियावाक्यं तत्रायं प्रतिषेधो न लौकिके वाक्ये प्रयोगार्हतस्य पृथगेव प्रयोगा
त्तादर्थ्याभावात्। गोनर्दीय आहेति। सूत्रप्रत्याख्यानमेतत्। तथोत्तरं हि मुनित्रयस्य प्रामाण्यं स्व
रः स्वांगशिटामदंतानामिति आद्युदात्तत्वं। आद्य पूर्वायेति। अबहुव्रीह्यर्थवचनं। न चात्रेति।
प्राधान्येनेतिभावः अत्र पूर्वत्वमाद्यत्वस्य विशेषणं यथाति पूर्वायेति पूर्वार्थोत्तिक्रांतस्येत्युपस
र्जनत्वात्पूर्वार्थस्य न भवति संज्ञा मयूरव्यंसकादित्वात्समासः॥

सूत्रं एवं द्वंद्वे चेत्यपि सूत्रमिति सूत्रहृदयं। यथोत्तरमिति। उत्तरोत्तरस्य बहुलक्ष्यदर्शित्वात्। स्पष्टं चेदं धि
न्विकृण्व्योरितिसूत्रे भाष्ये एतेन सूत्रस्योर्थक्यायवृत्तिकारोक्तं व्याख्यानमेव प्रबलमित्यपास्तं शिडिति सर्वना
मस्वरोदाहरणं विश्वप्रियायेति। भाष्ये। भूतपूर्वस्येति। भूतपूर्वार्थकपूर्वाद्यंतस्य समासस्येत्यर्थः। प्राधान्येनेति प्रयोग
काजरूपस्यावधेज्ञाटितिबोधेन व्यवस्था सत्वेपि पूर्वार्थस्योपसर्जनत्वात् न भवतीतिभावः॥२९॥ ॥

तृतीयासमासे॥ ॥अयमपि समुदायनिषेध एव सर्वाद्यंततृतीयासमासः सर्वनामनेत्यर्थः। प्रयोगार्हस्येति। मा
सेन पूर्वाय देहीति भाष्योदाहरणादिति भावः भाष्ये तादर्थ्यादिति च लोकदृष्ट्योक्तं लोको हि तस्मादेव वाक्यात् तादृत्ति
निष्पन्नामन्यते नन्वेवं सति समुदायस्य निषेधो न लभ्यते ऽत आह। वाक्यभेदेन चेति आवृत्त्येति भावः। अपवेति। यो
गांगमिति। योगरूपमंगमष्टाध्याय्यादृत्यर्थः। तृतीयासमासे सर्वादीनीति। तृतीयासमासरूपाणि सर्वाद्यंतानी

तृतीया॥ ॥अत्र तादर्थ्यात् तच्छब्दलाभे सति प्रयोगार्हस्य लौकिकस्य वाक्यस्य ग्रहणे सति मासेन पू
र्वायेति प्रयोगः साधुः वाक्यभेदेन च मुख्ये समासे निषेधः। अप वेति। पर्युदासाश्रयणात्स
मास सदृशस्य वाक्यस्य ग्रहणं पूर्वसादृश्येति च प्रतिपदोक्तस्तृतीयासमासो गृह्यते॥ ॥

त्यर्थः। अन्यथा पूर्वशब्दस्य निषेधेपि समासस्य तदनिषेधादुदाहरणे स्मै स्यात् अवयवस्य तत्त्वेपि ततो विभक्तेर
विहितत्वान्न दोषः सत्सप्त्युच्चारणं तु प्रकरणानुरोधादिति बोध्यं। तृतीयायाः सर्वादीनीति तृतीयातात्पर्याणीत्यर्थः तद्बीजं दर्शयति।
पर्युदासेति साध्ये पंचम्युदानात्पूर्वपदभूतेनास्य प्रवृत्तिः। सदृशस्येति। प्रयोगार्हत्वेन समाससमानपदार्थकत्वेन च सादृश्यं प्रतिपदोक्तः इति।
तेन समासेन कृताय पूर्वस्मै इत्यत्र तदर्थकं मासपूर्वस्मै इत्यत्र च न दोषः। अत एव भाष्ये प्रथमोपस्थितानन्यात्सर्वादीन् विहाय पूर्व एवोदाहृत इति बो १९६

विभाषा जसि॥ ॥इकारेणेति। तद्रूपस्य सर्वनामकार्यस्याभावादिति भावः। सूत्रे जसीति च लुप्तसप्तमीकं। लुप्तद्वितीयांतं वा।
अन्ये त्विति। जसीत्यंशस्य च जसभ्यटिते सर्वनामकार्य विधायक सूत्रे द्वंद्वे विभाषेति संज्ञाविकल्पायोपतिष्ठते इत्यर्थ इत्यस्मिमानः
भाष्ये ऽकच् भिन्न भवतीत्यस्य समुदायनिष्ठकुत्साबोधकोकजन्न भवतीत्यर्थः कृताकच्चासमासस्तु न भवत्येव तत्र सर्वाद्यंतत्वा
दनेन विकल्पो भवत्येव। समुदायकुत्साविवक्षायां केनायं विकल्पः द्वंद्वस्य सर्वाद्यंतत्वाभावादिति बोध्यं पूर्वपरा। भाष्ये। ३२

विभाषा जसि॥ ॥जसः कार्यं प्रतीति। जसद्गजसीति निर्देशादिकारेणाई कारस्य ग्रहणादित्याहुः अन्ये तु कार्यका
लत्वात्संज्ञाया जसः शीत्यत्रोपस्थानं मन्यंते॥ ३२॥ ॥पूर्वपरावर॥ ॥अवरादीनां चेति। किमर्थं प्रति पदं पू
र्वादीनि जसि विभाषार्थं पठितानि यावता गण एवार्थविशेषेण विशिष्टानि नित्यं सर्वनामसंज्ञार्थं पठ्यंते। तत्र
पूर्वादीनि नवेत्येवं सूत्रं पठितव्यं प्राप्तविभाषा चेयं भविष्यति। तेषामेवात्र प्रत्यभिज्ञानाद् गुण एवार्थनिर्देशः पा
ठविशेषणं भविष्यति यथा तिङो गोत्रादीनीत्यत्र कुत्सनाभीक्ष्ण्य ग्रहणं पाठविशेषणमिति वार्त्तिककाराभिप्रायः॥

पुनः सूत्रपाठे इति गणपाठोत्तरकालिके सूत्रपाठे इत्यर्थः ननु पूर्वादीनि नवेत्येतावत्युक्ते गणस्य ग्रहणे न प्राप्तवि
भाषा त्वे ऽसावतात्पर्यकत्वेन गौरवादर्थांतरे एवाप्राप्तविभाषा स्यादत आह। तेषामेवात्रेति नन्वे
व विशेषणाभावे न स्यादत आह॥ गण एवेति॥ ॥छ॥ ॥

कै०वि०१ प्रकारार्थइतिवस्तुतोऽल्पाच्तरत्वादजाद्यदंतत्वाच्च सूत्रेऽवरशब्दस्यैव पूर्वनिपातउचितइत्याशयेनावरादीनामित्युक्ति
१९७ र्वार्त्तिककृतइतिबोध्यं। ननु सर्वादीनीतिव्यवहारात् गणपाठस्य पूर्वत्वानिश्चीयते। तआह। आदिशब्दइतिननुगणपाठ
स्य

अवरादीनामित्यत्र प्रकारार्थआदिशब्दः तेन पूर्वपरावितिशब्दौगृह्येते। कथंपुनरितिपूर्वंगणपाठोनियत
संनिवेशोव्यवस्थितः पश्चात्तु सूत्रपाठइत्यत्र प्रमाणाभावात्। आदिशब्दः प्रकारवाचीदृष्टोव्यव
स्थावाचीच सर्वादीनीत्यत्र। आदिशब्दस्य प्रकारार्थतापिसंभवति। प्रकारार्थप्रदर्शनायपश्चाद
भियुक्ता गणान्पठंति। यदुक्तंभ्रेण्यादयः पठ्यंते कृतादिराकृतिगणइतिकृतादयश्च वृत्तिकारै
र्निदर्शनार्थंपठिताः तत्रचेदंमध्यमस्यामितिप्रयोगदर्शनात्प्रकारार्थतादिशब्दस्य सर्वादीनीत्यत्र
संभाव्यतइतिप्रश्नः। तानिहि पूर्वादीनितिपूर्वकालपठितत्वात् पूर्वशब्देन सर्वशब्दोभिधीयते
तेनायमर्थः सर्वादीनीत्यत्र व्यवस्थावाच्यादिशब्दः प्रकारवाचित्वेहि कृत्स्नादीनामपिसंज्ञा
स्यात् मध्यमस्यामिति। तु व्यत्ययेनछांदसः प्रयोगः। इमान्यवरादीनीति अवरकालपाठात् पूर्व
शब्दोवरशब्देनोच्यते। तेनपूर्वंगणपाठः पश्चात्सूत्रपाठइत्यर्थः॥

स्यनिदर्शनार्थत्वेआदिपदस्य प्रकारार्थतास्यात् तदेवकुतइत्यतआह। तत्रचेदइति। प्रकारेतिसर्वनामकार्यवत्व १९७
मेवसादृश्यमितिभावः। छांदसः प्रयोगइति। एवंच सर्वादीनीतिव्यवहारादेवगणपाठस्य पूर्वत्वनिश्चयइतिभावः॥

अत्रवदंतितानिपूर्वादीनीत्यनेनैवगणपाठस्य पूर्वत्वेसिद्धे इमान्यवरादीनीतिव्यर्थं अस्यहि पूर्वादीनीत्यर्थः केय
टाद्युक्ष्यते। नचायंसूत्रपाठस्यपुनःपाठेत्वेसाधकः किंचेमान्यपिपूर्वादीनीतिशंकाप्यनुपपन्ना त्वदुक्तरीत्या
हेतोरभिधानात्। एवंचहेत्वभिधानमंतरेणेत्याद्यपिचिंत्यमेव तस्मादत्रादिशब्दआश्रयवाचीभीष्मादिश्चस्
योधनइतिवत् तानिगणपाठितानि पूर्वकालाश्रयाणिइमान्यष्टाध्यायीपठितानि अवरकालाश्रयाणिइत्यर्थः ए
वंचतत्तत्कालकृतत्वाभावेनापिरनर्थकएवस्यात् सर्वादीनीत्यादौ तु पूर्वादिव्यवहारइतिभावः तत्र मानो
भावमूलकशंकते। इमान्यपि। अष्टाध्यायीपठितान्यपिपूर्वादीनिपूर्वकालाश्रयाणीत्यर्थः अत्रापिरेवार्थेन्यथोभयोःपर

हेत्वभिधानमंतरेणाशक्योयमर्थः प्रतिपत्तुमित्याह। इमान्यपीति। नवग्रहणमिति तत्रनवग्रहणंत्यदा
दिनिरासार्थंक्रियतेयदिचनियतसंनिवेशोगणपाठः पूर्वस्ततोधिकस्यव्यवच्छेदायनवग्रहणंकर्त्तव्यं॥
इदंतर्हीतिप्रतिनियतविशेषणाभिधानायप्रतिपदपाठइत्यर्थः। एवंविशिष्टान्येवेति। पाठविशेषणायगणे
पनिर्देशाइत्यर्थः॥ ॥

स्यरापेक्षयापूर्वकालत्वासंभवेनापिरनर्थकएव स्यात् सर्वादीनीत्यादौ सर्वत्रादिशब्दः प्रकारएव तत्तत्कार्यवत्वे
नचसादृश्यंअतिप्रसंगस्त्वनभिधानान्नेत्याशयः ध्वनितंचेदंकस्येदितिसूत्रेभाष्येइति। नवेवेतिभाष्ये। अष्टाध्याय्यांपूर्व
त्यादिश्चसूत्रीपठितानीत्यर्थः अष्टाध्याय्याः पूर्वकालत्वे पूर्वादीनीतिसूत्रेऽष्टाध्यायीसूत्रपठितानामेवतेषांग्रह
णंस्यादितिभावः। प्रतिनियतेति पूर्वादिसप्तकस्यैव व्यवस्थायामित्यादिस्वशब्दस्यैवाज्ञातीत्यादि अंतरश
ब्दस्यैवबहिर्योगेत्यादिविशेषणाभिधानायेत्यर्थः॥ ॥

अष्टाध्यायीपाठेन यथा त्यदादिपर्युदासाभावस्तथा दर्शयति। तत्र पुनरिति। पुनः संज्ञाविधानेन पुनः कार्यविधानाद्वा
त्यदादिपर्युदासो बाध्यत इत्यर्थः। इति पुनर्विधानेति एतत्संज्ञाकल्पिते नाद्वितीयापुनर्विधानेनेत्यर्थः। नन्वेवं सति
विकल्पो न स्यादत आह। वाक्यभेदेन चेति विभाषा जसीत्यनुवृत्त्येत्यर्थः। जश्भावादिति चेदुत्तरत्रेति। ढोढेलोप इ

त्यादिपर्युदासेनेति। त्यदादीनि पठित्वा गणे कैश्चित्पूर्वान्पूर्वादीनि पठितानि तत्र त्यादिरित्यद्भिति न सिला
दीनां प्रतिषेधः प्राप्नोति। तत्र पुनः सर्वनामसंज्ञया तसिलादि विधीयते। तेन त्यादिपर्युदासो बाध्यते। यथा।
अनुलक्षणादिति पुनर्विधानेन हेतुतृतीया बाध्यते वाक्यभेदेन च विभाषा जसि विधीयते यथा निपूर्वः संप्र
सारणा चेत्यत्र वाक्यभेदेन वा छेदसीति संबंधाछंदसि विकल्पः क्रियत इति भावः। इदं तर्हीतियदि पूर्वा
दीनि न वेत्युच्येत तदा गणपाठेऽर्थनिर्देशस्य नित्यसंज्ञाविधान एवोपयुक्तत्वात् पाठविशेषयोः प्रमाणा
भावादप्राप्तविभाषेयमर्थांतरे पूर्वादीनां जसि विज्ञायेत। प्राप्तविभाषायामुक्तानुवाददोषप्रसंगाद
प्राप्तविभाषायामपूर्वविधानात्॥

तिसूत्रे वार्त्तिकमिदं। एतेश्च सूत्रवार्त्तिकप्रयोगैस्त्यदादितः पूर्वमेव गणे पूर्वादिपाठ इति बोध्यमि तिभावः। पा
ठविशेषयोः प्रमाणाभावादिति व्याख्यानातिरिक्तप्रमाणाभावादिति भावः। तथा व्याख्याने बाधकमाह। उ १९८
क्तानुवादेति। भावांश इत्यर्थः। अभावतात्पर्यकत्वेन गौरवं दोष इत्यपि बोध्यं॥ ॥छ॥ ॥

नन्वप्राप्तविभाषात्ववारणायार्थमात्रनिर्देशः क्रियतां किं प्रतिपदपाठेनेत्यत आह। प्रतिपदेति। असंकरेणेति।
सप्तस्वेव व्यवस्थासंबंधः स्वेऽज्ञातिधनयोरंतरे बहिर्योगादेरित्येवंरूप इत्यर्थः। एवमप्याद्यसूत्रे पूर्वादीनि व्यवस्था
यामसंज्ञायामित्येव कुतो न सूत्रितं सप्तानामेव व्यवस्थायां वृत्तेरिति चिंत्यं॥३४॥ ॥छ॥ ॥

विभाषामिति। प्राप्तविभाषामित्यर्थः। प्रतिपदपाठं विनाऽसंकरेणार्थनिर्देशो शक्यः कर्तुमिति भा
ष्यकारेण प्रतिपदपाठः समर्थितः॥३४॥ ॥स्वमज्ञातीति॥ ॥आत्मात्मीयज्ञातिधनवचनः स्वशब्दः
अभिनिज्विषयस्त्वैश्वर्यवाची। आख्याग्रहणमिति स्वे पुत्राः स्वे गाव इत्यत्र स्वशब्द आत्मीयत्वमेवाह
पुत्रादिशब्दास्तु ज्ञातिधनयोर्वर्त्तंते न स्वशब्द इति प्रतिषेधो न प्रविष्यतीति प्रश्नः। तस्य यथा स्यादि
ति प्रतिषेधशेषः। इहमा भूदिति। असत्याख्याग्रहणे स्वे पुत्रा इत्यादौ स्यादेव प्रतिषेधः अत्रात्मी
यत्वं प्रवृत्तिनिमित्तमुपादाय स्वशब्दो ज्ञातिधनयोर्वर्त्तते पुत्रादिभिः सामानाधिकरण्यादाख्याग्र
हणे तु सति न दोषः स्वशब्दो ह्यत्रात्मीयस्याख्या न तु ज्ञातिधनयोरिति विधिः सिद्धः॥३५॥ ॥

स्वमज्ञातिधनाख्यायां॥ ॥आत्मीयत्वमेवाहेति। आत्मीयत्वेनैव ततः प्रतीतिर्न तु धनत्वादिनेत्यर्थः। ई
दृशविशेषलाभार्थमेवाख्याग्रहणं तदभावे आत्मीयत्वादिना ज्ञातिधनवाचकेऽपि निषेधः स्यादित्युत्तरं॥ प्र
तिषेधइति शेष इति। अज्ञातीत्यादि प्रतिषेध इत्यर्थः। न तु ज्ञातिधनयोरिति। ज्ञातित्वधनत्वयोरित्यर्थः॥३५॥॥

अंतरंबहिर्योगोपसंव्यानयोः॥ ॥भिन्नार्थइतिनानार्थइत्यर्थः। ततः सर्वथेति। कर्मणिद्वितीयव्याख्यानेनकरणेआ
द्यव्याख्यानेतिबोध्यं। नन्वल्पमहत्परिमाणास्यामंतरीयोत्तरीयत्वनिर्णयो न विष्यतीत्यतआह। समानेइति। पदत्रयमपिसप्त
म्यंतं॥भाष्ये। किमुत्तरीयंकिमंतरीयमित्येतन्नज्ञायतइत्यन्वयः। तृतीयचतुर्थयोरितिशरीरसंयुक्तयोरि

अंतरं॥ ॥बहिरित्यनावृतोदेशउच्यते। तेनयोगोबहिर्योगः सचबाह्यस्यभवतीति। अंतरेगृहाइतिन
गरबाह्याश्चण्डालादिगृहा। उच्यंतेयदातुबहिः शब्देनबाह्यमुच्यतेबाह्येनयोगोबहिर्योगइतितदानगराभ्यं
तरेयेगृहास्तउच्यंते। उभयथापिस्मर्यते। उपसंख्यानशब्दोपिकर्मकरणार्थभेदाद्भिन्नार्थः ततःसर्वथाबहि
र्योगात्सिद्धिमत्वाह। उपसंख्यानेति। नवेति। समानप्रमाणेशाटकयुगेपरिहितेतत्र। इदंनज्ञायतेकिमु
त्तरीयंकिमंतरीयमित्यर्थः। अत्रापीति। यथोपसव्यानत्वंनावबुध्यव्यवस्थाप्यतेतथाबहिर्योगेपीत्य
र्थः। अन्येत्वाहुः। आदिशब्दोवार्त्तिकेशाटकयुगाद्यर्थमित्यत्रोपपत्तिः तत्रशाटकानांत्रयेचतुष्टयेवात्तृ
तीयचतुर्थयोर्बहिर्योगान्नोवादुपसंख्यानग्रहणंकर्त्तव्यं। अपुरीति। गणसूत्रएतत्कर्त्तव्यंलिंगविशि
ष्टपरिभाषयाग्रहणप्रसंगात् इहत्वेननार्थः अतइतिजसःशीविधानात्। टावंतात्प्राप्त्यभावात्।
पूः कस्मिंश्चित् देशेप्रकारान्तरेक्रियतेकश्चित्प्राकाराद्बहिरितिअस्तिपुरोबहिर्योगः॥
त्पर्थः भाष्यस्यत्वयंभावः बहिर्योगइतिस्वर्यतेतेनपरंपरयाबाह्यसंबंधस्यापिसिद्धिरितिनतुतस्मिविकल्पविधायकसूत्रस्य १९९
वार्तिकोदाहरणंसप्तम्यंतमयुक्तमतआह। गणेति। पूःशब्दस्यविशेष्यत्वेइत्यर्थः सचस्त्रियामेवतदाह। इहत्विति॥२६॥

स्वरादिनिपातमव्ययं॥ ॥क्रियाप्रधानामितिक्रियायामेवविशेषणामित्यर्थः यथाहिरुगादिएतच्चोत्तरसूत्रेकै
यटेस्पष्टं। किंचिदिति। यथोच्चैरादि। अनेकशक्तीतिस्वस्तिश्चतिस्वआगतइत्यादावित्यर्थः अनेककारकशक्तियो
गएवचसत्वमितिभावः भाष्येसत्ववचनानांचेत्पस्याव्ययसंज्ञेष्यतइतिशेषः। लोहितेति। अव्ययीभावश्चेति

स्वरादिनिपातमव्ययं॥ ॥किमर्थमिति। स्वरादिषुकिंचित्क्रियाप्रधानंकिंचित्साधनप्रधानमि
ति। असत्ववचनत्वाच्चादिष्वेवस्वरादीनिपतितव्यानीतिमत्वाप्रश्नः। स्वरादीनांपुनरिति। स्वस्तिवा
चयतिस्वःपश्येतिक्रियासंबंधेऽनेकशक्तिदर्शनात्सत्ववाचित्वनिश्चयः लोहितगंगमित्यादी
नांचाव्ययानांसत्वधर्मनपुंसकत्वदर्शनाद्युक्तमेवसत्ववाचित्वं। ननिपातसंज्ञैवेति। प्राग्रीश्व
रान्निपाताःस्वरादीनिचादयोसत्वइतिसूत्रन्यासः कार्यइत्यर्थः स्वरादीनामिति। किं नोदित्य
प्रत्ययोदक्षिणादाजित्याचकेनप्रन्तृतयस्त्वृत्तएकाचः संतीतिभावः। तच्चाशक्यमिति। अव्ययसं
ज्ञायामेवसत्या। अव्ययमेकाजनाङितिसूत्रंकर्त्तव्यं। ततश्चात्प्रभृतीनामपिप्रगृह्यसंज्ञाप्रसंगः॥॥

स्वरादिषुपठ्यन्तइतिमतेइदं। नन्वसत्ववाचित्वाभावाच्चादिषुपाठाभावाच्चकथंनिपातत्वमतआह। प्रीश्रीति। कि
मोदिति। तद्धितश्चेतिसूत्रमपितत्संज्ञाविधायकमेव एतत्प्रयोजनसत्वादेवकेवलानामपितेषांसंज्ञास्यादिति
भावः भाष्ये। एवंतर्हीश्वयेतिप्राग्नीश्वराद्व्ययस्वरादीनिचादयोसत्वइतिपाठ्यमित्यर्थः॥ ॥छ॥ ॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्याख्यस्य स्मारकम्
Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्याख्यस्य स्मारकम्

तदाचादीनामितियदित्तुचादयः।असत्वेइतियोगविभागेनासत्वेइतिपागविशेषणंक्रियतेतदानायंदोषः तस्माद्भा
ष्योक्त एवदोषः नचतत्रप्रादीनामितिवाच्यंऊर्यादीनामसंग्रहापत्तेः। एवंनिपाताआद्युदात्ताइत्यादावपिदोषोबोध्यः
॥३७॥ ॥तद्धितश्चासर्वविभक्तिः॥ ॥यद्यपिकेवलस्येति। एवंचकेवलतद्धितात्कस्याअपिविभक्तेरभावेना

अपचादयएकाजनाङितिक्रियतेतदाचादीनामसत्वविशेषणमलभ्यं॥३७॥ ॥तद्धितश्चास
र्वविभक्तिः॥ ॥इहसंज्ञाविधौप्रत्ययग्रहणेतदंतविधिप्रतिषेधाद्यद्यपिकेवलस्यप्रत्ययस्यग्र
हणं तथापिप्रयोजनंसर्वनामाव्ययसंज्ञायामितिवाचनिकस्तदंतविधिरस्तीति।तदंतस्याव्य
यसंज्ञाविज्ञायते।तत्रवृत्तिकारेणाव्याख्यातं असर्वाविभक्तिरस्यतः असर्वविभक्तिरितितत्र
यदायमर्थः यस्यतद्धितस्यासर्वाविभक्तिःयथासर्वैकान्येतिकार्यायस्मान्नसर्वाविभक्तिरुत्पद्यत
इत्यर्थः तदादोषोन॥ ॥

सर्वविभक्तिरितिविशेषणमव्यावर्त्तकमितिभावः।वाचनिकइतिशब्दरूपंविशेष्यमादायतदंतविधिरितिभा
वः किंचकेवलानांसंज्ञायांप्रयोजनाभावः प्रयोजकाभावश्चअन्वर्थसंज्ञालभ्योयोहितत्प्रयोजकइतिबो २००
ध्यंबातिकोत्थानायसूत्रार्थंदर्शयति।तत्रवृत्तिकारेणेति। सर्वाविभक्तिरितिसर्वावयविकेत्यर्थः॥ ॥

प्रतिनितेयेति।एवंचविशेषतःकस्याअपिनिमित्तत्वेनानाश्रयणात्सर्वविभक्तिनिमित्तकोयमितिभावः ननुसु
बंतात्तद्धितोत्पत्तेरविभक्तिनिमित्तस्तद्धितोप्रसिद्धोतआह।अश्रूयमाणेतितन्निमित्तकस्यबहुव्रीहिः ननूत्सर्गतए

यदातुयस्यतद्धितस्योत्पत्तौनिमित्तत्वेनासर्वाविभक्तिराश्रितासो। सर्वविभक्तिःयथासर्वैकान्येति
दाप्रत्ययस्यसप्तम्येवोत्पत्तिनिमित्तमित्यस्मिन्सूत्रेविनानानेत्यव्ययसंज्ञानसिध्यतिनहिविनञ्
भ्यामित्यत्रप्रतिनियताकाचिद्विभक्तिराश्रितेत्याह। असर्वविभक्तावितिअतिव्याप्तिश्चास्मिन्सू
त्रेर्थेदाक्षिरितीञःषष्ठ्येवनिमित्तमितिसंज्ञाप्रसंगात्।अविभक्तिनिमित्तस्येति।अश्रूयमाणविभक्ति
कमव्ययमविभक्तीत्युच्यते।तन्निमित्तस्ययस्येष्यतेनचप्राप्नोतितस्योपसंख्यानंकर्त्तव्यंनतुसामान्ये
नाविभक्तिनिमित्तस्यसंज्ञाविधेयाविशालविशंकटादीनामपिप्रसंगात्।किंपुनरिति।एकवचन
मुत्सर्गइतिवचनात्क्रमव्यतिक्रमेकारणाभावात्।विनानानेत्यत्रापि।असर्वाविभक्तिरुत्पत्तौनि
मित्तमितिप्रश्नः॥ ॥

कवचनमपिसर्वासांस्यादितिबहुवचनांतविग्रहेसर्वविभक्तेर्निमित्तत्वमव्याहतमतआह।क्रमव्यतिक्र
मइति॥प्रथमातिक्रमेकारणाभावेनप्रथमायाएवैकवचनमितिनदोषइत्यर्थः॥ ॥छ॥ ॥

कै॰वि॰१
२०१

अविशेषेणेतिद्व्येकयोरित्याद्येकवाक्यतामनपेक्ष्येत्यर्थः।उत्पन्नानांनियमइति।उत्पन्नानांशास्त्रबलान्नियमेन
लोपेनैवनिवृत्तिःक्रियतइत्यर्थः इदमप्यर्थनियमेसजातीयापेक्षप्रत्ययनियमेचबोध्यं।विशेषस्येति।द्व्येकयोरित्या
द्येकवाक्यतारूपस्येत्यर्थः ज्ञापकाद्विभक्तिरितिपक्षेद्वयमेवेति।विशेषस्येत्यर्थः ननुत्रलादीनामित्युक्तात्रलःप्रा
कृपठिते

सर्वविभक्तिरितिअविशेषेणोत्पद्यंतेउत्पन्नानांनियमःक्रियतइत्यव्ययात्सर्वाविभक्तयउत्पद्यंतइ
त्यर्थः।अविशेषादितिविशेषस्यानाश्रयणादित्यर्थः। त्रलादीनांचेति।आदिशब्दस्यप्रकारवाचि
त्वात्तसिलपिगृह्यते।वक्ष्यत्येतदितिभवदादिप्रयोगएवाप्राप्तिश्चोद्यतइत्यर्थः।यदिपुनरितिप्र
योगेयोऽश्रूयमाणविभक्तिः सोऽव्ययमित्यर्थः। नचदधिमध्वित्यत्रातिप्रसंगः दध्नीत्यादौविभ
क्तिश्रवणात्।अविभक्ताविति।अव्ययत्वादविभक्तित्वंअविभक्तित्वादव्ययत्वमितिदोषः।। ।।

कृपठितस्यतसिलःकथमुदाहरणदानमतआह।आदिशब्दस्येति।ननुविनेत्यादावपिपदत्वायविभक्त्युत्पत्तिराव
श्यकेत्यतआह।प्रयोगइति। दध्नीत्यादाविति।प्रयोगमात्रेविभक्त्यभावोविवक्षितइतिभावः।अव्ययत्वादिति २०१
अविभक्तिकत्वस्यस्वाभाविकत्वव्युत्पादाभ्युपइत्यस्यवैयर्थ्यप्रसंगादितिभावः।। ।।ठ।। ।।

ननुपूर्वलक्षणस्यदूषितत्वाद्वाशब्दोऽसंगतोतआह।अविभक्तिरिति।वाशब्दइति। प्रयुक्तइतिशेषः एवंचाप्यर्थो
वाशब्दइत्यर्थः।अलिंगमित्यपियद्युच्यतेएवमपिअन्योन्याश्रयइत्यर्थः।शास्त्रादेवेति।तद्योतकविभक्तिलुक्शास्त्रा
देवेतिभावः। वाशब्दार्थइतिवाशब्दस्यार्थइवार्थोयस्येतिबहुव्रीहिः अयंचपाठः स्वरादिषुकार्यइतिबोध्यं।सँच

अलिंगमसंख्यमिति।अविभक्तिरव्ययमित्यस्यलक्षणस्यदूषितत्वादत्रापितदेवदूषणमितिप्रद
र्शनार्थोवाशब्दः।अलिंगासंख्यत्वस्यलौकिकत्वान्नान्योन्याश्रयमितिपूर्वपक्षः।एवमपीति।।
अर्थमपिकश्चित्कचिच्छास्त्रादेवप्रतिपद्यतइतिभावः।सिद्धंत्विति। वार्त्तिककारस्येतरेतराश्रयदोषः
स्थितएवेतितुशब्दोविशेषदर्शनार्थः।भाष्यकारेणत्वितरेतराश्रयदोषःपरिहृतइतिवाव्यर्थस्तु
शब्दोव्याख्यातः येएवप्रकारवचनेथाल्सएवप्रत्नादिभ्योविधीयतइतिनाव्याप्तिः।। ।।

पचतिकल्पादिव्यावृत्तयेतद्धितश्चेतिसूत्रारंभोऽव्यावश्यकइतिभावः।प्रत्नेत्यादिथाल्नपरिगणितमध्यवर्तीत्यआह।
सएवेतिप्रकारवचनइत्यत्रप्रकारःसादृश्यंविशेषश्चतत्रशब्दशक्तिमाहात्म्यात्प्रत्नादिभ्यउत्पन्नेनसादृश्यमुच्यते
किमादिभ्यस्थाल्नातुविशेषएवंचप्रत्नपूर्वेतिसूत्रंव्यर्थमिवलोकेऽप्रयोगस्तुनअभिधानादितिभावः।। ।।

अमुत्र चछंदसीत्यम् किमेतिङित्याम् प्रतियोगे इति तसिः शास्त्रप्रकृतिषु सतीति तत् ग्रहणं चिंत्यं। दृष्टांतार्थमित्यन्ये। भा
ष्ये। वतिस्तेन तुल्यमिति विहितः नञ् उपसर्गाच्छंदसीति विहितः उद्धृतो निवत इत्यादौ तस्य लिंगसंख्याद्यन्वयदर्शना
दित्याहुः। एकत्वादिव्यवहारवदिति। पटादिपदानामिति शेषः। अलिंगासंख्यत्वमपीति तथा च संख्याभावादेव ति
ङन्तत्वानुत्पत्तिरिति अविभक्तिरिति न्यासोऽप्यदुष्ट इति भावः। अव्ययादाप्सुप इति सूत्रं तु न्यायसिद्धाया अनुत्पत्ते

मातद्रूति। आम् अमृतसिप्रतिश्रयोगे पंचम्यास्तसिः तेनैकदिक् तसिश्चेति तत्त्वोर्थः कृत्वसुच् सुच्
धा। अपचेति वृद्धव्यवहारादेव शब्दार्थसंबंधावगमादेकत्वादिव्यवहारवदलिंगासंख्यत्वमप्य
व्ययार्थस्य प्रसिद्धमित्यर्थः॥ अत्रैवोपपत्तिमाह॥ तन्नायीति॥ ॥छ॥ ॥

रेवान्वाख्यायकं प्रत्ययलक्षणप्रवृत्तिद्वारा यदत्वादिसंपादनार्थमिति तात्पर्यं॥ नन्ववैयाकरणैः संख्या
या अज्ञानादेव तद्वाचकविभक्तिर्न प्रयुज्यत इत आह भाष्ये। भक्तिसंज्ञाश्चेति। घट इत्यादौ तैरपि एकवचना
दिप्रयोगकरणादिति भावः युक्त्यंतरमप्याह तथा विज्ञा इति वस्त्रोमूल्यं। अत्रैवेति अलिंगासंख्य २०२
त्व एवेत्यर्थः उपपत्तिर्युक्तिः क्रियाप्रधानत्वादिरूपा एवमनुगम्यमानमित्यस्योपपद्यमानमित्यर्थः॥ ॥

नापि साधनप्रधानमिति। किंतु द्रव्यप्रधानमिति शेषः तस्माद्वाकुल्येति एवं च तादृशबहुमध्यपाठेन स्व
रादीनामप्यलिंगासंख्यत्वमनुमीयते। अनेककारकशक्तियोगमात्रेण तु सत्ववचनत्वमिति भावः उन्म

किंचिदिति। अव्ययानां द्वैविध्यमेवेति प्रतिपाद्यते अलिंगासंख्यत्वप्रतिपादनाय। अन्ये त्वाहुः
किंचिदव्ययं क्रियाप्रधानं किंचित्साधनप्रधानम्। अन्यत्तु नापि क्रियाप्रधानम् नापि साधन
प्रधानं यथा स्वः पश्य लोहितगंगं उन्मत्तगंगं देश इति तथा चात्र नपुंसकत्वं अव्ययीभावश्चेत्य
न्वाख्यायते पूर्वं चिन्त्राष्यकारेणोक्तं स्वरादीनां पुनः सत्ववचनानामसत्ववचनानां चेति। तस्माद्बाहु
ल्याभिप्रायेणालिंगासंख्यमव्ययमित्युच्यते॥

त्तगंगादीनां वाचनिकमव्ययत्वमव्ययीभाव इति महासंज्ञया सूच्यते। सत्वप्रधानता तु इदं स्वरिति
सर्वनाम्ना परामर्शात् आन्यायार्थकप्रतामित्याद्यपि सत्ववचनमित्यन्ये॥ ॥छ॥ ॥ ॥

कै०वि०१
२०३

ननु तदर्थे कारकान्वयाभावान्न तस्य क्रियात्वमत आह। क्रियाविशेषणत्वादिति। क्रियाया एव विशेषणत्वादित्यर्थः
क्त्वातुमुन्नन्तादिवदिति भावः स्वरादीनां घटादीनां च स्वःपतिर्घटोदकमित्यादौ नामार्थेऽप्यन्वय एतेन तेषामपि क्रि
याविशेषणत्वाक्रियाप्राधान्यं दुर्वारमित्यपास्तं अत एवैतदर्थेन कारकाणामन्वयः तदन्वययोग्यस्य साध्यत्वरूप
क्रियात्वस्य तत्राभावात्। क्रियाक्षेपादितिस्थित्यादिक्रियाक्षेपादित्यर्थः द्रव्यप्राधान्येनेति पीलुमूलसमानदिक्स्थ

उच्चैर्नीचैरिति। सप्तम्यर्थे वर्त्तते हि रूक् पृथगिति क्रियाविशेषणत्वादेषां क्रियाप्राधान्यं क्रियापदप्रयोग
मंतरेण पृथक् देवदत्त इत्यादिप्रयोगस्तु क्रियाक्षेपात् उपपद्यते शब्दशक्तिस्वाभाव्याच्चैकस्मिन्नर्थे वि
धीयमानयोस्तेनैकदिक्तसिश्चेत्य एतं तसोऽभिन्नधर्मत्वं तत्र यैलुमूलमिति द्रव्यप्राधान्येनाभिधी
यते पीलुमूलतइति तु द्रव्योपसर्जनस्तृतीयार्थइति तस्य साधनता॥

मितिदितत्र बोधः। द्रव्योपसर्जन इति तसप्रत्ययाभिधेयद्रव्योपसर्जनः प्रकृत्यभिधेयस्तृतीयार्थ इत्यर्थः तृतीया
र्थश्च तत्र साहित्यं पीलुमूलेनैकदिक् पीलुमूलतः एकदिक्स्थपीलुसाहित्यमित्यर्थः। अन्ये तु पीलुमूलेन समानदिशा
इत्यर्थकं अधिकरणशक्तिप्रधानं पीलुमूलत इतीत्याहुः। भाष्ये। न चैतयोरर्थयोरिति। यद्यपि क्रियाया मेकत्व २०३
संख्यारूपस्त्रेनाप्युक्तापचतिरूपमित्यादिवाच्यायाश्च नपुंसकत्वयोग उक्तस्तथापि अव्ययवाच्ययोरे
तयोर्लिंगसंख्यास्वामयोग इत्यर्थान्न दोष इति दिक्॥ ॥

सूत्रारंभकाले इति यद्यपि न्यासांतरेपि एकस्मिन्निति बद्धेव तथापि एकग्रहणे सति ज्ञापकादितः सर्वविभक्त्यु
त्पत्ताव स्य सूत्रस्याप्यानर्थक्यमिति एतत्सूत्रपाठकाले एतत्सूत्रसहितं एकस्मिन्नित्यतिबद्धव्यर्थं क्रियत इति
एकग्रहणं त्यक्तास्य सार्थक्यं वक्तुं योग्य इत्यर्थ इति भावः। न्यासांतरेति पागश्रयेण लिंगसंख्यमित्यनेनैवेत्यर्थः

अद्यत्व इति। सूत्रारंभकाल इत्यर्थः पूर्वं हि न्यासांतराश्रयेणासूत्रं प्रत्याख्यातं। अतिबद्धिति एकस्मि
न्नित्यपनीय एकवचनमिति सूत्रं कर्त्तव्यं ततो द्विबह्वोर्द्विवचनबहुवचने इत्येवं कर्त्तव्यं तेनाद्वित्वब
हुत्वयोर्द्विवचनबहुवचने भविष्यतः एकवचनं त्वेकस्मिन्नपि भविष्यति। अलिंगसंख्येभ्योऽव्ययेभ्य
श्च। ननु कर्मणि द्वितीयेत्यादिना कर्मादिषु द्वितीयादीनां नियतत्वात्कथमेकवचनमव्ययेभ्यः स्यात्
नैष दोषः। एतदर्थमेवैकवचनमित्येतत् क्रियते॥

भाष्येति बद्धितिबहुशब्दो वैपुल्यवाची अतिबहु शास्त्रं व्यर्थं क्रियत इत्यर्थः। अलिंगासंख्येभ्य इति द्विवचनब
हुवचनविधायकयोर्द्विबहुग्रहणसामर्थ्यान्महासंज्ञाबोध्यैकत्वाभावेपि एकवचनप्रवृत्तिरिति भावः॥
कथमेकवचनमिति प्रथमापि मात्रग्रहणात् प्रातिपदिकार्थस्य कर्मत्वाद्याधिक्यसंभवनात्तत्रैवेति भावः॥

कै०वि०१ अप्राप्तेति। द्वित्वबहुत्वयोर्द्विवचनबहुवचनविधाने एकवचनस्यार्थात्तदभावे कर्मादौ सिद्धत्वेन सामर्थ्यादि
२०४ तिभावः अप्राप्तिश्च कर्मत्वाद्यभावप्रयुक्तैव न तु प्रातिपदिकत्वाभावप्रयुक्तापि। सुपां विध्येकवाक्यत्वात् ते
न तिङंतादिष्वेनापत्तिरिति बोध्यं किंच सर्वथाप्राप्तावेवास्य विधायकत्वमिति च तिकल्पमित्यादौ न स
वैकवचनापत्तिरिति बोध्यं। यद्यप्यनिर्दिष्टार्थत्वात्स्वार्थे विधीयमानस्यास्य न द्वित्वादौ प्राप्तिस्तथापि पंचकप्रा

अप्राप्तप्रापणार्थं तेन कर्माद्यभावेपि भवति। द्वित्वबहुत्वयोस्तु प्राप्तं द्विवचनबहुवचनाभ्यां
बाध्यते न सर्वाविभक्त्यंतत्पत्तौ निमित्तमस्येति येन वृत्तिकारेण व्याख्यातं तन्मतं दूषितं॥ ॥

तिपदिकार्थपक्षे एकत्वइव द्वित्वादावपि प्राप्तिरित्याशयेनाह। बाध्यत इति। अत्र पक्षे द्व्येकयोरिति सूत्रमपि विध्यर्थमेवेति
भावः यद्यपि अव्ययात्सर्वविभक्त्युत्पत्त्यायंन्यासो दूषितस्तथापि सामान्यापेक्षप्रत्ययनियमे एकवाक्यतया वि
धाने वा कस्याप्यप्राप्त्येदं विधायकमिति न क्षीसंत्र सार्थक्योपपादनमिदं एवं चैतदेव तयोरन्यतरपक्षाश्र २०४
यणास्यैक पदेवाक्यार्थानन्वमित्वस्य वज्ञापकमिति बोध्यं। एतत्सर्वमुक्तसंगपदेन भाष्ये सूचितं। तन्मत
मिति दाक्षिरित्यादावतिव्याप्तेरितरात्योपि दृश्यत इत्येतद्धि हित्रलादिविषयेऽव्याप्तेश्चेति भावः॥ ॥

वृत्तिकारांतरेति तद्विग्रहे यस्येति अपादानस्यैव संबंधत्वविवक्षया षष्ठीति ध्वनयितुं भाष्ये यस्मादित्युक्तं। विशेषेति।
एकवचनांतविग्रहकरणे रूपो विशेषः नन्वेवं सर्वविभक्त्येकवचनोत्पत्तौ बहुवचनांतविग्रहासंगतिरतो भाष्ये न
चापीति तद्व्याचष्टे। प्रकारेति। सर्वाविभक्त्यइत्यस्य सर्वप्रकारादित्यर्थः अवयवकात्स्न्ये तु बहुवचनंव्यर्थमिति भा

इदानीं वृत्तिकारांतरमतं विशेषदर्शनेन। संस्क्रियते। न चाप्येवमिति एवं विग्रहे सर्वशब्दस्य प्रकार
कात्स्न्र्येपि वर्त्तनादेकवचनमात्रोत्पत्तावपि सर्वाविभक्तयः सन्त्वाव्ययेभ्य उत्पद्यं तद्इति नस्या
दसर्वविभक्तित्वं। कथं तर्हीति द्रव्यकात्स्न्र्ये वृत्तिः सर्वशब्द एकवचनमात्रोत्पत्तौ निरवशेषवि
भक्तिर्नोत्पन्ना भवतीति भवत्येवासर्वविभक्तित्वं यदा त्वयं न्यायः प्रथमातिक्रमे कारणाभावात्
प्रथमायाएकैकवचनमव्ययेभ्य उत्पद्यत इति। तदा असर्वाविभक्तयो यस्मादित्यपि विग्रहे आश्रिते न दोषः॥

वः एकवचनांतविग्रहे तु अवयवकात्स्न्र्येएव सर्वशब्द इति। नानेत्यादौ नाव्याप्तिर्नापि दाक्षिरित्यादावतिव्याप्तिरि
ति भावः भावे पचतिकल्पमित्यादौ च क्रियायाः स्वत एवैकत्वादेकवचनमेव तच्च भावे प्रथमपुरुषस्यैव जातसमाना
धिकरण्युष्मदाद्यभावादिति रूपप्सूत्रे भाष्ये स्पष्टं। अव्ययेभ्योपि प्रथमैकवचनमेवास्तु इत्याह। यदावितिप्रथमेति। अनेकनियमबाधे गौ
रवाच्चेत्यपि बोध्यं।

के॰वि॰१ ननुभाष्योक्तपक्षेव्ययेभ्योयुगपत्सर्वविभक्त्येकवचनानांकर्त्तुमशक्यत्वं परस्येत्युक्तेः किंतुयत्किंचिदे
२०५ वतस्यलुकितावतैवपदत्वसंपादनात्॥ विभक्त्यंतरोत्पत्तौमानाभावेनबहुवचनांतविग्रहेपिनदोषोत
आह। खलेकपोतेति। वाचः क्रमवृत्तित्वात् युगपदुच्चारणासंभवेपिबुध्यायुगपत्सर्वोत्पत्तिर्वक्तुंशक्येति
भावः। विनिगमनाविरहोत्रबीजं। प्रक्रियादशायांचबुद्धिरेवमुख्या असाधूच्चारणायोगात् यद्वाप्रधा

यदातुखलेकपोतिकान्यायेनसर्वैकवचनोत्पत्तिपक्षस्तदैतदुक्तं अव्ययीभावा
दप्येकवचनमात्रमेवोत्पद्यतेतावतैवतृतीयासप्तम्योर्बहुलमित्यस्योपादानात्॥ ॥

नानुरोधेनगुणावृत्तेस्तावत्यः प्रकृतयः स्युरितिभावः। परेतुप्राथम्यंस्वादिसूत्रेप्रथमायानियमशास्त्र
पर्यालोचनयाद्वितीयायाइतिनतन्नियामकमितिप्रथमातिक्रमेइत्याद्यसंगतं॥ तन्मायाश्रयणेनि २०५
जांत्रयाणामित्यस्याद्युदात्तश्चेत्यादावादिग्रहणस्य वैयर्थ्यंचेत्याहुः॥ तावतैवेतिटाङ्योरितिवक्तव्ये
तृतीयादिग्रहणंतु वैचित्र्यार्थमितिभावः॥ ॥छ॥ ॥

इदमेवध्वनयितुंपंचयोगान्प्रत्याचष्टे। एवंगतेइतिभाष्ये। प्रतिपदमितीति असर्वविभक्तीतिन्यासेनैव
सिद्धत्वादित्यर्थः॥ भाष्ये। श्लोके॥ तत्रेति अव्ययसंज्ञाविधावित्यर्थः॥ पंचेतिस्वरादीत्यादिर

एवंगतइतियदानसर्वाविभक्तिरस्मादितिविग्रहः। अश्रीयतेनदेवविज्ञातेसत्येतावल्लक्षणम
स्त्वसर्वविभक्त्यव्ययमिति। पंचसूत्रीनकर्तव्या। एतदसर्वविभक्तिकत्वंकृत्यपितुल्यंयस्यकृन्मे
जंतइत्यनेनाव्ययसंज्ञेष्यते। मांतस्येतिसूत्रोपलक्षणं। मांतस्येतितः परइतिकृन्मेजंतइत्यस्मा
त्सूत्रात्परेकृदर्थाः कृत्संज्ञाविषयाः क्त्वातोसुन्कसुनइत्यर्थः ग्रहणेनोच्चारणेनप्रतिपदमित्यर्थः। योगा
श्चनकर्तव्याः स्वरादिनिपातमव्ययमित्येवमाद्याः। इदानीमतिव्याप्तिपरिहारार्थंतद्धितग्रहणंकर्तव्यंतस्मि
न्कृतेकृन्मेजंतइत्याद्यपिकर्तव्यमितिदर्शयति। कृत्तद्धितानामिति। संख्याविशेषमितितन्निरुत्यर्थमि
त्यर्थः। तेषामिति। असतितद्धितग्रहणेएकादीनामतद्धितांतानामप्यसर्वविभक्तित्वात् प्रतिषे
धोवक्तव्यः स्यादितितद्धितग्रहणंकर्तव्यंतस्मिन्कृतेस्वरादिग्रहणंकर्तव्यंस्वरादीनामतद्धितत्वात्॥

व्ययीभावश्चेत्यंता। ये। इतियच्छब्दस्य तच्छब्दसाकांक्षत्वादाह। तन्निवृत्त्यर्थमिति॥ ॥छ॥ ॥

कै॰वि॰१ तदेवंसूत्रेस्थापितमितिवार्त्तिकोक्तंसिद्धंतुपागादित्यप्यनाश्रितंस्यात् एवंचोभयशब्दादेशेषइतिशंकोत्तर
२०६ त्वेनोत्तरभाष्यमवतारयति। ननूभयेतिअतएवोभयोन्यत्रेतस्योदाहरणंउभयेउभयाइतिभाष्येसर्वादिसू
त्रेदत्तंगोदावित्यादौवरणादिष्वयश्चेतिचातुरर्थिकलुपियुक्तवद्भावात्प्रत्ययार्थस्यद्वित्वादीतिबोध्यं॥

ननूभयशब्दस्यद्विवचनानुत्पादात्सर्वविभक्तित्वंतथागोदौवरणादितिततएषामपितद्धित
श्चासर्वविभक्तिरित्यव्ययत्वप्रसंगइत्याह। कृतद्धितानामिति। प्रतिपदंतद्धिताःपठित
व्याःयेषामव्ययसंज्ञेष्यतइत्यर्थः तस्मात्कृणापागएवाश्रयितव्यःप्रपंचार्थस्तुसूत्रारंभः
तदंतविधिनेति॥प्रयोजनंसर्वनामाव्ययसंज्ञायामितिवचनेनेतिभावः॥ ॥

इत्याहेति। इत्याशंकयामाहेत्यर्थः भाष्येचस्तर्थेकृतद्धितानामित्यत्रकृत्ग्रहणेनकृतामव्ययसंज्ञाविधायकेसूत्रेऽपिगणे
पाठोइतिसूचितं। कृदित्युपलक्षणमव्ययीभावश्चेत्यस्यापितदाह। तस्मादितितदेवंगणपाठमाश्रित्यतद्धितश्चासर्वविभ २०६
क्तिरित्यष्टाध्यायीपाठःप्रत्याख्यातःतदाह। प्रपंचार्थस्त्वितिशंकतेभाष्येपाणिनेयमिति। स्वरादिनिपातमितीत्यर्थः॥ ॥

नन्वत्यादयोद्वितीययेत्युक्तेःकथमुच्चैःशब्देनाधिकरणशक्तिप्रधानेनाद्वितीयांतेनसमासइत्यतआह। शक्तीति।
द्वितीयांतस्येति। अतिक्रांतार्थान्वययोग्यकर्मद्वितीयांतस्येत्यर्थः शेषामन्यमित्यत्रकर्मणीत्यधिकारेआत्ममाने
स्वशः। दिनंरात्रिंमन्यतइत्यर्थः। प्रश्नेपीति। व्येतीत्यस्यविविधंप्रकारंगच्छतीत्यर्थः क्वतस्यकिंविषयेइत्यर्थइतिभा
वःअन्यथोत्तरानुसारेणकानितिप्रश्नःगवितःअतएवाग्रेउक्तंएतानर्थान्कैविद्धियंतीत्यादिविपूर्वस्यैणो
रूपंयेनवियंतिएतानर्थान्वियंतिविविधप्रकारप्रापकान्नप्राप्नुवंतितत्तद्वाचकमव्ययमित्यर्थः॥
अत्युच्चैसाविति। शक्तिप्रधानान्यप्यव्ययानिवृत्तिविषयेशक्तिमत्प्रधानान्यव्ययानिवृत्तिविषये
शक्तिमत्प्रधानानिभवंतियथादोषामन्यमहःदोषाभूतमहरितिततउच्चैःशब्दस्यप्राक्रियायांद्विती
यांतस्यसमासः। क्वपुनरिति। श्लोकेसप्तमीनिर्देशात्प्रश्नेपिसप्तमीनिर्दिष्टा। सदृशमिति। लिंगविशेष
प्रतिपादनेसामर्थ्याभावात्। विभक्तिष्विति। कारकेषुतत्रयानिसाधनप्रधानानिअव्ययानितेषांशक्त्यं
तरेणावेशात्। क्रियाप्रधानानांचशक्तिसंबंधाभावात्। सर्वासुचविभक्तिष्वित्युक्तं॥ ॥
त्वादेरर्थधर्मत्वात्इतिबोध्यम्। ननुविभक्तिवचनशब्दयोःप्रत्ययपरत्वेन्यतरवैयर्थ्यमतआह। कारकेष्विति।
विषयसप्तम्यएताःसादृश्यंतत्तल्लिंगाद्यभावानुयोगित्वेन। नन्वेवंस्वरादिवाच्यानांकर्मत्वादियोगसत्वेन
सकलकारकविषयेनकारकाभावानुयोगित्वरूपंसादृश्यमतआह। तत्रयानीतिसाधनंशक्तिःतादृश
न्युच्चैरादीनितेषुचकारकशक्त्यंतरायोगात्सर्वकारकविषयेकारकाभावानुयोगित्वमस्त्येवेत्यर्थःशक्तिःकर्मत्वादिः॥

कौ०वि०१
२०७

वचनादिति अव्ययीभावश्चेति वचनादित्यर्थः। संख्याभावाग्निलमुदिति चार्थः मशाकार्थइत्यादौ अभावस्य फलत्ववत् अत्र तदभावस्य कारणत्वमिति बोध्यं। यथेति। क्रियाहे तुकसंबंधविशेषद्योतका हि अन्वर्थबलात्कर्मप्रवचनीयाः स्वत्यादीनां तत्वाभावेपि क्रियापदसंनिधौ क्रियागतविशेषद्योतकयोरपि यथा संज्ञा तथा प्रकृतेऽव्य

वचनेष्विति। एकत्वादिष्वव्ययीभावस्य शक्तिलिंगविशेषयोगेपि वचनादव्ययत्वं। यथा स्वत्यादीनां कर्मप्रवचनीयसंज्ञा तत्र यान्यसत्वभूतार्थाभिधायीन्यव्ययानि तेषां लिंगादिभिरयोगः तेषां द्रव्यधर्मत्वात्। सत्ववाचिनामपि शब्दशक्तिस्वाभाव्यात्तदयोगः यथा युष्मदस्मदोर्लिंगायोगः केचित्तु लिंगादिविशेषेणायोगात्सामान्येन तु योगमव्ययानामाहुः तदयुक्तं लिंगादिसामान्यसद्भावे प्रमाणाभावात्। यन्नव्येतीति नानात्वं न गच्छति सत्वधर्मान्न गृह्णातीत्यर्थः॥

यीभावादीनामित्यर्थः। सत्ववाचिनामपीति स्वरादीनामिति शेषः तदयोगः लिंगसंख्याऽयोग इत्यर्थः सदृशमित्यत्रोक्तं सादृश्यं निरूपयितुं। यन्नव्येतीत्यादि अत्रापि लिंगेष्वित्याद्यावृत्या संबध्यते। नानात्वमिति एतेषु यन्नव्येति एतद्विषये पन्नानात्वं न प्राप्नोति। तदव्ययमित्यर्थः क्वचित्तु नाना न गच्छतीति पाठः तदा एतद्विषयमनेकप्रकारं न प्राप्नोतीत्यर्थः॥ २०७

कृन्मेजंतः॥ ॥ किमजंतेति कृतो मेजंतस्य प्रत्ययमात्रस्य संज्ञा उत कृदंतस्येति न शंकार्थः प्रयोजनं सर्वनामाव्ययसंज्ञायामिति तदंतविधेरित्याशयः। पश्चादिति मेजंतो यः कृदंतमव्ययमित्यर्थ इति भावः संज्ञाविधौ प्रत्ययग्रहणे तदंतविधिनिषेधादाह। प्रयोजनमिति ननु तद्वचनमप्रत्ययांशे चरितार्थमत आह। अथवान्वर्थेति। एवं चाव्ययत्वप्रयोजकस्य महासंज्ञालब्धार्थस्य केवलप्रत्यये अभावात्तदंतविधिरिति भावः अनयैव रीत्या सर्वा

कृन्मेजंतः॥ ॥ कथमिति किं मेजंतग्रहणेन पूर्वं कृद्विशेष्यते पश्चात्तु कृतात्तदंतविधिः आहोस्वित्पूर्वं कृतात्तदंतविधिः पश्चात्तु कृदंतं मेजंतग्रहणेन विशेष्यत इति प्रश्नः। प्रयोजनं सर्वनामाव्ययसंज्ञायामिति चात्र तदंतविधिः अथवाऽन्वर्थसंज्ञाश्रयणात् प्रत्ययग्रहणे संज्ञाविधावप्यत्र तदंतविधिर्भवति न हि केवलस्य प्रत्ययस्य प्रयोगार्हस्य नानागमनमगमनं वा संभवति। कारयांचकारेति लिडंत्रकृतस च मांतो न भवति। प्रतामाविति क्विपि लुप्तप्रत्ययलक्षणेन कृदंतमेतद्भवति श्रुत्या च मांतं॥

दिगणेनुत्तरडतमाभ्यां तदंतविधिर्बोध्यः नानागमनमपि न संभवति संभावितप्रतियोगिदिशा एव तदभावबुद्धेः शाब्देन जननात् संभावितप्रतियोगितावच्छेदक एवाब्राह्मण इत्यादिना भेदबुद्धिवदित्याशयः। लिडंत्रकृदिति। लिङः भावित्वाभावेनातिङ् इति नञ्त्वप्रतिषेध इति भावः। प्रतामाविति तमेः क्विप्। अनुनासिकस्येति दीर्घः॥ कृत्वा चेति। तथा चाव्ययत्वाल्लुक् स्यादिति भावः॥

कै०वि०१
२०८ द्विवचनेत्यादि ननु संख्याया अनुप्रयुज्यमानोत्तरतिङैवाभिव्यक्तत्वात्कथं द्विवचनादिप्रसंग इति चेत् उपलक्षणमिदं सर्वैकवचनोत्पत्तिपक्षे। माद्दिलुगर्थमिदमावश्यकमिति न दोषः अव्ययात् सुपो लुगिति ज्ञापकात्सर्वविभक्तिरिति पक्षे च अकजर्थं तद्यामंतस्याव्ययत्वमेष्टव्यमत आह। अकच्चेति। अपरिसमाप्तार्थत्वं च संख्याकारकादिविषयकोत्थिताकांक्षत्वं। अत एवानु

अव्ययादिति लुगिति। ननु लुङ्याद्दिलोपेनासिद्धत्वात् किं लुका प्रयोजनं यदा तद्यनुप्रयोगवशात् द्वित्वबहुत्वावगतिः। तदास्ति द्विवचनबहुवचनोत्पत्तिरिति लुग्विधेयः। अकचूतुन भवत्यपरिसमाप्तार्थत्वादज्ञातादिभिर्योगाभावात्। इष्यते चेति। पूर्वोक्ताद्धेतोस्तरबाद्यनुत्पादादनुप्रयोग एव तरबाद्युत्पत्तिः समाप्तार्थस्य प्रकर्षादियोगादित्यर्थः अत्रैवार्थे ज्ञापकमाह। आतश्चेति। तत्रह्युक्तं। अवद्दितनिवृत्यर्थं चेति। प्रशान् शब्द मितितस्य मोनो धातोरिति नत्वस्यासिद्धत्वात्। सिद्धमव्ययत्वमिति भावः तुल्यजातीयस्य धातोर्नियमेन व्यावृत्तिः क्रियतइति कारयांचकारेति भवत्येवमांतस्याव्ययसंज्ञा॥ ॥

प्रयोगः प्रार्थ्यते स्वार्थे परिपूर्णत्वचार्थांतरेणासंबंध इति भावः ननु तरबाद्यनुत्पत्तावामंतार्थप्रकर्षादिप्रतीतिः कथमत आह। अनुप्रयोग एवेति तदुत्पन्नतरयैवैतद्गतप्रकर्षप्रतीतिरित्यर्थः भाष्ये लुकप्रदर्शनमात्रपरमिति भावः धातुत्वेन तुल्यजातीयतेत्याह॥ धातोरिति॥ ॥छ॥ ॥ॐ नमः शिवाय॥ ॥ २०८

तस्य च्विंतस्येति। अत्र चेदमेव ज्ञाप्यमानं प्रशामाविति तु शांतिमद्वाचकस्य शांत्यर्थकस्यैव चगणे पाठस्यैव स्वभावेन लिंगाद्यभावात्। वस्तुतो गणे मांत पाठः प्रयोगे एव तु नत्वं यथा स्वरादीनां गणे रेफांत पाठः प्रयोगे तु विसर्गादीति भाष्याशयः। अस्मादेवेति धातुमात्रापेक्षं ज्ञापकमिति भावः लाक्षणिकत्वाद्वेति। वर्णग्रहणेपि तत्प्रवृत्तेरिति तात्पर्यं भाष्ये। निकारोकारेति यत्वं तयहण्यान्नित्ययोग बहुव्रीहिणोपदेशे एजंतमित्यर्थाद्त्र न दोष इति तत्र परिभा

षानतेजनइत्यस्य तु प्रवृत्तिरूपं नत्ववतितस्य च्विं तस्य प्रयोगादर्शनात् लावयतेलैरित्यस्यापि न भवति अस्मादेव ज्ञापकात् लाक्षणिकत्वाद्वौकारस्य। अनिकारोकारेति। एच एतद्विशेषणं न मकारस्य व्यवच्छेद्यासंभवात्। आधय इति गुणे कृते अंतरंगबहिरंगयो रिति न्यायादव्ययसंज्ञा स्यात् न त्वयादयः अंतरंगत्वादेव सुब्लुक् स्यात्। परिभाषांतर प्रयोजनकथनार्थं लक्षणप्रतिपदोक्तयोरित्यत्र दनाश्रितं लाक्षणिकं ह्यनुमेयं प्रतिपदोक्तं तु प्रत्यक्षमिति तस्यैव ग्रहणं न्याय्यं॥ ॥छ॥ ॥

षयैवासिद्धत्वग्रहणं न कार्यमिति तदाशयात्। गुणे कृत इति। तत्र कृते सुवनपेक्षत्वेनांतरंगाव्ययसंज्ञा सुप्संबंधि अजपेक्षत्वाद्यादयो बहिरंगाः। अंतरंगत्वादेवेति ननु वर्णमात्रापेक्षया यादय एवांतरंगाः एवं तर्हि अंतरंगत्वेन बाधकत्वं जष्यते तेनांतरंगानपीति न्यायेन लुगिति बोध्यं। तेन च लुक इव तत्प्रयोजकानामपि प्राबल्यबोधनेनातेनैव गुणे यादीन्बाधित्वाव्ययत्वं बोध्यं॥ ॥छ॥ ॥ ॥

कै०वि०१
२०९

तद्विघातस्येतिकर्मण्यणित्याह। तमिति। नचानयाऽलुकोबाधेपिसंज्ञाबाधेमानाभावः साक्षात्वरंपरयावातद्वि
घातकमात्रस्यानयाप्रतिबंधात्। अतएवोपादास्तेत्यत्रकित्वंन। अन्यथाऽनयासाक्षादेव्विषयसन्नि
पातद्विघातक्रकुितिचेतिनिषेधाप्रवृत्तिः स्यात्कित्वंतुस्यादेव। तत्फलंतुसन्नियोगशिष्टत्वस्तोद्धिरेवए

सान्निपातलक्षणइतिसन्निपातः संश्लेषस्तन्निमित्तोयोविधिः सतद्विघातस्यानिमित्तं तं
सन्निपातंयोविहंतितस्येत्यर्थः। ग्रामणिकुलमिति। इकोह्रस्वइतिपूर्वोत्तरपदसन्निपात
निमित्तंतुकिद्धसंतिपूर्वोत्तरपदयोरानंतर्यविघातः। यदातुह्रस्वमात्रस्यतुगागमोनत
दंतस्य। अवयवावयवश्चसमुदायावयवोनभवतितदैतत्प्रयोजनंनत्वन्यथा॥ ॥

वंचोपादेस्तेतिरूपंस्यात्अत्राहिकिदित्तिनकार्यातिदेशः इत्वकालेतत्कार्यासंभवात्तस्माद्व्यपदेशाति
देशएव। तस्मात्सान्निपातविघातकशास्त्रप्रवृत्तिनिमित्तातिदेशवत्संज्ञायाअप्यनेनाप्रवृत्तिः अकजाद्य
र्थसंज्ञातुनः अंतरंगायातस्यांबहिरंगगुणादेरसिद्धत्वात्। पूर्वोत्तरेति। अधिकृतेनोत्तरपदेनपूर्वपदस्यापेक्षया २०९
दितिभावः अवयवेति। तथाप्रतीतेरित्यभिमानः॥

वस्कतस्कदृगंतपूर्वपदस्योत्तरपदसंनिपातविघातपूर्वपदस्येगंतत्वानिपातविघातश्चेतिभाष्याशयः एवंचत्रहस्विरित्यत्रनांत
स्यस्वादिसंनिपातविघातःपूर्वपदस्यैनांतस्वादिनिपातनिमित्तकपदत्वनिमित्तकोदिनलोपइति। लोकेपाण्याद्यवयवांगुल्यादेर्युज
पुरुषाद्यवयवत्वव्यवहारात् कैयटोक्तंचिंत्यं। किंचभवितेत्यादौतास्यवयवेटोलघूपधागावयवेकृत्वेनप्राप्तस्यगुणस्यदीधीवेवी
तिनिषेधोव्यर्थः स्यात्। नचह्रस्वावयवत्वेतुकोयदागमादइतिन्यायेनेकूग्रहणेनतुग्विशिष्टस्यग्रहणान्नसन्निपातविघातः
आनेमुगितिज्ञापकेनतदनंगीकारात्। एतेनावयवावयवस्यसमुदायावयवत्वेअवयवावयवेपिअवयविनः समवेतत्वा
पत्तौघटस्यापिपरमाणुषुसमवेतत्वेनाप्रत्यक्षसमवेततयावायुवृक्षसंयोगवदप्रत्यक्षत्वंस्यादितिपरास्तं। नूयोवयवसं

बहिरंगमिति द्विपदाश्रयत्वात्। यदपिह्रस्वोनपुंसकइतिह्रस्वत्वं त
दपिअर्थाश्रयत्वाद्बहिरंगंतुक्तुवर्णाश्रयत्वादंतरंगः॥ ॥

निकर्षस्यैवफलवत्वात्कारणेनोत्वेक्षतेः संयोगप्रत्यक्षेतुयावदाश्रयप्रत्यक्षमेवहेतुः फलबलादितिदिक् असिद्धत्वेनसमाधा
नंचावश्यकमित्याह। यदपीति। अर्थाश्रयत्वादितिइदंत्र्यादेशेत्वंतस्यप्रतिषेधोवक्तव्यइतिस्यानिवत्सूत्रस्थेनवार्तिकेनतद्व्या
त्याख्यानपरेणभाष्येणचविरुद्धं प्रातिपदिकरूपसमुदायाश्रयत्वादितिवक्तुंयुक्तंतदेवाह। वर्णाश्रयत्वादितिइयंच
बहिरंगत्वेनसिद्धिर्नाजानंतर्यइतिनिषेधमनाश्रित्यकुल्ग्रामणिइत्यत्रनपुंसकह्रस्वत्वेसंनिपातपरिभा
षयैवनतुकप्रातिपदिकस्याजंतत्वसंनिपातेनजातह्रस्वस्यतदविघातकत्वात् एतेनपरनिमित्तकत्वेनह्र
स्वपित्ज्ञानसापेक्षत्वेनचतुगपिह्रस्वसमानइतिनपुंसकह्रस्वत्वेतुग्दुर्वारइत्यपास्तमितिअलोपदमेववक्ष्यामः॥ ॥

DR BHAU DAJI MEMORIAL
DR BHAU DAJI MEMORIAL

तुकि संनिपातपरिभाषाश्रयणे दोषमप्याह। यदिविति। अत्रापि वर्णमात्राश्रयत्वेन तुगंतरंगः पूर्वपदो
त्तरपदाश्रयो ह्रस्वो बहिरंगस्तद्दोषेष्वस्यागणनाच्च तस्मादत्र तुग्भवत्येवेत्यन्ये तत्रेदं भाति रित्यादौ पदसंज्ञाद्या

यदि तु सन्निपातलक्षणाद्युपाश्रीयते तदा ग्रामणिकुलमित्यत्रापि तुक् न स्यात् ह्रस्वत्वतुगा
गमयोस्त्वत्र साम्यादंतरंगत्वं बहिरंगत्वं नास्तीति छ लक्षणास्तु कृ सिद्धो भवति। असिद्धो नलो
पइति। नलोपः सुप्स्वरेति। असिद्धं बहिरंगमिति वा। निकुचितइति। कुंचेर्णावक्तप्रत्ययः। अ
निदितामिति नलोपः तत्र कित्त्वनिमित्तं उदुपधत्वमुदुपधादित्य कित्त्वस्यानिमित्तमिति न गुणो
भवति। अमुनेति नमुनइत्यस्यायमर्थः नेकर्तव्ये मुभावः सिद्धो भवति न तु नेपरतो यद्दीर्घत्वं
प्राप्नोति तत्र यथा च तत्र मुभावस्यासिद्धत्वात् अकारांतात्वाद्दीर्घप्रसंगः॥

रान लोपस्य संनिपातलक्षणत्वं। असिद्धमिति भुवन्निरपेक्षस्तुगपेक्षया पदत्वद्वारा तदपेक्षनलोपो बहिरंगइति भावः यद्दीर्घत्वं २१०
प्राप्नोतीत्यस्य तत्रापि मुभावः सिद्धइत्यर्थइति शेषः तत्रेत्यस्य च एवं चेत्यादिः। क्वचित्तु प्राप्नोति तत्र तथा च तत्रेति पाठः। असिद्धत्वादिति
शास्त्रासिद्धत्वादिति भावः॥

कृते दसोसेरिति। ननु मुत्वासिध्या उकारे एवाकारस्तु द्धौ सुपि चेत्यंतरतमे दीर्घे आकारे मस्य स्वत एव सत्वाद्धात्परत्वा
नावेन कल्पमनेन दीर्घाकारप्रवृत्तिरिति चेन्न। लोकसिद्ध संनियोगशिष्टन्यायेन मुत्वस्यापि नित्वे नेदीत्परत्वसत्वात् न
चावः परस्मिन्निति स्थानिवत्त्वाद्दीर्घस्य नान्यपरायायइति वाच्यं। पूर्वत्रासिद्धीयेन स्थानिवदिति निषेधात् लक्ष्ये
लक्षणस्येति न्यायस्तु न लक्ष्यभेदात् इत्यन्तिमानः केचित्तु अमाना अदानाइति वापत्तिरित्याहुः। दीर्घत्वे

तस्मिन्कृते। दसोसेरिति दीर्घस्य दीर्घ ऊकारः प्राप्नोति तत्श्चामूनेति स्यात् उकारसन्निपातनिमित्त
स्तु नाभावो दीर्घत्वस्यानिमित्तमिति सिद्धममुनेति। नमुटादेशइति। अनेकविभक्त्यंतस्तत्र समास
आश्रितः टाया आदेशः टायामादेशइति। उपादास्तेति एज्विषयआत्वविधानादकित्वसन्नि
पातनिमित्तमात्वं साध्वोरिज्वितिकित्वस्यानिनिमित्तं कित्वसन्नियुक्तं चेत्वमिति कित्वात्वाविन भवति।
यदयमिति ननु समस्तार्थमेतत्स्यात् प्रियतिसृणां ब्राह्मणानामिति। अत्र हि डःपुंसिवर्तते इति नास्ति ङीपः प्राप्ति
रिति केचित्॥ ॥

स्येति। उकारस्वरूपविनाशकस्येत्यर्थः नन्वेवमपि टादेश एव सिद्धत्वं स्यादत आह। अनेकेति। अनेकविभक्त्यंत पूर्वपद
इत्यर्थः संबंधसामान्यषष्ठ्या समासइति तात्पर्यं। कित्वस्येति भाष्ये घिस्याघ्वोरिज्विति कित्वं प्राप्नोतीति पाठः इत्वमिति
पाठे कित्वसहितमित्वमित्यर्थः कित्वावस्थायामीत्वं स्यादत आह। कित्वेति। नास्ति ङीपइति। यत्वंतरंगत्वात्स
मासात्पूर्वमेव ङीवितितत्र अंतरंगानपीति न्याये नांतवर्तिविभक्त्याश्रयतिस्रादेशस्याप्रवृत्तेः॥ ॥

अज्ञापकमेवेति। ङ्यं तेनुनास्य प्रवृत्तिर्विनिवृत्तौ लिंगविशिष्टग्रहणात्। नन्वेवं स्वस्त्रादिपाठोऽनर्थः स्यादत आह। ज्ञापकादेवेति। एवं चेतत् ज्ञापकपरत्वात्प्रामाण्यात्स्वपाठो। प्रामाणिक इति भावः। विनिक्लित्स्कुक इति तन्निमित्तसंज्ञायाश्च त्यपि बोध्यं अंतग्रहणमिति तत्सामर्थ्यादिति मन्यते। सामर्थ्यमसिद्धमिति परिहारः। संख्येति। बहुव्रीहेः फलं संख्या संप्रत्ययः। विभक्तौ इति॥ घेः परस्य ङेरौत् घेरंतादेशश्चाकार इति सूत्रार्थः। ति ङ्यादेशो त्वसन्नियोगेन विधी

तद्युक्तं न हि ङी विधाने गाधिकारोऽस्ति तत्रावयवस्य स्त्रीत्ववृत्तित्वात् ङीपः प्राप्तिः केन वार्यत इति ज्ञापकमेव। ज्ञापकादेव च सिद्धत्वात् स्वस्त्रादिषु नयोः पाठो न कर्तव्यो भवति। शतानीति विभक्तिसन्निपातनिमित्तो नुमागमः षट्संज्ञाहेतुकस्य विभक्तिलुको न निमित्तं ष्णांता षडिति तत्र ग्रहणं मौपदेशिकप्रतिपत्त्यर्थमित्यत्र न भवतीति चेत्। संख्यासंप्रत्ययार्थबहुव्रीह्यर्थं तत्स्यादित्यदोषः। शाकटाविति। विभक्तिसन्निपातकृतमत्वं यदि टापो निमित्तं स्यात्। आनंतर्यं विहन्यैत शास्त्रीये च कार्ये अंतादिवद्भावो नानंतर्यं लौकिके टाप्यपि च सति शाकटायामिति स्यात्। अद्व घारिति तपरकरणेनाप्यत्र टाप् निवर्तयितुं शक्यते। इदूतौ हि स्थाने मात्रिक एवाकारो भविष्यति त्वाप्यमानत्वाद्धास्वर्णस्याकारो ग्राहको न भविष्यति लक्षणांतरेणापि प्राप्तस्य
दीर्घत्वस्य निराकरणार्थं तपरकरणं संपद्यते॥ श२

यमानत्वमंगप्रत्ययसन्निपातकृतमित्यर्थः नन्वकादेशे तवद्भावान्नटाप् व्यवधायको तत आह। शास्त्रीयेन्वेति। ननु टापि दीर्घैकादेशे शाकटाविति सिध्येदत आह। टापि चेति। वृद्धेः परत्वाद्बाधं गत्वा ङ्याडामाविति भावः संपद्यत इति। तपरत्वाद्धिस्वर्णदीर्घत्वं न स्यात् टाबनुस्यादेवा किं च शाकटावित्यादौ वृद्धिरप्येवं न स्यादिति चिंत्यमिदं॥ ११ २११

लुक्स्यादितीति। लुगभावेपि शाकटावितिवद्यत्संनिपातेन गुणो जातस्तदानंतर्यविघातस्य सत्वेन तत्कथनस्योपयोगश्चिंत्यः ननु षविदेरित्याम्विधानादुवोषेत्यसंगमत आह। उपविदेति। तत्र न द्विर्वचनात्प्राक् गुरुमत्वमिति भावः। प्रतिपदविधेरिति। क्वचिद्गुणे क्वचिद्द्वित्वे एकादेशो गुरुमत्वाद्विजादेरित्येतदत्राप्राप्तमिति भावः। प्रतिपदविधेरिति। क्वचिद्गुणे क्वचिद्द्वित्वे एकादेशो परत्वादिति। तदुक्तस्य ऊषतुरित्यस्यावकाशत्वमभ्युपगम्येदमुच्यते। उवोषेति कर्गद्वितीयांतो वाभ्योप्येपावः उषेर्विकल्पेन पक्षे आमभावे पि कृतद्वित्वात् उवोषे दुर्वार एवाम्रूपेवास्त्येव विशेष

इयेषेति। आमि सति लुक्स्यादिति प्रत्ययसन्निपातस्य विघातः स्यात्। उषविदेति विकल्पः ऊषांचकार ऊषतुरित्यादौ सावकाश इत्युवोषेति नित्यं आम् प्रसज्येत। प्रतिपदविधेस्तु बलवत्वात्परत्वाच्चात्रापि विकल्पेनैव भाव्यमिति। अनुदाहरणमेतत्। गुरुमत इति। नित्ययोगे मतुवाश्रयणादपि शक्यो त्रामभावः प्रतिपादयितुं। दाक्षिरिति। प्रयोगे व्यवस्थितस्यैवेकारस्यान्वाख्यानमनेन क्रियत इति सन्निपातलक्षणत्वं प्रत्ययस्य संनाव्यते॥

उवोषांचकारेति उषेस्त्वामि ओषांचकारेति इति परे। नित्ययोगे तिङ्जादेर्गुरोरित्युक्तावपि अनृच्छ इति प्रतिषेधादिजादेर्गुरुमत इत्यर्थलाभेन मतुप्ग्रहण्यादिति भावः परेत्वेवं सत्यनृच्छ इत्यस्यानर्थक्यापत्तिः तुगुत्पत्तेः प्राक् गुरुमत्वाभावात् उक्षादीनां गुरुमतामामनोपत्तेश्च तेषामाशीर्लिङि गुरुमत्वाभावादिति भाष्याशयमाहुः नन्विजः प्रत्ययो नो भयाधिष्ठानसंबंधलक्षणसंनिपाताश्रय इत्यत आह। प्रयोग इति। अन्वाख्यानं। साधुत्वेन प्रत्ययस्य। साधुत्वावच्छिन्नस्य।

अविद्यमानएवेतिमंदमध्यानां तथैवप्रतीते।साधुत्वान्वाख्यानेपिसाधुत्वस्य सन्निपातनिमित्तकत्वंनप्रत्ययस्ये
 तिभावः॥सत्यामितियस्मादित्यस्यप्रत्ययविधावुद्देश्यतावच्छेदकावच्छिन्नादित्यर्थः॥वर्णादादितितदंगसंज्ञामितिसूत्रा
र्थइतिभावः यद्यंगसंज्ञा॥निमित्तंकथंतर्हिवार्त्तिकेप्रत्ययइत्युक्तमतआह।तत्रेति।आत्रेयइतश्चनित्रइत्विकं।
परेतुवार्त्तिकस्यायमाशयः निमित्तनिमित्तिनोः संबंधवत् विशेषणविशेष्ययोः संबंधोपिसंनिपातः एवंचप्रातिपदि
कस्यादंतत्वनिमित्तः प्रत्ययस्तद्विघातस्यानिमित्तमितीममाशयमजानानः शंकते।नप्रत्ययइति।एकदेश्युक्तेर

नप्रत्ययइति।कल्पितप्रकृतिप्रत्ययविभागेनान्वाख्यानात् प्रकृतेरविद्यमानएवप्रत्ययइत्याद्यतइत्या
शयः॥अंगसंज्ञेति।सत्यामंगसंज्ञायामकारलोपइतिस्यादानंतर्यविघातः।तत्रवर्णविचालस्यानिमित्तस्या
दिति॥अंग संज्ञाद्वारेणेत्यर्थः॥अत्रकेचिद्वर्णाश्रयइतिमाचक्षतेतेनात्रेयाद्यप्युदाहरणंअन्येल
वर्णाश्रयइत्यकारप्रश्लेषमाहुः॥ ॥

यति।अंगसंज्ञातर्हीति।युक्तंचैतत् दुपजीव्यविरोधस्यान्याय्यत्वंहि एतन्न्यायमूलंतस्यचप्रकृतेपिसत्वात्
अतिप्रसंगस्तुत्वयेवमयाप्यनित्यत्वेन सुशकवारणः अतएवग्रामणिकुलमित्यादौनपुंसकह्रस्वत्वेलुकः
उपजीव्यस्यप्रातिपदिकाजंतस्यैत्वसंबंधस्यविघातात्।बहिरंगपरिभाषया॥सिद्धत्वंतुन।तस्यंतत्वाभावात्।
शेवोगांगेयइत्यादावप्यंगसंज्ञायालोपनिमित्तत्वानापत्त्यावर्णाश्रयइत्यंशस्यवार्त्तिकेवैयर्थ्यापत्तेश्चेत्याहुः॥ ॥

आत्वंक्रीङ्जीनांणाविति।स्वांगस्याव्यवधायकत्वादाह।आकारइतिकृतत्वात्तस्यैवपुगितिभावः परेतुपुकोंग
त्वकत्वेपिनक्षतिः याहृशयोः सन्निपातः पुग्निमित्तंतस्यविघातसत्वात् यदागमाइतिपरिभाषयातत्ग्रहणे
नग्रहणेपिसूत्रकृतः संनिपातस्याभावात् अत्रचेदमेवभाष्यमानंह्रस्वत्वंतुत्वविधेरित्यादिवुत्।सिद्धांताश
यस्तुपरिभाषायाअनित्यत्वमाश्रयणीयमेवेत्याहुः भाष्ये।पुक् ह्रस्वत्वस्येति।शायाकारसंनिपातनिमित्तः

भापयतीति।णिचिरक्डौकृतायामात्वंपुकोननिमित्तंस्यात्।अंगस्ययआकारस्तस्यपुगि
त्यवयवन्नत्वंपुकंमत्वादोषोपन्यासः॥अग्निमानिति।पूर्वमुदात्तमाश्रित्यमतुपनुदात्तत्वंक्रिय
माणंपूर्वस्यनिघातंनकुर्यात्।परमवाचेति।अंतोदात्तादुत्तरपदादितिविभक्त्युदात्तत्वंविधीय
यमानंपूर्वनिघातः स्यानिमित्तंस्यात्॥

पुक् ह्रस्वेहितद्विघातः स्पष्टएव।नचह्रस्वस्यचङ्परणिनिमित्तस्यणिनिमित्तपुगपेक्षयाबहिरंगत्वेनासिद्धत्वा
त्कथमत्रपरिभाषाप्राप्तिः एतद्भाष्यप्रामाण्येनानेयासिद्धस्यापिनिरत्तिस्वीकारात्।किंचतयाशास्त्रीयेकार्येऽसिद्ध
त्वेपिलौकिकेसंनिपातेसिद्धत्वाभावात्।भाष्ये।सिद्धिरिति।वसुकाजादित्याकारांतलक्षणइडूनियमप्रशास्त्राणांचवि
धिमुखेनैवप्रवृत्तिरितिभावः।पूर्वमिति।ह्रस्वनुड्भ्यामित्यत्रांतोदात्तादित्यनुवृत्तेरितिभावः ह्रस्वत्वंमंबाधत्यनेन॥

कै॰वि॰९॰१ ननु ह्रस्वग्रहणं निरवकाशत्वेन संनिपातपरिभाषाबाधकं स्यादत आह। संबुद्धिलोपश्चेति। भाष्ये। एते दोषाः समा
२१२ इति। वार्तिककारोक्तसकलप्रयोजनापेक्षमिदं। यद्यपि प्रयोजनानि नव दोषा अष्टौ तथापि अल्पांतरत्वात्समत्वो
क्तिः यद्वान्यत्रापि दोषः संभाव्यत इत्यस्ति मानः ननूक्तदोषाणामुक्तप्रयोजनेष्वो बहुत्वमेव न कुतस्तदतिश

मात्स्यादिति। हल्ङ्याबादिसूत्रे दीर्घग्रहणमदृष्टेदमुच्यते तत्रकृतेपि ह्रस्वत्वे स्थानिवद्भावाद्भविष्य
तीति भावः ब्रह्मबंधुशब्दापेक्षया न चैतदुच्यते तस्याङ्याचितत्वात्। नित्यमिति का यं तावन्नित्यं
यद्येन कें न चित्त्रक्षणे नेभवत्विति भावः संबुद्धिलोपस्यावकाशः। हे देवदत्तेति। न्यूयांसो वेति। दु
ष्टत्वप्रतिपादनाय प्रकर्षारोपः सर्वादिषु समशब्दस्य सर्वशब्दपर्यायस्य सर्वनामसंज्ञाविधाना
त्। तुल्यवाचिनोऽत्र समा इति प्रयोगः अस्ति समशब्दः सर्वपर्यायः यथा समराज्यं वर्त्तते सर्वेषां राज्यं वर्त्तत
इत्यर्थः वेदेपि मानः समस्य इत्यादि प्रयोगः सर्वस्य दुर्धियो मान इत्यर्थः तत्र प्रयोजनान्यल्पत्वात् तान्येवोपसंख्यातव्या

योत आह। दूष्टत्वेति अन्येतूक्तेषु दूषितप्रयोजनानित्यक्तान्यतप्रयोजनत्रयापेक्षया भूयस्त्वोक्तिरित्याहुः ध्यायते वि
चिबस्यकेबचने अतोधातोरिति लोपे दुरोनाशदमध्येष्विति उत्त्वे उत्तरपदादे इत्वेदृदिदु इति तदाह। दुर्धिय इति। सर्वस्य दुर्बुद्धेः २१२
हतिरूप इवोनो स्मान्माबधीदित्यर्थः दुस्थिता धीर्येषामिति विग्रहे गतिकारकपूर्वकत्वानाबाधएनतस्मान्नार्थ इति पूर्वपक्षाभ्रमाह। तत्रेति॥

सिद्धांती समाधत्ते भाष्ये। नहीति। परिभाषायाः कर्त्तव्यत्वे युक्त्यंतरमप्याह सिद्धांती। दोषाः खल्वपीति। लक्षणमिति।
उपलक्षकरूपं नास्तीत्यर्थः। तत्र विधानेति। यादृशप्रकृतिप्रत्ययस्य निपातनिमित्तागसंज्ञातादृशसंनिपातवि
घातं विनायस्येति लोपस्य चारितार्थ्याभावादिति भावः। काष्टयेति। अकारसंनिपातनिमित्तोङ्ःयो यिजा
तानिमित्तदीर्घस्यानिमित्तं स्यादिति भावः न चैवं दोषाः साकल्ये नेति भाष्यविरोधः कष्टायेति यादेशो दी

र्घविधेयमिति। तत्रविधानसामर्थ्यादिगो वर्णविभाजो भविष्यतिका
ष्टायेति ज्ञापकात् यशब्दे दीर्घो भविष्यति। नयासयोरिति लिंगाद्वायुभावि
ष्यति। यथि वानि तिवस्येकाजादित्युयं नियमः। इटोनत्वं पूर्वो यं
विधिरिति। आकारस्यालोपः॥ ॥

र्घत्वस्येति ग्रंथो भाष्यपुस्तकेषु न दृष्टो नो न दोषः। एवं च समा इत्यपि यथाश्रुतमेवेत्याहुः। लिंगादिति इत्वनिषे
धवैयर्थ्यादिति भावः। नत्वपूर्व इति क्रादिनियमाद्धार्धधातुकस्येति इटि त्येवेट्सिद्ध इति नेडाकारांतसंनिपात
निमित्त इति भावः परेतु नियमशास्त्राणां विधित्वमेव अपीत्वितरनिवृत्तिरित्यर्थस्य भाष्यसंमतत्वेना
कारांतसंनिपातनिमित्त एवेड् इत्यनित्यत्वे नैवात्र समाधानं युक्तमित्याहुः॥ ॥छ॥ ॥

कै०वि०१०१
२१४

आकारांतेति। अंगस्येत्यनेन सामानाधिकरण्यस्योचितत्वादितिभावः। अत्र यद्वक्तव्यं तत्प्रागेवोक्तं। तज्ज्ञापयतीति अ
त एव भरज्ञपीतिनिर्देशः संगछते मिमां ह्रस्वो चोपधाया इत्यनुवर्त्ततद्रितिभावः। ह्रस्वभाविनी ति अ चश्चेत्युपस्थितेरि

अध्ययतीत्याकारांतन्नक्तः पुङ् व्यवधायकः अदीदयदितिलिंगाद्ध्रस्वः यदयं मारणतोष
णेति जानाते र्मित्वं उपधाह्रस्वार्थं शास्ति तज्ज्ञापयति पुकि कृते उपधाह्रस्वत्वं भवतीति। नहि जा
नातेरकृते पुकि ह्रस्वनाविन्युपधा भवतिः अग्निभानि ति। अनुदात्तं पदमेकवर्जमितिपरिभा
षा स्वरविषयासन्निपातपरिभाषां बाधते एङ् ह्रस्वादित्यत्रापि गुणात्संबुद्धेरित्ति वक्तव्ये ह्र
स्वग्रहणसामर्थ्यात्संनिपातपरिभाषाभावः दर्वीत्यत्र छंदसि गुणाभावपक्षे छांदसो लुक् भवति॥ ॥

तिभावः अचश्चेत्यस्य भक्तत्वेन तद्बाधकल्पनापेक्षया ऽस्यैवानुमितस्य लोकन्यायासिद्धस्य बाधकल्प
नोचितेति तात्पर्यं। बाधतेति। ह्रस्वनुड्भ्यामित्यत्रोपस्थितयोपस्थितिसामर्थ्यादितिभावः। गुणाभावेति जसा
दिषु छंदसि वावचनमितिवचनादितिभावः॥ २९ ॥ ७० ॥ २१४

अव्ययीभावश्च॥ ॥ उपचारो नाम अतः कृ इति विहितविसर्गस्यानित्वं। यथा मशकार्थ इति एतदेव निरुक्तिकारणमिति पातंजलेव्ये
वह्वियते। अनेनेति। शब्दांतरवचनसंवादेनेत्यर्थः। तन्न वक्तव्यं इत्यंततः तत्र यदन्यदित्यन्यत्वे प्रतियोगिनस्त्र्ययुक्तादूत्याहुः किं
पुनस्तत्परांगवदित्यादिना तस्यैवोदाहरणप्रदर्शनं। षष्ठ्येति। अत्र चकारकत्वं। तेन समुदायस्य षाष्ठमामंत्रितस्य चेत्याद्यु
दातत्वं भाष्ये। यदयं नाव्ययीभावादिति। सद्यनंतरत्वादव्ययाक्षष्ठु पद्दृत्यस्यैवानुषंधोनतस्तुयोधात्वित्यस्येति उपमालो
कमुखद्दृत्यादौ तन्निषेधेन चरितार्थमिति नस्त्रमितव्यं। नचोक्तमिति भाष्ये पदीत्यस्य ... ग्धे संदिग्धवचनं वेदाः प्रमाणे

अव्ययीभावश्च॥ ॥ योजनमिति। मुखस्वरोपचारो निवर्त्यमानो प्रयोजनम् यथा मशकार्थे धूसड्ति। अपिखल्विति। एवं ख
ल्वित्यर्थः परिगणनमनेन दृढी क्रियते। उपाग्न्यधीयानेति। अग्निसमीपे अधीयानेत्यर्थः। तत्र षष्ठ्यामंत्रितकार
कवचनमिति परांगवद्भावो भवति। न चैकमिति। सामान्यलक्षणामेकप्रयोजनार्थं न कर्त्तव्यमित्यर्थः। तत्रैवा
यमिति। न चोक्तं तस्मान्मुखस्वरेणात्र भवितव्यमित्याहुः। अन्ये वर्णयंति अनव्ययमव्ययं भवतीत्यन्वर्थसंज्ञा
विज्ञानात् मुखस्वरानिवृत्तिर्भविष्यतीति नार्थः सूत्रेणेति। केचित्स्वरादिपाठात्सिद्धायामव्ययसंज्ञायां पुनर्वचन
मनित्यत्वज्ञापनार्थं तेन कतिपयान्येवाव्ययकार्याणि भवंतीति नार्थः परिगणनेत्याहुः तेषां वचनमंतरेण विशेषप्रमाणाभावः॥ ॥

चादितिवत् तस्मात्तत्र ग्रहणं कर्त्तव्यं सूत्रं च न कार्यमिति भाष्याशय इति वया। अन्ये त्विति चिनाद्यारोपितमव्ययत्वं वास्त
वमनव्ययत्वं च प्रतीयते इति यथा जस्य किंचिदव्ययकार्यं भवति किंचिन्नेतीष्टसिद्धमिति भावः। विशेषा। कार्यविशेषे। किं च द्विर्व
द्धसुबद्धमिति न्यायेन पुनर्विधानात्सार्वत्रिकत्वमेवस्यादित्यपि द्रष्टव्यं। एवं चाव्ययीभावस्याव्ययत्वात्क्यत्रेतिहरदत्तायुक्तं चिंत्यं भा
ष्यविरोधात्। अन्ये तु। मुखस्वरे नाव्ययीभावादिति नोक्तं सत्रं च कृतं। तस्मादन्यदपि प्रयोजनं नेद्यादुपकूलमित्यादौ षष्ठीसमा
सप्रतिषेधादीत्याहुरिति मतं हरिटीकायां स्पष्टं तदपि लच्छ्याहुरित्यादिभाष्याननुगुणं॥ ७१॥ ॥छ॥ ॥

कौ॰वि॰१॰१
२१५

शिसर्वनामस्थानं॥ ॥नाप्येसमर्थसमासश्चेतिदूषणांतरंतत्रासामर्थ्यमसंबंधात्। चेनवाक्येनेदस्यापिसंग्रहः।पर्युदासेति।एवंहि
समर्थसमासैकवाक्यतेलभ्यते।यद्यपिपर्युदासेविलक्षणातथापिदोषद्वययुक्तप्रसज्यप्रतिषेधापेक्षयालघुरेवेतिभावः।वस्तुतोन
ञोनिपातत्वेनानेकार्थत्वात्पर्युदासपक्षेलक्षणेतिरिक्तंबवःपर्युदासपक्षेसुडित्यनेनैकवाक्यतयातस्याप्राप्तावपिआद्यस्याप्राप्तौनमान
मितितात्पर्य।नाप्ये।नपुंसकेनव्यापारइतिनिषेधस्येतिशेषः।अप्राप्तेरितिवार्त्तिकस्यपूर्वसूत्रविहितसंज्ञायाःप्रतिषेधाप्राप्तेरि
तिअक्षरार्थः।भाष्येतुवस्त्वर्थनउच्यते।अन्यथेति।सुडित्यनपेक्ष्यनपुंसकसंबंधिमात्रस्यनिषेधइत्यस्तिमानःसुड्संबंधेतुइदंचिंत्यं

शिसर्वनामस्थानं॥ ॥सुडनपुंसकस्येतिचेदिति।अस्मिन्सूत्रन्यासेदोषः सुट्स्त्रीपुंसयोरित्यस्मिन्न्यासेनदोषइत्यर्थः।
प्रसज्यप्रतिषेधाश्रयेणपूर्वपक्षः पर्युदासपक्षेणसिद्धांतः।अप्राप्तेर्वेतिप्रसज्यप्रतिषेधेप्यदोषः तत्रसुडित्य
नेनयाप्राप्तिःसानिषिध्यतेनतुशिसर्वनामस्थानमितिप्राप्तिः।अन्यथाशिसर्वनामस्थानमितिनिरवकाशं
स्यात्।नपुंसकस्यैवहिशिःसंभवति।ननुचेयमितिपरत्वादित्यर्थः प्रतिषेधयुक्तायुक्तत्वाच्चविरोधसंभ
वः तत्रपरत्वात्सुडितिप्राप्तिःपूर्वाप्राप्तिंबाधेतमपिप्रतिषेधइतिदोषः।नोत्सहतइतिअपवादविषयपरिहारेणास्याः॥
प्रवर्त्तनादित्यर्थःअथवेतर्हीतिइदानीमित्यर्थः तत्रस्त्रीपुंसयोरितिवक्तव्येअनपुंसकस्येतिवचनंज्ञापकंप्रसज्यप्रतिषेधे
पिनञ्समासोऽस्तीति॥ ॥
प्रासःशोचारितार्थत्वात्।ननुसंज्ञायाएकत्वेनकार्यैक्यंविरोधाभावात्कथंपरत्वमतआह।प्रतिषेधेतिशास्त्रभावकोशत्वात्।एवंचो
सयोर्योगपद्यासंभवरूपोविरोधोस्तीतिभावः।पूर्वाप्राप्तिमिति।एवंचसकृद्गतिन्यायेनपुनर्नप्रवर्त्ततइतिभावः।इदानीमित्यर्थइ
तितथापीत्यर्थइत्युचितं।यद्यपिवक्तव्यइत्युपक्रमातस्त्रीपुंसयोरितिमात्राधिक्येपिस्पष्टप्रतिपत्त्यर्थमित्यर्थःक्रियोरितितुवक्तुमशक्यं २१५
तस्यासाधुत्वावइतिबोध्यं।अत्रपर्युदासप्रसज्यप्रतिषेधयोःसमफलत्वोक्त्याशास्त्रप्रापितस्यप्रतिषेधविकल्पइतिमीमांसकोक्तं
चिंत्यंसामान्यविशेषन्यायेनबाधस्यैवोचितत्वात्स्वाभावेसंभावितस्यैवचप्रतिषेधइत्यादिमंजूषायांविस्तरः॥४२॥४३॥ ॥छ॥ ॥

नवेतिविभाषा॥ ॥ननुसमुदायस्यसमासग्रहणनियमेनाप्रातिपदिकत्वात् नवेतिविभाषायामित्यनुपपन्नमतआह।
समुदायस्येतिवार्त्तिकोच्चारितसमुदायस्येत्यर्थः नन्वेवमपिसमुदायस्यानावृतत्वात् कथंयाडादीत्यतआह।स्त्रीप्रत्य
येचेति।स्त्रीप्रत्ययेचानुपसर्जनेनेतिष्यङःसंप्रसारणामित्यत्रभाष्यपठितवचनेनेतिनावः यत्तुहल्ङ्याबितिदीर्घ
ग्रहणादितितन्नबहुश्रेयसीत्यादौलोपार्थप्रत्ययग्रहणइतितदंतविधिनाङ्यंतेत्यर्थेतस्यस्वादिप्रत्ययलब्धयस्माद्वि
धिस्तदादेरित्येतद्विशेषणतयाङ्यंतां तेत्यर्थेननिष्कौशांबिव्यावृत्तयेदीर्घग्रहणस्यावश्यकत्वादित्यादिक।अनु

नवेतिविभाषा॥ ॥नवेतिभाषायामिति।समुदायस्यानुकरणत्वादनुकरणस्यचानुकार्येणार्थ
वत्वात्प्रातिपदिकेलेसतिविभक्त्युत्पत्तिःस्त्रीप्रत्ययेचतदादिनियमाभावाद्याडामौभवतः।अथवा
नवेत्युच्चार्ययाविभाषाकृतातस्यामितिव्याख्यातत्रलोकेक्रियापदसन्निधानेनवाशब्दयोर्योर्योर्योत्योविक
ल्पप्रतिषेधलक्षणःससंज्ञीत्यर्थःअन्यथाविभाषाप्रदेशेषुनवाशब्दावेवादेशौस्यातां॥ ॥

करणस्यांवंतत्वंतुप्रकृतितदनुकरणमितिन्यायात्।तस्यानित्यत्वाच्चनप्रत्ययांतत्वप्रयुक्तप्रातिपदिकत्वनि
षेधइतिबोध्यं।अथवेति।कृतानुच्चारितासमासत्वादेवप्रातिपदिकत्वमसमासेपिलिंगविशिष्टपरिभाष
याविभक्तिरितिभावः नामपदसंनिधानेनवाशाटीत्यादौप्रत्ययाप्यवगतेराह।क्रियापदेति।अन्यथेति
प्रकरणादिवशाच्चार्थविशेषावसायइतिभावः ननुदाधाघ्वित्यादौनघुशब्दादिनादाधादीनांप्रत्य
यः किंतुदाधाशब्दैरेवेत्यतआह।प्रदेशेष्विति॥ ॥छ॥ ॥ ॐ श्रीसदाशिवायनमः॥ ॥

कै०वि०१०१ भाष्ये ग्रहणे ऽपीत्यादेर्ग्रहणे ऽपीत्यर्थः करणल्युडिति अर्थासंगतेराह। कर्मणीति बाहुलकादिति भावः। सा
२१६ मान्येति। पाकं पचतीतिवत्। भाष्ये स्वस्मात्पदार्थात्प्रच्युतः शब्दः पदार्थकः संपद्यत इत्यन्वयः स्वस्मात्पदार्था
दित्यस्य विवरणं याभावेति। दार्ष्टान्तिके च शब्दः पदार्थकता स्वरूपमिति वचनात्। तस्या इत्यस्य प्रच्युत इति

ग्रहणे ऽपीति शब्दस्य संज्ञाकरणात्प्रदेशेषु तस्यैव संप्रत्यय इत्यर्थः। इतिकरण इति क्रियत इति क
रणः कर्मणि ल्युडिति स्वासौ करणश्चेति समासः क्रियत इति सामान्यविशेषभावे निर्देशः। शब्दा
धिक्यादिति। उपहासपरमेतच्चोदकस्य वचनमशब्दार्थस्याज्ञानादिति भावः। गौरित्ययमा
हेति यद्यपि नित्ये शब्दार्थसंबंधे ऽपात्तस्यार्थस्य त्यागो नास्ति तथापि प्रसिद्धिवशादेतदभिधी
यते॥ अर्थपदार्थकतायाः प्रच्युत इति तत्त्वतस्त्वादावेव स्वरूपपदार्थको गोशब्दः प्रयुक्तः॥

शेषः। यद्यपीति। एवं च स्वस्मात्पदार्थादित्यनुपपन्नं सर्वस्यापि स्वपदार्थत्वात्। प्रच्युतिश्चानुपपन्नेति भावः॥ त्यागो
नास्तीति चार्थान्तरग्रहणाभावस्याप्युपलक्षणं। प्रसिद्धिवशादिति लोकप्रसिध्यैव तत्र स्वपदार्थत्वव्यवहारः २१६
तेषामेवास्यायं प्रसिद्धोर्थस्त्यक्तो ऽप्रसिद्धश्च गृहीत इति प्रसिध्या भाष्ये प्रच्युत्यंगीकारावुक्ताविति भावः। व स्त्र
तो न प्रच्युतादिकमित्याह। तत्त्वत इति॥ ॥

सादृश्यादिति अर्थभेदाच्छब्दभेद इति पक्षेदं। एकशब्दत्वे त्वभेदादिबोध्यं वस्तुतः प्रच्युत्यंगीकारौ तयोरर्थयोर्बो
धाविषयत्वबोधविषयत्वे एव न तु मुख्याविति बोध्यं। पदार्थविपर्यासकृदिति लोके शब्दविशेषणकार्थप्रतीतिः
शास्त्रे ऽर्थविशेषणकशब्दस्येति शब्दसमभिव्याहारे विपरीतमिति विपर्यासः भाष्ये ऽपि स्वस्मात्पदार्थात्प्रच्यु
त इत्यस्य विशेष्यभूतादिति शेषः। अन्यथाप्रतीतेः शब्दानालिंगितायाअभावेन एतदसंगतिः स्यादिति

सादृश्यात्तु तमर्थमनभिव्यक्तमिति शब्दो द्योतयतीति पदार्थविपर्यासकृदित्युच्यते। अर्थपदा
र्थकतेति। संबंधे भावप्रत्ययः संबंधात्प्रच्युतो ऽर्थात्प्रच्युतो भवति। समानशब्दप्रतिषेध
इति। समानशब्दो वाचको येषामर्थानामित्यर्थः। विभाषादिक्समास इति। विभाषाशब्देनान्नि
न वलक्षणो ऽर्थः प्रत्याय्यते तत्र प्रत्ययवाची यो दिक्समास इति संप्रत्ययः स्यात्॥

दिक्। इतिकरणस्यार्थनिर्देशार्थत्वे स्थिते नैव समानानां शब्दानां प्राप्तिरत आह। समान इति। प्रत्यग्रेति यद्य
पि नेह चयं विभाषाग्रहणे न सर्वादीन्यपि संबध्नीयइति भाष्यपर्यालोचनया सर्वादिविशेषणत्वला
भात् प्रत्यग्रत्वं समासविशेषणमयुक्तं तथापि दिग्वाचक सर्वादीनामर्थस्य दिशो नवपुराणत्वासंभवा
दुदाहरणपरभाष्याच्च तत्र सर्वादीनीत्यनेन तद्घटितसमासो लक्षणीय इति भावः॥ ॥

कै०वि०१.१
२१७ तन्निमित्तइति। लक्षणयेत्यर्थः। तदासंज्ञेति। नबहुव्रीहावितिनिषेधेप्राप्तेइदं नित्यार्थंस्यादितिभावः। भाष्येऽअ
चिरकृतायामिति। तस्यांबोध्यायामित्यर्थः संप्रत्ययः स्यादित्यस्यसंज्ञायाइतिशेषः। ननुप्रदेशेविभाषादिगि
त्यादौननवाशब्दउच्चारितः नवेतिविभाषेतिसूत्रेतुनकिंचिद्विधायोक्तं। पूर्वोत्तरसाहचर्येणास्यसंज्ञासू
त्रत्वादित्यतआह। प्रदेशेति। इयंसंज्ञेति। नवेतिविभाषेत्येतत्संज्ञासूत्रार्थइत्यर्थः कार्याणिसर्वनामसंज्ञा

तत्रादिशोनित्यत्वात् नवपुराणत्वासंभवात्तन्निमित्तोयदाशालायांव्यपदेशः दक्षिणपूर्वाशाला
साचास्तिनवातदासंज्ञास्यादित्यर्थः संज्ञाकार्यमंग्यंचप्रत्ययत्वंस्यात्। नवाविधिपूर्वकत्वादि
तिप्रदेशवाक्यार्थपर्यालोच्येयंसंज्ञाव्यवस्थाप्यतेप्रदेशेषुचकार्याणिविधायविभाषाशब्दउच्चारि
तोनवाशब्दार्थंगमयतितत्रलोकवन्निपातार्थावगतिर्भवतिनतुप्रत्ययार्थावगतिरित्यर्थः। विलिं
गमितिभिन्नलिंगंव्यधिकरणमित्यर्थः। विलिंगत्वेनवैयधिकरण्यंलक्ष्यतेनतुप्रतिषेधवाचिनोनवाशब्दस्य
लिंगयोगोस्ति॥ ॥
दीनिनवार्थं। नवाशब्दार्थं॥ विभाषाशब्दस्यार्थसंज्ञात्वात्॥ क्वचित्तुतथैवपाठः भाष्यतेनवेत्युच्यते
इत्यस्यतदर्थबोधकोविभाषाशब्दउच्यतेइत्यर्थः॥ प्रतिषेधवाचिनइति॥ प्रतिषेधवाच्ययंशब्द
इतिप्रत्ययोभवतीत्यर्थः॥ नत्विति। एवंचप्रदेशानुगुण्येनप्रकृतसूत्रेपिनप्रत्ययवाचिनोग्रहणमि २१७
त्यर्थः॥ भिन्नेति। अत्रेसमानलिंगइतिदर्शनाद्विशब्दोभिन्नार्थइतिभावः। नत्विति। असमर्थत्वादितिभावः॥

नैवेति। भाष्येकचित्क्रियतइत्येतच्छ्रेवनजानीमइत्यन्वयः नवाविधीत्युक्तवतोऽयंग्रंथः एवंचशास्त्रेसमानलिं
गनिर्देशस्यक्वाप्यभावात् नक्वापिप्रत्ययार्थावगतिरित्याशयः ननूनयविधाव्ययसंभवेकथमन्यतरनिर्णय
इत्यतआह। तत्रेति। अप्राप्तेयवागूनोजनइतिअकर्तव्यत्वेनावगतेइत्यर्थः प्ररोचनायेतिशेषः। नतुतदंगमि

एतच्छ्रेवेतिनैवकचिद्व्याकरणेसमानलिंगनिर्देशइत्यर्थः। विभाषासेनासुरेतियद्यपिसमान
लिंगोनिर्देशस्तथापिभिन्नविभक्तित्वात्सामानाधिकरण्याभावः। अपिचेतितत्रसामर्थ्याद्विशेषाव
गतिः यदाअप्राप्तेयवागूभोजनेवाक्यमुदीर्यतेतदाप्रत्ययार्थावगतिः यदात्वातुरंप्रतिगुरूपभोजन
निषेधार्थमुच्यतेतदानिषेधावगतिः। नचेहेतिक्रियायाः प्राधान्यात् सैवविभाषाग्रहणेनसंबध्य
तेनतुतदंगमित्यर्थः। तदेवंस्थितमेतत्। नवाविधिपूर्वकत्वादिति। विध्यानित्यत्वमितिविकल्प
इत्यर्थः। नवाशब्दएकएवनिपातः प्रतिषेधवाचीतस्येहोपादानादितिभावः परिहारांतराभिधानाय
नबहुव्रीहावित्यसंबद्धंस्यादितिनोक्तं॥ ॥
तिनवतिक्रियाकर्तृरूद्देश्यरूपंतदंगमित्यर्थः। भाष्येविभाषाभवतीअत्रविभाषेत्यग्रेसर्वनामानीतिशे
षः नवंतिविभाषेत्यस्यसर्वनामानीत्यादिः ननुदिक्समासेपिनित्यप्रतिषेधेनबहुव्रीहावितिसामान्यसू
त्रेणैवसिद्धेविभाषादिगितिसूत्रस्यवैयर्थ्यापत्तिरतआह। परिहारांतरेतिइतिसिद्धेविभाषादिगित्यसंबद्धंस्यादितिअर्थः॥

कै॰वि॰१.१ ननु प्रसक्तस्य निषेधे भाव एव दृष्टो न तु विकल्पो त आह। प्रतिषेधादिति विभाषाभ्येरित्यादौ पि द्विषये विधेरनु
२१८ मानं करिष्यते इत्यर्थः निषेधानुपपत्तिकल्पितशास्त्रेण प्रसज्येति वार्त्तिकार्थ इति भावः एवं च षोडशीग्रहणाग्र
हयावदेकविषयत्वाद्विकल्पसिद्धिरिति तात्पर्यं। तत इति अन्यथा कल्पितशास्त्रं व्यर्थं स्यात् प्रक्षालनाद्धी
तिन्यायविरोधान्न निषेधार्थमेव तदिति भावः ननु विकल्पो विरुद्धविषय एवेति किमुच्यते विप्रतिषिद्धत्वि
ति अत आह। एकेति। युगपदिति शेषः विप्रतिषेधोपपादकं भाष्यं। अत्रेति। प्रसजतिभावमिति शेषः प्रस

सिद्धत्विति प्रतिषेधाद्विधिरनुमास्यते ततो विकल्पः सेत्स्यतीत्यर्थः। विप्रतिषिद्धत्विति एकविषय
योर्विधिनिषेधयोर्विरोधादित्यर्थः। नवाप्रसंगेति। सामर्थ्याद्विधिप्रतिषेधयोः पर्यायो भविष्यती
त्यर्थः॥ ॥छ॥ ॥

ज्यत इति प्रसंगो विधिः प्रतिषेधविषयादित्यस्य कालविशेषविशिष्टात्ततोऽन्यत्र तत्रैव कालांतरविशिष्ट इत्यर्थः नि
षेधसामर्थ्यलब्धोऽयमर्थः सामर्थ्यात्प्रतिषेधविषयादन्यत्र विधिरित्युक्ते यत्फलितं तदाह। प्रतिषेधसामर्थ्या
द्धीति इदमपि पूर्ववद्व्याख्येयं तद्धनयन्नाह। पर्याय इति भाष्ये। या हि प्राप्ते इति केवलोभयत्रविभाषारूपा चेत्यर्थः।
कृतसामर्थ्य इति। पूर्वेणैव कृतशास्त्रेणैव विधिः कृतसामर्थ्याद्विहितविधिकल्पकनिषेधीयशक्तिक इत्यर्थः एवं च तत्र २१८
विधिकल्पनाभावात्प्रतिषेधमात्रप्रत्ययः स्यादिति भावः एतद्भाष्यादपि सामान्यशास्त्रप्राप्तनिषेधे विकल्पं वदंतो मीमांसकाः
परास्ताः॥ ॥

महत्याः संज्ञाया इति भाष्येण संज्ञैव न कर्त्तव्येति विवक्षितं न तु लघ्वी कर्त्तव्येति इत्याह। यदिहीति। समुदायस्येति।
प्रत्येकधर्मावच्छिन्नस्योभयस्येत्यर्थः। विकल्पप्रतिषेधाविति प्राप्तविभाषाविषये इत्यर्थः। विकल्प एवोपतिष्ठ
न्नयोः संज्ञाकरणेऽपि निषेधस्यान्वयायोग्यत्वाद्द्वितीयस्यैवोपस्थितिरिति भावः अत्राप्राप्तविभाषाशब्देन केवला
प्राप्तविभाषोच्यते। युगपदिति। अनवगतसंज्ञिद्वयक्रमोपस्थानस्य चोद्यमेतदित्यभिप्रायः। भावाभावाविति।
इमावेव भाष्ये विधिप्रतिषेधशब्देनोक्तौ। भाष्ये। पूर्वस्योत्तरेणेति। पूर्वस्य प्रतिषेधस्य उत्तरेण विकल्पेन। बाध

महतीसंज्ञेति। तेन द्वावत्र संज्ञिनौ विकल्पप्रतिषेधावित्यर्थः यदि हि केवलः प्रतिषेधः संज्ञी स्यात्संज्ञा
करणमनर्थकं स्यात् विभाषाप्रदेशेषु नेत्येव ब्रूयात्। तत्र समुदायस्येयं संज्ञेति विभाषाप्रदेशेषु विक
ल्पप्रतिषेधावुपतिष्ठेते। अप्राप्तविभाषासु च प्राप्त्यभावात्प्रतिषेधस्याप्यप्रसंगाद्विकल्प एवोपतिष्ठ
ते। एवमपीति यद्यपि विरुद्धयोरेकासंज्ञा क्रियते तथापि प्रदेशेषु युगपद्विरोधाद्भावाभावौ विधातुं न शक्यौ
ते इत्यर्थः॥ ॥छ॥ ॥

भावान्न निषेधप्रवृत्तिप्रतिबंधः किं तु तत्फलस्याभावनिष्ठसार्वकालिकत्वस्य प्रतिबंध इति बोध्यं। नन्वेवमपूर्ववा
क्येन शब्द एवादेशः स्यात् तत्रार्थपरत्वे मानाभावादत आह। इतिकरणा इति एवं चोभयत्रापीति शब्दान्वय इति
भावः एवं चार्थद्वयसंज्ञाकरणसामर्थ्याद्वाक्यभेदेन क्रमेणान्वय इति भावः एवं च केवलप्राप्तविभाषाया
मुभयत्रविभाषायां च क्रमेण निषेधविकल्पयोरुपस्थितिः अप्राप्तभाषायां तु निषेधस्यान्वयायोग्यत्वाच्छुद्ध
विकल्पोपस्थितिरिति तात्पर्यं।

कै०वि०१०१ पूर्वविकल्पाप्रवृत्तौहेत्वंतरमाह। नुपूर्वीवेति। अनुपयोगादिति। उभयगतिरिहे त्युक्तेर्लोकगृहीतविकल्पशक्त्यैवसिद्धेरि
२१८ तिभावः। पक्षेनिवृत्तिरिति। एवंचतत्रनिषेधतात्पर्यकतयैवप्रवृत्तिरितिभावः। अप्राप्तेति। तत्रविधितात्पर्यकतयैव
प्रवृत्तिरितिभावः। पित्त्वेवेति। तत्राप्राप्तेरितिभावः। एकस्योभयत्रतात्पर्यंतुनसंभवतीत्याशयः। नावतात्पर्यकताजो

सिद्धंत्विति। उभयत्रविभाषासुप्रतिषेधेनसमीकृतेविषयेपश्चाद्विकल्पःप्रवर्त्ततइत्यर्थः। यदितुपूर्वं
विकल्पःप्रवर्त्ततेपश्चात्प्रतिषेधस्ततोविकल्पप्रवृत्तिरनर्थिकैवस्यात्। आनुपूर्वीचसंज्ञाविधावाश्रितासै
वप्रदेशवाक्येष्वाश्रीयते। उभयत्रविभाषार्थाचेयंसंज्ञाप्राप्तविभाषायामप्राप्तविभाषायांचसंज्ञाक
रणस्यानुपयोगात्। तथाहि। प्राप्तविभाषासुपक्षेनिवृत्तिःक्रियतेपक्षेतुप्रवृत्तिःस्थितैव। अप्राप्तविभा
षासुचपक्षेकार्यस्यप्रवृत्तिःक्रियतेपक्षांतरेत्वप्रवृत्तिःस्थितैवेतिनास्तितत्रसंज्ञाफलंविभाषाश्वेरित्य
त्रतुयदिविधिमुखेनविभाषाप्रवृत्तिःप्रवर्त्ततेपित्त्वेवसंप्रसारणंस्यात्। कित्सुयजादित्वान्नित्यमेवस्या
त्। अपप्रतिषेधमुखेनप्रवृत्तिस्तदापिकित्स्वेवविकल्पइतिपित्सुनस्यात्। संज्ञाकरणेतुपूर्वंप्रतिषे
धेकित्सुप्रवृत्तेपश्चाद्विधिमुखेनसर्वत्रपक्षेसंप्रसारणप्रवर्त्तनादिष्टंसिध्यति॥

भेनापिद्विषयतैवस्यादितितत्त्वं। अस्योभयत्रविभाषाविषयत्वंभाष्येविभाषाश्वेरित्यस्यैवोदाहरणदानेनबोधितम्। एवंच २१८
तदर्थमावश्यकेऽस्मिन्अन्यत्रापिस्वशास्त्रगृहीतसंकेतेनैवबोधान्नयाहिप्राप्तेविभाषातत्रोभयमुपस्थितमित्याद्युक्तभाष्याविरोधइतिदिक्॥

साधुत्वप्रतिपादनाच्छास्त्रस्येतिपाठः। शास्त्रस्येतिकर्त्तुःशेषत्वेषष्ठी। कचित्तुसाधुत्वप्रतिप्रतिपादनार्थत्वादितिपा
ठः। प्राधान्यादितियदिपरिनिष्ठितंतत्साध्वितिअर्थापत्तिकल्प्यवाक्यस्यैवमुख्यत्वात्तेनमुख्यतयासाधुत्वस्यैववि
धानादित्याशयः। तदंगभूतानामिति। तदुद्देश्यभूतानामित्यर्थः। भाष्ये। यस्यविभाषाक्रियतइतितत्संबंधे
नविभाषोच्यतइत्यर्थः। समासश्चैवहीति। हियतःसमासोविभाषाक्रियते। समासोविभाषेत्युच्यते

यदातुप्रातिलक्ष्यंनेदंनविभाषाश्वेरित्यस्यव्यापारःकचिद्विधिमुखेनकचित्प्रतिषेधमुखेनतदापिसं
ज्ञाकरणमन्तरेणापिसिध्यतीति। अशिष्योप्रयोगइतिवक्ष्यते। अशिष्योवाविदितत्वादिति। साधेनुशा
सनइति। साधुत्वप्रतिपादनार्थत्वात्शास्त्रस्यसाधुत्वस्यैवप्राधान्याद्विकल्पेनसंबंधःस्यात्। ननुतदंगभूतानांस
माससंज्ञादीनामितिभावः। ततश्चविभाषाश्वेरित्यस्यायमर्थःस्यात्। विभाषाश्वयतेःसाधुसंप्रसारणंभवतिपक्षे
त्वसाध्विति। अस्तुयःसाधुरितियथालक्ष्यालक्ष्यसंनिधौलक्ष्यमेवोपादीयते। नचैवहीति। सर्वदात्वस्यसाधुत्वं
नोभयरूपत्वमित्यर्थः। द्वेधाप्रतिपत्तिरिति। साधुत्वविकल्पनेविभाषाग्रहणस्योपयुक्तत्वात्। शिश्वियतुरि
त्यादिरूपंसिध्यतीत्यर्थः॥ ॥७॥ ॥

तत्रसमासोद्देशेनसाधुत्वविधानात्तस्यैवविकल्पःस्यादितिभावः। साधुत्वंचजातिविशेषःसमासप्रकरणीयविभा
षाधिकारस्यभाष्येप्रत्याख्यानादाह। विभाषाश्वेरिति। साधुत्वविकल्पेदूषणमाहभाष्ये। नचैवेत्यादिनातद्व्या
चष्टे। सर्वदात्विति। सादृश्यादसाधुत्यागपुरःसरसाधूपादानंदुष्करमित्यपिबोध्यं॥ ॥७॥ ॥

DR. BHAU DAJI MEMORIAL

DR. BHAU DAJI MEMORIAL

कै॰वि॰१॰१ तत्रसाध्वनुशासनइत्युक्त्याशब्दनित्यत्वपक्षएवायंदोषः नतुकार्यत्वपक्षेइत्युक्तंतदुपपादकंयस्यपुनरित्यादिना
२२० ष्यं। प्राधान्यात्साधुत्वस्यैवविकल्पः स्यादितियदुक्तंतत्राह। साधुत्वस्येति। संज्ञायाः श्रुतत्वेनसाधुत्वस्याश्रुत
त्वेन: श्रुतस्यश्रुतेनैवसंबंधस्यन्याय्यत्वात्प्रयोगासमवायिजडादिस्यजेश्रुतेविधेयत्वस्यावश्यकत्वाच्चे

यस्यपुनरितिएवंमन्यतेव्याकरणेनैवशब्दाउत्पाद्यंतेतन्मतेनविभाषाग्रहणेनापूर्वत्वेनविधेयत्वात्
संप्रसारणमेवविकल्प्यतेइतिद्वैधंप्रतिपत्तिःशब्दानांसिध्यतीति। यस्यापीतिसाधुत्वस्यापौरुषेयत्वाददि
विकल्प्यत्वात्तदंगानामेवविकल्पः। तद्यथेति। पशुत्वानडुत्वयोरविकल्प्यत्वात्क्रियाविकल्प्यते। नन्वन्य
त्रोक्तंनचसंज्ञायाभावाभावाभावाविष्यतेइतितूक्तंसंज्ञादिसंबंध्यतइतिततश्चविरोधः नैषदोषः इह
वृत्तिवाक्ययोर्मुख्यार्थाभेदादभिन्नार्थत्वमाश्रित्योक्तंअन्यत्रतुव्यपेक्षैकार्थीभावभेदात्भिन्नार्थत्वं
माश्रित्यैकार्थीभावेएवसंज्ञायाभावाभावोनेष्यतेइत्युक्तमित्यविरोधः॥ ॥छ॥ ॥

पिवोध्यं॥ पशुत्वेति। साक्षाच्छ्रूयमाणेप्ययोग्यत्वाद्यदानसंबंधस्तदाकिंवक्तव्यमश्रूयमाणेऽयोग्येसंबंधोने
तीत्यर्थः॥ अन्यत्रेति। समर्थसूत्रे। मुख्यः प्रधानः। अभिन्नार्थत्वमिति। एवंचतदर्थेकश्चित्साधुत्वेनान्वाख्यायमा २२०
नोनन्वाख्यातस्यतदर्थस्यान्यस्यनिवर्त्तकः कः स्यादितितस्यापिसाधुत्वार्थंविभाषाधिकारआवश्यकइतिभावः॥ ॥

वाक्येव्यपेक्षापरस्पराकांक्षारूपापदार्थानामपृथगुपस्थितिविषयत्वमेकार्थीभावोवृत्तिविषयः एवंचवृत्तिवाक्ययोर्भि
न्नार्थत्वान्नवाक्यानुज्ञानायविभाषाग्रहणं। किंतुवृत्तिविषयेएवसंज्ञाविकल्पार्थंवाच्यं। नचवृत्तौसंज्ञायाः सइष्यते
तस्मादेकार्थीभावस्यैवमंदमत्यनुग्रहायेसविशेषणमितितत्रोक्ततात्पर्यमित्यविरोधइतिभावः भाष्ये। समाससंज्ञे
त्यस्यतत्रविषयेकार्थीभावइत्यर्थः ननुयुगपच्छब्दस्यैककालइत्यर्थकस्यसत्तम्यर्थवृत्तेरन्वान्वयशब्देनाताह

नित्यवादीकार्यपक्षेदूषणमाह। कार्यइतियुगपद्भावेयुगपच्छब्दोवर्त्ततइतिद्वंद्वः कृतः अन्वा
चयः समुच्चयोत्तिमतोयस्यचकारेणस्वरितत्वेनवाविधानंयस्यकार्याः शब्दाः सप्रयोगनिर
पेक्षंशब्दमन्वाचष्टइतितन्यादीनांयुगपदुत्पत्तिःप्राप्नोति॥ ॥छ॥ ॥

शेनकथंद्वंद्वइत्यतआह। युगपद्भावइति। कार्येषुशब्देषुयौगपद्यान्वाचयविषयेतेषांयौगपद्यंयुगपत्प्रयोगःप्राप्नोती
तिवार्त्तिकाक्षरार्थः भाष्ये। युगपद्वचनतेतिबहुव्रीहेस्तल्अन्वावयेनेत्युक्तोढक्केतिसमुच्चयोदाहरणमसंगमित्यआह। समु
च्चयइति। स्वरितत्वेनवेतिप्यथाकाश्यादिस्यधम्र ञिठावितिवर्त्तमानेवाहीकग्रामेभ्यश्चेत्यत्रनित्यशब्दवादेतुप्रयोगदृष्टएवशास्त्रे
काल्पनिकविधेयत्वेनेष्टप्रत्ययविभागासिद्धिः रेखागवयन्यायस्याद्यंतावितिसूत्रेभाष्यएववक्ष्यमाणत्वात्॥ ॥

व्यवहितेपीतिलोकेतथादर्शनादितिभावः।आनंतर्यमारोप्येति।अनेनपरादिशब्दानामव्यवहितएवेप्रवृत्तिरित्याह।निर्दिष्ट
ग्रहणंत्विति।तुश्चार्थे।छंदसिपरेपिपरश्चेत्यादावपिऽत्तरांशाविकलतस्मादितिपरिभाषायाः× प्रवृत्तिरतएवव्यव
हिताश्चेतिसूत्रंसार्थकमितिभावःशास्त्रेतुसर्वथानव्यवहिते× प्रवृत्तेरितिभावः।कथंतर्हीति।सरूपसूत्रेइतिभा

नन्वेकस्यादृतिनत्वव्यवहितेपिपरशब्दःप्रवर्त्ततेसत्यंअंतरालस्थमनपेक्ष्यानंतर्यमारोप्यतत्रपरशा
ब्दप्रयोगःनिर्दिष्टग्रहणंत्वानंतर्यार्थमितिकुतोव्यवहितस्यप्रयोगः कथंतर्हिउक्तमेकाप्रकृतिर्बहवश्च
यत्रइतितत्रायमाकृतेरेकत्वात्स्याश्चपरत्वाच्चानंतर्याच्चादोषःतव्यादयस्त्वेकाकृतियुक्तानभवंति।
नापिब्रूमइति।एकस्याःप्रकृतेःसर्वेभवंत्विति नब्रूमःकिंतर्हिप्रत्ययांतरेणाप्रकृत्यंतरस्याक्षेपात्कर्त्त
व्यमितिप्रयुक्तिकरणीयादीनामपिप्रयोगःप्राप्नोति।अर्थगत्यर्थइतितव्यत्तव्यानीयरइत्यस्माद्वाक्या
द्वाक्यांतराण्युपपन्नवंतेप्रतिपादकानिधातोस्तव्यद्भवतिभावकर्मणोरित्यादिनितत्रकर्त्तव्यशब्देन
त्तस्यार्थस्यप्रतिपादितत्वात्करणीयशब्दोनप्रयुज्यते॥

वः।एकाकृतीति।एकानुपूर्वीहिएकाकृतिरत्रभाष्येनोपिब्रूमइत्यस्यनैवब्रूमइत्यर्थःअर्थोपिसमुदायस्येतिशंक २२१
मानंप्रत्याह।तव्यदिति।प्रत्ययादिसंज्ञास्तव्यत्तव्यानीयरइतिबहुवचननिर्देशात्प्रत्येकमितिप्रत्येकमेवभावाद्यर्थकत्वमितिभावः॥

पुनःपुनःसंकीर्त्तनमिति।अत्रपुनःपुनरित्यस्योपयोगश्चिंत्यः।एकैकस्मिन्शास्त्रेतदभावाच्चतस्मात्संकीर्त्तनमात्रमे
वात्रशीलनमिति बोध्यं।तेनयत्कार्यमुच्यतेइतिवार्त्तिकाक्षरार्थः।अतएवाग्रेभाष्येतत्कीर्त्तनेचेत्येवोक्तं।तद्विषयत्व
मुपपादयति।सर्वप्रयोक्रिति।इकोह्रस्वोभवतितत्प्रयोक्तृत्वंचगालवस्येत्यादिक्रमेणसूत्रार्थःभाष्ये।प्राक्कुर्चेवे
तिप्राग्देशएवाफिन्प्रयोगःस्यादित्यर्थः।अनादित्वादिति।एवंचगालवातिरिक्तशिष्टैरपिप्रयुज्यमानत्वान्नि

आचार्येति।आचार्यस्यदेशस्यचपुनःपुनःसंकीर्त्तनमाचार्यदेशशीलनंतत्रतस्यशब्दस्यतद्विषय
त्वमेवस्यात्सर्वप्रयोक्तृप्रसंगेगालवस्येतिनियमार्थस्यात्।यस्यपुनरिति।अनादित्वोच्छब्दव्यवहा
रस्यनित्यत्वपक्षेनास्तिप्रयोक्तृनियमः।केवलंगालवःस्मर्तृत्वेननिर्दिष्टोस्यशास्त्रस्यप्रामाण्यं
प्रतिपादयितुमिति।पूजार्थमाचार्यग्रहणंशास्त्रस्यत्वनाद्यर्थप्रतिपादकत्वात्पूजाभवति।कीर्त्यर्थ
मिति कीर्तौसत्यांतेषांस्वर्गव्यवस्थानंस्थिरंभवतियथेंद्रद्युम्नादीनां॥

यमासंभवःकिंचेतत्पक्षेशास्त्रेरेखागवयन्यायेनकल्पितशब्दविषयमितिकल्पितशब्दप्रयोक्तृनियमासं
भवइतिभावः।शास्त्रस्यप्रामाण्यमिति।एवंचपूजार्थमित्यस्यशास्त्रपूजार्थमित्यर्थइतिभावः।तदेवाह।
शास्त्रस्यहीतिभाष्ये॥देशग्रहणंचेतिचेनाचार्यग्रहणंदेशग्रहणस्यपूजार्थत्वंतुवक्तुमशक्यं।देशस्यस्म
र्त्तृत्वाद्यभावादितिभावः।स्थिरंभवतीतितत्श्चदेशकीर्त्तितिदेशीयानांस्वर्गस्थानमित्यर्थःतेनचपाणिनेरपितदितिभावः॥

कै० वि० १०१ ननु नित्यशब्दवादे गालवादिग्रहणस्य पूजार्थत्वे ह्रस्वाभावविशिष्टस्य साधुत्वबोधनं न स्यात् तत्पक्षे त्वघूपायेन साध
२२२ साधुविवेकाय शास्त्रमिति चेन्न। गालवः स्मर्त्ता नान्य इति स्मृत्यन्तरानुसंधानद्वारेण विकल्पसिद्धेः वाग्रहणयो
एवं कर्त्तव्ये गालवग्रहणं व्यर्थमिति शंकानिरासार्थं तु न्याय्ये पूजार्थमित्युक्तं। भाष्ये। तत्कीर्त्तने चेति आचार्य
देशाकीर्त्तने चेत्यर्थः यस्य कार्याः शब्दास्तस्येति शेषः तदेवाह। इदानीमिति। प्रयुक्तमिति कृतमित्यर्थः। नित्य

ननु च यस्यापीति कार्यपक्षेपि पूजा शक्यते व्याख्यातुं यस्माद्गालवेन ह्रस्वत्वं प्रयुक्तं तस्मात् त्वम
पि प्रयुंक्ष्वेति स्तुत्यर्थो ऽनुवादः स्यादित्यर्थः इदानीं कार्यपक्षे दूषणमाह। तत्कीर्त्तन इति। कार्यपक्षे
यमर्थः स्यात्। यस्माद्गालवेन ह्रस्वत्वं प्रयुक्तं तस्मात्प्रयोक्तव्यमिति। ततश्च ह्रस्वत्वस्य विक
ल्पो न स्यात्। नित्यपक्षे तु गालवो ह्रस्वस्य स्मर्त्ता अन्यो दीर्घस्येति स्मृत्यंतरानुसंधानद्वारेण विक
ल्पः सिध्यतीति नित्यपक्ष एव युक्तः॥

पक्षे त्विति। कार्यपक्षे त्वेवं वक्तुमशक्यं। यतो गालवेन कृतो ऽतः कर्त्तव्यो नान्येन कृतो ऽतो न कर्त्तव्य इति।
अन्येन कृतस्य पुनः करणवैयर्थ्यात्। नह्यन्यकृतस्य पुनः करणमस्ति नाप्यन्येनाकृतस्याकरणं। तादृशस्ये २२२
व करणात् एतेनान्येन कृतस्यानुवादो ऽन्याकृतत्वबोधनद्वारा विकल्पबोधक इति परास्तं पाणिनिकृताना
मपि पचोव इत्यादीनामन्याकृतत्वेन तेषामपि विकल्पापत्तेश्च तस्मात्कार्यवादो ऽसंगत इति दिक्॥ ॥

ननु लोकतो नित्यत्वर्थलाभेपि निषेधविकल्पयोरलाभ इत्यत आह भाष्ये। आचार्यः खल्वपीति एवं च
हक्रोरित्याद्युभयत्र विभाषायां यथा तव तयोर्लोपस्तथा विभाषापद घटितेपि भविष्यतीति नार्थः सू
त्रेणेति भावः। वाशब्दो विकल्पे इति। यत्तु अर्थस्य संज्ञित्ववद्भिन्नाषापदार्थस्यैव संज्ञात्वं तत्रापीतेः संबं
धात् न च पदजन्यपदार्थोपस्थित्यभावेनान्वयासंभवः विकल्पवाचिपदस्य तदर्थलक्षणाभ्युपगमात् एवं च

अशिष्यो वेति। वाशब्दो विकल्पेनेनाकृतिपक्षे उभयत्रविभाषार्थं सूत्रं कर्त्तव्यं॥ ॥

लक्षणातात्पर्यग्राहकमिदं सूत्रं अर्थेन संज्ञात्वमिति चेत्तदर्थाक्षिप्तशब्दमात्रस्य संज्ञात्वमस्तु इति शब्द
संबंधसामर्थ्यादिति तन्न एकस्यानेकसंज्ञायाः शास्त्रे दर्शनात् अनाकृतिः संज्ञेति वृद्धिसूत्रस्य भाष्यविरो
धाच्च। तेनाकृतीति तत्पक्षे लिङ्त्वजातो विधिमुखेन प्रवृत्तौपि त्येवस्यान्निषेधमुखेन प्रवृत्तौ किं त्येव स्यात्
ननु सर्वत्रेति सूत्रं कर्त्तव्यं सति सूत्रे लिङ्त्वजातो प्राप्तस्य निषेधे तस्यामेव विकल्पो विधीयमानः सर्वत्र
सिध्यतीति भावः॥ ॥छ॥ ॥

के॰वि॰१९१

२२३ प्रत्याख्यानाशयमाह। व्यक्तिपक्षे त्विति। क्वचिद्विधिमुखेनेत्यन्वयः किंचिल्लक्षणमुभयत्र विभाषारूपं तत्तरत्र तु क्वचित्प्रतिषेधमुखेनेत्येव पाठः परं तु आकृतिपक्षे किंतज्जात्याश्रयसकलव्यक्तिविषयं लक्षणं तु तत्तज्जात्याश्रय यत्किंचिद्विषयं नाद्यः सूत्रारंभेपि नपदघटितवाक्यस्य तद्विषयतायावक्तुमशक्यत्वात्। तस्य यत्किंचिद्विषयतावाघटितस्य सर्वविषयतेति दुर्लभं। नात्योपि न ब्राह्मणो हन्यादित्यादौ जातिपक्षे सर्वव्यक्तिविषयताया एव दृष्टत्वात्। किंच तत्र किं विधिमुखप्रवृत्यापि तद्विषयत्वं निषेधमुखप्रवृत्या कि द्विषयत्वं वेत्यत्र विनिगमनावि

व्यक्तिपक्षे तु लक्ष्यभेदेन लक्षणभेदात् क्वचित् किंचिल्लक्षणं विधिमुखेन प्रव
र्त्तते क्वचिन्निषेधमुखेन प्रवर्त्तत इतीष्टसिद्धौ सूत्रं न कर्त्तव्यमित्यर्थः॥ ॥

प्रत्ययस्य लुक्श्लुलुपः॥ ॥ ननु लुगादिविधौ प्रत्ययादर्शनाविधिर्यथा स्यादित्यर्थं प्रत्ययस्येतीत्यत आह। लुगा दीति। साक्षादिति लुगणिञो रित्यादौ क्वचिदिति यथा लुग्वादुहेत्यादौ क्वस्येति क्वचिदिति वक्ष्यमाणसूत्रेषु वक्ष्यमा णयुक्तिभिरित्यर्थः। नन्वदर्शनस्येमाः संज्ञा इति अप्रत्ययस्येमा इत्यनुपपन्नमत आह। अविद्यमानइति प्र

प्रत्ययस्य लुक्श्लुलुपः॥ ॥प्रत्ययग्रहणमिति। लुगादिविधौ क्वचित्प्रत्ययः। साक्षा न्निर्दिश्यते क्वचिदनुवर्तते क्वचित्सामर्थ्यात्प्रतीयतइति प्रश्नः। अप्रत्ययस्येति। अविद्यमा नः प्रत्ययो यस्मिन्न्दर्शने तदप्रत्ययः॥ गोरथीति। पंचेंद्रइत्यादौ निर्दिश्यमानस्यादे शाइति वचनात्स्त्रीप्रत्ययस्यैव लुग्भविष्यति न तदंतस्य॥ ॥ ६१॥ ॥ ॥

तियोगिविशेषणत्वेनेति शेषः। वस्तुतो वसानसंज्ञासूत्रे वक्ष्यमाणरीत्या प्रत्ययाभावस्यैवेमाः संज्ञाइति भाष्याभिप्रा यः भाष्ये गोरथीति गौः स्त्रीमित्यधिकारविहितप्रत्ययग्रहणेन तदंतग्रहणात् प्रत्ययांतस्य लुक्स्यादिति तद्धितलुकि तन्निर्द ✗ गोस्त्रियोरिति समुदायानुवृत्तेरिति भावः नन्वगोस्त्रियोरित्यत्र स्त्रीति स्वरितगुणयुक्तमिति स्त्रिया ✗ त्यर्थलमपि कृतानात्कमत
आह। पंचेंद्रइति॥ ॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

गोनिवृत्तिः प्रत्ययग्रहणं विनापि सिध्यतीति शंकते। गोरिति। पंचगुरित्यत्र क्रीतार्थकोऽप्यर्थ इति। लुक्। कृते इति। प
रत्वादिति भावः। अंतरंगानपीति न्यायस्तु अंतरंगनिमित्तविनाशकप्रत्ययलुग्विषय इति तात्पर्यं। परत्वादिति भा
वः। अंतरंगानपीति न्यायस्तु नच समासांते तेन व्यवधानात्कथं लुक्। गोरित्यनुवृत्तिसामर्थ्येन लक् प्राप्तेरिति

गोरतद्धितलुकीत्यत्र गोर्लुकि कृते पंचगुरित्यादौ गोशब्दांतत्वाभावात्समासांताप्राप्तावतद्धितलुकी
ति प्रतिषेधोऽनर्थकः स्यादिति चेत्। कृते समासांते लुक् स्यादित्यर्थवानेव प्रतिषेधः। ननु स्वभावतो
प्रवृत्तस्यादर्शनं लुक्संज्ञं न च तत्र गोशब्दस्य स्वभावतोऽप्रवृत्तिः नैष दोषः शास्त्रीनुसारिसिरस्यार्थ
स्य प्रधानत्वात्। प्रकृतेरपीति। समुदायस्य षष्ठीनिर्देशात्। योगविभागादिति। एकयोगनिर्दिष्टानाम
प्येकदेशानुवृत्तिरित्येतत्प्रकारांतरेण प्रतिपाद्यते। विशिष्टनिर्देशादिति। छयतावेवात्र निर्दिष्टावित्यर्थः॥

बोध्यं नित्यशब्दाद्व्याख्यानाभिप्रायेण शंकते। नन्विति समुदायस्येति यस्येति चेत्यकारलोपे सिद्धे लुग्विधानसामर्थ्येन सर्वा
देशः स्यादित्यर्थः। ननु योगविभागे सूत्रभेदः कृतः स्यादत आह। एकयोगेति। प्रकारांतरं योगविभागरूपं। छयताविति। ३१०
कंसात्प्राक्क्रीताच्छः। परशोरुगवादिभ्यो यत्। कंसेकमेः सः परशौ आङ्‌पूर्वयोः खनिशृभ्यां डिच्चेत्युप्रत्ययः॥ ॥

अतः क इति। धातुसप्तमीनिर्दिष्टत्वादादिग्रहणात्कमिग्रहणेनैवासिद्धे इति शेषः। कंसेस्तु कं सद् इति न द्वयं अनभि
धानादिति भावः। अत एव कमेः सः कंस इति भाष्ये उक्तं नन्वेवमपि विशिष्टनिर्देशाभावे यञञोरपि लुक् स्यादत आ
ह। यञञोरिति विकारावयवार्थप्रतीयते औत्सर्गिकाण एव लुकं विदध्यात्। न च यञञ् लुको सामर्थ्याद्धि कल्पो
स्त्वित्यनुक्तिर्यञञ्स्त्वामुक्त औत्सर्गिकायाः श्रवणाभावायेति वाच्यं। यञञ् लुकामेककालप्रतीतानामुद्देश्यो

उणादय इति। अतः कृकमिकंसकुंसेति कंसशब्दस्य भेदेनोपादानात् कचिद्गुणा
दयोऽप्युत्पत्तिकार्यं न लक्षंत इत्यर्थः। यञञोस्तु। विधानसामर्थ्याल्लुगभावः॥ पक्षो
न स्यादर्थ इति ॥ प्रकृतिनिवृत्त्यर्थ एव न प्रत्ययांतरनिवृत्त्यर्थोपीत्यर्थः॥ ॥

विधेयभावसंभवात्। द्रुद्रुञो तुरुद्धे त्यादौ तु अनद्यतन इत्यादिनिर्देशाद्वाक्यभेदांगीकारः। किंच कंसीयपरश
व्ययोरिति षष्ठीनिर्देशादपि न यञञोर्लुक् अन्यथा पंचम्यैव निर्देशं कुर्यादिति भावः। प्रकृतीति प्रकृतीव्य
तिरिक्तप्रत्ययांतरवाची अन्यशब्दः तेन नञः समासे प्रकृतिरूप्यत इत्याशयः भाष्ये। ङ्याविति प्रातिपदिकात्प
रस्य लुगित्यर्थे यञञोर्विधानसामर्थ्याल्लुगभावे तयोः प्रातिपदिकात्परत्वाभावेन परिशेषात्। कंसीयादिव
यत्प्रातिपदिकात्परयोः छयतोरेव लुगित्यर्थः॥

विशिष्टस्येति जनपदार्थकप्रत्ययसंबंधिन इत्यर्थः भाष्ये। प्रकृतमिति। अतएव जनपदाल्लुगित्यत्र प्रकृतवत्क
एव लुगिति बोध्यं। शौरसेनाः पंचाला इत्यादौ इतिभाव उचितः। अनंतरस्येति अव्यवहितस्येत्यर्थः जनपदार्थवा
चके शब्दे सति तदनंतरस्य लुबित्यर्थ इतिभावः वार्तिककृदभिमतषष्ठीनिर्देशार्थत्वमुपपादयति। आगस्त्ये
ति। त्रय इति। एवं च वैषम्यादयथासंख्याप्राप्तेरगस्तयोपि कुंडिनाः कुंडिनाश्चागस्तयः स्युः लुक्त्वत्वाप

षष्ठीनिर्देशार्थत्वेति। विशिष्टस्य षष्ठ्यर्थस्य स्थाने योगत्वस्य निर्देशार्थमित्यर्थः। असति प्रत्ययस्येत्येतस्मिन्
यः कश्चिदानंतर्यादिः संबंधः स्यात् ततश्च जनपदे लुबिति पंचालाः शौरसेनाः इत्यादौ जनपदवाचिनोनंत
रस्य शौरसेनादेरपि लुप् स्यात्। सर्वादेशार्थं वेति। षष्ठीनिर्देशार्थत्वं स्थितमेवेति वार्तिककारेण विकल्पार्थो
वाशब्दः प्रयुक्तः। आगस्त्यकौंडिन्ययोरित्यत्र हि यदि लुगनुवर्तते तदैकैकस्य त्रयं आदेशाः स्युः अपनानु
वर्तते द्वावेवादेशौ विधीयेते तदागस्त्यादेशेन सर्वत्र भाव्यमिति आगस्तीयाच्छात्रा इति न सिध्यत्यस्मत्वात्प्रकृतेः।

कात्सर्वादेश इति विभक्तिमात्रं श्रूयते इति भावः। द्वावेवेति तेन नोक्तापत्तिरिति भावः। सर्वत्रेति
औनादिग्राग्दीव्यतीयविषयेपीति भावः। असत्त्वादिति यद्यपि स्थानिवद्भावेन सत्त्वाच्छः सिध्य ३११
ति तथाप्यसत्त्वात्प्रकृतेः छस्य सध्यनिमित्तत्वाच्च आकारस्य श्रवणं न स्यादिति भावः संनियोग
शिष्टत्वादगस्त्यादेशाभावे प्रतिषेधप्रयुक्तलुगभावो हेतुः॥ ॥छ॥ ॥ ॥

गोत्रे विहित इति। नन्वागस्त्यस्य गोत्रप्रत्ययांतस्यैव ग्रहणं न त्वनंतरापत्यप्रत्ययांतस्येत्येतदर्थं तदनुवृत्तिः स्या
त् शिवादिभ्य इत्यत्रैव गोत्र इति निवृत्य ऋष्यणसाधारणः अगस्त्यप्रकृतिप्रकृतिक ऋष्यणंत एवात्रागस्त्यः

प्रत्ययस्य तत्स्यमाने गोत्रे लुग्विधौ लुकि प्रतिषिद्धे संनियोगशिष्टत्वाद्गस्त्यभावादगस्त्यादेशाभावादागस्ती
या इति सिध्यतीति षष्ठीनिर्देशार्थं प्रत्ययग्रहणं। भाष्यकारस्तु तदर्थं वाशब्दं व्याचक्षाणः षष्ठीनिर्देशा
र्थत्वं नेच्छति। सत्यमेवं मन्यते। आगस्त्यकौंडिन्ययोरित्यत्र यस्कादिभ्यो गोत्र इत्यतो गोत्रग्रहणं। भाष्यकार
स्तु तदर्थं वाशब्दं अनुवर्तते लुगिति च तेनागस्त्यकौंडिन्ययोर्यौ गोत्रे विहितस्तस्य लुक् परिशिष्टस्य तु प्रकृ
तिभागस्य यथासंख्यमगस्तिकुंडिनचावादेशाविति सूत्रार्थः। अथा क्रियमाणोपीति। अलोंत्यस्येति वचनात्
प्रत्ययस्यांत्यस्यैव प्राप्नुवंतीति भावः। वचनप्रामाण्यादिति। प्रत्ययस्येति वचनसामर्थ्यादलोंत्यस्ये
ति बाध्यते वचनप्रामाण्यादिति ब्रुवतो वार्तिककारस्यापि षष्ठीनिर्देशार्थत्वमनवाच्छितं। तदर्थत्वे हि
प्रत्ययस्येत्यस्य चरितार्थत्वात्। कथमलोंत्यविधिर्बाध्यते॥

न त्वगस्तिप्रकृतिकगर्गादियञंतः यञञोश्चेति लुका सिद्धत्वादिति चेन्न। कौंडिन्यसाहचर्येणागस्त्यस्यापि गोत्रप्रत्य
यांतस्यैव ग्रहात्। भाष्यमते गोत्रसंज्ञा सूत्रपर्यंतं गोत्राधिकारेण ऋष्यणंतस्यापि तत्त्वाच्च वस्तुतो वार्तिककारस्यापीत्य
मेव संमतमित्याह॥ प्रत्ययस्येति॥ ॥

कै०वि०१
३१२

सामर्थ्याल्लोपस्यैव सर्वादेशत्वं कुतो न कल्प्यत इत्यत आह। विपर्यय इति। नन्वपसंजातो विरोधो वैयर्थ्याल्लोपस्यैव सर्वादेशत्वं शंकोऽकृतो यस्य तत्वादित्यर्थः। नन्वयमिति। अयं अवयव दाहादौ समुदाय दाहादि व्यपदेशो गौणो न किंतु मुख्य एव। अवयव लोपे समुदायस्यापि लोपादित्यर्थः। अनुनासिकेति। अनुदात्तोपदेशेत्यनेन आघ्नीतेत्यत्र आ

पदयमिति। विपर्ययस्तु न कल्पते। अनुपसंजातविरोधित्वाल्लोपस्यादंत्योदेशः स्थितः ततो लुगार भ्यमाणो पद्यत्तस्य स्यात्। लोपानुवृत्त्यैव सिद्धत्वात्। लुकं न विदध्यात्। विहितस्तु सर्वादेशस्य ज्ञापकः संपद्यते। द्वितीयमिति। लोपविशेषणापेक्षया द्वितीयं। पाठापेक्षया तु तृतीयं भवति। एकदेशलोप इति। अवयवक्रियासमुदायेऽपि व्यपदिश्यते। यथा पटो दग्ध इति। अवयवे हि पटाख्योऽवयवी समवेत इति तस्याप्यसौ दाहः। नन्वयं गौणव्यपदेशः। गौणत्वे हि सति मुख्यस्यैव प्रत्ययात्। कर्त्तव्यमेव प्रत्ययग्रहणं स्यात्। अघ्नीतेति परत्वादुपधालोपे कृते पुनः प्रसंगविज्ञानादनुनासिकलोपः स्यात्॥ ॥छ॥ ॥

ङोऽयमहन इत्यात्मनेपदैकवचनं। संग्मीयेति। गमेर्विधिलिङि समो गम्यृच्छीत्यात्मनेपदैकवचनमिटि शायो बहुलं छंदसीति लुकि लिङः सलोपे इट्योरिति उपधालोपे रूपं तत्र प्रत्ययलक्षणेन झलादिङिपरत्वादनुनासिकलोपः स्यात्। इदं च प्रयोजनं अप्राधान्येनालाश्रयणे विध्यर्थं प्रत्ययलक्षणसूत्रमिति वार्त्तिकमते बोध्यं।।६१॥ ॥छ॥ ॥ ३१२

प्रत्ययेलोपे॥ ॥लक्षणशब्दार्थमाह। निमित्तमिति कार्यमिति बहुव्रीहिलभ्यं। प्रत्यासत्त्येति। क्रियमाणेऽपि प्रत्यय ग्रहणेऽन्यप्रत्ययनिमित्तकार्यवारणाय प्रत्यासत्तिराश्रयणीयेति भावः। ननु प्रत्ययलक्षणमित्यस्य बहुव्रीहितया नेन स्यान्यत्वे। भावे प्राप्तकार्यप्रापणायातिदेश इति अत्र प्रत्ययस्य सत्त्वेन किं तन्निमित्तकार्यातिदेशो नात आह। प्रत्य यस्य लक्षणमिति यस्य लोपस्तस्मिन्सति यः प्रत्ययो भवति तस्य तल्लोपेऽपि प्रादुर्भाव इत्यर्थः लाघवात्षष्ठीत

प्रत्ययलोपे॥ ॥प्रत्ययग्रहणमिति। प्रत्ययनिमित्तं कार्यं लोपे भवतीति उक्ते प्रत्यासत्त्या प्रत्ययस्यैव लोप इति विज्ञास्यत इति भावः। सौरथीति। प्रत्ययस्य लक्षणं दर्शनं। प्रादुर्भाव इत्यर्थं परिकल्प्यैतदुच्यते। सुरथस्य विहतस्य चापत्यं गोत्रं। स्त्री इति कृते मकारनकारयोर्भावे यथा गुरूपोत्तमत्वात्ष्यङ् न भवति एवं लोपेऽपि स्यात्। प्रत्ययग्रहणे तु सति विरुद्धत्वान्नायमर्थो भवति प्रत्ययस्य लोपे तस्यैव पुनः प्रादुर्भाव इति। एवं हि लोपविधानमनर्थकं स्यात्। तस्मात्प्रत्ययनिमित्तं कार्यं प्रत्ययलोपे भवतीति वाक्या र्थ आश्रीयते॥ ॥छ॥ ॥

त्पुरुष एव स्यादिति तात्पर्यं रमेः कथं निहंते भ्रवक्ते अनुदात्तेत्यनुनासिकलोपे गुरूपोत्तमत्वादप्राप्तः ष्यङ इति देशातः स्यादित्यर्थः॥ एवं हि लोपे इति न नु णेरनिटीत्यादि सामर्थ्यात्तमाप्नुत तत्र प्रवृत्तिः यस्तु सामान्येन लोपो णाविष्टवदिति सो प्रत्ययविशेषायेद इति वदेत्। चरितार्थ इति निश्चमाचष्टे क्षिपयतीत्यत्र पुनः प्रादुर्भावार्थ मिदं स्यादिति चेन्न। एवं हि तत्रैव प्रत्ययस्येन लोप इति वदेत्। एवं च गुरुतरन्यासो ज्ञापक इति बोध्यं॥ ॥

अन्यथा। व्याख्यानस्य धारणत्वाभावे। पदसंज्ञा न स्यादिति। तिङन्तत्वाभावादित्यादिति भावः। लोपे प्रत्ययइति। अस्य प्रा
दुर्भवतीति शेषः। ननु प्रत्ययलोप इत्युक्ते कथं सति प्रत्ययइति लभ्यते। तत्राह। प्रत्ययशब्द इति। यत्कार्यमिति प्रत्य
यलक्षणं यत्कार्यं दृष्टमित्यर्थः॥ ननु जगादित्यादौ विलोपात्परत्वात्पूर्वं गमः क्वावित्यनुनासिकलो

नेवमिति। संदेहेपि व्याख्यानात्करणसाधनो लक्षणशब्द आश्रयिष्यते। अन्यथाक्रियमाणेपि प्रत्ययग्र
हणे भावसाधनो शंका न निवर्त्तते। प्रत्ययलोपे प्रत्ययांतरस्य प्रादुर्भाव इति यथा ग्रामणीति क्विपो
लोपे स्वाद्युत्पत्तिः तत्रश्चाधोगित्यत्र पदसंज्ञा न स्यादिति। करणसाधनत्वे व्याख्यानमेव धारणमि
ति भावः। लक्षणशब्दोपादानसामर्थ्याद्वा करणसाधनो लक्षणशब्दः। अन्यथा लोपे प्रत्ययइत्येवं
वक्तव्यं स्यात्। सति प्रत्ययइति। प्रत्ययशब्दोऽत्र लुप्तसप्तमीको निर्दिश्यते तेन प्रत्यये सति यत्कार्यं दृष्टं
तल्लोपे भवति। न च ग्रामणीरित्यत्र क्विपि सति तुग्दृष्टः ह्रस्वाभावात् कृते क्विपो लोपे ह्रस्वत्वे च तुक्
प्राप्तिः। जगादिति। द्युतिगमिजुहोतीनां द्वे चेति गमेः क्विप् अत्रांतरंगत्वात् पूर्वं विलोपः गमः क्वावि
त्ययं लोपो ग विशेषापेक्षत्वाद्बहिरंगः॥

पो क्विपि सत्यपि तुकः प्राप्तेराह। अत्रांत ३१३

भिन्नविषयत्वादित्यर्थः। वार्त्तिकमते एतत् अचिरादेशो नुडपवादत्वपरस्ताच्छरीत्या विषयभेदेपि तत्त्वे तु लोपेन
नुत्पत्तेरेवान्वाख्याने नापवादत्वं नेति बोध्यं। वैयात्यात् वायांगीकारे दोषमाह। सतिल्विति। एकमेवेति। अवय
वस्य प्रत्ययत्वपर्याप्त्यधिकरणत्वाभावादिति भावः। एवं चानयोः फलांतराप्तिनिवेशो भाष्यविरुद्धइति बो

भिन्नविषयत्वाद्बयेन नाप्राप्तइत्यपि न भवति। सति त्वस्मिन् न्यायेनैव विलोपः स्यात्। त
स्मात्सति क्विपि नातुकः प्राप्तिः अपितु विलोपे कृते। अन्यतरदिति। एकमेव प्रत्ययग्रहणं सा
मर्थ्यात् कृत्स्नप्रत्ययलोपप्रतिपादने समर्थं। वर्णलक्षणमिति। प्रत्ययलोपे तल्लक्षणमित्यु
च्यमाने प्रत्ययस्य यत्र कार्ये निमित्तभावः प्रत्ययत्वरूपाश्रयेण वर्णरूपताश्रयेण वा त
त्सर्वं स्यात् सर्वनाम्नो वस्तुमात्रपरामर्शित्वात् प्रत्ययग्रहणे तु सति प्रत्ययनिमित्तमेव का
र्यं प्रत्ययलोपे भवति न वर्णरूपतानिमित्तं॥

ध्यं। ननु द्वितीयप्रत्ययग्रहणाभावे बहुव्रीह्यलाभात् तल्लक्ष्यकार्यातिदेशो न सिध्येतत्राह। तल्लक्षणमिति।
वस्तुमात्रेति प्रत्ययमात्रे सर्वः प्रत्ययनिमित्तमेवेति प्रत्ययत्वेन प्रत्ययनिमित्तमित्यर्थः न वर्णेति प्राधान्येन न वर्णनिमित्त
मित्यर्थः॥

ननु रैकुलमित्यत्राप्यादेशो न प्रत्ययाश्रयः किं तु तदवयवाश्रयो त आह। अवयवद्वारेणेति केचित्तु प्रत्ययग्रहणमित्यस्य द्वितीयप्रत्ययपदघटितं प्रत्ययलक्षणग्रहणमित्यर्थः प्रत्ययलोपे यीत्येव सूत्रं कार्यं अस्य तद्भवति यत्प्रत्यये सतीति शेषः स्थानिवदित्यनुवृत्तिर्वा प्रत्ययलक्षणमिति प्रत्ययत्वतद्व्याप्यान्यतरधर्मावच्छिन्नलक्षणमित्यर्थः वर्णलक्षणं वर्णत्वव्याप्यधर्मावच्छिन्ननिमित्तं। प्रत्यये सति वर्णनिमित्तं भवतीति तल्लोपेपि स्यादिति भावः कैयट

रैकुलमिति। अवयवद्वारेण अत्र प्रत्ययस्याप्यादेशं प्रति निमित्तत्वमस्त्येव प्रत्ययाश्रय
श्चादेशो न भवतीति न प्रवर्तते। अनेनैव न्यायेन न धातुलोप आर्द्धधातुक इत्यत्र धि
न्विकृण्वोर्वि चलोपो र्वोर्वलीति वलोपस्य वलि मित्तत्वादार्द्धधातुकनिमित्तत्वाभा
वाद्गुण प्रतिषेधो न भवति॥ ॥

व्याख्यातु चिंत्या प्रकृते तच्छब्दप्रत्ययशब्दयोः पर्यायत्वेन तद्विचारस्यायुक्तत्वात्कं त्वापत्तेरित्याहुः। अनेनैवेति।
अत्र प्रत्ययग्रहणसामर्थ्यात्तत्पार्थलाभे पि तत्र तादृशार्थग्रहे न मानं। आर्धधातुक इत्यस्य कैयटरीत्यातो तो
तीत्यादिव्यावृत्त्याचरितार्थत्वात् पूर्वसूत्रे आर्द्धधातुकग्रहणे मनवकाशमिति किं ति चेति सूत्रस्थभाष्य ३१४
विरोधाद्भावादित्यादिना तत्पार्थकल्पने तु न मानं किं च तत्पार्थकल्पने यङ्यकृयवलोपे इति वार्त्तिकं तदुदाहरण
परं जीरदानुरिति भाष्यं चासंगतं स्यादिति चिंत्यमेतत्॥

सुधे इत्यादि धिविकृण्व्यो नुमिवि चिवलोपे। एत्कलोपे गुणे सति नासमासे सौ हल्ङ्यादिलोपन लोपयोरिमे रूपे। गुणनिषेधे तु सुधिन् शब्दे इङ्क्नि तिदीर्घः सुकृणः सर्वनामस्थाने चेति दीर्घ उपधाया श्चेती त्वे रपरत्वे सुलोप योर्वोरिति दीर्घः स्यादिति भावः। स्थानिवद्भावेनेति वर्णाश्रयस्य तवाप्यनिष्टत्वादित्यर्थः ननु शास्त्रस्य कर्तृत्वे सतः कर्मत्वे नोभयप्राप्ताविति नियमाच्छास्त्रस्येति षष्ठ्यनुपपन्ना। कर्मणि चेति समासनिषेधापत्तिश्च करणत्वे तु षष्ठ्यनुप

तेन सुधे सुकरिति भवति। न तु सुधी सुकीरिति। किमर्थमिति। स्थानिवद्भावेनास्त्विति भावः।
सदन्वाख्यानादिति। शास्त्रकर्तृकरणं वा शेषत्वेन विवक्षितमिति षष्ठी कृता। सच्छास्त्रेणेति शा
स्त्रेण करणेनाचार्यः स्मर्त्ता सद्विद्यमानं वस्तु निमित्तत्वेनान्वाचष्टे। सतोवेति। शास्त्रस्यैवाविच्छे
देन प्रवर्त्तमानस्य स्वतंत्रत्वमन्वाख्यानइति पूर्वस्माद्व्याख्यानादस्य विशेषः न च स्थानिवद्भावेन
सिध्यति। अत्तृणेडित्यादावल्विधित्वात्॥ ॥

पक्षेत्यत आह। शास्त्रमितिशेषत्वे चोभयप्राप्ताविस्याप्राप्तेः षष्ठीसमासोनानुपपन्नो इति भावः। आचार्यः स्म
र्त्तेति फलितार्थकथनं। स्मर्त्राचार्येणेति लन्वाख्यायत इत्यन्वययोग्यं। स्वतंत्र्यत्वमिति करणस्य कर्तृत्वविवक्षेति भावः। अल्वि
धित्वादिति इमादेरिति शेषः वर्णाश्रयेति तु वर्णप्राधान्यविषयकं। एवं चाप्राधान्येनाल्याश्रयणे विध्यर्थं सूत्रमिति भावः॥ ॥

कै॰वि॰१
३१५

स्याष्ये। स्तिप्रयोजनमेतदिति। उक्तप्रयोजनविशिष्टं सूत्रं निर्दोषं वेति काक्वा प्रश्न इति बोध्यं। किं तर्हीति ममतु निर्दो
षमेव तव कश्चिद्दोषप्रतिभासोस्ति चेद्वदेति प्रश्नगर्भमुत्तरं। बाधनादिति। एवं च यं चेत्यादौ पदत्वं न स्यादिति भावः।
उपलक्षणार्थत्वादिति। तयोरपि पूर्वपक्षवित्तस्य समत्वादिति भावः तत्र श्लुलुपोः प्रत्ययलक्षणस्य फलं चिंत्यं लुकि

लुक्युपसंख्यानमिति। तक्रकौंडिन्यन्यायेन लोपसंज्ञाया लुगादिसंज्ञाभिर्बाधनादिति भा
वः लुग्रहणस्योपलक्षणार्थत्वात् लुक्लुपावपि गृह्येते। नवादर्शनेति। अदर्शनमात्रस्य लोप
संज्ञा विधीयमाना लुगादिसंज्ञाविभावयमप्यवगाहते। न च संज्ञानां बाध्यबाधकभावस्समावे
शादर्शनात्तासामिति आकडारसूत्रे वक्ष्यामः। लोपस्य संज्ञि लोपसंज्ञितस्य भावो लोपसंज्ञि
त्वं तस्मादित्यर्थः॥ प्रत्ययादर्शनं त्विति। लुक्श्लुलुसंज्ञानां संकरः प्राप्नोतीत्यर्थः॥ ॥

तु पं चेत्यादौ पदत्वं फलमस्ति। समावेशादर्शनादिति कृत्स्नत्यादिष्विति भावः। लोपः संज्ञा यस्येति बहुव्रीहौ मत्वर्थीयानु
पपत्तेः त्वांतेन षष्ठीसमासे र्थासंगतिरतद्भावं तेन षष्ठीसमास इत्याह। लोपस्येति। संकर इति। परस्परं लोपशब्दभावित ३१५
प्रत्ययादर्शनविषये लोपसंज्ञया चेत्यर्थः। प्रत्ययादर्शनमात्रं सकलं लुमत्संज्ञं प्राप्नोतीति भाष्याक्षरार्थः॥ ॥

DR. BHAU DAJI MEMORIAL

उतो वृद्धिरिति न च तत्र नाप्यस्तस्येति वर्तनाददोषः अत्र पक्षे तदनुवृत्तेर्वक्तुमशक्यत्वात्। हरीतकीति न च्वत्र सत्यपि ङीषो लु
कि युक्तवद्भावात् पुनर्ङीष् स्यादिति चेन्न। लक्ष्ये लक्षणस्येति न्यायादित्याहुः। हरीतक्यां हरीतक्यादिभ्यश्चेत्यणो लुप्। य
द्वा हरीतकीवेयं प्रतिकृतिरिति कनो लुप्। लवण इत्यत्र लवणाल्लुक्। तद्भावितग्रहणे युक्तिमाह। तत्राश्रयेति। आश्रितः
स्वरूपस्य व्यापारोऽदर्शनविषयो यैस्ते तथोक्ता इत्यर्थः अदर्शनाधिका लुगादिशब्दाः प्रत्ययादर्शनस्य संज्ञे युक्ते प्रत्या

तत्र लुकि श्लुविधिरिति। उपलक्षणं चैतत्। तेन श्लावपि लुग्विधिः प्राप्नोति जुहोतीति उतो वृद्धिर्लुकि हलीति। लुप्यपि लु
ग्विधिप्रसंगः हरीतकीति लुक्तद्धितलुकीति। तथा लुकि लुब्विधिः लवणः सूप इति युक्तवद्भावः स्यात्। न वा एष
गिति। एकयैव संज्ञया। प्रदेशवाक्येषु संज्ञिप्रत्यायने सिद्धे अनेकसंज्ञाविधानसामर्थ्यात्। तद्भावि
तग्रहणं विज्ञायते तत्राश्रितस्वरूपव्यापारा लुगादय आश्रीयंते आवृत्तिर्वा लुगादिशब्दानां आश्री
यत इति तद्भावितग्रहणं सिध्यति। विधिप्रदेशेषु चेतरेतराश्रयदोषानवतारः नित्यसंज्ञाश्रयणाद्वा
विसंज्ञा विज्ञानाद्वा॥ ॥

पया संज्ञया यदर्शनं भाव्यते तस्यैव सा संज्ञेति लभ्यत इति भावः॥ प्रत्यासत्तिः सर्वैर्दुर्ज्ञेयेत्यत आह।
आवृत्तिर्वेति॥ तेन लुगादिशब्दभावितमदर्शनं क्रमेण तत्तत्संज्ञमित्यर्थः॥ अदर्शनस्यानित्य
त्वेपि तद्भावितत्वस्य शास्त्रायत्तत्वादितरेतराश्रयत्वं तदवस्थमेवेत्यत आह। सा विसंज्ञेति॥ ॥

तज्झावितग्रहणपक्षेयथैवेत्यादिग्रंथोनुपपन्नइत्यतआह। तिसृणामितिइतरेतराश्रयपरिहारायभाविसंज्ञावि
ज्ञानगौरवापत्त्यासामर्थ्यात्तिसृणामसंकरःप्रतिपादितोनतुतज्झावितपक्षाश्रयेणेत्यभिमानः वैयधिकरण्यादि
तिभवनक्रियायांप्रकृतेःकर्तृत्वादितिभावः। कांचिद्विकारस्येतिवस्तुतोवृत्तौतद्वाक्येचसर्वत्रप्रवर्तेरेवक
र्तृत्वंविकृतशब्दस्यापिगौण्याप्रकृतिवृत्तित्वात्सामानाधिकरण्यंअतएवगौणत्वान्महच्छब्दे आत्वाभावः गो

यथैवेति। तिसृणांसंज्ञानांविधानसामर्थ्यात्। परस्परविषयावगाहनंतासांमाभूत् लोपसंज्ञाविषये
लुताःप्रवर्तेरन् गोमतीभूतेति। च्व्यर्थेकृतेलुक्तद्धितलुकीतिलुक्प्राप्नोति।पुंवद्भावस्त्वत्रनभवति
वैयधिकरण्यात् महद्भूताब्राह्मणीत्यत्रतुभवतिसामानाधिकरण्यात्। नित्यत्वात्डिशब्दानांकचिद्विका
रस्यजनिकर्तृत्वंकचित्प्रकृतेः नन्वत्रायीतिलुगादिसंज्ञानांभेदेनोपादानात्तज्झावितग्रहणमित्यर्थः। अ
स्त्यन्यदिति। प्रत्ययाप्रत्ययादर्शनस्यलोपसंज्ञायथास्यादिति। लोपमात्रेमाभूदिति। यथागोमतीभू
तेतिच्व्यर्थेकृतेलुक्तद्धितलुकीतिनभवति। तस्माल्लोपसंज्ञायांनास्तितज्झावितग्रहणं॥ ॥

मतीशब्देतुगोमतीनदीनिम्नागोमतीनदीभूतेत्यर्थनाभाषितपुंस्कत्वात् पुंवद्भावइतिबोध्यं।भाष्ये।एवंलो
पेतिलोपसंज्ञायामपितज्झावितग्रहणंमत्वानस्यचोद्यमेतत्। अत्रसामर्थ्यात्तज्झावितग्रहणेपिलोपसंज्ञायांतत् ३१६
ग्रहणेमानाभावः नचलुगादिभिर्लोपसंज्ञायाःपृथक्करणमानंतस्याःप्रयोजनांतरसत्वादित्याह।अस्त्यन्यदितित
द्दर्शयति।तल्लोपमात्रइतिभाष्येस्वयंप्रयोजनांतरमत्वाह।प्रत्ययाप्रत्ययेतिभाष्ये।लुमतिप्रतिषेधादिति।नन्वेतेति।निषेध
ष्या नतत्रलोपत्वनिमित्तकार्यप्रवृत्तिर्ज्ञाप्यतइत्यदोषइतिभावः॥

लुक्युपसंख्यानमिति।दोषेपरिहृतेदोषांतरमाशंकते। सतोनिमित्तेतिवार्तिकतद्व्याख्यानयोर्विरोधंपरिहरति।
निमित्तशब्देनेति। नन्वेवंपदत्वेपिसत्वस्यापिसत्वाल्लोपःस्यादतआह।ल्लोपश्चेति।कालविप्रकर्षेति।अस्य

सतोनिमित्ताभावादिति।निमित्तशब्देननिमित्तत्वमुच्यतेतेनयस्यसत्वः।कार्यप्रतिनिमित्तत्वंनाभू
तस्यलुप्तोप्यनिमित्तंस्यादित्यर्थः।राज्ञइति।सतिङसिभसंज्ञायांस्वादिष्वितिपदसंज्ञाबाधितेतिनलो
पोनाभूत् अल्लोपश्चासीत्।अस्तुतस्यादिति। द्वेचात्रपदसंज्ञेएकास्वादिष्वितिअवयवस्यसंज्ञा
चासभसंज्ञयाबाधिताद्वितीयासुबंतसमुदायस्यसाचलुप्तेपिस्थितैव।अल्लोपस्तुनलुमतांग
स्येतिप्रतिषेधान्नभवति।सत्येतदितिकालविप्रकर्षप्रतिपादनायानद्यतनप्रत्ययप्रयोगः।रा
ज्ञइत्यत्रावधिभेदाद्भसंज्ञयावयवस्यैवपदसंज्ञाबाध्यतेनसमुदायस्यसुबंतत्वनिमित्ताल्लुप्तेतु
प्रत्ययेऽवधिभेदाभावात्।प्रत्ययलक्षणेनप्राप्तयाभसंज्ञयाहि।अपिपदसंज्ञाबाधितव्या।एका
पवादत्वेनद्वितीयापरत्वेनेतिभावः।अनयेतिपदसंज्ञाद्वयमनेनदर्शितं भसंज्ञाप्रत्ययलक्षणेन
वर्णाश्रयापिभवति।यथातृणेढितीभागमः॥
चोत्तरस्यनायमवसरइत्यर्थः।भाष्ये।एतद्वक्ष्यमाणवाक्यार्थरूपं।पदसंज्ञाद्वयमिति।अनयापद
संज्ञयानलोपोभविष्यतीत्यादिभाष्यार्थःयथेतिवर्णप्राधान्यविषयएवसनिषेधइतिभावः॥ ॥

कै०वि०१
३१७

भाष्ये। पर्यपन्नानि। मृतानि अप्राप्तानीतियावत्। नन्वेतत्कार्यादेशेस्यात्स एव कुतः शास्त्रनिमित्तातिदे
शयोरपि संभवात् अत आह। कार्यस्येति व्यपदेशो निमित्तं। विधीयेतइतिइत्यास्मिमानइतिशेषः वस्तुतः का
र्यशास्त्रातिदेशयोरभेद एवेत्युक्तं भाष्ये। एकयोगलक्षणानिचेति ताहृशानि विप्रतिषेधविषयत्वेन नक
ल्प्यंतइत्यर्थः। नन्वन्यनावइतिषष्ठीतत्पुरुषः कर्मधारयोवा। उभयथापिष्य ननुपपन्नः भावस्यन्ना

तुग्दीर्घत्वयोश्चेति। अनेनैव प्रत्ययनिमित्तानि कार्याणि लुप्तेपि प्रत्ययेविधीयन्तइतिक्रमाभा
वात्पौर्वापर्यंतिप्रकल्पते। कार्यस्यप्राधान्यान्नानेन शास्त्रव्यपदेशोविधीयते। सिद्धं त्विति। अन्या
भावोऽन्यद्वस्तु स्थान्यपेक्षया आदेशः। अन्यभावएवान्यभाव्यमिति स्वार्थेष्यञ्। तत्र परिवीरि
तिस्थानिनः क्विपोयासंज्ञयोर्व्यपदेशः पित्कृत्प्रत्ययइत्यादिः सलोपस्यानेन विधीयते। तत
स्तन्निबंधनशास्त्रं प्रवर्त्ततइतिसिद्धो विप्रतिषेधः। संज्ञामात्रमिति। कृदादिव्यपदेशस्येत्यर्थः॥

वांतरेणायोगात्समाससंज्ञया गुणवचनसंज्ञायाबाधाद्वार्षासंगतेश्चेत्यत आह। अन्योनावइति भाष्येऽन्यरू
पं प्राप्तस्येत्यर्थकमन्यन्नूतस्येत्यत्तत्फलितार्थो बोध्यः॥ स्वार्थइति चातुर्वर्ण्यादित्वात्। ननु सत्तास्था
निनश्चेद्विरुद्धमतिदेशस्तदस्त्वेव सत्तायाअशक्यत्वाज्ज्ञात आह। कृदादिव्यपदेशश्चेति एतदर्थमे स्य ३१७
वस्थानि संज्ञानुदेशादित्युक्तं नेतु स्थान्यनुदेशादिति तथासति स्थानिकार्यातिदेशएवस्यादिति बोध्यं॥ ॥

भाष्ये शंकिता आह। तद्वक्तव्यमिति वचनांतरेणसूत्राक्षेपपरिहारोनयुक्तइतिभावः परिहरति। यद्यपीति।
अप्येवतर्हीतितथापीत्यर्थः एवं च लघुतरत्वाद्वचनांतरेणापि परिहारोयुक्तइतिभावः। संज्ञामितिनिमित्तभूतव्य
पदेशमित्यर्थः ननु संज्ञासंज्ञिनोर्नेदार्ह्यतेहैतिः संज्ञेत्ययुक्तमत आह। सूत्रोपात्तइतिफलांतरमपिवचनां
तरारंभेदर्शयतिभाष्ये। नत्यादिसिद्धमितिइष्टमितिशेषः वक्ष्यमाणान्यल्विधित्वाद्वार्त्तिकमतेनातिदेशेन

यद्येवमिति। हंतिस्वरूपेणोपादायात्मनेपदं विधीयतेनतुकांचित्संज्ञामाश्रित्येतिभावः। नहीति।
यद्यपिधातुसंज्ञास्तितथापिनतदुपादानेनात्मनेपदंविधीयते। हंतेरपीति। आङोयमहनइति
सूत्रोपात्तोहन्तिः संज्ञाप्रयोगस्य स्कसंज्ञीति। वधेरपिहंतिसंज्ञाऽतिदेक्ष्यते। चित्रायांजातेति। चि
त्रारेवतीरोहिणीभ्य। स्त्रियामुपसंख्यानमित्यणोलुक् टिड्ढाणञित्यत्रातइत्यधिकारात् ङी
पोल्विधित्वं॥ ॥

भविष्यंतिसूत्रारंभेतवर्णाश्रयेइत्यस्यवर्णप्राधान्यविषयत्वादितिदेशेनस्युरेवेतिभावः। चित्रेतिनक्षत्रे
णायुक्तइत्यणा। लुबविशेषइतिलुपयुक्तवद्भावात्स्त्रीत्वंततोजातेर्थेसंधिवेलादीत्यणोवार्त्तिकेनलुकइतिभावः
नचाणोलुकिलुक्तद्धितेतिटापोलुकियुनष्टापदुर्लभः लक्ष्येलक्षणस्येतिन्यायात्इतिवाच्यं जातगतस्त्री
त्वबोधनरूपफलस्यासिद्धतयाप्रवृत्तेः। अतइत्यधीतिअकारांतादणइत्यर्थः॥ ॥छ॥ ॥

ननुवर्तंङातस्त्र्यप्रत्ययेयश्रोलुक् स्त्रियामितिलुकिप्रत्ययलक्षणेनप्राच्यामितिप्राप्तष्फंबाधित्वापरत्वात्
ङीतस्यात् शार्ङ्गरवादिपाठगदतआह। यथेतितत्रहिसूत्रेयञइतिवर्त्तते। सर्वत्रग्रहणादिति तद्धिपूर्वसू
त्रेपकृष्यते। औतोमिति एकादेशविधायकंहितत्। अचीति अजाद्योरित्यर्थः अतएवतद्धितशसो

वर्तंङीति। यथाआवट्याद्यायनीतिचापंबाधित्वासर्वत्रग्रहणापकर्षात्ष्फोभवत्येवंशार्ङ्गरवा
दिपाठात्। प्राप्तंङीनंबाधित्वाप्राच्यंष्फः स्यात् अतइत्यधिकारादल्विधिष्फः। गव्यतीति।
औतोम्शसो रित्यत्र अचीत्यनुवर्त्तनादल्विधावात्वं। चर्मन्निति। सुपांसुलि णितिङे
र्लुक्। अत्रभसंज्ञायाअभावान्नलोपः प्राप्नोतीतिनङिसंबुध्योरितिवक्तव्यंजायते॥ ॥

निवृत्तिः साध्येसूत्रारंभवादीवचनांतरवादिनंप्रतिदूषणमाह। तस्यदोषइति स्थानिसंज्ञानुदेशा
दित्यस्येत्यर्थः। इत्वंशासइदङ्हलोरिति। इमूतृणहइत्यनेनसाध्ये। वक्ष्यत्यत्रेति नङीतिङौनलोप
प्रतिषेधाज्ज्ञापकात्प्रत्ययलक्षणेनभसंज्ञानेत्येवंरूपमनुपदमेतत्सूत्रएवेत्यर्थः॥ ॥ ३१८

शास्त्रपरेति। उपदेशशास्त्रपरेत्यर्थः अतिदिश्यमानकार्याणामुत्पत्तिदेशएव विप्रतिषेधशास्त्रोपयोगी
तिभावस्तदाह। सतिप्रत्ययेति। इदंसूत्रंतत्तच्छास्त्रनिमित्तसंपादकमितिभावः अतएवपूर्वंतान्यनेनप्र
त्युत्थाप्यंतइत्युक्तंतानितत्कार्यबोधकानिशास्त्राणीतितदर्थउचितः नतुकार्याणिक्रियंतइत्यर्थः अत
एवटितआत्मनेपदानामितिसूत्रपयःचपादौरूपांतरापत्तिरित्युक्तं कैयटेनविद्यमानस्यहिरूपांत

परत्वाद्दीर्घत्वमिति। सतिप्रत्ययेयत्कार्यंदृष्टंतल्लुप्तेपिभवतीतिसूत्रार्थः परिवीयेत्यादौच
सतिप्रत्ययेदीर्घोदृष्टोनतुगीतिपरिवीतिरित्यत्रापिदीर्घएवभवति। प्रयोजनमिति। यद्यप्य
ल्विध्यर्थमिदमतृणेडित्यादौतथापिविशेषविहितत्वात्। तुमादयोप्यस्यैवोदाहरणानीतिभावः॥ ॥

रापत्तिर्भवतिशास्त्रमेवचविद्यमानंनतुकार्यंतस्यरूपांतरमेतद्विषयेकार्याप्रवर्त्तकत्वमित्यन्येसाध्ये। कानिपु
नरितिपूर्वमेतत्सूत्रकरणेकायुक्तिरितियुक्तिप्रश्नः इदानींतुप्रयोजनप्रश्नइतिनपौनरुक्त्यंअतएवसद
न्वाख्यानादितिप्रागुक्तरिति। यद्यप्यल्विध्यर्थमितिइदमितिशेषः। विशेषविहितत्वादितिप्रत्यय
विषयेशीघ्रोपस्थितिकत्वादित्यर्थः। त्रीतेइत्यादौशेश्छंदसीतिलोपः नुम्फलंदीर्घः॥ ॥७॥ ॥

कै०वि०१ ३१९

आश्रित्येति अपवादबाधकवाचनिकपूर्वविप्रतिषेधाश्रयेणेति भावः। विशेषविहितत्वादितियेन नाप्राप्तिन्या
येनापवादत्वादित्यर्थः। तदेति अपवादविषयं परित्यज्येति न्यायेनापवादविषये उत्सर्गाप्रवृत्तेरितिभावः।
यदीत्यनेन विषयभेदादपवादत्वमेव नास्तीति सूचितं। यदि तु नुड्विषये प्रतिषेधो वक्तव्य इत्यादिसाक्षात्भिक
भाष्येण विषयभेदेप्यपवादत्वं तर्हि प्रत्ययलोपस्थलेनुत्पत्तिरेवान्वाख्यायते इति स्वरूपसूत्रस्य भाष्योक्तत्वेन

अनादुन्निति। पूर्वसंबुद्धिलोपमाश्रित्येतदुक्तं। यदि तु विशेषविहितत्वादम्‌संबुद्धाविति पू
र्वममुप्रवर्त्ततेतदा संबुद्धिलोपो न स्यात्। ऐयइति। इयर्त्तेर्लङ् तिप् शप्श्लुः द्विर्वचनं। अर्त्ति
पिपर्त्योश्चेतीत्वं। अभ्यासस्यासवर्ण इतीयङ्। औनइति। उन्देर्लङ् सिप्‌ नुम् श्नान्नलोपः दश्चेति रुत्वं॥

पवादत्वसंभावनैव नेत्याहुः। इतीयाड्‌इति। ततो गुणेऽस्तलोपेऽडाटाविति भावः आडागमे रूपांतरेणात्त
छास्त्रनिमित्तविघातात् केनापि कार्येणानयोर्नयौगपद्यमिति भावः। भावस्थायामाडितिपक्षेपि बहुलंछंद
स्यमाङ्योगेपीति बाहुलकादत्रैव धाक्रियाबोध्या। आस्तन्नित्यत्रापीकारलोपात्स्तलोपास्यां
मायौगपद्यासंभवेन परत्वाच्चोपेतस्य प्रवृत्तिरिति बोध्यं॥ ॥छ॥ ॥ॐ नमः शिवाय॥॥ ३१९

भाष्ये। प्रयोजनं ङाविति सूत्रारंभवादी। प्रत्याख्यानवाद्याह। नसंज्ञेइत्यादि। सूत्रारंभवाद्याह। नसं
ज्ञायां तावदिति। यद्यपं नङीति अंगाधिकारप्रतिनिर्देशपक्षे ज्ञापकोपन्यासः अकारेणार्णंतामिति
तद्विजातेरस्त्रीत्यादेराखुरित्यादौ व्यावृत्तये आवश्यकं ननु प्रत्ययग्रहणसामर्थ्येन प्रधानतयाप्र

नचलोपइति। दिशिरुच्चारणक्रियो न चलोप उच्चार्यते अभावरूपत्वात्। लोपोपीति।
प्रतिपादनक्रियोऽन्नदिशिरितिभावः। अण्योकारइति। अकारेणार्णंतं न विशेष्यते। किं
तर्ह्यणेव सर्वश्चाण् अकार एवेति विशेषणसामर्थ्याच्छ्रूयमाणाकाररूपादणइति वि
ज्ञायते। अथवाणाकारो विशेष्यत इति वर्णनिमित्तो ङीप् न तु प्रत्ययनिमित्त इति प्रत्ययलक्ष
णाभाव॥ ॥

त्ययत्वेन प्रत्ययस्य। यत्र निमित्तता तत्रैवाल्विध्यर्थमिदं। एवं चाकाररूपो योणित्यर्थेपि प्रत्ययलक्ष
णं दुर्वारमत आह। विशेषणेति वस्तुतोकार एव विशेष्य इत्याह। अकारेणेति। न तु प्रत्ययनिमित्त
इति प्राधान्येन प्रत्ययानिमित्त इत्यर्थः॥ ॥

कै॰वि॰१
३२०

अज्झलात्मकयओकारेणसामानाधिकरण्यासंभवादाहा कारावयवेतिबहुव्रीहिः अस्यविशेष
णत्वेइदं। गुणेत्वन्याय्यकल्पनेतिन्यायादितिभावः नन्वेवंसतिमत्यादिष्वतिप्रसंगवारणा
याजाद्यतद्रूपत्रज मुख्यार्थस्योत्तरत्रलक्षणायांवैरूप्यंस्यादतोव्याख्यांतरमाह। यवेतित द्वि

यञ्योकारइति।अकारावयवइत्यर्थः।अपवायञ्वययवेयञ्शब्दोऽनुवर्तते।यञ
वयवोयोकारइत्यर्थः।पूर्ववदेतदपिव्याख्येयं।अच्यमीति।अच्याधातंतद्विशेषणममी
तितदादिविध्यभावः।तन्नवर्णानिमित्तमितिदोषाभावःक्रियतएतदिति।त्ववापिज्ञापना
र्थमवश्यंवक्तव्यमितिभावः॥ ॥

शेषणमित्यमोवयवेचीत्यर्थइतिभावः।एवंप्रत्याख्यानवाद्युक्तदोषेषुपरिहृतेषुप्रत्याख्या
नवाद्याह।प्रयोजनान्यपीतिप्रादिज्ञापनार्थमितिप्रत्ययलक्षणेनत्वंनेत्यस्येतिशेषः।नलु
मतातस्मिनित्यनाग्रित्येदं॥ ॥छ॥ ॥ ॥ॐश्रीसांबशिवायनमः॥ ॥ ३२०

Dr. BHAU DAJI MEMORIAL

अकृतत्वेपि।परस्मैपदिविहिताङः साहचर्यात् शासुधातोरेवग्रहणंतत्रेतिपक्षोवित्यर्थः।नन्वेवमप्यार्यशीनित्या
द्यसिद्धिरितिचेत् अत्राहुः।शासइतिसामान्यसूत्रंततोङिअजादौचेदङ्वेतिनियमार्थमिदं एवंचसूत्रेत
लुग्रहणमास्तितिमित्रपूरीरित्यादिसिद्धिः।आशासःक्वावितितुअत्रशासोरेवग्रहणेविध्यर्थअन्यथानियमा
र्थमितिआशास्तेइत्यादौनदोषइति।अथवावार्तिकोक्तविध्यर्थत्वेदूषितेभाष्य

शासत्वेइति।कृतेप्यस्मिन्सूत्रेनियमार्थमेतद्वक्तव्यंआशास्तेइत्यादौमा
भूत्।अकृतेतुविध्यर्थंआशास्तइत्यादौतुनभवति।शासुअनुशिष्टावित्य
स्यैवतत्रग्रहणात्॥ ॥

र्थमितिशासास्तेइत्यादौनदोषइति।अथवावार्तिकोक्तविध्यर्थत्वेदूषितेभाष्यकृन्नियमार्थंसूत्रमितिप्र
श्नपूर्वकमाह।नतर्हीत्यादि।प्रत्ययंगृहीत्वेति।प्रत्ययत्वतद्व्याप्यधर्मपुरस्कारेणयदुच्यतइत्यर्थः।
शब्दंगृहीत्वेतिनुक्तधर्मातिरिक्तपुरस्कारेणयदुच्यतइत्यर्थः॥ ॥छ॥ ॥ ॥

कै॰वि॰१
३२१

ननु शब्दं गृहीत्वा यदुच्यते तत्प्रत्ययलक्षणेन माभूत् स्थानिवत्त्वेन तु स्यादत आह। स्थानिवदिति। प्रत्यय ए
वेति उक्तोर्थः एतदर्थमेव द्वितीयं प्रत्ययपदं न चालोमोषसीति पर्युदासेन श्रूयमाणासंतस्यैव ग्रहणमिति
नियमोपि व्यर्थ इति वाच्यं। पर्युदासेन प्रत्ययासंतस्यैव ग्रहणापत्तौ सुव इत्यादौ स्वरानापत्तेरितिभा

प्रत्ययं गृहीत्वेति। स्थानिवद्भावेन सिद्धे सत्ययं योगो नियमार्थः प्रत्यय एव यस्य लक्षणं तत्प्र
त्ययलोपे यथा स्यात्। सोर्मनसीइत्यत्र तु अनिनस्मन्ग्रहणानि चेति वचनाद सत्प्रत्ययश्चा
प्रत्ययश्च गृह्यत इति सुदृषदित्यत्र स्थानिवद्भावाभावादुत्तरपदाद्युदात्ताभावेन ञ्रं दुः सुप्स्या
मित्यं तोदात्तत्वं भवति। तत्र चोत्तरपदादिरित्यधिकारात्। असत्त्वमुत्तरपदं गृह्यत इति सु
दृषदित्यत्रापि स्थानिवद्भावादसंतत्वमुत्तरपदस्य स्यात्॥

ष्याशयात्। ननु स्थानिनिमित्तं पदन्यस्य कार्यं तत्स्थानिवत्त्वेन लोपेपि न तु तस्यैव। असतो वचनशतेनापि
कार्यित्वाप्रतिपादनात्। इह चासत एव कार्यित्वमत आह। तत्र चेति। सोर्मनसीतिसूत्रे इत्यर्थः॥ ॥ ३२१

नलुमतांगस्य॥ ॥लोपक्रियानिरूपिताकरणे तृतीया। यद्यपि लुशब्दयोगात्संज्ञालुमद्व्याख्यानं च तत्रायं प्रतिषे
धः किंतु तत्प्रतिपादितादर्शने। एवं च लुमति प्रतिषेध इत्यनुपपन्नं तथापि वाचकधर्मस्य वाच्ये उपचार इत्या
ह। लुमदिति ननु सर्वोपि स्वरः कार्यित्वेनैकमेव पदं गृह्णातीत्यत आह। एकेति। सर्वामंत्रितेत्यत्रामंत्रित
पदेनाष्टमिकमपि गृहीतुं शक्यमिति पदस्य पदादित्यधिकारे। नंतरेमप्यामंत्रितस्येत्यु द्वंद्वघ्य व्यवहि

नलुमतांगस्य॥ ॥लुमतीति लुमम त्संज्ञया प्रतिपादितमदर्शनं लुमत् तत्र यः प्रतिषेधस्तास्मि
न्नित्यर्थः। एकपदस्वरस्येति। एकपदाश्रयो यः स्वरस्तस्येत्यर्थः यस्तु पदस्य पदादिति पदद्वयाश्र
यः स्वरस्तत्र प्रत्ययलक्षणं भवत्येव दधि तिष्ठतीति तिङ् तिङ इति निघातः अंगस्येत्यंगाधिका
रनिर्देशात् अकित्स्वरस्य चानांगत्वात् प्रतिषेधस्याप्राप्तिरिति भावः॥ ॥छ॥ ॥

तमुदाहरति। दधीति। अंगस्येत्यधिकारेति। वस्तुतस्तु तदनिर्देशोप्यवश्यकमेतत्। तथाहि सौव
रीणां सप्तमीनां षष्ठीह्रीमदेति सूत्रप्रत्ययात्पूर्वमिति पूर्वग्रहणेन तदंतसप्तमीत्वस्य ध्याष्टनाष्ये
तत्सूत्रे एवोक्तत्वेन स्वराणां प्रत्ययेपरतः पूर्वकार्यत्वाभावे नाकित्स्वरेषष्ठ्या एव सत्वाच्च॥ ॥

ननुसंज्ञायानुपमानमिति। उपमानशब्दः संज्ञाया माद्युदात्तइत्यर्थकंकनो लुपिचंचेवचं चेत्यादावाद्युदात्तसा
धकंञ्नित्यादिरित्येवासिद्धे व्यर्थंसदनुबंधलक्षणे स्वरेप्रत्ययलक्षणाभावज्ञापकमिति तत्सूत्रे भाष्ये स्पष्टं ते
ननेदं विरुध्येतेति चेन्न प्रकृतसूत्रे वार्त्तिकव्याख्यानमात्रे। षष्ठे तु प्रत्याख्यातानीमानीत्यविरोधात् अतए
वतत्र भाष्ये पथिमथिस्वरार्थं वचनं कर्त्तव्यमित्युक्तं एवंच तदर्थस्यात्र त्यवचनस्य कर्त्तव्यत्ववदतान्येषामे
कर्त्तव्यत्वमर्थादुक्तमेव। एतेनस्त्रीह्रीति ज्ञापकं विशेषापेक्षं सप्तम्यर्थग्रहणे तदंतग्रहणं च यत्र फलन्नेदस्त

सर्वस्तोमइति। सर्वस्य सुपीति यदाद्युदात्तत्वं तदेव बहुव्रीहौ प्रकृत्येति
विधीयतइत्येकपदस्वरोऽस्त्वत्येव॥ ॥

द्विषयं एवं चोपोत्तमं रितीत्यादावेव तत्प्रवृत्तिरिति न ञ्नित्यादिरित्यादौ तत्प्रवृत्तिरिति कैयटाशयइत्ति
परास्तं संज्ञायामुपमानमिति सूत्रस्थभाष्यविरोधात्। तस्मात् ज्ञापकस्य सामान्यापेक्षत्वमेवोचितं। तत्र
सप्तम्यायथ्याश्रुतत्वेहि न लुमतेति निषेधान्नेदं प्राप्तौ ञ्नितीति प्रयोजनमितिभाष्यासंगतिः स्पष्टैवनचा
गाधिकारप्रतिनिर्देशपक्षे तङ्गाव्यासिद्धात् पक्षेयोजयितुं शक्यत्वादितिदिक्षष्ठीसमासादोपरत्वात्सति शिष्टत्वा
च्च समासांतोदात्तत्वस्यैवप्राप्तेः भाष्ये। सर्वस्तोमइति बहुव्रीहिरुदाहृतः। तत्र बहुव्रीहिस्वरस्याद्विपदाश्रयत्वात्प्र
तिषेधस्यैवाप्राप्तेः कथं तदपवादिदमुदाहरणमतआह। सर्वस्येति। विधीयतइति अपवादनिवर्त्तनेनव्यवस्थाप्यतइत्यर्थः॥ ॥ ३२२

प्रत्ययस्वरेणेति। इतिप्रत्ययांतत्वादिति भावः। नद्विषयस्येत्यस्य तु न प्राप्तिः अनिसंतस्येति पर्युदासात् घृता
दिस्वकल्प्यनंतु किमर्थमिति चिंत्यं। नित्स्वरेणेति सप्तन्शब्दो हि सप्प्श्रप्यां तुद् इति कनिनतः स्वख्यायाद्युत्पद्या
द्युदात्तत्वं प्राप्नोतीति द्रष्टव्यं। माहिदातामित्यत्राट् प्रतिषेधायमोङ्। दिशब्दो हि चेति नि घातप्रतिषेधार्थः सिज्लु
क्स्वरवर्जनं न कार्यमित्याह। लेरिति। गातीत्यनेन स्त्रेरेवलुकिमंत्रेद्यस्येत्यत्र पुनर्लिग्रहणं न कार्यं लुस्वि

सर्पिरिति। सर्पिः सशब्दोंतोदात्तः प्रत्ययस्वरेण घृतादित्वाद्वा। सप्तशब्दोपिघृतादित्वादंतोदा
त्तः आद्युदात्तत्वे विशेषो न स्यात्। माहिदातामिति। गातिस्थाघुपिति सिचोलुक् स्त्रेरेवलु
कि विधानत्व्यस्सिचोलुग्विधानं प्रत्ययलक्षणार्थं। ञ्निकिद्लुकीति। इकार उच्चारणार्थः
ञ्नित्नित्किता प्रत्ययानां। लुकि कृते स्वराः निवर्त्त्यमानतया प्रयोजनमिति पदानां
संबंधः न्याप्यकारस्तु वस्त्वर्थं व्याचष्टे। ञ्निकित्स्वरादिति। प्रतिषेधमित्याध्याहारः॥

धावातइत्येतच्चु हि ध्यर्थं स्यादिति लाघवमिति भावः। प्रत्ययलक्षणार्थमिति। प्रत्ययलक्षणेन सिज्निमित्तकार्या
र्थमित्यर्थः नन्वत्र ञ्निकित्स्वरादिति। भाष्यदर्शनात् ञ्निकितां स्वरविशेषणत्वेन लुकावार्त्तिके लुकीत्युपलक्षणमि
ति भावः समासोनुपपन्न इत्यत आह। ञ्नित्किताम् इति। प्रयोजयतीत्यस्य कर्माकांक्षायामाह। प्रतिषेधमिति। वार्त्ति
के लुकीत्युपलक्षणमिति भावः॥

भाष्ये। आद्युदात्तत्वं मा भूदिति। एवं च प्रातिपदिकादिस्वरेणांतोदात्तत्वमेवेति भावः। अत्रि शब्दाद् इति। भ्वादिभ्यो निजद् इति ढको त्रिन्न् ग्वि ति लुक् नन्च त्रकित्व प्रयुक्तांतोदात्तत्वा भावे पि प्रातिपदिकस्वरेण तत्वं दुर्वारमत आह। राशदीति। त्रिवंतंइ तिनांतस्त्वंतोदात्तइति भावः इद्द्वयो जनंकितङ्किताांतस्यांत उदात्तइत्येस्तेत्याहुः। पथिमथिशब्दो इति प्रत्ययांतत्त्वा या प्रत्ययस्वरेणाफिषोंतइति वांतोदात्तौ तयोः सर्वनामस्थाननिमित्तोद्युदात्तत्वमत्रापि स्यादित्यर्थः। भाष्ये। प्रतिषे

उष्ट्रीश्रीवाः वामरज्जुरिति। देवयथादित्वात्कनो लुप्। असंज्ञायां चेदमुदाहरणं। संज्ञायां तु संज्ञायामुपमान मिति भवितव्यमाद्युदात्तत्वेन। अन्नयइति। राशादिभ्यां छिप्। असंज्ञायां अदेत्त्रि वितिात्रिव त्तोत्रिशब्द आद्यु दात्तः। पथिप्रियो मथिप्रिय इति। पूर्वपदप्रकृतिस्वरेणांतोदात्तौ पथिमथिशब्दो भवतः। अहर्ददातीति। असुपी ति। प्रसज्यप्रतिषेधात्। पर्युदासे तु दीर्घाहानिदाघ इत्यत्रापि सुपूसदृशो निदाघशब्दे परतो रत्वं स्यात्। रूत्वं चे ष्यते। लोपशब्देन सोर्लुप्तत्वात्। प्रत्ययलक्षणेन सुपिनेति रत्वप्रतिषेधादुत्वे यत्वे तस्य च लोपे दीर्घाहानिदा घ इति सिध्यति। लुकि तु प्रत्ययलक्षणप्रतिषेधाद्रत्वस्य त्वाभावादहर्ददातीत्यादि सिध्यति॥ ॥छ॥ ॥

धोमाभ्य दिति तेनापर्युदासत्वं सूचितं तदुपपादयति। पर्युदासे तु इति प्रत्यत्वेन सुप्सादृश्ये तु अहर्ददातीत्यत्रापि र त्वं न स्यादित्यर्थः नन्विष्यमाणमपि रुत्वं न प्राप्नोति। प्रत्ययलक्षणनिषेधेन रत्वस्येव प्राप्तेरत आह। लोपशब्देनेति हलङ्या दिसूत्रेणेति भावः लुमता लुप्त एवा निषेध इति तात्पर्यं न लुमता तस्मिन्निति पक्षे तु नेदमावश्यकं उत्तरपदत्वे चेति सर्वथा कार्यं॥

ननु सामान्यत उत्तरस्य पदे त्वेद्द्वत्यर्थे परमं च मेत्यत्रापि निषेधापत्तौ नलोपो न स्यात् अत आह। उत्तरपदामिति। अ त एव बहु च्युर्वस्यनेति वचनमर्थवदिति भावः। उत्तरपदशब्दश्च समासचरमावयवे रूढ इत्यसमासे नातिप्रसंग इति बोध्यं। समासार्थेति। तत्र सुप् सुपेत्यधिकारादिति भावः। भाष्ये। पदस्येतीति पदस्येत्यधिकृत्य यानि विहितानि

उत्तरपदत्वे चेति। उत्तरपदं उत्तरशब्देनोच्यते पदैकदेशलोपात्तेनोत्तरपदस्य पदत्वे पदव्यपदेशे कर्त्त व्ये प्रत्ययलक्षणं न भवतीत्यर्थः। परमवाचेति। समासार्थाया विभक्तेः कृतां तां प्रत्ययलक्षणेनाश्रित्य पदत्वनिबंधनानि कुत्वादीनि प्राप्नुवंति। न संज्ञा तु यस्मायजादि विधिरिति समुदायस्यैव नत्ववय वस्य। दधिसेचाविति। दध्नः सेचाविति षष्ठीसमासः उपपदसमासे तु प्राक् सुबुत्पत्तेः। समासवि धानात्सेच् शब्दस्य पदसंज्ञाया अभावात् पदादित्वं सकारस्य न स्यात्। अनभिधानाच्च। सोय पदादिजभावाद्दधिसेचावित्यादिप्रयोगाभावात्॥ ॥

त्यर्थः ननु सोपपदात्सिचेर्विचि दधिषे चाविति स्यादेव न चेष्टापत्तिः पदाशादिरिति। पक्षे दुर्लभत्वात् अत आह। अन भिधानादिति। तस्य छांदसत्वादिति भावः। भाष्ये। यद्यपशादीति। एकदेशेन संपूर्णं वार्त्तिकमुपलक्ष्यते। यतः प्रतिषेधस्यादिति व्याप्तिर्न प्रातिषेधापवादस्येति बोध्यं॥ ॥छ॥ ॥ ॥

स्वरश्चेतिउत्तरपदादिरित्यधिकारादितिभावः। नन्वसमासे स्वांगशिटामिति कर्णस्याद्युदात्तत्वं सिद्ध्मेवेत्यतआह। कर्णशब्दादिति। एवमादिविधिर्न सिध्यतीतिभाष्याद्युत्तरपदादिरधिकारस्तु सूत्राणां वैयर्थ्यस्यैव दूषणत्वेन प्रतीतिरित्येके। प्रत्यासत्त्येति। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेरित्युपस्थित्येतिभावः। तथो

कर्णोवर्णलक्षणादिति। नन्वपदादिविधावित्युच्यते। स्वरश्चायंपदादिविधिः ककारो ऽत्रादिर्नत्वाकारइत्यदोषः स्वरविधौव्यंजनमविद्यमानवन्नन्वादिव्यपदेशो सूत्रं चा असमासार्थं स्यात्। कर्णशब्दादशआदित्वादचिरुतेऽयुक्तः वर्णइत्याद्युदात्तत्वंयथास्यात्। यदिपुनरिति। तेन पूर्वस्मिन्परत्र च भवत्येवप्रत्ययलक्षणं। राजकुमार्याविति। इकोसवर्णइत्यत्रेङः पदांतादतीत्यतः पदग्रहणमनुवर्त्ततेतत्रप्रत्ययलक्षणेनपदांत्वाछाकलप्रसंगः। दधिअधुनेति। अधुनाप्रत्ययइदमोविधीयतेन तइदमइश्रयस्येतिलोमः यस्माद्यइति॥
प्रत्यासत्त्येतिभावः राजकुमार्यावित्यत्रयद्यपि समुदायाद्विहितः तथाप्यवयवादप्यसौ विहितइति बुद्धिर्भवत्येव। समुदायद्विर्वचने ऽवद्विर्वचनबुद्धिवत्॥

पीतिवस्तुतो राजकुमार्यावित्यत्रापिदोषः समुदायादसौ विहितानावयवात्॥ अन्यथाकौरूचरेयइत्यादौ चकाराकारस्यापिटद्धिः स्यात्॥ ॥छ॥ ॥ॐनमःशिवाय॥ ॥ ३२४

इहतर्हीत्यादिभाष्यंतुअभ्युपेत्यवादेन। भ्रुतेरग्नेतुनोत्तरपदत्वे चेत्यस्यप्रवृत्तिः अतएव पूर्वत्रैवदोषएणेदं दूषितंभगवतेतिबोध्यं। ङमोह्रस्वादितिसूत्रस्यभाष्यंत्वेकदेश्युक्तिरितिनदोषइतितत्रैवनिरूपयिष्यामः समासचरमावयवेउत्तरपदशब्दो रूढइत्यभिप्रेत्याह। समासेहीतिनतुपदत्वमपितद्व्यवहारे

उत्वमिति। नुत्वविधावेङः पदांतादितिपदाधिकारः वचनादिति। समासेह्युत्तरपदंभवति। नचकर्णशब्दो प्रत्ययांतोस्तिअर्शआदिषुहिस्वांगाद्धीनादितिपठ्यते तेनस्वअर्शआदिभ्यएवहीनस्वांगवाचिभ्योअत्ययोभवति नचकर्णशब्दो हीनस्वांगवाची। तत्तर्हीति। उत्तरपदत्वे चापदादिविधावित्येतत्। यचिभमिति। ततश्चपरमेवाचेत्यत्रवाकुशब्दस्यभत्वात्पदत्वाभावः॥

प्रयोजकमित्यर्थः केवलरूढत्वेमानमुक्तंतुष्यतुदुर्जनन्यायेन केवलयोगेप्याह। नचकर्णेतिराजवाचककर्णशब्दस्यतुअभिव्यक्तपदार्थायेइतिन्यायान्नतत्रग्रहणमितिभावः काश्यपिनावित्यादोब्राह्मणानीतितद्विषयताबोधकशास्त्रबलात्सवुत्पत्तेः प्रागेवतद्धितइतिनदोषः॥ ॥छ॥ ॥

कै०वि०१ ३२५

न्नाष्ये। नः केइत्यादि तदादिसुबंतं चेति। यस्मात्प्रत्ययविधिरिति अवश्यमुत्तरत्रानुवर्त्यं परमैश्वतुर्भिरिरित्या दौपरमघटितस्समुदायस्य पदत्ववारणाय तत्वेहि इत्युपोत्तममिति परमैरित्यस्यापि निघातापत्तिरेवं च तस्य नः क्ये इत्यत्रापि संबंधे यस्मात्क्यविधिस्तदादियदि क्यतोन्निमित्तांयां तवर्त्तिसुयापदं तदानांतमेवेति नियमः स्यात् तथा च परमवाच्यतीत्यादावपि वाक्शब्दस्य पदत्वेन कुत्वं स्यात् सूत्रं तु सनिमित्ती त्येतद्याद्वत्यर्थं स्यादिति सुबंतमि

इह तर्हीति। असर्वनामस्थान इति प्रसज्यप्रतिषेधं मन्यते। ततश्च सर्वनामस्थाने परतो यस्मात् स्वादिविधिस्तदादि सुबंतं च पदसंज्ञं न भवतीति प्रत्ययलक्षणेन सर्वनामस्थानपरत्वात्प दत्वप्रतिषेधात् कुत्वाप्राप्तिः स्यादेतदिति। अवधिभेदात्संज्ञिनोभेदात्॥ ॥

त्यपि संबध्यत इति न्नावः तस्य च मध्ये चेत्सुबंतं तदा तदपि नांतमेव पदमित्यर्थः अन्वाचयशिष्टं च सुबं तमिति सर्वत्र संनियोगशिष्टत्वे षड्स्पद् इत्याद्यसिद्धिः स्मिति चेत्पत्रयद्यपि नास्योपयोगोवयव सुबंताप्राप्तेस्तथापि उत्तरत्रानुवृत्तिं दर्शयितुं तत्रापि तत्संबंधो दर्शितः व्यपदेशिवद्भावेन कथंचिदन्वयः संपाद्यः एवं स्वादिष्विति सूत्रेपि तदनुवृत्तिक रणमुत्तरार्थमेवयचिभमित्यत्रापि पदसंज्ञयां तुल्यावधिकत्वसिध्यर्थं यस्मादित्याद्यनुवर्त्यमिति बोध्यं। संज्ञिनो भे दादिति सति स्तो न दत्तस्य सुबंतमिति पदत्वं तत्प्राग्नागस्य स्वादिष्विति तिभावः॥ ॥

न नु अपरनिमित्तकत्वेनांतरंगतया सुबंतमिति पदत्वं स्यादत आह। न्नाष्ये। प्रतिषेधाश्चेति। विध्युन्मूलनं प्राप्तस्य विधेर्निवर्त्तनं एवं चापवादन्यायेनात्रांतरंगासंभव इति न्नावः। अत्रानुवर्त्तमानं सुबंतमित्यपि स्वादिष्विति सूत्रेण तदनुवृत्या मध्यस्य सुबंतस्य यत्प्राप्तं तन्निषेधकं न तु सुबंतमिति सूत्रप्राप्तस्ये ति बोध्यं। न्नाष्ये। नोत्सहते इति स्वयमप्रवर्त्तमाना कथमन्यं बाधेतेति भावः ननु सर्वनामस्थानेऽयची

बलीयानिति। विध्युन्मूलनरूपत्वात्। एवं तर्हीति। योगविभागे सति सर्वाप्राप्तिः प्रतिषिध्यत इति दोषाभावः। असर्वनामस्थान इति नञः क्रियापदेन संबंधो यचीत्येतच्च सर्वनामस्थानविशेष णं तेनायमर्थो भवति। यजादौ सर्वनामस्थाने परतः पदसंज्ञा न भवति हलादौ तु सुशब्दे भव त्येव न्नाष्ये च वस्तुमात्रमुपन्यस्तं। सर्वनामस्थानेऽयचीति यजादौ सर्वनामस्थाने पदसंज्ञाया नि षेधात्सामर्थ्यादयमर्थः संपद्यते। अयजादौ सर्वनामस्थाने पदसंज्ञा भवतीति॥ ॥छ॥ ॥

तिन्यासस्य परत्वनिषेधत्वेनांतरस्येति न्यायेन स्वादिष्वित्यस्यैव निषेधे परमवाग्विति यायो सुबं तमिति पदत्वं स्यादत आह। योगविभाग इति। एवं च तत्सामर्थ्यादनंतरस्येति न्यायबाध इति भावः य चीत्यस्य पुरस्तादपकर्षफलमाह। हलादाविति। वस्तुमात्रमर्थसिद्धोर्थः तत्फलं नञः सर्वनामस्थानपदेनासंबंधप्रदर्शनं॥

Dr. BHAU DAJI

३२५

कै०वि०१ ३२६

भाष्ये। प्लुतविकारे इति। प्लुतसहितविकारे इत्यर्थः एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतावित्यत्रेति
भावः भाष्ये। इह नदीतिवार्त्तिकारंभे त्वपदादिविधावित्युक्तेर्न दोषः प्रत्याख्याने तु न दोषः कुत्वाभावाय पदत्व
निषेधप्रवृत्तेरावश्यकत्वादेतेन योगविभागसिद्धस्य काचित्कत्वान्न दोष इत्यपास्तमिति भावः। पंचमीतियो
गविभागादिति। पदादित्यस्य परशब्दान्वयेनासामर्थ्यादत्र समासशास्त्राप्राप्तेः सौत्रः समास इति वक्तुमु
चितं भाष्ये। न तेभ्यः प्रतिषेध इति तेभ्यः परस्य सुबंतं पदमिति पदत्वमाश्रित्यापि न प्रतिषेध इत्यर्थः अत

वाक्यपदयोरिति गोरित्योकारो वाक्यांतोनभवतीत्यादुतोन्नवतः पदादादिरिति पंचमीतियोगविभागात्स
मासः॥ ॥

एवं परमवाक्षु इत्यादावपि न दोषः भाष्ये। पदादादेर्नेत्युच्यमानेपीति॥ षष्ठीतत्पुरुषेपि न सिध्यति कु
त्वाभावाय पदत्वाभावस्यावश्यकत्वात् इतिअयमर्थः अयं बहुसे चिदोषो वार्त्तिकारंभेपि उत्तरपदत्वाभावे
न निषेधाप्राप्त्यापदत्वसत्त्वेन षष्ठीतत्पुरुषेप्येषत्वानिषेधसाम्राज्येपि कुत्वप्राप्तेः इदानीं प्रत्याख्यानप्रकारस्य
गौरवदुर्ज्ञेयत्वाभ्यामयुक्तत्वं मनसि निधाय लाघवाय न आहितवचनपाठमाह। एवं तर्हीति न पदांतविधा ३२६
विति पदांतस्थानिके विधावित्यर्थः नञ्घटितवार्त्तिकस्याप्यत्रैव प्रवृत्तिर्व्याख्यानादेतेष्वफलत्वायेति बोध्यं॥ ॥

एतावतापि बहुसेचावित्यस्यासिद्धिरिति शंकते। कथं बहुसेचाविति। तदुपपादयति। समासेति। एवं च
नियमाप्राप्तौ प्रत्ययलक्षणेन पदत्वात् षत्वनिषेधवत् चोः कुः पदांतस्येति कुत्वं स्यादिति भावः पंचमीस
मासेपि षत्वापत्तिरित्याह। नापि पूर्वस्येति। भाष्ये। बहुच्पूर्वस्य चेति। आद्यवार्त्तिकारंभे तत्प्रत्याख्याने
च सात्पदाद्योरित्यत्रेदं कार्यमिति गूढ आशयः न पदांतविधाविति प्रतिनिर्देशादुत्तरपदत्वे चेत्यस्य वा

कथं बहुसेचाविति। समासाभावान्नोत्तरपदत्वं नापि पूर्वस्य पदत्वं बद्ध इत्यस्येति। उत्तरपदत्वे चेत्यनेनै
व सिद्धनियमार्थमिदमित्यस्यैवेति। मध्यमपदस्यापि पूर्वपदापेक्षयोत्तरपदत्वसंभवात् प्रत्ययलक्षण
प्रतिषेधप्रसंगात्। मुख्ये तूत्तरपदे संभवति कथं मध्यमपदस्यापि ग्रहणं स्यात् इति चिंत्यमेतत्॥ ॥

र्त्तिकस्य ङमुडादिविधौ चाप्रवृत्तिरिति बोध्यं। ङमुडिति सूत्रस्थभाष्यविरोधात् उञ्निवपद इति सूत्रस्थभाष्य
विरोधाच्च न लोपादिप्लुत्यंत इति वार्त्तिकस्थभाष्याविरोधाच्चैकदेश्युक्तिरिति बोध्यं एवं च प्रत्याख्यानप्रकारो
पि योगविभागस्य काचित्कत्वेन ङमुडादिविषयेन इदमेव ध्वनयितुं प्रत्याख्यातमपि वार्त्तिकं पुनरक्षरांतरैरूपा
त्तमित्याहुः। मुख्ये त्विति। उत्तरपदशब्दस्य समासे चरमावयवे रूढेरिति भावः रूढस्यैव ग्रहणमित्यनेन तदव्या
ख्यायकं द्वंद्वे चेति तत्वं प्रत्याख्यानेपि न मध्यमस्य प्राप्तिः मध्यसुबंतस्यापि स्वादिपरत्वेन विशेषण्यादिति बोध्यं॥ ॥

कै०वि०१ प्रस्तावादिति। आतइत्यस्यारंभादित्यर्थः सिचइति। अनेनविधित्वासंभवो दर्शितः स्थाप्ये। श्रूयमाणेति
३२७ श्रूयमाणत्वार्थकं विभक्तिविशेषणमित्यर्थः तत्त्रासाधोपायंदर्शयति। षष्ठीत्यादि। अपवायथारभेति

आकारप्रकरणादिति। आकारस्य नियमार्थत्वेनप्रस्तावादित्यर्थः अथवाकारेप्रकरणादातइ
त्यत्र सिचः प्रकृतत्वादित्यर्थः। इतियुष्मत्तुत्रइति। पदादुत्तरयोर्युष्मदस्मदोरादेशविधाना
दितिशब्दप्रयोगः। श्रूयमाणविशेषणमिति। षष्ठीचतुर्थीद्वितीयास्वित्येवसिद्धेस्थग्रहणेसत्यय
मर्थोभवति। तास्वयेत्यवस्थितेयुष्मदस्मदीइति। श्रूयमाणासुचावस्थानंसंभवतिनतुलुप्तासुलुप्त
स्याधारत्वासंभवात्। अस्त्यन्यदिति। तिष्ठतिरहानावपिवर्त्ततेयथातपसिस्थितस्तपोनजहातीत्यर्थः। त
थासमयेतिष्ठसुग्रीवेतिसमयंमाहासीरित्यर्थः। तेनसातिस्थग्रहणेतत्सहितयोःकार्यंविज्ञायते। अथवा
यथारथस्थाआनीयतामितिसरथआनीयतेतथाषष्ठ्यादिसहितयोर्युष्मदस्मदोःकार्यंभवतीतिविज्ञायते। प
दस्येतिवर्त्ततइतिकेवलयोःपदत्वाभावात्तदवयवयंपदस्थस्यतइतिभावः। पत्रावितिअन्नहितेएवपदेरितितयोरेवादेशप्रसंगः॥

स्यषष्ठ्यः साहित्यवाचीतिभावः। तदवयवमिति। बहुव्रीहिः। युष्मदस्मदोरिति। नतद्घटितसमुदायेनाणक ३२७
मितिभावः। मुख्येर्थएवपदसमानाधिकरण्येसंभवतिविलक्षणयेत्याह। अत्रहीति॥ ॥छ॥ ॥

यद्यपिद्वितीयायांषष्ठ्यांचतयोःपदत्वासंभवेनतत्रलक्षणायाआवश्यकत्वेचान्यत्राप्येकरूपत्वायलक्षणायु
क्तातथापिपदस्येत्यस्यमादुपधायाइत्यादावयवषष्ठीत्वस्यक्लृप्ततयापदावयवयोरित्यर्थएवस्यादतईदृश
लक्षणानांवैलाभः सर्वस्यग्रहणसाध्यएवेत्याह। सर्वग्रहणमिति। अनुदात्तंसर्वमित्यतः ननुला

सर्वग्रहणमपीति। अनेकाल्त्वात्सर्वादेशत्वेलब्धेसर्वग्रहणमनुवर्त्तंषष्ठ्यंतंविपरिणम्यमानंसर्वस्यपदस्य
प्रयोगार्हस्यविभक्त्यंतस्यस्थानित्वमवगमयतीत्यर्थः। याजयांचकारेति। परत्वात्तिबादिषुकृतेषुआ
मइतिलुकिप्रत्ययलक्षणेनयाजयामित्यस्यतिङंतत्वमितिपूर्वःपक्षः। आमिलिजोथादिति। नाप्रा
प्तेषुतिबादिषुलुगारभ्यमाणस्तेषांबाधकः। अंगाधिकारइति। अंगस्येतिस्वर्यतेनांगाधिकारविहितं
यत्कार्यंतत्। लुमतालुप्तेप्रत्ययेनभवतीतिसूत्रार्थेदोषोपन्यासः। जिगमिषेति। अतोहेरिति। लुकि
कृतेगमेरिट्परस्मैपदेष्वितिइएनप्राप्नोति। संवृत्सेति। नवृद्भ्यश्चतुर्भ्यइतिइट्प्रतिषेधः॥ ॥

घवस्थायामेवअंतरंगानपीतिन्यायेनलुकिप्रत्ययलक्षणेनापिनतिङंतत्वमतआह। परत्वादिति। ना
प्राप्तेष्विति। अंतरंगानपीतिन्यायादित्यपिबोध्यं। षड्प्रतिषेधइत्यत्रनप्राप्नोतीत्यनुषंगः॥ ॥

दीर्घत्वं। क्रमः परस्मैपदेष्विति। समुच्चिनुयादिति। तच्चासंभवतीति शेषः। इत्यभिप्रायेणेति। प्रश्नयद्दत्यर्थः।
त्ताप्येतदस्य अभिप्रायानभिज्ञत्वं उत्तरयति। आचार्य आह। नेत्याहेति। गमहनेति विधिः। वृत्तेस्तत्प्रतिषेधः क्रमेश्चवं दीर्घत्वं
नसिध्यतीत्यर्थ इति भावः अनंतरोक्तातिव्याप्तिरूपक्रमोक्ताव्याप्तेश्चांगाधिकारपरत्वं नयुज्यत इत्युपसंहरति भाष्ये।

क्रमेरिति। कार्यसमीपे श्रूयमाणश्चकारः कार्यमेव समुच्चिनुयादिति अभिप्रायेणाह। किंचेति। अदेश इ
ति। कार्यस्य समुच्चयेतव्यस्याभावात्सामर्थ्यात्प्रकृतिसमुच्चय इत्यर्थः। किंचिच्चेति। ञ्नितिकित्स्वरः।
नलुमतातस्मिन्निति। लुमतायो लुप्तः प्रत्ययस्तस्मिन्यत्कार्यमांगमनांगं तन्न भवतीत्यर्थः॥ ॥

इहेति ञ्नितिकित्स्वरादिति। इदमुपलक्षणं अहर्ददातीत्यत्रासुपीति प्रतिषेधस्यापि वस्तुतः किंचिच्चेत्य
त्र किंचित्पदेन रोसुपीत्येव। ञ्नित्स्वरविषये सौवरीणां सप्तमीनां तदंतसप्तमीत्वेन नलुमतातस्मिन्निति न्यासे
पि वचनस्यावश्यकत्वादिति बोध्यं। तस्मिन्कार्यमिति। तस्मिन्परतस्तन्निमित्तकं तत्प्रकृतिभूतस्य यत्कार्यमित्यर्थः॥ ॥

कि तदित्युदाहरणं कृतात्र यदित्यस्योभयपक्षेप्यसिद्धेस्तत्परिहरति। अत्र यदित्यत्रेति॥ यदन्यस्येति प्रत्य
यजमित्येव सिद्धे लक्षणग्रहणसामर्थ्येन प्रत्ययनिमित्तकमेव न तु प्रत्ययाप्रत्ययस्यानिकमित्यर्था
दिति भावः युक्त्यंतरमप्याह। नहीति षष्ठ्यर्थस्योच्चारणरूपप्रसंगस्य वक्तुमशक्यत्वादिति भावः अ

अत्र यदित्यत्र स्वरो न भवति तद्धितस्यैव कितोंतोदात्तत्वविधानात् लुकि कृते कार्यिणोऽसत्त्वा
त्प्रत्ययलक्षणं हि यदन्यस्य कार्यं तत्प्रत्ययजोपेति भवति। न तु यत्प्रत्ययस्यैव कार्यं तदपि न
हि वसनाच्चसः कोर्थित्विंशक्यते प्रतिपादयितुं। तद्विशेषणमिति। विशेषण एवोपक्षीणत्वात्
कार्यं प्रतिनिमित्तभावो नास्तीत्यर्थः॥ ॥

त एव न स्वनिर्भिन्न इत्यादावेसादिकं न एवमसतः सत्तापि न वचनेन शक्येति बोध्यं परस्मैपदपरसादेरंग
त्वनिमित्तस्येट् इत्याद्यर्थेन दोष इत्याह। विशेषण एवेति एवं च लुप्तप्रत्ययनिमित्तकं तत्प्रकृतेस्तन्न कार्यमि
तिभावः॥ ॥

नन्वार्धधातुकइत्यादीनां विषयसप्तमीत्वात्पूर्वमेवातेषांप्रवृत्तेर्नप्रत्ययलक्षणापेक्षेत्यतआह। लुकेति। एवं
च विषयत्वज्ञानायावश्यंप्रत्ययलक्षणमाश्रयणीयं तच्चनलुमतातस्मिन्नितिन्यासेनप्राप्नोतीतिभावः। लुङः
परेच्चिणीति। लुङ्परार्द्धधातुके विषयेइत्यर्थइतिभावः॥भाष्ये। तच्चायीति नलुमतातस्मिन्नित्येतदित्यर्थः॥
लुप्तेप्रत्ययेयदंगमितिलुप्तप्रत्ययानिरूपितांगसंज्ञकस्ययत्कार्यमित्यर्थः उक्तामेत्यादौतुपरस्मैपदनिमित्ता

हनणिङादेशाइति। लुकालुङोविषयत्वापहाराद्विषयसप्तम्याश्रयणेप्यसिद्धिः। तद्विशेषणं
लुङ्ग्रहणमितिनलुङ्परेच्चिण्यादेशविधानं। नलुमतेति। अंगस्येत्यस्यस्वरितत्वात्प्रतिज्ञानात्तत्रलु
मतालुप्तेप्रत्ययेयदंगंतस्ययत्कार्यंप्रत्ययाश्रितमांगमनांगंवातन्नभवतीत्यर्थः। कर्त्तव्योत्रेति। सर्वशब्दार्थवचनंकर्त्तव्यं॥

गसंज्ञकस्यनकार्यंकिंतुशिदादिनिमित्तांगसंज्ञकस्येतिनदोषः संजिगमिषेत्यादौसनः कार्यंनांगसंज्ञकस्येति
नदोषः किंचपरस्मैपदग्रहणस्यतङानाभावोपलक्षणत्वापिनदोषः अगायीत्यादौतुनदोषः लुङ्निमित्तांग
त्ववतश्चिण्तस्यकार्याभावात्इतिबोध्यं॥भाष्ये। एवमपीति अंगाधिकारस्प्रतिप्रतिनिर्देशाभावेपीत्यर्थः। व ३२९
×३ संज्ञकस्यनकार्यंकिंतुशिदादिनिमित्तांगसंज्ञकस्येतिनदोषः× चनंकर्त्तव्यमितिसोवर्यः सप्तम्यस्तदंतेसप्तम्यइत्येतत्॥ ॥

अलोंत्यात्॥ ॥असंदेहार्थमिति अंत्यात्पूर्वोलित्येववदेदितिभावः अल्ग्रहणमंत्यनिर्देशइत्यनयोः सामानाधिकरण्यम
नुपपन्नमतआह। अभिधीयतेनेनेतिअल्ग्रहणमंत्यप्रत्यायकंचेदित्यर्थः घञजयाः पुंसीतिनिर्देशशब्दस्यपुंस्त्वंप्रा
प्तिपूर्वकत्वात्प्रतिषेधस्यप्राप्तिमाह। पूर्वस्येति। एकाजिति। यद्यप्यत्रसमुदायसंज्ञयानावयवानामनुग्रहस्तथापिक

अलोंत्यात्॥ ॥किमिदमिति। प्रथमापंचमीवेतिसंदेहात्प्रश्नः। एवमिति। प्रथमायामभिप्रेतायांअसंदेहार्थ
मलित्येकवचनंवक्तव्यंस्यात्। अंत्यादितिपंचमीसाहचर्याच्चालइत्यपिपंचम्यंतमितिभावः। अल्ग्रहणमि
ति। निर्दिश्यतेभिधीयते। नेनेतिनिर्देशः यद्यंतः प्रत्याय्यत इत्यर्थः। संघातप्रतिषेधइति। पूर्वस्याविशेषि
तत्वात्समुदायावयवसन्निधौचसमुदायस्यैवकार्यित्वादेकाचूद्विर्वचनइवेतिभावः अंत्यविशेषणा
त्वेवर्णनिर्देशोजातिग्रहेप्यलइत्युपादानसामर्थ्यात्संख्याविवक्ष्यते। यदिपुनरिति। अत्राप्यग्रह
णसामर्थ्यात्संख्याविवक्ष्यते पिवेरदन्तत्वप्रतिज्ञानाच्चलिंगादल्समुदायस्यसंज्ञित्वेगुणस्यप्रा
प्तिरेवनास्तिकिमदन्तत्वप्रतिज्ञानेन॥ ॥

दाचिदविशेषात्संघातस्यापिस्यादित्यनिष्टमात्रापादनेभाष्यतात्पर्यमितिबोध्यं। ननुसंज्ञिवदवधिरपिकस्मात्जातिग्रहणा
प्राप्तसमुदायोननिषिध्यते। तआह। अंत्येति। संख्याविवक्ष्यतइति। अनेकाव्यक्तिर्नगृह्यतइतिभावः संख्याविवक्षातुनदृष्टगोत
त्वादयुक्ता॥पिवेरदंतत्वेहिअल्समुदायस्यलघुत्वाभावादितिभावः सत्वंतुउरवादौचरितार्थंकेदाचिदिकारस्याप्युपधात्वेनाचिं
त्यमिदं॥ ॥

कै॰वि॰१
३३०

शब्दस्यहीति।एकाचधातुविषयमिदं अनेकाचस्तुप्रथमस्यैकाचोद्वित्वेनार्थवत्त्वशंकैवनेतिबोध्यं।एवंचोत्तरखंड एवा
र्थवानितिभावः।अव्यक्तानुकरणस्येति।अछब्दांतस्याव्यक्तानुकरणस्येत्यर्थेसंपूर्णस्यात् शब्दस्यपररूपानापत्तिरि
त्यतोवैयधिकरण्यमुक्तं अव्यक्तानुकरणायोछब्दइतितुनार्थः एकाचोनेतिनिषेधारंभादित्यलं।ननुविकल्पार्थंत

सूत्रंचेति।अलंत्यादितिपच्यमानइत्यर्थः।अंत्यविज्ञानादिति।उपधायाइतिषष्ठ्यंत्यमलंनीयतइत्य
र्थः।अनभ्यासविकारइति।अभ्यासोऽनर्थकः शब्दस्यह्यासतिनार्थस्य।अव्यक्तानुकरणस्येति।अ
व्यक्तानुकरणस्ययोऽछब्दस्तस्यैतौपररूपमितिसूत्रार्थः यदयमिति।वाम्रेडितस्येत्येववक्तव्यं
स्यात्।घ्वसोरिति।अनभ्यासविकारइतिप्रतिषेधोरूपवत्त्वादेशलोपस्तुनीरूपः तथाचयस्यशायां
लोपागमवर्णविकारज्ञइतिलोपविकारौनेदननिर्दिष्टौपुनर्लोपेति।लोपोपीत्यतोलोपग्रहणेऽ
नुवर्त्तमानइत्तिभावः।तत्रघ्वसोरेद्धावभ्यासस्यचेतिवक्तव्यं॥ ॥

दावश्यकमतआह।वाम्रेडितस्येइति।अंतस्यपूर्वेणनित्यपररूपेप्राप्तेइतिशेषः।सेदेननिर्दिशाविति।यद्यप्ये
कदेशविकृतस्येत्यादोलोपोपिविकारपदेनोच्यतेतथापिव्याख्यानादेवात्रेदृशार्थावगतिरितिबोध्यं।ननुलोपग्र
हणाभावेघ्वसोरेद्धावभ्यासस्येत्युक्तेचकाराभावादन्यवचनाच्चप्रकृतासंबंधेएवमेवस्यादतआह।तत्रघ्वसोरेदित्यादि॥ ३३०

DR. BHAU DAJI MEMORIAL
अध्यापक भाऊदाजीइत्याख्यस्यस्मारकम्

२२

ननुचेनानुवृत्तावपिलोपोभ्यासस्यैवेत्यत्रनियामकाभावात्पर्यायेणत्रयाणामप्येत्वलोपौस्यातामतआह।तत्र
व्याख्यानादितिआगतूनामंतेतिवेशेनाभ्यासस्यलोपसंनिहितत्वादितिभावः।नन्वभ्यासपदोत्तरश्चकारस्थान
तरमेवसमुच्चिनुयात्।नविधेयांतरमितिएवमभ्यासस्यापिस्यादतःपरिहारांतमाह।योगविभागोवेति।अत्रेतिन
त्वित्वमित्यर्थः योगविभागसामर्थ्यादितिभावः।सर्वापहारेति।लोपएवनाविशेषःकस्यचिदित्यर्थादितिभावः न
नुलोपश्शब्दस्यासंज्ञात्वेनानर्थक्यात्सुरेवनस्यात् उत्पत्तोवाहखङ्गादिलोपाद्विशाकारकइत्यनुपपन्नमत

तत्रव्याख्यानादभ्यासस्यलोपएवभविष्यति।नत्वेत्वंयोगविभागोवाकरिष्यते।घ्वसोरेद्धौततोभ्यासस्यचे
ति अत्रलोपोऽनुवर्त्तिष्यते।तत्रपुनर्लोपवचनात्सर्वापहारार्थादलोंत्यस्येतिबाध्यते।द्विशाकारोनिर्देशइति।लो
पशब्दात्कृदंतात्संज्ञिनार्थेनार्थवत्वाद्विसक्तौकृतायांशाकारः प्रतिनिर्दिश्यते तस्यचेत् संज्ञायांसत्यांसर्वादे
शोलोपोभवति इत्संज्ञोपदेशेप्रवर्त्ततेतत्कार्यंतुप्रयोगइत्येषसिद्धांतः॥ ॥

आह।लोपशब्दादितिपदस्यसंयोगांतत्वाभावादसंदेहायस्वइत्लांजसीशीत्यत्रजसत्त्ववत्संयोगांतलोपसंयो
गादिलोपौनेतिबोध्यं।इत्संज्ञेति।धातुप्रातिपदिकप्रत्ययनिपातागमादेशानांहलंत्यमितीत्संज्ञायामपिनदोषःश
स्यस्वरूपेणार्थवत्तयाप्रातिपदिकत्वात्।कुडिनचइवउपदेशाइतितुतत्रत्रनानुवर्त्ततइतितत्रभाष्येस्पष्टं।उपदे
शएवेतिअंतरंगत्वादितिभावः एतेनलोपविधानकालेशत्वाभावात्कथंसर्वादेशइत्यपास्तं।कार्यंत्विति।अने
कालशिदित्यादौसमीपेप्यवयवत्वारोपेणनदोषइतिभावः एकांताअनुबंधाइतिमुख्यपक्षेतुआद्यमेवसमाधानमितिबोध्यं॥

कै०वि०१ ३३१ भाष्ये। न्यथाव्याख्यायतइति। ननुतन्त्रत्याख्यायतत्स्यानेवचनांतरंपठितमितिसूत्रमितव्यमितिभावः।इत्थं
नरस्येति।एवंचतेनदलोपेआभ्यामित्यस्तिद्धिरितिभावः ननुमस्यानित्यदाद्यत्वेनव्यवधानान्नानोहलादिवि

तिष्ठतिसूत्रमिति।लक्ष्यलक्षणभावस्याविवक्षितत्वात्तिष्ठत्सूत्रमितिनकृतं।तत्रायमर्थस्तिष्ठ
तिसूत्रंनप्रत्याख्यायतेतत्तुअन्यथाव्याख्यायते।तत्रनचीत्यनेनहलीत्यस्यार्थआख्यातः।आ
प्यकइत्यनुवृत्तिर्दर्शिता।अनएवेति।अनाप्यकइतिसामान्येनानोदेशंविधायहलादौतुतस्यै
वलोपोविधास्यतइत्यर्थः।येननाव्यवधानमितित्यदाद्यत्वेनव्यवधानमाश्रीयते।अत्रग्रहण
सामर्थ्यादिति।भीमादीनामेवसिद्धेत्रग्रहणादयमर्थआश्रीयतेयोऽभ्यासत्वेननिर्ज्ञातस्तस्य
समग्रस्यलोपःनत्वलोंत्यस्येति॥ ॥छ॥ ॥

सक्तिपरतेत्यतआह।येननेति।आप्परत्वेनेदमोविशेषणाच्चेत्यपिबोध्यं॥इदमिदोलोपइत्यर्थेप्यावश्य
कंएवंचनलोपेरयोरकारयोःपररूपेसुपिचेतिदीर्घेसिद्धमाभ्यामिति।अत्रग्रहणादिति।अत्रशब्दे ३३१
नःपुनःसनःपरामर्शात्सनियोभ्यासत्वाक्रांतस्तस्यसर्वस्यलोपइत्यर्थस्तावः॥ ॥छ॥ ॥

भाष्ये।विषयमपेक्षिष्यामहइतिमुचोकर्मकस्यगुणइत्यनुवर्त्तनीयं।यत्रमुचोकर्मकस्यगुणस्तत्राभ्यास
स्यलोपइत्यर्थः।अकर्मकग्रहणमात्रानुवृत्तौतुमुमुक्षतेवत्सः स्वयमेवेत्यत्रापिस्यादितिभावः।विभाषाप्स
वदितिवार्त्तिकेपिवस्येत्येवसिद्धेः।वस्येतितत्रावारणसामर्थ्यात् अलोंत्यस्येतिनप्रवर्त्ततेइतिप्रत्याख्यातायं

यथाजातीयकोंत्यइति।एतच्चब्रुवतापंचमीपक्षएवाश्रितःषष्ठी।प्रथमयोरपिनदोषः
षष्ठीपक्षेनिर्धारणेषष्ठीनिर्धारणंचतुल्यजातीयस्यभवतीत्यलांमध्येयोंत्योऽलतस्मा
त्पूर्वउपधासंज्ञइत्यलेवोक्तन्यायात्प्रतीयतेप्रथमाबहुवचनपक्षेपि।अयमर्थः।अंत्यात्पूर्वोऽ
लुपधासंज्ञेति।अलइतिजातौबहुवचनं।अवधिमत्तुल्यजातीयश्चावधिरितिअलः।अंत्यादितिविज्ञायते॥

रित्नाषाएवंचअंत्यविज्ञानात्सिद्धमित्यस्यस्थितत्वाद्वार्त्तिकेवाशब्दप्रयोगस्तदाह।अथवाव्यक्तमेवेति।एतच्चेति।अ
वधिनावधिमतोनिर्णयंब्रुवतेत्यर्थः।संयोगोपधेत्यादिव्यवहारस्तुगौणइतिभावः।षष्ठीप्रथमयोरपीति।दृष्टांतेमीमांसाब्रा
ह्मणानामित्युपाददताभगवतासूचितमिदं।उक्तान्यायादितिभाष्योक्तादित्यर्थः।जातौबहुवचनमिति।भा
ष्यकृताजात्याख्यापामितिसूत्रप्रत्याख्यानादिदंचिंत्यं॥

तस्मिन्निति। निर्दिष्टे पूर्वस्य॥ ॥ स्वरूपपदार्थकत्वेनेति। स्वरूपस्य तत्र विशेष्यत्वादिति भावः। प्रश्न इति। तस्मिन
णि चेत्यत्रैव वोतान्यत्रापीति प्रश्न इति भावः। तत्रैव पूर्वेति। ननु तस्मान्नुड् चि। तस्मान्नुड् द्विहलः तस्माच्छस इ
ति सूत्रत्रये उत्तरग्रहणे विपरीतं गौरवमिति चेन्न। यतो द्विहलो नुड्विधायके नास्योपयोगः तत्रांगाधिकारेणालि
एन मित्रांगवाधिदीर्घात्पूर्वस्य प्रत्यासत्यात्तदंगसंबंधिनो ऽसंभवेन फलाभावात्। एवं तस्मान्नुड्चीत्यत्रापि

तस्मिन्निति॥ ॥ किमुदाहरिष्यामि तिङ् इतिकरणस्य गौरीत्ययमाहेत्यादौ स्वरूपपदार्थकत्वेन व्यवस्थापकत्वदर्श
नात्प्रश्नः। दध्यत्रेति। यदि तस्मिन्निणि चेति तस्माच्छस इति चात्रैवेति परिभाषेयं पाश्चात्येतां तत्रैव पूर्वग्रहणं
उत्तरग्रहणं वा करिष्येतामिति भावः। अत्र व्यवच्छेद्यमस्ति यौष्माकीणः अस्मत्पदे हि आस्माकीनः युष्मत्पदीय
तामिति खञः परयोर्युष्मदस्मदोरादेशो न भवतः वृक्षानित्यत्र पूर्वसवर्णदीर्घे कृते तात्छसः पूर्वस्य षकारस्य
नत्वं न भवति। अथ शस इति षष्ठीति व्याख्यानात् षकारस्य न भवतीत्युच्यते। एवमप्युज्झरतः आनुपलभत
इत्यादौ पूर्वसवर्णदीर्घात्। पूर्वस्य शसो नत्वं व्यवच्छेद्यमेव॥ ॥छ॥ ॥

न दोषः उत्तरपदाधिकारेण प्रत्यासत्यानजरूपपूर्वपदनिरूपितोत्तरपदस्यैव तेन नुड्विधानात् इति भावः। तस्मिन्नि
ति परामृष्टखञ व्यवधानाय स्युष्यतमुदाहरति। यौष्माकीणेति। षकारस्येति। तस्मादित्येतत्साहचर्याच्छस इति पंचमी। ३३२
शसा च सामानाधिकरण्यं शास्तु वयवे लक्षणायेति भावः। मुख्यार्थसमानाधिकरण्यासंभवात् स्थान्याकांक्षासत्वा
च्च भवयवषष्ठीत्याशंकते। अथेति। शस इति स्थानषष्ठीत्येव पाठः। आदित्यशब्दस्य शसि रूपं॥ ॥छ॥ ॥

इतिकरणादिति। लोके व्यर्थप्रधानस्य पदार्थविपर्यासकेति नाशब्दप्रधानत्वदर्शनादिति भावः। नन्वेका
र्थक प्रत्ययद्वयोपादानं व्यर्थमत आह। थालेति। एवं च शब्देनेत्यनेन सामानाधिकरण्यानुपपत्तेर्जातीयास्तु त्रि
त इतिस्वभावादिति भावः। नन्वेवंजातीय एव प्रयुज्यतां। किं थालेत्यत आह। लौकिके इति। उभयोः प्रका
रवृत्ति

अन्यथाजातीयकेनेति। इतिकरणात्स्वरूपग्रहणे नैव भाव्यमिति भावः। थाला प्रकारमात्रमभि
धीयत इति तद्वतो ऽभिधानाय जातीयर्प्रत्ययः। लौकिके प्रयोगे लाघवानादरप्रदर्शनाय
प्रत्ययद्वयप्रयोगः केवलेन जातीयरा प्रकारवान् गम्यत एव। इदंवार्या इति सिद्धांतवादी इतिक
रणो ऽत्रार्थनिर्देशार्थ एव स्वरूपमिति वचनात्स्वरूपग्रहणे प्राप्ते। सर्वनाम्नाऽयमिति। सूत्रां
तरोपात्तस्य तस्मिन्नित्यस्य तस्मादित्यस्य च नैतदनुकरणं किं तर्हि सर्वनाम्ना निर्देश इत्यर्थः॥

रवद्वृत्तित्वेप्येवं वक्तुं शक्यमिति उक्तं च यत्नो रथा अत एव कस्य प्रयोग इति चिंत्यं। ननु दूषितस्य कथमुदाहर
णत्वेनादानमत आह। सिद्धांतेति। अर्थनिर्देशार्थ एवेति अन्यथा तस्मिन्निति शब्दे अचीत्यादिशब्दे
षु वा ऽव्यवहितेषु इत्यर्थः स्यादिति भावः। नैतदनुकरणमिति। प्रागुक्तयुक्तेरिति भावः॥ ॥

कै॰वि॰१ सर्वनाम्नेति। सप्तम्यंतार्थक सर्वनाम्नेत्यर्थः सप्तमीत्वस्य सप्तम्यंतार्थकत्वबोधनायानुवादिकेति भावः इति शब्द ल
३३३ न्यमर्थमाह। यत्र सप्तम्यर्थेति सप्तम्यर्थाबोधइत्यर्थः अत एव तस्मान्नुडचीत्यादौ न प्रवृत्तिः अचिइत्यस्य षष्ठ्यर्थत्वादि
तिभावः सप्तमीपंचम्यर्थाविधिकरणावधी। अयं पक्षोपस्थिति पक्षोपोदर्शितः पक्षांतरेपि सप्तम्यंतार्थऽव्यव
हितेसतीत्यर्थोबोध्यः न्नाप्य। सामान्यवाचीति बुद्धिस्थत्वेनैव तदादीनां बोधकतेति भावः। सामान्यं। अनिर्द्धारित
विशेष। तस्मिन्नणि चेत्यादेरपि सप्तमीपंचमी विशेषत्वादित्याशयः सामान्यस्य बुद्धिस्थत्वस्य सर्वविशेषेषुन्ना

एतेनयत्र सप्तम्यर्थनिर्देशः पंचम्यर्थनिर्देशश्च तत्रोभयोरुपस्थानं। विशेषा अपीति अपिः संभावनायां
नसमुच्चयेन हि विशेषपरित्यागेनेह शास्त्रे सामान्यमस्ति यदुदाहरणं स्यात्। तस्मात्सर्वविशेषाइतोदा
हरणमित्यर्थः। सामान्यस्य सर्वविशेषेषुन्नावात्। किंपुनरिति। सामान्यविशेषन्नावस्यानवस्थोना
त्प्रश्नः कदाचिदूराद्गोत्वमात्रग्रहणं पश्चात्खल्लादिविशेषावगमः। कदाचित्पूर्वंखल्लादेर्ग्रहणं पश्चाद्गोत्वादेः॥

वात् सत्वादित्यर्थः उक्तमर्थमजानानस्य चोद्यमित्यभिप्रायेणाह। सामान्येति। तास्मिनितीत्यस्य तस्मिन्नणि
चेत्यादिकं विशेषः तस्यापि खत्रादिनिरूपित सामान्यत्वादिति अचीत्यस्याप्यकाराद्यपेक्षया सामान्यत्वादि
ति च प्रश्न इत्यपि बोध्यं। ननु कथमव्यवस्थितिः पूर्वावगतं सामान्यं पश्चादवगतो विशेष इति व्यवस्थासंभवादि ३३३
त आह। कदाचिदिति। परिछेद्य परिछेदकभावो ऽनियत इत्यर्थः। एवं प्रकृतेप्यचीत्यादीनां बुद्धिस्थ
त्वेन परिछेदाद्बुद्धिस्थस्यापि तैः परिछेदादनिर्णय इति भावः॥ ॥छ॥ ॥ ॥

विशेष्यं प्रधानमिति परिछेद्यमित्यर्थः परोपकारितया परिछेदकत्वेन एवं प्रकृतेपि तस्मिन्नित्यर्थस्य परिछेद्य
त्वेन विवक्षणात्सामान्यं विशेषभावमुपपाद्य द्वितीयविधयाकृतं प्रश्नं समाधातुं योगपद्येनापितमुपपादयि
तुमाह। सा X त्वमचीत्यादीनां परिछेदकत्वविवक्षणाद्विशेषत्वमिति भावः तदाह। इहापीति अयं भावः सप्तम्यंतार्थ
इत्युक्ते कस्मिन्नित्याकांक्षोदयात् अचि इत्याद्यर्थस्य परिछेदकत्वाद्विशेषत्वमेवेति तदेवं पर्यायेण सामान्य X ष्ये। पितेन्या

गोः सामान्यमिति। यद्विशेष्यं प्रधानं तत्सामान्यं यत्तु विशेषणत्वेन परोपकारितया निर्द्दिश्यते स
विशेष इति। तात्पर्यं इहापि तस्मिन्नित्यनेन सप्तम्यर्थमात्रं सामान्यं निर्दिष्टं अचिहलीत्यादयस्तु
विशेषाः॥ पितापुत्रवदिति। जन्यजनकशक्तिद्वययोगवदेकस्यैव विशेषणविशेष्यशक्ति
द्वययोगात्। कदाचित्काचित्। शक्तिराश्रीयते॥

दि। यथा पराशरात्मजं वंदे शुकतातं तयोनिधिमित्यत्र तथा राजपुरुषाश्च इत्यत्र पुरुषो राजापे
क्षया विशेष्यः अश्वापेक्षया विशेषणं एवं प्रकृते खत्रादिनिरूपित सामान्यस्यापि तस्मि
न्नणि चेत्यस्य तस्मिन्नितीत्येतत्प्रति विशेषत्वमिति भावः॥ ॥छ॥ ॥ ॥

इत्याहेति। इत्यत आहेत्यर्थः। निर्देशप्रयोजनानामिति। बोधप्रयोजनकानां शब्दानां मध्ये इत्यर्थः बहुवचनविस
ज्योपपदत्वादाह। भाष्यकारेति। परंतु नैर्देशिकानां मध्ये न्येऽस्य शब्दस्य इत्यध्याहृत्य विभज्योपपदे त्रतरप्
अत एव न खल्वपि बहूनां प्रकर्षे तमपा भवितव्यमिति तरप्सूत्रस्थ भाष्येणाविरोध इत्याहुः। सप्तमीशब्देनेति।

सप्तमीनिर्दिष्टे पूर्वस्येत्येव कस्मान्नोच्यत इत्याह। एते खल्वपीति। नैर्देशिकानां निर्देशप्रयोजनानां
मध्ये वार्त्ततरकायुक्ततरका इत्यर्थः भाष्यकारवचनप्रामाण्यादन्नतरप् प्रत्ययः तमपा द्यत्र भा
व्यं। एतेर्हीति। यदि हि सप्तमीनिर्दिष्ट इत्युच्येत तदा सप्तमीशब्देन यो निर्दिष्ट इति प्रतीयेतेति
भावः किमर्थमिति। किमर्थमुपसर्गयुक्तस्य धातोर्निर्देशः। क्रियते तस्मिन्निति पूर्वस्येति कस्मा
न्नोच्यत इति प्रश्नः न पुनर्दिष्ट इत्येवोच्यतामिति प्रश्नः केवलस्य दिशेर्नार्थत्वादिहानुपयोगात्॥

तथा च सप्तम्यां जिनेर्ड इत्यादावेवेदमुपतिष्ठतेति भावः किं च यत्र सप्तम्यंत निर्देश इत्यर्थे नेड्वशिकृतीत्यादौ दोषः तत्र
कृतीति सप्तमीनिर्देशसत्वात् परंतु स्यर्थे स इति भावः सप्तमीति निर्दिष्ट इति सूत्रकरणेपि तदर्थं इत्यादिनिर्देश इत्यर्थे स एव
दोषः यथाश्रुतमेव कस्मान्न गृह्यत इत्यत आह। न पुनरिति। अत एव किमर्थमुपसर्गनिर्देशेन दिष्ट इत्येवोच्येतेति नोक्तम्॥ ३३४

अंतरेणापीति साकांक्षतयोच्चारित इति पदाध्याहारादिति भावः। पुनर्निर्दिष्टेति। एवं च सप्तम्यंतार्थबहिर्भूते उपश्लि
ष्टस्य पूर्वस्येत्यर्थः बहिर्भावस्य चावध्यपेक्षत्वादवधेश्च सूत्रोपात्तस्यैव गृहीतुमुचितत्वेन तस्य च शब्दात्मकत्वा
दवधिमानपि शब्द एवेति शब्दे सप्तमीनिर्दिष्टे पूर्वस्येति लभ्यत इति भावः ननु प्रत्ययस्यार्थेन पौर्वापर्यासंभ
वात् कथं जनपदे इत्यत्रास्योपस्थानमत आह। तत्रायमर्थः स्यादिति लक्षणा स्यादिति भावः निर्दिष्टग्र
शब्द इति। अंतरेणापि निर्दिष्टग्रहणं तस्मिन्निति पूर्वस्योत्पत्तिवनिर्दिष्टत्वे लब्धे पुननिर्दिष्टशब्द उपादीयमा
नो बहिर्भावं गमयति शब्दाच्च बहिर्भूतः शब्द एव भवतीति। जनपद इति। तत्रायमर्थः। स्याज्जनपद
वाचिनि शब्दे परतः श्वातुरर्थिकस्य लुप् भवतीति। अयेति न तु प्रयोजनस्योक्तत्वात्पुनः प्रश्नानुपपत्तिः
अयं भावः जनपदे लुवित्यत्रार्थेन पौर्वापर्याभावाज्जनपदेयः प्रत्ययनुत्पन्नस्तस्य लुब् भवतीति तथाभिप्राय
नेवर्त्तमानात मवादय इति अर्थनिर्देशेषु पस्थानं भविष्यति। यदि चैतत्प्रयोजनं तदा तस्मिन्निति शब्दे पू
र्वस्येति वक्तव्य॥ ॥
हणे तु यत्र मुख्यया वृत्त्या शब्दतात्पर्यको निर्देशस्तत्रास्योपस्थानमिति न दोष इति तात्पर्य। अर्थेन पौर्वेति। तथा
चैकशब्द लक्षणायां च न मानमिति भावः। तत्रार्थनिर्देशे च व्याख्यानमेवं चार्थ किमर्थमित्यादि पूर्वपक्षास्ति
कातावेकदेशिनो रिति बोध्यं। किं चार्थनिर्देशे जनपदेयः प्रत्यय इत्यन्वये नियमप्रसंगाभावोन्नियमफलाप
रिभाषा नोपतिष्ठते इत्यपि बोध्यं भाष्ये॥ आनंतर्यमात्रे इति न तु व्यवधाने इत्यर्थः॥ ॥छ॥ ॥ ॥

कै॰वि॰१ ३३५

ननु संहितायामिति। निमित्तस्यानिनोरन्येनाव्यवधानं संहितेतिभावः। उपश्लिष्ट इति। उपसमीपे श्लिष्टोत्यंतसमीप इतिहि
तदर्थः। नैष दोष इति। वर्णभूयस्त्वकालाभाव: संहितेतिभाव:। तत्सप्तमीति। औपश्लेषिकाधिकरणत्वस्याव्यवहितेवाधात्स
तात्वव्यवहितेपीतिभावः एवं चानिर्दिष्टग्रहणमौपश्लेषिकाधिकरणसप्तम्यंतात्पर्यग्राहकमितितात्पर्यं। वस्तुतउपश्ले
षोप्यल्पव्यवहितेस्त्येव किंचित्दूरस्थितेपिवृक्षमूलेतिष्ठतीति कटव्यवधानेपि गुरौ शेते इति च व्यवहारात्।

निर्दिष्टग्रहणमिति। पूर्वोक्तप्रयोजनाभावादितिभावः निःशब्दस्य नैरंतर्ये वर्त्ततोदिशिश्वोच्चारणक्रियः तेनानिरंतरो
च्चारितेकार्यमितिलभ्यते। सन्निधाविति। ननु संहितायामित्युच्यते न च व्यवहितयोः संहितास्ति। अचीति चाधिक
रणमौपश्लेषिकं निर्दिष्टं न च व्यवहितमुपश्लिष्टं भवति। नैष दोषः। वर्णानां परः सन्निकर्षः संहिता सा चा
न्नास्ति अचीति सत्सप्तमी विज्ञायते व्यवहितेपि पूर्वशब्दो वर्त्तत इति यन्न विषये यथान्तरतकं संभवति।
अनंतरो वाव्यवहितो वा तत्र तथा स्यात् तस्यैव यणादेशः स्यात्॥

ननु व्यवहिते इकोचः पूर्वत्वाभावेनाप्राप्तेनिर्दिष्टग्रहणं व्यर्थमत आह। व्यवहितेपीति। मथुरायाः पू ३३५
र्वं पाटलिपुत्रमित्यादिव्यवहारादितिभावः। यत्रविषय इति। लक्ष्यभेदेन लक्षणभेद इतिभावः वस्तुतः सं
हिताधिकारो न कर्त्तव्य इत्युपन्निधायमिदं भाष्यं संहिताधिकारप्रत्याख्यानं च तत्सूत्रे भाष्ये स्पष्टं॥ ॥

२९

किमुदाहरणमित्यादिना सूत्रप्रयोजनस्योक्तत्वात्प्रश्नानुपपत्तिरत आह। किंनियमार्थमित्यादि। ननु पूर्वोत्तरयो
र्योगयोरिति भाष्यदर्शनेन पूर्वोत्तरयोरित्यस्य योगसमानाधिकरणत्वात्सापेक्षस्यासमर्थत्वेन योगाविशेष इति स
मासो न स्यादत आह। कर्मणि षष्ठीति। क्रियायाः कारकांशे नित्यसापेक्षत्वेनाविरुद्धः समास इतिभावः पूर्वोत्त
रयोर्योगयोरितितुफलितार्थकथनं। अच्युपश्लिष्टस्येति। औपश्लेषिकेधिकरणे सप्तमीतिभावः आद्यसूत्रे

किमर्थमिति। किंनियमार्थमथ षष्ठीप्रक्लृप्त्यर्थमितिप्रश्नः। पूर्वोत्तरयोरिति। कर्मणि षष्ठी योगः संबंधः
तदयमर्थः अच्युपश्लिष्टस्येकोयणाभाव्यं यथा च परस्मिन् पूर्व उपश्लिष्टः एवं पूर्वस्मिन्नपि परः तिङ्इति
ङत्यत्रापि यथा तिङ्न्तात्परं तिङ्न्तं भवति एवं पूर्वमपि। तत्र षष्ठीप्रक्लृप्तिपक्षे षष्ठ्यनुवर्त्तयितव्या गौ
रवप्रसंगान्नियमार्थमित्युक्तं। योगयोरिति। युज्येते इति कर्मणि घञ् अचीति सत्सप्तमीपक्षे नियमप्रसंगः॥

दाहरणं दध्युदेति द्वितीयसूत्रोदाहरणं पचत्विति ननु नियमपक्षात् षष्ठीप्रक्लृप्तिपक्षः प्रशस्तो नुवाददोषा
भावादत आह। तत्र षष्ठीति। भाष्ये योगयोरिति द्विवचनोपपत्तये आह। कर्मणीति। पूज्यमानयोः पूर्वपरयो
रविशेषात् संबंधाविशेषादित्यर्थः वस्तुतस्तु व्यधिकरणे षष्ठ्यौ प्रतियोगित्वेन संबंधि[illegible]द्वित्वाद्द्विव
चननिर्देश इति बोध्यं। सत्सप्तमीपक्षेपीति। अयस्य च भावेनेति सप्तमीतिभावः॥ ॥३॥ ॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

कै॰वि॰१
३३६

इदं चिंत्यमित्याहोपपदविभक्तेरिति कारकविभक्तित्वं च कारकाधिकारपठितसंज्ञानिमित्तकविभक्तित्वं। एत
च्च तत्र चरीयतृ इति सूत्रे कैयटे स्पष्टं। ननु दिग्योगे तिसस्त्तसप्तम्या अप्युपलक्षणमिदं। एतच्चप्राप्नलोपइत्यत्र नि
रूपयिष्यामः पर्यायस्यैवापादने बीजमाह। न हि युगपदिति स्थानित्वे हि कार्यित्वेन प्राधान्यं निवर्त्यत्वं च निमित्तत्वे च

अचिपूर्वस्येति। उपपदविभक्तेः कारकविभक्तिर्बलीयसीति न्यायादधिकरणसप्तमीकृता ननु दिग्योगल
क्षणपंचमी। तत्र दध्युदकमित्यादौ पर्यायप्रसंगः। न हि युगपदेकस्य स्थानित्वं निमित्तत्वं चोपपद्यते इ
ति नियमार्थं वचनं पूर्वस्यैवानंतरस्यैव भवतीति। इदं चानेन क्रियते परनिवृत्तिर्व्यवहितनिवृत्तिश्च। संदेह
स्तूपक्रममात्र तथात्पन्यस्तः न हि संदेहाद्लक्षणमिति न्यायात्। पर्यायप्रसंगात्। अथ यत्रेति। यथा बे
हो लोप इत्यत्र युगपच्चैकस्य कार्यित्वानिमित्तत्वासंभवात्प्रश्नः। विप्रतिषेधादिति। सूत्रपाठापेक्षया पर
स्य व्यवस्थापकत्वमित्यर्थः॥ ॥

पारार्थ्येन गुणत्वं सत्वं च तच्चोभयमेकदा एकस्य विरुद्धमिति भावः। ननु संदेह इति भाष्योक्त्या शास्त्रस्य मूकत्व
मित्याशंक्याह। संदेहस्त्विति ननु कार्यकालत्वात्परिभाषयोः पौर्वापर्याभावात्कथं विप्रतिषेधोत आह। सूत्रपाठे ३३६
ति अत एवाग्रे ङमो ह्रस्वादिति त्रिपादिकमुदाहरणं संगच्छते तत्र हि कार्यकालपक्षाश्रयेणैव परिभाषाप्रवृत्तिरिति बोध्यं

विभक्तिविशेषनिर्देशस्यानवकाशत्वादिति इदमुदाहरिष्यमाणोदाहरणविशेषापेक्षं। अत एवाग्रे इः सिध्युडित्य
त्र द्वयोरनवकाशत्वेपि न क्षतिः भाष्ये वक्ष्यति। तास्यादिस्य इति तास्यनुदात्तेन्ङिदि सूत्रे अस्यस्तासिजर्थ इति अन्य
स्तानामादिः आदिस्सिच इति सूत्रयोर्जसार्वधातुक इति सप्तम्या नानुवृत्तिस्सिद्धये इत्यर्थः ननु भाष्ये सर्वनामस्थान

किंप्रयोजनमिति। विभक्तिविशेषनिर्देशानवकाशत्वात् वक्ष्यमाणोऽभिप्रायः। संदेह इति संदेहाच्च प
र्यायप्रसंगः। इष्टमेयः स्विति। तदा वकृशब्दस्य लोपप्रसक्तावपि पर्यायेण स्यातां। गोतो णिदिति। यदि गोश
ब्दस्य स्यात् तदा तिष्ठति गौरित्यत्र वचनसामर्थ्यादनंगस्यापि वृद्धिः स्यात्। ङमो ह्रस्वादिति। ङमो
ङमुडागमे सति कुर्वन्नास्ते इत्यत्र णत्वप्रसंगः पदस्य चैकोनकारो नो न तु द्वाविति णत्वप्रतिषेधो नास्ति॥

स्य गोत इति षष्ठीदर्शनात् गो इत्यनेनान्वयो नस्यादत आह। णित्त्वमिति भावप्रधानो निर्देश इति भावः। गोतो
णित्वे को दोषस्तत्राह। तिष्ठतीत्यादि। पदस्य चैक इति व्यक्तिपक्षे इदं व्यक्तिपक्षेप्येवंविधप्रयोगसाधनायैवं व्या
ख्यानमिति भावः यद्वा तशब्दस्यावयववाचित्वेनैतद्विषये जातिग्रहणं संभवत्येवेत्याहुः॥ ॥छ॥ ॥

उःस्थिधुङित्यादावुभयोरप्यनवकाशत्वादाह। पूर्वौपात्तेष्विति। वहोरितिपंचमीअचरितार्थाअत एवेत्यादिषु षष्ठी। अत एव भूस्च वहोरितिरूपकाति दीर्घश्चरितार्थः गोतद्द्रत्यादौ सर्वनामस्थानेइति सप्तमी पूर्वत्र चरितार्था गोशब्दस्याणित्ववैयर्थ्यं च तिष्ठति गोरित्यत्र गोशब्दं प्रतितिष्ठतेरनंगत्वान्न दोषः रुदादिभ्यः सार्वधातुक इतिलिङः सलोपइत्यादौ चरितार्थं। तत्र हि सार्वधातुके विद्यमानस्य सस्य लोपइत्यर्थः आमिसर्वनाम्न इत्यामीति त्रेस्त्रयइत्यत्र सावकाशं ङमइति सूत्रे ऽचीतिमयइञ इति सूत्रे चरितार्थं। भाष्ये। पंचमीनिर्देशोभविष्यतीत्यधबलवत्त्वार्थ एव भविष्यतीत्यर्थः सप्तमीतु षष्ठ्यर्थ इति भावः भाष्ये एकदेशी

विप्रत्तीति। पूर्वोपात्तेषु सप्तमीनिर्देशस्य कचित्पूर्वार्थत्वात् कचिदुत्तरार्थत्वात्सावकाशत्वम्। पंचमी तु निरवकाशेति परस्यकार्यित्वं बोधयिष्यतीतिभावः। यथार्थं चेति। यथाविषयमित्यर्थः प्रदेशेषु कार्यिणःषष्ठ्यैव निर्देष्टव्या॥

प्रौढ्याह। यथार्थं चेति तत्र अर्थशब्दो न प्रयोजनादि वाचीत्याह। यथाविषयमिति। प्रदेशेष्विति। प्रागुक्तेष्वित्यर्थः भाष्ये। पूर्वस्य षष्ठीति पूर्वबोधकपदस्य षष्ठ्यंतस्योच्चारणं कार्यमित्यर्थः एवं चोभयोच्चारणे गौरवमित्येकदेश्युक्तिरियं॥ तत्र तत्र सप्तम्यंत षष्ठ्यंतयोर्द्वयोः पाठे गौरवं मत्वेतर एकदेशीआह। सतर्हीति। एकदेशी प्रौढ्यैवाह। न कर्तव्य अनेनैवेति षष्ठी पदावृत्तिगौरवादयमेकदेशी उभयोः प्रकल्पकत्ववारणाय परत्वानवकाशत्वे चावश्यके। इति चान्निर्दिष्टपूर्वस्य षष्ठीति। पूर्वस्य कार्यित्वप्रतिपादनयोग्या षष्ठी तद्बोधकपदे भवतीत्यर्थः एवमुत्तरस्येत्यपि॥ ॥ ३३७

नहीति। आवृत्तिप्रसंगादितिभावः इतर एकदेशी। उपदेशादितिहलंत्यमित्यत्रानुवर्त्तनदूमत्वाह। इत्संज्ञेति तद्व्याचष्टे। उपदेशाभावादिति। स्थानेंतरतमपरिभाषया नुमीयमानत्वे नादेशस्योच्चारणाभावादित्यर्थः। न

प्रकल्पकमिति चेदिति। यत्र षष्ठी नास्ति तत्र तस्याः प्रक्लृप्तिः क्रियते यत्र तु स्यस्ति इकोयणचीत्यादौ तत्रानेन नियमो न क्रियते न हि व्यापारद्वयमुपपद्यते येन षष्ठी प्रक्लृप्तिः तस्य नियमश्चेति भावः। इत्संज्ञेति। आदेशस्योपदेशनाभावात्तस्येत्संज्ञा न सिध्यतीत्यर्थः स्थानेचोत्पत्तिकाल एव निवृत्त्यभिमुखतयाप्रतिपन्न इतिस्थानित्यपीत्संज्ञानास्ति॥ ॥

नुस्थानिन्येव तस्याः प्रवृत्तेरनुमीयमानादेशो निरनुबंधक एवेत्यत आह। स्थानी चेति। यदा धातोः प्रत्ययस्तदानीमेवादेशो भवेदिति नेत्संज्ञाद्धि प्रतीक्षते। यत्र कार्यं तत्रेत्संज्ञेति प्रयोगे एवेत्संज्ञेत्यभिमानः एकदेश्युक्तित्वादत्र नान्यं तन्निर्जरः कार्यइतिबोध्यं॥ ॥

कै०वि०१
३३८

ततश्चेतिपूर्वस्यजायमाणोयणपिपूर्वएवेतितत्रापिषष्ठीकल्पननिमित्तिभावः। विरोधाभावादितिस्थानि
भेदादित्यर्थः अतएवविप्रतिषेधाप्रवृत्तिः यद्यपिकार्यित्वनिमित्तत्वेयुगपद्विरुद्धेतथाप्येकदेशयुक्तित्वान्ना
न्यतनिर्धारः कार्यइतिबोध्यं। एवमग्रेपिबोध्यं। यत्रत्वस्तीति। तस्मिन्नितीत्यस्यबहुविषयत्वलाभायविषयसे

यणितिप्रथमायाइति। ततश्चेकः स्थानेयणन्भस्यतेइकोप्यन्यआदेशः स्याद्यणोप्यन्यइत्य
निमतास्थान्यादेशभावव्यवस्थानस्यात्। उभयकार्यप्रसंगइति। विरोधाभावाद्यौगपद्येनो
भयोः कार्यप्राप्नोति। माभूदनियमइति। षष्ठीप्रकॢप्त्यैवतत्फलस्यलब्धत्वादितिभावः।
यत्रषष्ठीनास्तितत्रासौप्रकल्प्यतेयत्रस्वस्तीकोयणचीतितत्रापिपूर्वस्यैवषष्ठीनपरस्येतिप्रकल्प्यते॥१॥

देनभेदात्क्वचित्पूर्वस्यषष्ठीतिविधिपरंक्वचिन्नियमपरमित्यर्थः सूत्रएवेतिषष्ठीप्रकॢप्तेः प्रागेवपरत्वादंतरंगत्वाच्च ३३८
उपदेशोत्तरकालस्तत्रएवेत्संज्ञाकार्यप्रयोगएवेतिभावः एवंचनिरनुबंधप्रत्ययत्वेनविधानात्तदादेशस्यकुतः सा
नुबंधकतेतितात्पर्यं। भाष्ये। उपदेशाइतिदीत्संज्ञोच्यतइति एवंचत्वदुक्तिर्व्याहतेतिभावः॥ ॥

हलंत्यसूत्रेउपदेशपदासंबंधएवेतितत्सूत्रवक्ष्यमाणपक्षेप्याद्यपवेति। परत्वविशिष्टस्येतिअनुत्प
न्नौधातोः परस्येतिवक्तुमशक्यत्वादितिभावः उपक्षयादितिपंचम्याइतिशेषः। प्रवृत्त्यंतराभावादिति। पु
नः प्रवृत्तौमानाभावादितिभावः। अपेक्षायाइति। श्रुतयोः संबंधाभावेहितस्मिन्नित्यनेनषष्ठीप्रकॢप्तपे
क्षानंचप्रकृतेतथा। लिंगाच्छ्रुतेबलीयस्त्वादित्यर्थः भाष्ये ऽथवा ऽस्त्वेतावदितिप्रथमाषष्ठीनिर्देशसा

कृतायामित्संज्ञायामिति। सूत्रएवोच्चारितस्यइत्संज्ञेतिप्रयोगेसशब्दएवसन्निकार्यभत्सतइत्यर्थः।
अथवेति। परत्वविशिष्टस्यसनउत्पादनेउपेक्षयात् प्रवृत्त्यंतराभावोन्नास्तिपंचम्याः प्रकल्पकत्व
मित्यर्थः। प्रकृतौषष्ठीति। इकोयणचीतिश्रुतयोस्थान्यादेशभावोपपादनान्नास्तिषष्ठीप्रकल्पनं
अपेक्षायाअभावादित्यर्थः॥ ॥

मर्थ्यात्प्रथमतइग्यणोः स्थान्यादेशभावोस्तुततएतत्सूत्रबलाद्घणः स्थानित्वेपिनक्षतिरित्यर्थः। यत्रना
मसौत्रिषष्ठीपदिचेदानीमितियत्रसौत्रीषष्ठ्यास्ति तत्रसप्तमीयदिप्रकल्पयेत्तर्ह्यस्तुप्रकल्पयस्त्वित्यर्थः परं
त्विदंप्रौढ्याअथवानानुत्पन्नेसनीतिप्रागुक्तन्यात् गाङ्कुटादिस्पइत्यादौषष्ठीप्रकॢप्तावपिनदोषः ङित्य
दस्यधर्मपरत्वादितिबोध्यम्॥ ॥

कै०वि०१ यद्यपियुगपत्प्रसक्तिविरोधान्नसंभवतितथाप्येकदेशित्वादेवज्ञापकत्वेनपरिहरति।नोभेदइत्यादिना।त
३३९ थैवप्रसक्तिरिति।अवर्णदच्चिअवर्णस्याचश्चैकोगुणोभवतीत्यर्थइतिभावः ननूभयोःप्रकल्पकत्वाभावेपि
एकस्यप्रकल्पकत्वमतआह।तत्रपरत्वेतिङःसिधुङित्यादौपरत्वमुक्तेष्वनवकाशत्वमितिभावःननु

यदयमितियद्युभयनिर्देशोपरस्परषष्ठीप्रकल्पनेसतिग्रहणकवाक्याद्वाक्यांतरमनुमीयतेतास्या
दिभ्योलसार्वधातुकस्यलसार्वधातुकेतास्यादीनामनुदात्तत्वंभवतीतितदाकुर्यादित्यादावपित
थैवप्रसक्तिर्नभविष्यतीतिकिंपूर्वपरयोरित्यनेनभविष्यतीत्यर्थः।तत्रपरत्वानवकाशत्वाभ्यां
नियमपक्षवत्षष्ठीप्रकल्पकत्वपक्षेव्यवस्थादीर्घाच्छेतुग्भवतीत्यत्रषष्ठीस्थानेव्यत्ययेनपं
चमीतिव्याख्यानात्।सेनासुराच्छायेत्यादेर्वाज्ञापकादीर्घस्यैवतुग्भवतिनतुछस्य॥ ॥

दीर्घादितिसूत्रेपंचम्याअनवकाशत्वेनचछकारेषष्ठीप्रकल्पनंस्यादतआह।दीर्घाछेइति।सुराछायेति।
पदांतेतुकोवैकल्पिकत्वाच्चिंत्यमिदंतुकसाहितंपाणिनिपाव।मभिप्रेत्यतुज्ञापकोपन्यासः युक्तश्च
तथाभावः वैकल्पिकेषुभावाभावानुष्ठानस्यधर्माधिक्यफलकत्वात्॥ ॥छ॥ ॥ ॥ ३३९

स्वंरूपंशब्दस्याशब्दसंज्ञा॥ ॥स्वरूपस्येति।शब्देनार्थप्रतीतावर्थेकेषांचित्कार्याणामसंभवात्तद्वाचकश
ब्दमात्रग्रहणादितिभावः।अन्येत्विति।शब्दस्यस्वरूपमिदंग्राह्यत्वेनविधित्सितमितिनेहप्रदेशविशेष
समर्पकंलिंगमस्तीतिभावः नतुशब्दस्येत्येवलिंगं।यत्रशब्दग्रहणंतत्रस्वरूपमेवग्राह्यंनतुपर्यायादी

स्वरूपंशब्दस्याशब्दसंज्ञा॥ ॥स्वरूपस्यपर्यायाणां तद्विशेषाणांच ग्रहणेप्राप्ते
नियमार्थपरिभाषेयमितिकेचिदाहुः।अन्येतुलिंगाभावाद्विध्यंतरशेषभावाच्च
नेयंपरिभाषा।अपितुसंज्ञासूत्रमिदमितिप्रतिपन्ना॥ ॥छ॥ ॥ ॥

त्यर्थः तेनजनपदेअपत्यमित्यादौनास्याःप्रवृत्तिरतआह।विध्यंतरेति।नहिस्वंरूपमित्यस्याग्नेर्ढगित्यादौपं
चम्यंतेनसामानाधिकरण्येनवैयधिकरण्येनवासंबंधःसंभवतीतिभावःभाष्यकारोप्याहरूपंशब्दस्यसं
ज्ञेतीत्ययमेवपक्षोयुक्तःननुसंज्ञापक्षेतुनयगतिन्यायात्एकस्यसकलशब्दार्थात्मकस्फोटस्यैवसर्वबोधकत्वादितिभावः॥

कै॰वि॰
३४०

शक्तियुक्त इति। शक्त्याश्रय इत्यर्थः। सर्वशब्दप्रत्याप्यशक्तिरिति प्रत्याप्यत्वशक्तियुक्त इत्यर्थः। अनेन नियमद्वयं दर्शि
तं अनेन शब्देनायमेवार्थो ग्राह्यः अयमर्थो नैनैव शब्देन बोधनीय इति चेति। वस्तुतस्तु सर्वेषां सर्वार्थवाचकत्वेपि
न तस्मादादिज्ञानविषयः सर्वार्थशब्दानामस्माकं विशिष्याज्ञानात् किंतु योगिनामेव तज्ज्ञानं। एवं च शास्त्राधिका
रिणोऽस्मदादीन्प्रति नियमार्थत्वं शास्त्रस्यासंभव्येव। इयं कथा तु सर्वस्य ब्रह्मरूपस्यैत्वकथा वन्न व्यवहारेणो
पयोगिनी तस्मात् प्रकरणादस्यैवार्थस्य शास्त्रेणपास्थितो अर्थान्नियमः फलित इति बोध्यं। तत्र द्वितीयो नियम

देवदत्तादयश्च संज्ञाशब्दा नियमार्था इति सिद्धांतः सर्वार्थप्रत्यायनशक्तियुक्तो हि शब्दः सर्वशब्दप्र
त्याप्यशक्तियुक्तश्चार्थ इति व्यवहारनियमः क्रियते रूपशब्देन चेहाग्निशब्दत्वादिकं श्रुकसारि
कापुरुषोदीरितासिन्नशब्दव्यक्तिसमवेतं सामान्यमभिधीयते॥ ॥

श्चिंत्यः आकारादीनां रक्षीनां च हि शब्दातिरिक्तैराकारादिशब्दैर्व्यवहारानापत्तेरिति। केचित् ननु रूपरूपिणोरत्र भेदा
भावाच्छब्दस्येति षष्ठ्यनुपपन्ना संज्ञासंज्ञिसंबंधश्चानुपपन्न इत्यत आह। रूपेति। सामान्यलक्षणघटकानेकसमवेतत्
त्वसिद्धये आह। श्रुकेति न च तत्रोच्चारणक्रियैव भिद्यते न शब्द इति वाच्यं। ताल्वादिव्यापाररूपस्योच्चारणस्याश्री
तत्वेन शब्दश्रवणानंतरं जायमानवक्तृविशेषानुमानापत्तेः उदात्तत्वादिविरुद्धधर्माध्यासाच्च भेदसिद्धेः वर्णनि
ष्ठतया प्रतीयमानानां ध्वनिनिष्ठत्वकल्पने मानाभावात् इति भावः॥ ॥ब॥ ॥ ॥ ३४०

ननु प्रायेण सामानाधिकरण्यं संज्ञासंज्ञिनोर्दृष्टं न चेह तदित्यत आह। तत्रेति। स्वशब्दो व्यक्तिबोधक आत्मीयत्वेन ए
वं च शब्दस्य तत्तज्जातिविशिष्टस्य स्वं व्यक्तिः रूपं सामान्यं संज्ञकमित्याद्यः पक्षः। शब्दस्य रूपमित्युद्देश्यत्वमि
त्यनेन व्यक्तिसंज्ञकत्वं विधीयत इति द्वितीयपक्षे संभवः सामानाधिकरण्यस्य चोपपत्तिः न चानयोः पक्ष
योः फले कश्चिद्विशेष इत्याह। व्यक्तिरिति। व्यक्तिद्वारेणेति सामान्यस्य ढगादिभिः साक्षात्पौर्वापर्यासंभवादि

तत्र व्यक्तेः सामान्यं संज्ञा सामान्यस्य वा व्यक्तिरिति व्याख्याने कामचारो व्यक्तिः कार्यं प्रतिपद्य
माना सामान्यप्रतिबद्धैव प्रतिबध्यते सामान्यमपि कार्यं प्रतिपद्यमानं व्यक्तिद्वारेणैव प्रतिपद्य
त इति फले न कश्चिद्भेदः॥ ॥

ति भावः रूपग्रहणं किमर्थमिति भाष्यस्य स्वशब्देनैव जातिर्ग्राह्या व्यक्तिर्वा शब्दस्य स्वं स्वीया जातिर्व्यक्तिर्वा
च्येत्यर्थोन भविष्यति। सामानाधिकरण्यमेव संज्ञासंज्ञिनोरिति तु नियमः उभ इत्यादौ व्यभिचारादित्याशयः शब्द
स्य सूत्रोच्चारितस्य स्वस्वीयं रूपं प्रयोगस्थं संज्ञीत्यर्थ इति केचित्तन्न भाष्ये। रूपं शब्दस्य संज्ञेति। अत्र संज्ञाशब्दो बो
ध्यपरः कर्मव्युत्पत्तेः अन्यथा स्वशब्देनार्थग्रहणाय रूपग्रहणमित्युत्तरभाष्यासंगतेः न ह्यर्थः शब्दस्य संज्ञा किंतु बोध्य एवेति बो
ध्यं॥ ॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी ...

32

तत्रात्मीयवाचिना स्वशब्देन रूपस्यैव कथं परिग्रह इत्यत आह। प्रतीताविति। उपदेशः संबंधग्रहणं अंतरंगत्वप्र
थमतः श्रोत्रेणोपस्थित्या। अहेयत्वमुपपादयति। अनुकरणेति। शब्दमात्रतात्पर्यकोच्चारणस्यैवानुकरणत्वा
त् अर्थस्य रूपतुल्यत्वमभ्युपेत्याप्याह। न चार्थ इति। शब्दात्मिकानामेवावर्त्तिनीत्वेन संज्ञात्वात् तादृशसंज्ञ
या व्यवहाराच्चेति भावः। ननु स्वशब्दस्याभिधेयमित्येवार्थोऽस्त्वित्यत आह। संज्ञित्वे चेति। लोक तत एव सिद्धेरि

रूपग्रहणमिति। प्रतीतावुपदेशानपेक्षत्वादंतरंगत्वात् अहेयत्वादसाधारण्याच्च रूपमेव ग्रही
ष्यते। अर्थो हि संबंधग्रहणमपेक्षते अनुकरणशब्देषु नार्थः प्रतीयते साधारणश्च पर्यायैरपि प्रत्यायनो
त्। न चार्थः संज्ञा शक्यते वक्तुं संज्ञित्वे चार्थस्य सूत्रमनर्थकमिति प्रश्नः। एवं तर्हीति। यत एवेह रू
पग्रहणस्य व्यावर्त्यं नास्ति तत एव ज्ञापकं सति तु व्यावर्त्ये तत्रैवोपक्षयान्न ज्ञापकं स्यात्। ॥

ति भावः। ज्ञापकमिति स्वशब्देन बहिरंगस्याप्यर्थस्य ग्रहणे इत्यर्थः। नन्वत्यस्य स्वीयस्य सत्वेन द्व्यावृत्य
र्थं रूपग्रहणमिति अर्थो न भाष्याद्व्यज्यते एवं च शास्त्रेऽर्थस्याग्रहणे रूपमर्थवत्यग्निनाधास्ति किरिति चेन्न। अ
न्यत् स्वीयमस्ति यतोऽन्तस्यापि शब्दबोध्यत्वबोधनार्थमुभयोपादानमिति भाष्याशयात्। एवं चाधिकसंग्रहार्थं ३४१
रूपग्रहणं रूपग्रहणेन चांतरंगत्वादिन्यायबाधपूर्वकं स्वशब्देनार्थस्य स्वशब्दबोध्यत्वबाध्यत इति तात्पर्यं। ॥

तत्रोभयानुग्रहाय सति संभवे ऽर्थवतो रूपस्य ग्रहणं असति तु केवलार्थस्य शुद्धस्य वा रूपस्य ग्रहणं तदाह। यत्र चार्थवते
त्यादि अर्थोपस्थापकेन रूपेणेत्यर्थः। अत एव भिन्नाविभक्तिनिर्देशश्चरितार्थः। इह योग्यतेति योग्यता बोधजनक
ता रूपान्तया लक्ष्यते कल्प्यत इति योग्यता लक्षणाः शक्तिः तस्य उभयाश्रयकत्वेनोभयाधीनत्वलक्षणगुणयो

अर्थवद्ग्रहणइति। अर्थयुक्तं रूपं गृह्यत इत्यर्थः तेन काशे कुश इत्यत्र शे इति गृह्यसंज्ञा न भवति। यत्र चा
र्थवता रूपेण शब्देनाश्रीयते तत्रेदं नोपतिष्ठते यथा वर्णग्रहणेषु टेरेत्वे चेति पचेतेइत्यत्रानर्थकस्यापि टेरेत्वं
भवति। किमर्थमिति। वक्ष्यमाणोऽभिप्रायः। शब्देनार्थगतेरिति। कात्यायनवचनप्रामाण्यादस्त्रियामिति प्रति
षेधस्यानित्यत्वात् विभाषागुणेऽस्त्रियामिति यं चेमीइह योग्यतालक्षणेन संबंधेन शब्दोऽर्थं लोके प्रत्याययति व्या
करणेऽपि पशुरपत्यं देवता ग्रांच उदंचो। तरतादित्यर्थ एव गृह्यते अग्नेर्दगित्यादौ त्वर्थस्य प्रत्ययेन पौर्वाप
र्यासंभवात्सा इचर्यात्सर्वस्य तद्वाचिनः संप्रत्ययः स्यादिति सूत्रारंभः। ॥छ॥ ॥

गात् गौण्यावृत्या वासंबंधपदव्यवहार्यत्वमिति बोध्यं। इत्यर्थ एवेति। अर्थे कार्यस्य संभवादिति भावः। ननु संज्ञा
विधायकस्य तत्प्रतिषेधार्थकत्वमयुक्तमत आह। संप्रत्यय इति भावे ङिः इति भावः। ॥छ॥ ॥ॐ नमः शिवाय॥

कै॰वि॰१
३४२

नन्वर्थप्रत्ययस्य शाब्दपूर्वकत्वे पिकथं स्वरूपस्यैव ग्रहणमत आह। शाब्द इति। तथा च प्रथमप्रतीतत्वरूपकारणादुच्चारितशाब्दस्यैव ग्रहणं युक्तमिति भावः। शाब्दपूर्वक इत्यस्य शाब्दज्ञानपूर्वक इत्यर्थः। प्रत्यासत्त्येति। अर्थबोधानुकूलत्वेन ज्ञातिप्रथमप्रतीते शाब्द एवार्थेऽसंसवे कार्यं न तु तत्पर्यायादिष्विति भावः। अर्थे कार्यसंसवे तु तस्यैव एवं चोपास्थितस्यार्थस्य सर्वथा त्यागे मानाभावात् अर्थवत्परिभाषापि सूत्रं विनासिद्धेति तात्पर्यम्। एवं चैतन्न्यायानुवादकमिदं सूत्रं मंदम

संज्ञाप्रतिषेधार्थमिति। संज्ञासंप्रत्यय उच्यते। नवेति। शाब्द उपलब्धोऽर्थं प्रत्याययति न सत्तामात्रेण। चक्षुरादीनि तु सत्तामात्रेण विषयमवगमयंति। अर्थस्य शास्त्रीये कस्मिंश्चिदयोग्यत्वात्प्रत्यासत्त्या स एवोपात्तः शाब्दो ग्रहीष्यते न तु विप्रकृष्टशाब्दांतरमिति भावः। शाब्दपूर्वक इति। अस्योपलब्धुः शाब्दपूर्वक इत्यर्थः॥ ॥ ॥ ॥

त्यनुग्रहायेपि बोध्यं ननु अर्थज्ञानोत्तरं परं प्रति तद्बोधनाय शाब्दप्रयोग इति कथं शाब्दपूर्वकत्वमर्थप्रतीतेरत आह। अस्योपलब्धुरिति श्रोतुरित्यर्थः। भाष्ये। शाब्दपूर्वको हीति हिः प्रसिद्ध्यर्थः श्रोतुः शाब्दज्ञानपूर्वकोऽर्थबोधप्रत्यय इति लोकप्रसिद्धमित्यर्थः। युक्त्यंतरमप्याह। आतश्चेति। एवं च शाब्दस्यार्थप्रतीतौ कारणत्वादर्थे कार्यासंसवे तद्बोधकारणत्वेनोपस्थिते शाब्दे कार्यमिति भावः॥ ॥ ३४२

इदानीं तत्तच्छाब्दजन्यार्थबोधे प्रकारतया भासमानशाब्द एव कार्यमर्थेऽसंसवे इत्याह। शाब्दपूर्वकश्चेति शाब्दविशेषणकस्यार्थविशेष्यकः प्रत्यय इत्यर्थः नसोस्ति प्रत्ययो लोके यः शाब्दानुगमादृते इति भावे। चकारेणान्वास्य युक्त्यंतरत्वं सूचितं। भाष्ये। तस्मादर्थनिवृत्तिरिति। अर्थबोधकशाब्दांतरनिवृत्तिरित्यर्थः फलांतरं शंकते। इदं तर्हीति। एवमर्थमिति निषेधप्रतियोगिज्ञानार्थं न्यायसिद्धस्यापि विध्यंशस्यानुवाद इत्यर्थः किं प्रत्यय इति। न चैवं पेषंवासवाहेनाधिषु चेति धिग्रहणं व्यर्थं स्यात् नहि धातोः किं विना उदकस्य धुत्तरपदत्वं संभवति तत्र हि कर्मण्यधिकरणे चेति यदुत्तरसूत्रेणाकिरिति वा

अशाब्दसंज्ञेति। न्यायात्स्वरूपग्रहणे सिद्धे शाब्दसंज्ञायां स्वरूपग्रहणं मा भूदिति एवमर्थमिदमित्यर्थः। अन्यथोपसर्गे घोः किरिति कि प्रत्ययो घोर्धातोः शाब्दार्थात्स्यात्। न तु दाधाभ्युः कुमारीघ्र इत्यत्र घ्र रूपे ह्रस्वः प्रसज्येत। ईहल्यघोरित्यत्र तु घुशाब्दस्याकारांतत्वाभावाद्दाधामेव ग्रहणं सिद्धमिति॥ ॥ ॥ ॥ ति

र्च्यं। उपलक्षणमिदं सनिमीमाघुतेर्गदेत्यादौ धातोर्ग्रहणं स्यादिति बोध्यं। कुमारीघ्र इति। ननु अयं षष्ठीतत्पुरुषः कर्मधारयो वा सयथा नात्र स्त्रियां समानाधिकरण इत्यनुवृत्तेरिति चेत्। घोस्त्यस्याः सा घा कुमारीघा अस्य इति बहुव्रीहौ घादिषु ह्रस्वत्वं पुंवद्भावाद्विप्रतिषेधेनेत्युक्तेः पुंवत्त्वं बाधित्वा ह्रस्वप्राप्तिरस्तीत्याशयात्। घुसंज्ञाविधानस्य तर्हि को वकाश इत्यत आह। इहलीति। घसंज्ञापि किमेत्तिङव्ययघादित्यादौ चरितार्था तत्र हि तिङंतात्परात्प्रघांतप्रातिपदिकासंभवादिति बोध्यं॥ ॥

प्रदेशेष्विति। सर्वप्रदेशेष्वित्यर्थः संज्ञावचनसामर्थ्यगम्यप्रकरणात् प्रत्यासत्तिन्यायो बाध्यत इत्यभिप्रायः न चेहल्पयोः कि
किमेतिङव्ययघेत्यत्र तयोश्चारितार्थ्यात् तावन्मात्रफलकत्वे तत्रैव दाधाग्रहणं तरप्तमपूग्रहणं च कुर्यात् इति बोध्यं। उप
यगतिरिति संज्ञावचनस्य प्रत्यासत्तेश्चानुग्रहायोपसयगतिरिति भावः सूत्रारंभमप्युपेत्येदं। षट्संज्ञस्य इति।

वचनप्रामाण्यादिति। प्रदेशेषु संज्ञिप्रत्यायनार्थं संज्ञाकरणमिति सामर्थ्यात्स्वरूपग्रहणं न भवि
ष्यति। ननु चेति। उपसयगतिरिह शास्त्रे दृष्टा संख्याकर्मकरणादिष्विति। इहापि स्वरूपस्य संज्ञि
नस्तेषु च प्रदेशेषु ग्रहणं स्यात्॥ नहीति। षड्भ्यो लुगित्यादावुच्चारितेतिभावः। कातर्हीति। तत्र
उकारांतः शब्द उच्चारितो जश्शसोश्च षकारांताल्लुक् कर्तव्यः षण्णामिति च नुट्॥ ॥

भाष्ये संज्ञाशब्दो बोधकपरः न हि षकारांतो बोधकशब्दस्तत्रोच्चारित इत्यर्थ इति भावः। षकारांतादि
ति। जश्शसोर्लुकः प्रकृजस्त्वाभावादेवं च तदर्थं तस्य षट्संज्ञा विधीयत इति न ज्ञापकत्वमिति भावः॥ ॥ ३४३

डकारांतादिति। षड्भ्यस्तरयोर्जश्शसोरिति स्वरूपग्रहणेन लुकि कार्ये जस्त्वमसिद्धमिति भावः तथापि संज्ञा
सूत्रे यतो उच्चारणात् षड्-भ्य इत्यादौ चर्त्वासिद्धत्वे नैव निर्वाहः संहितापाठेन डांतस्य संज्ञायां न स्वरूपग्रहण
त्वे षट् चतुर्भ्य इत्यत्रैव चर्त्वासिद्धत्वमावश्यकमिति तात्पर्यं। श्रृगंतेत्यादि ज्ञापकं शास्त्रीयशब्दसंज्ञायां

असिद्धमिति। डकारांतः श्रूयमाणे पिडत्वस्यासिद्धत्वात् षकारांतस्य स्वरूपस्य ग्राहको भविष्यतीत्यर्थः॥
मंत्राद्यर्थमिति। मंत्रादयः शब्दस्य संज्ञा। शास्त्रसामर्थ्यादिति। देवसुम्नयोरित्यादौ यजुरादीनां नि
मित्तत्वेनोपादानाद्यजुषि त्वचि मंत्र इति च स्वरूपं न ग्रहीष्यते न च तथाविधं लक्ष्यमस्तीति भावः।
मंत्रादिसहचरित इति। साहचर्यं च शब्दानुविद्धस्यैवार्थस्यावगमात्। सित्तद्विशेषणामिति। वृ
क्षस्य मृगस्य इत्येवं निर्देशः कर्तव्यः एतदपि न्यायसिद्धं तुल्यजातीयानां द्वंद्व एकवद्भवतीति वक्ष्यते॥
पर्यायाणां च युगपत्प्रयोगाभावात्॥ ॥

न स्वरूपग्रहणमित्यर्थं बोधयतु न तु शब्दपदार्थक इत्याशयेनाह भाष्ये। मंत्राद्यर्थमिति। शब्दानुविद्धस्यैवेति।
न सोस्ति प्रत्ययो लोके यः शब्दानुगमादृते इति हर्युक्तेरिति भावः तद्बोध्यत्वेन सहचरितत्वमित्यन्ये चार्थभावमुपपा
दयति॥ ॥

सामान्यशब्देनेति। एवं च पदार्थभेदाभावात्साहित्यरूपवाच्यार्थसंभवदिति भावः। पर्युदासइति कश्चित्तु अरा
जेति छेदाभावात् किं च राशब्दः शब्दपरः मनुष्यशब्दश्चार्थपर इति दुर्लभं स्यात् किं च एवं अमनुष्यश

सामान्यविशेषाणां चार्थ्याभावात्सामान्यशब्देन सर्वविशेषाणामाक्षेपाद्धवरक्षमित्यादेः द्वंद्वासा
वाद्विशेषाणामेव प्लक्षन्यग्रोधादीनां ग्रहणं सिद्धं। पित्पर्यायवचनस्य चेति। चशब्दात्स्वरूपस्य
विशेषाणां च ग्रहणमिदं वाचनिकमेव। जित्पर्यायेति। इदं न्यायसिद्धमित्याहुः। अराजेति प
र्युदास आश्रीयते तेन राजसदृशानां तत्पर्यायाणामेव ग्रहणं सिद्धमिति। झित्तस्य चेति। इदं
वाचनिकमेव। मत्स्याद्यर्थमिति। मृगपक्षिणोस्तु पित्निर्देशस्तत्फलला भार्थः कर्तव्यः। अस्पैकस्येति इय
मिष्टिरेव॥ ॥७॥ ॥

ब्दार्थेनापि मनुष्यपर्यायाणामेव ग्रहणं स्यादिती दं वाचनिकमेवेत्याह॥ आद्यं तौ विहमध्योपादाने स्विष्टा ३४४
यमाह॥ मृगेति। एवं च मत्स्याद्यर्थमित्यादिशब्दप्रयोजनं चिंत्यं॥ ॥७॥ ॥ ॥

अणुदित्सवर्णस्य चाप्रत्ययः॥ ॥ किंयस्येति। नाक्षेपोयं किंतु विशेषजिज्ञासेत्यर्थः। न तयो यौगिक इत्यन्वयः
किमर्थमित्यत्रास्य सवर्णग्रहणेपि नांतरतम आदेशः संभवतीति ऋत एव भविष्यति न चऋतापेक्षया दीर्घस्तु
त्तयोरंतरतमत्वात्त एव भविष्यतः ह्रस्वोच्चारणं तु लाघवार्थं स्यात् इति वाच्यं एवं तर्हि परत्वात् लिलोपे मात्रि
कत्वान्मात्रिक एव भविष्यति। तत्र नापीति वर्त्तते। फलाभावादत आह। विशेषेति येन नाप्राप्तिन्यात्

अणुदित्॥ ॥ अप्रत्यय इति किमर्थमिति। किंयस्य प्रत्ययसंज्ञा विहिता तस्य प्रतिषेधन्तयः प्रतीय
ते विधीयत इति यौगिकः प्रत्ययः तस्यापीति प्रश्नः। इत इति विशेषे विहितत्वात्पदाद्यत्वं बाधित्वात्रि
मात्र आदेशः प्राप्नोति। बभूवेति। अनुनासिकः प्राप्नोति। अनइन्निति। आमपि पक्षे प्राप्नो
ति। यदयमिति। ग्रहेरेव दीर्घो नान्यस्य इति नियमादिति भावः नियमार्थमिति ग्रहेर्दीर्घ एव न तु ह्रस्व इत्येवमर्थं स्यादित्यर्थः॥

न्यायादिति भावः शादीनां चोपदेशे एव त्संज्ञा लोपयोरण्त्वेन सवर्णग्रहणप्रसक्तिः। अनुनासिक इति॥
पक्षे इति शेषः नियमार्थं तत्स्यादत आह। ग्रहेरेवेति। वृतो चेत्यनेन विरोधादिति भाव इति केचित्तु व
स्तुतस्तु यथा दिक् संख्ये इति नियमो दृश्यो भ समासविधायक तद्धितार्थ इति एवं ग्रहेरेवेति नियम
माद्प्राप्त दीर्घविध्यर्थं वृतो वेति स्यादिति चेत्तेषां व्याख्या तस्माद्विधेयसंकोचस्यान्याय्यत्वान्न तथा नियम इति भावः॥

कै॰वि॰१ ३४५ ववरिथेति। ववर्थेति छंदसि इड्भावनिपातनात् भाषायां कृसृभृवृ इति इट्प्रतिषेधो न। अलिट्येव शब्दतो वेत्य
र्थात् लिटि ह्रस्व एवेति भावः। वाग्रहणमिति अत एव भाष्ये यद्भिर्भाषायां शंस्ती त्युक्तं भाष्ये। भाव्यमाने नेति इयं च जा
तिग्रहणग्रहणप्राप्तगुणभेदकत्वप्राप्तभान एसाधारण्येन प्राप्तं सवर्णग्रहणं वारयितुमावश्यकीति भावः। सा
धारण्योश्चेति। भूयान्निर्युक्तिः भाष्यवार्त्तिक समाधानानभिप्राया किंतु सूत्रोक्तो प्रत्ययग्रहणमपेक्ष्येति भूयानि

वृतो वेति। ननु ववरिथेति लिटि दीर्घो मा भूदित्येवमर्थमेतत्स्यादिति कथं ज्ञापकं एवं तर्हि वृतद्त्यत्रा
पि अलिटीत्यनुवर्त्तनाद्भिरी दीर्घनिषेधादन्यत्र नञ्सयस्मिन्निति वा ग्रहणं ज्ञापकमीटद्वटोग्रहणाभा
वस्य। प्रत्यये भूयानिति साधारण्योः साधारण्याश्चेत्यर्थः। प्रत्ययद्त्येन्वर्थसंज्ञा स्वायेनार्थप्रतिर्य
तिस प्रत्ययः न च दीर्घप्लुतयोरर्थस्याभिधानमस्ति। ह्रस्वाद्तिश्रूयंते उच्चार्यते अगादिचोदनादित्यर्थः॥ ॥

तिप्रतिज्ञायेकपरिहारोपन्यासेपि न विरोध इति भावः नन्वस्य च्छ्वावित्यादाविवार्थाभिधानासमर्थस्यापि
सवर्णस्य ग्रहणं स्यादत आह। प्रत्यय इतीति प्रत्ययविधौ सवर्णग्रहणं हि तेषामपि प्रत्ययत्वमेष्टव्यं त ३४५
च्चान्वर्थत्वादसीसवीति न तत्र सवर्णग्रहणमिति भावः। उच्चार्यत इति। उच्चारणं चात्र साक्षाच्छब्देन
विवक्षितं॥ अतोणादिशब्द प्रतीयमाने कोरादिषि सवर्णानां ग्रहणं सिद्धं॥ ॥छ॥ ॥

३७

ह्रस्वे गृहीते रिति। प्रकृतसूत्रस्याण्पदेनेति शेषः न नु प्रत्याहारसूत्रोपदिष्ट एवाण इति कथमाकारो ग्राहक
इत्यत आह। यथैवेति। न चाक्षरसमाम्नायिकविषयकः प्रतिषेधः प्रत्याप्यमानविषयं तु सवर्णग्रहणमिति
वैपरीत्यं किं न स्यादिति वाच्यं। तथा सत्यको विधीयमानस्य पूर्वसवर्णदीर्घस्य कुमार्यावित्यादावप्राप्ते दीर्घाज्झ

दीर्घाद् इति। ह्रस्वे गृहीते र एत्वा दीर्घाणां ग्रहणं तत्राष्टन आ विभक्तावित्यर्थस्याभिधानमस्ति। ह्रस्वा
इति श्रूयंते भाकारो ग्राहको मा भूदित्यर्थः सुतर्नीविनव्यर्थ यथैव हि अण्त्वादाकारो रपरत्वादिका
र्यं प्रतिपद्यते तथा ग्राहकत्वमपि प्रतिपद्येतेति भावः कथं पुनरप्रत्यय इत्यस्याप्रत्याप्यमान इत्यर्थः।
अंतर्भावितण्यर्था इति कर्मण्यच्विधानात्। यत्नाधिक्यादिति। न नु च ह्रस्वोच्चारणे अर्द्धमात्रिक
स्यमात्रिक एव स्यादिति दीर्घोच्चारणमुक्तयार्थं स्यात् एतत्तु न निरूपितं न्याय्य एवात्र परिहारोभिधा
स्यते। अनण्त्वादिति। अत्र हि सूत्रे प्रत्याहारसन्निविष्टा एव गृह्यंते स्वात्मनि क्रियाविरोधात्। अनि
ष्पादात् ग्रहणक शास्त्रांतराभावाच्च॥

भिच्चेति प्रतिषेधो नर्थकः स्यादिति भावः एवं च वर्णसमाम्नायपठितानामेव ग्राहकत्वबोधनार्थमप्रत्ययपद
मिति तात्पर्यम् उक्तयार्थह्रस्वदीर्घनियुविध्यर्थ एवं च यत्नाधिक्यमेवासिद्धमिति भावः। न्याय्य एवेति अन एत्वादित्य
यमित्यर्थः यदुक्तं तथैवेति तत्राह। अत्रहीति। स्वात्मनि क्रियायाः स्वस्मिन्प्रवृत्तिविरोधहेतुमाह। निष्पासदादिति अर्थाबोधादि
त्यर्थः॥

DR. BHAU DAJI MEMORIAL

नन्वल्पविषयेणाप्रत्ययइत्यनेनकथंबहुविषयपरिभाषार्थशक्यतेप्रतिपादयितुमतआह।प्रतीयत
इतिभाष्येज्ञापयतीत्यस्ययोगेनबोधयतीत्यर्थः अप्रत्ययइतिचवाक्यभेदेनानिषेधार्थमणित्यस्यचनात्र
संबंधःतेनोक्तस्सकलार्थलाभइतिभावःवस्तुतएकदेशानुमतिद्वारातांपरिभाषांज्ञापयतीतिभाष्याक्षरा
र्थः विधीयतइत्यर्थेप्रतीयतइत्यस्यप्रयोगाद्व्याख्येयटीकंचिंत्यं।आकृतीतिप्रत्याहारसूत्रेष्वस्यप्रावि

अत्रसूत्रेअकारादिभिराकारादीनांग्रहणासंभवोऽन्येषुतुप्रदेशेषुअनेनसूत्रेणाकारादिभिराकारा
दयोगृह्यमाणाअणादिकार्याणिलभंते।भाष्यमानेनेति।प्रतीयतेविधीयतइतियौगिकस्यात्रप्रत्ययस्य
ग्रहणमितिभावः।किमर्थंपुनरिति।आकृतिनिर्देशात्सिद्धमितिप्रश्नः।अथसवर्णस्येति।उदितग्रहणस्या
विचारयिष्यमाणत्वादेवमुक्तंव्यक्तिनिर्देशेकालादिभिन्नस्यग्रहणंनप्राप्नोतीतिभावः॥ ॥ ॥

त्यादिषुचेत्यर्थः नेयमुदिद्विषयाशंकाभुत्वादिजातौमानाभावेनतस्यावश्यकत्वादित्याशयेनाह॥
उदिदिति।कालादिभिन्नस्येतिएकोवर्णउदात्तत्वादिकंध्वनिगतमितिपक्षेपिउपाधिभेदाभिन्नत्वा ३४६
त्ग्रहणंनसिध्यतीतिभावःअनंतावर्णव्यक्तयइतिपक्षेतुअग्रहणंस्पष्टमेवेतिबोध्यम्॥ ॥

नन्वेतत्प्रयोजनंअस्यच्वावित्यादौवाअणादिप्रत्याहारेषुवातत्राद्यंतत्रानुवृत्तिनिर्देशइत्यादिनादूषयिष्यति।नांत्य
इत्याह।प्रत्याहारग्रहणेइत्यादिप्रत्याहारग्रहणेसवर्णग्रहणमितिबोधिकस्यद्वेधार्थःअकइत्यादौईकारादीना
मणादिसंज्ञाभिर्ग्रहणंनप्राप्नोति।अनुपदेशणक्षरसमाम्नायेतेषामनुच्चारणादित्यर्थःतदाह।यत्रसंज्ञयेति।एक
स्यैवयुगपत्प्रत्याप्यत्वप्रत्यायकत्वयोर्विरोधादित्यर्थः।यत्रस्वरूपेणेति।इदंचिंत्यं।अव्यक्तानंत्येतस्याएत्वा

प्रत्याहारग्रहणइति।अकोचीतियत्रसंज्ञयाप्रत्यायनमिकारादीनांतत्रतैरन्येषांग्रहणंनस्या
त्यत्रस्वरूपेणज्ञायते।अस्यच्वौयस्येतिचेतितत्रैवैषांग्राहकत्वंस्यात्।अनुपदेशादिति।अनु
च्चारणादित्यर्थः नहिप्रत्याहारेदीर्घाउच्चारिताः यतोऽणादिचोदनाभिर्गृह्येरन्अथवाअकोची
त्यादावनुच्चारिताइकारादयोदीर्घाणांप्रत्यायकानस्युरित्यर्थः॥ ॥

भावात्तस्माद्यःस्वरूपेणोच्चार्यतेअकइत्यादावकारादिस्तस्यैवग्राहकत्वंस्यादितिवक्तुमुचितं।प्र
त्याहारेअइउणित्यादौभाष्ये।यथाजातीयकानामिति।वर्णसमाम्नायपठितानामित्यर्थः।संज्ञेति।आ
दिरंत्येनेतिकृतादिसंज्ञेत्यर्थः यद्वाणादौइकारादिभिरीस्वदीर्घाणामग्रहणंकुतः अनुपदेशात्।अको
चीत्यादाविकारादीनामनुच्चारणादित्यर्थः तदाह।अथवेति।भाष्यस्वारस्यंत्वाद्यव्याख्यायामेव॥ ॥

कै॰वि॰१ ३४१ उच्चार्यमाणैरेवेति। पुस्तकदर्शनादौ व्यभिचारादित्यर्थः। संज्ञेति। आदिरंत्येनेति संनिहिताइति। बुद्धिसंनि
हिताइत्यर्थः। अयंभावः शाब्दानुपस्थिता बोधं जनयंति। उपस्थितिस्तु स्मृतिरूपा प्रत्यक्षरूपा च न त्वस्यैवे
ति नियमः। लिपिस्मारितपदे बोधानापत्तेरिति। संनिधानामिति। प्रतीतिरित्यर्थः। यथायोगं। उच्चारणेन सं

ननु चेति। उच्चार्यमाणैरेव प्रत्यायकैर्भवितव्यमिति नास्ति सन्निहितास्तु प्रत्यायकाः तच्च सन्नि
धानं यथायोगमस्त्येवेत्यर्थः। उच्चार्यमाणेति। प्रतीयमानो हि प्रधानं कथमन्यप्रत्यायने गभावं
तदेव गच्छेदित्यर्थः। शब्दस्यावचनमिति। प्रतीयमानेन शब्देनान्यस्याप्रत्यायनमित्यर्थः॥ ॥

ज्ञयाचेत्यर्थः। प्रतीयमानो हीति यद्यप्युच्चारणे प्रधानमपि अर्थप्रतीतावंगत्वाभावं प्रतिपद्यते तथाप्युच्चारणाहृताया
स्तत्प्रतिबिंबविशिष्टस्फोटाभिव्यक्तेः स्थिरस्थापितयोपपद्यते तत्वे शब्दज्ञानमात्रस्य तु न तदभिव्यंजकत्वं वक्ष्यमा ३४१
णहेतोरितिभावः। अन्यस्येति दीर्घादिरूपशब्दस्येत्यर्थः। भाष्ये। ह्रस्वसंप्रत्ययादिति तृतीयातत्पुरुषः॥ ॥

ऋगित्युक्ते संपाठमात्रं गम्यत इति। एतेनोच्चारितानामेव प्रत्यायकत्वे रहसि पुस्तकमीक्षमाणस्य बोधानापत्तेर्वाचकज्ञा
नसामान्यस्यैव बोधे तंत्रत्वेनेदमयुक्तमित्यपास्तं मानसजपस्थलइव तत्रापि स्वीयसूक्ष्मोच्चारणाद्बोधेन क्षतेः उ
पेहिमंत्राणां त्रैस्वर्यमेव तत्तत्स्थानेषु उच्चादिदेशोपलभ्यमानत्वरूपोदात्तत्वादेर्मात्राकालिकत्वादिरूपह्रस्वत्वादे
श्च विनोच्चारणमनभिव्यक्तेः। यद्वा जिपरैव चेष्टादिवत्संकेतेन बोधकत्वं अत एव लिपौ शब्दत्वभ्रमो बालानां य
द्वालिपावनादेः शब्दतादात्म्याध्यासाद्बोधकत्वं लिपौ शब्दत्वबाधज्ञानवतां पंडितानामपि अंतःकरणादावा

ऋगिमित्युक्ते इति। यद्यपि प्रकरणवशाद्विशिष्टसन्निवेशेनापि ऋक् प्रत्याय्यते तथापि सा स्वार्थं न प्रत्याय
तीत्यर्थः। एवं तर्हीति अइउणिति प्रत्याहारे एवाकारादिभिराकारादीनां ग्रहणात्तेषामप्यणादिसंज्ञा भिन्ने
हणं भविष्यतीत्यर्थः। उपदेशइति। प्रत्यायनमित्यर्थः॥

त्मत्वप्रत्यये भ्रमत्वं जानतामनादिसिद्धारोपयैव व्यवहारवद्बोधोपि ननु ऋगित्युक्ते तद्विशेषाप्रतीतेरर्थप्रतीति
संभावनाया अप्यभावः ऋत्वकस्य वेदत्वस्य चार्थप्रतीतिजनकतानवच्छेदकत्वादत आह। यद्यपीति ऋक्शब्दे
न विशिष्टसंनिवेशेनापि ऋक् प्रत्याय्यत इत्यन्वयः यत्र संकेतादिवशात् ऋगित्युक्ते ऽग्निमीळे पुरोहितमित्याद्यानु
पूर्वीप्रकारेण बोधस्तत्रापि सा स्वार्थवेदनादिक्रियाकर्मत्वेन प्रत्याययतीति भावः। प्रत्यायनमिति तच्चैतत्त्रैणेवेति बोध्यं।

अनेन तत्प्रत्यायनमशक्यमित्याह। भाष्ये। वरकालत्वादिति। परासूत्रादिति सूत्रात्प्रत्याहारसूत्रात्परापरकाजाक्रि
यत इत्यर्थः तेषामनादित्वादपाणिनिकृतत्वादिति भावः अवरकाले तिवाक्यार्थज्ञाने पदार्थज्ञानस्य कारणत्वादि
तिभावः शब्दक्रमोष्टाध्यायीक्रमः प्रत्याहारकालो त्तरासवर्णसंज्ञेति नाज्झलावित्येतद्विषयनिर्णयोत्तरं तत्परिहा
रेण सर्ववर्णपदशक्तिर्यदस्येव व्यवहारोपयोगित्वादितिभावः। वर्णानामुत्पत्ताविति प्रतीतावित्यर्थः अकइत्या

करिष्यत इतिव्याख्यायते। अवरकालत्वादिति निष्पन्नेष्वंगेषु अनयान्यत्रास्य च्चावित्यादौ सवर्णानां ग्र
हणं नविष्यति नांगेषु नापिस्वात्मनि अनिष्पन्नत्वादिति भावः। सर्वथेति। अर्थक्रमेणापि नशब्दक्रमेणेवे
त्यर्थः। वर्णानामुत्पत्ताविति। अइउणित्यत्र इयमेव वर्णानाकारादीनुत्पादयतीत्येतन्नास्ति। तस्मादि
ति। प्रत्याहारएव दीर्घप्लुता अपि पठनीया इत्यर्थः॥ ॥

दावाद्यवर्णेष्वस्या एव प्रत्यायकत्वादध्याहारेण व्याचष्टे। अइउणिति। उत्पादयतीति। प्रत्यापयतीत्यर्थः प्रत्या ३४८
हारे। अइउणित्यादौ न च प्रत्याहारेषु तद्वाच्यवाच्ये लक्षणांगीकारान्न दोषः उक्तभाष्यरीत्या तद्वाच्यानां प्रत्याय
कत्वाभावेन तेषामशक्तत्वेन लक्ष्यतावच्छेदकलक्षणामूलसंबंधत्वादनयोर्दुरुपपादत्वात्॥ ॥

एवं प्रत्याहारेषु सूत्र प्रयोजनाभावमुक्त्वा अस्य च्चावित्यादावपूतमाह। तत्रानुवृत्तिर्निर्देश इति भाष्ये वृत्तिं वर्णसमा
म्नायमनुगतस्तत्सदृशो नुवृत्तिरकारादिस्तस्य निर्देशः स्वरूपेणोच्चारणमित्यर्थः। तत्र सवर्णग्रहणे हेतुमाह। व्यक्ती
ति। अनंताव्यक्तयइति पक्ष इत्यर्थः न दाह। वांतरभेदेति। जात्येकत्वेपि सोसंगतः उदात्तादि विरुद्धधर्माध्यासात्।

तत्रानुवृत्तीति। व्यक्तिपक्षे सत्यपि सूत्रारंभे ऽवांतरभेदसंभवाद्ग्रहणं न सिध्यतीत्यर्थः। वचना
दिति। अण्सदृशेणिति ग्रहीष्यत इत्यर्थः। यत्रेति अनंतरोक्तमुत्तयं यत्र नास्ति अकोचीत्यादा
वत्रस्य नुबंधेन चिह्नेन प्रत्याहारस्य एव निर्दिष्ट इत्य एत्व मुच्चारणं चास्ति तत्राकार उच्चारितआ
दिरंत्येन सहेति मध्यपतितानां स्वरूपस्य च ग्राहकोस्मा च्च वचनात्सवर्णानामपीत्यर्थः एवं व्य
क्तिपक्षे सत्यपि सूत्रारंभे नास्तीष्टसिद्धिः॥

× व्यक्तीनां परस्परभेदसंभवादित्यर्थः एका अवर्णव्यक्तिरिति पक्षे तु यद्यपि सिध्यति तथापि × यदि तु ध्व
निनिष्टास्ते तद्धाकत्वखत्वादिकमपि तन्निष्टमस्तु किं वर्णे नों वेदनंता एवेति भावः। अनणेव चनादपि कथं ग्राहकत्व
मत आह। अण्सदृश इति। अक्षयं। अनणत्वमनुच्चारणं च। मध्यपातिनामिति दृष्टांतार्थं नास्तीति॥ ॥ ॥

कै॰वि॰१ यदित्व इ उ ऋणित्यादावत्वादिजातिनिर्देशाश्चात्रैवार्थे देषामणत्वंप्रत्याहारग्रहणेषुत्वनदोषः ल्वादयइत्यादिनिर्दे
३४९ शाश्चात्रैवार्थेलिंगंइत्युच्यते तदासूत्रमेवव्यर्थमित्याह। आकृतीतिप्रत्याहारे। अइउऋणित्यादिसूत्रेअनुवृत्तिनिर्दे
शेअस्यञ्चावित्यादौ उपदिश्यते। उच्चार्यतेप्रत्याप्यते वा। नांतरीयकमितिजातेः साक्षादुच्चारणासंभवादुच्चारणंकिं
त्वजातौकार्यान्वयस्यव्यक्तिं विनासाक्षादसंभवात्तदुच्चारणं तद्बोधनमित्यर्थः तत्रदीर्घादिव्यक्त्याक्षेपेबीज

आकृतिपक्षेतुसूत्रंनकर्तव्यमित्याह। सवर्णइति। प्रत्याहारेअनुवृत्तिनिर्देशेचसर्वत्रजातिरूपदि
श्यतेनांतरीकंतव्यक्त्युच्चारणंअत्वंचह्रस्वदीर्घप्लुतेषुविद्यतेयथागोत्वंकृशेपिगोपिंडेस्थूलेशुक्लेकृ
ष्णेचेतिभावः। ननुचान्येति। आकृतिभेदोऽभेदं मन्यमानस्यप्रश्नः। अनन्यत्वाच्चेति। सत्यपिआकृतिभे
देएकाकृतियोगोस्त्येव। यथाकृशेस्थूलेपिचगोपिंडेगोत्वयोगः॥

माहात्वेचेतिप्रमाण्याकृतमभिधायगुणकृतभेदेप्याह। शुक्लइति। आकृतिः। श्रवणोपलब्धिः। भेदाद्भेदमिति॥
जातेरितिशेषः सत्यपीति। आकृतिभेदोहिव्यक्तिभेदसाधको नाकृतिभेदसाधकइतिभावः अतएवह्रस्वोयमकारोदी
र्घोयमकारइतिअत्वेन सामानाधिकरण्योनुभवः इकारादिषुत्वमननुभवान्न। अतएवोदात्तादयोनजात्यंतरप्रयोज ३४९
काइतितात्पर्यंनच आकारोयंनअकारइतिप्रतीत्यनापत्तिः तस्याव्यक्तिभेदविषयकत्वात्॥ ॥छ॥ ॥

भाष्ये। नैकांतेनेति अनियमेनेत्यर्थः अभेदेन समानाधिकरणइतिभावः तदाह। अभेदस्यापीतिप्रत्यभिज्ञाना
दित्यर्थः अकारोकारइत्येकाकारप्रत्ययाच्चेत्यपिबोध्यं। नासावन्यत्वमितिभेदप्रतीतिमेवेत्यर्थः। प्राणीतियद्य
पिप्राणित्वं नजातिस्तथापिसाधारणधर्मत्वाभिप्रायेणोक्तं। गवाश्वरूपेति। गोत्वाश्वत्वेत्यर्थः परेतुइस्व

योहीति। अभेदस्यापिप्रत्यभिज्ञानात्संग्राह्यइत्यर्थः। यस्त्विति। अत्रापि
यदाप्राणीनहंतव्यइतिप्राणित्वेनाश्रयणंतदाअभेदएवगवाश्वरूपाश्रयेण
तुभेदइतिभावः॥ ॥

षड्भेदवृत्त्येवात्वंदीर्घषड्भेदवृत्त्येवआत्वमित्यादिर्ननुचेतिभाष्याशयः सकलव्यापकमत्वमप्यस्तीत्यु
क्तं। ननुव्यापकआत्वेकोपिव्याप्यजात्याभेदोप्यस्तीत्यतआह। अनेकांतोहीति। व्यापकधर्मेणा
समानाधिकरणव्याप्यधर्मकृतोभेदः केवलभेदबुद्धिं नकरोतीत्यर्थइत्याहुः॥ ॥छ॥ ॥

ननुजातिनिर्देशोऽष्टनआद्दत्यादावपितन्निर्देशात् अकारादयः स्युः यत्नाधिक्यं तत्तयार्थस्यात् ह्रस्वोच्चार
णेतुअर्धमात्रिकस्यांतरतम्यात् ह्रस्व एवस्यादतआह। अष्टनइति। दीर्घव्यक्तीति। व्यक्तेरुपलक्षणत्वेआंतर
तम्याद्ध्रस्वएवस्यादिति यत्नाधिक्यानर्थक्यं तदवस्थमितिविशेषणत्वमेवतस्यादितिइतिभावः अत्वाति

अष्टन। आविभक्तावित्यत्रतुयत्नाधिक्यादीर्घव्यक्तिसमवेतसामान्यंगृह्यते। यथापूर्वंवयाब्राह्म
णः प्रत्युत्थेयइतिविशिष्टव्यक्तिस्थब्राह्मण्यमाश्रीयते। अपरआहेति। व्यक्तिरेवशब्दार्थः जाति
स्त्वशब्दार्थोप्यभेदप्रत्ययहेतुरस्तीतिसर्वव्यक्तीनामभेदेनाश्रयणादेकव्यक्तिनिर्देशेपिग्रह
णंसर्वव्यक्तीनांसिध्यतीत्यर्थः॥ ॥

रिक्तमात्वादिनास्त्येवेतितात्पर्यंकेचित्तुदीर्घषड्भेदवत्त्यात्वजातेरेवात्वव्याप्यायास्तत्रनिर्देशइतिवदंति। अशब्दा
र्थइति। शब्दजन्यप्रतीतिविशेष्यत्वाभाववानित्यर्थः यद्वाशक्यतावच्छेदकत्वेप्यशक्यइत्यर्थः। सर्वव्यक्तीनामिति।
जातिवैशिष्ट्येनप्रत्येकवृत्तिपरस्परभेदत्यागपूर्वकमभेदेनैकरूपेणाश्रयणात्तज्जात्याक्रांतसर्वव्यक्तीनांग्रहणंसिध्यतीत्यर्थः॥

DR. BHAU DAJI MEMORIAL

पूर्ववार्त्तिकेग्रहणाकरणेआकृतिग्रहणं हेतुः आकृतेरपिभेदशंकायामनन्यत्वाच्चेतिवार्त्तिकखंडः अ
परमतेग्रहणाकरणेसर्वव्यक्तीनामनन्यत्वंहेतुरन्यत्वेचाकृतिग्रहणं आकृतेर्ग्रहणंविशेषणत्वेनाश्र
यणं रूपसामान्यादित्ययमाकृतिग्रहणादित्यस्यार्थोपरमइत्येके। जात्याश्रयणमावश्यकमित्याह।

अत्रपक्षेआकृतिग्रहणमाकृतेरेकाकारप्रत्ययनिमित्तत्वेनप्रतिपत्तिरुच्यते। तद्वच्चेति। यथाकृति
ग्रहणं दएसुकार्यंसिध्यतितथाहल्स्वपिआकृतिग्रहणादेवसिध्यति। व्यक्तिनिर्देशपक्षेतुएकैवत
कारव्यक्तिर्द्विर्लब्धपदेशमासादयेत्। पूर्वपरावेत्यवात्तामितिलोपोनस्यात्॥ अबुद्धेत्यादावेव
तुस्यात्। धातुप्रत्ययावयवयोस्तकारयोर्भेदएवेतिचेत् तत्राह। अनेकांतइति॥ ॥छ॥ ॥

तद्वच्चेति॥ पूर्वापरावेतिभत्तयोरपिद्वित्वंनस्यात् अन्यतरस्यप्रत्याहारसूत्रोपात्तादन्यत्वादि
तिभावः। अवात्तामिति। वसेर्लुङि तसस्तामिरूपेसःसीतितत्वे झलोझलीतिसिलोपेरूपंनतुझ
लइतिसूत्रंचरितार्थमतआह। अबुद्धेति। बुधेर्लुङिरूपं। भेदएवेति। व्यक्त्योःपरस्परंभेदएवेतिभावः॥ ॥

न्नाष्ये। नैकांतइति। उपात्तास्पेदकधर्मसमानाधिकरणेन्नेदकधर्मइत्यर्थः प्रकृतेस्पेदकधर्मस्तत्वं। प्रयोगार्थेतुम
ध्यमेत्युक्ते द्रुतविलंबितयोरित्युक्तं। ह्रस्वदीर्घादीति। वृत्या। कालप्रमाणेनपृथक्त्वमितितृतीयासमासइतिषा
वः न्नाष्येतुशेषत्वविवक्षयाषष्ठी हेतौपंचमीवा आकृतिग्रहणादितिउक्तमइउण्सूत्रे न्नाष्येतद्वृत्तप

द्रुतेति। हल्ग्रहणेष्वेवेदमुच्यते। यत्रैतन्नास्ति। आएसवर्णान्गृह्णातीति अएस्तुव्यक्तिनिर्देशेपिग्रह
णकशास्त्रेणस्यादेववृत्ति। न्निन्नस्यग्रहणं। वृत्तिपृथक्त्वमिति। ह्रस्वदीर्घादिप्रमाणलक्षणापिवृत्ति
र्नन्नेदिकास्यादिति स्वद्वान्नि रित्यैसप्रसज्येतेति न्नावः। क्रियतइति। अवश्यकर्त्तव्यतांदर्शयति
व्यक्तिपक्षे एसवर्णान्गृह्णातीतिप्रसंगः सूत्रप्रत्याख्यानेतुआकृतिग्रहणात्। उदिद्ग्रह
णंकर्त्तव्यमेव नहिवर्णानामेकाकृतियोगोस्ति॥

रकरणं एवंच कृत्वा तपराः क्रियंते आकृतिग्रहणेनातिप्रसक्तमिति कृत्वेति एकाकृतियोगइति। तन्मा
त्रनिष्ठेत्यादि। उदिदितिच कुचुटुतुपूनांप्राचांसंज्ञातयेहापिव्यवहारः न्नतुसर्वत्रेत्संज्ञाप्राप्नो ३५१
ति॥ अनुवादेतदप्राप्तेरितिबोध्यं॥ ॥छ॥ ॥

नन्वण्ग्रहणप्रत्याप्रत्याख्यानेऽनुवादेष्विवविधावपिजातिनिर्देशात्सर्वग्रहणप्रसंगइत्यतआह।
न्नाव्यमानेष्विति। यथाश्रुतमितिजातिविशेषावच्छिन्नव्यक्तिविशेषरूपमित्यर्थः॥ उत्पत्तिवाक्य
त्वादिति। विधिवाक्यत्वादित्यर्थः। विधौहिप्रमितत्वाद्विशिष्टोपादानेनवाक्यन्नेदोनुवादेतुतस्य

न्स्यतेसूत्रेकुहोश्चुरित्यादौ न्नाव्यमानस्य उदित्वसामर्थ्यादप्रत्ययइति निषेधोनावतरतीत्य
णस्विवायंनिषेधः प्रत्याख्यानपक्षे न्नाव्यमानेषुयथाश्रुतरूपमुत्पद्यतइति। आकृतिग्रह
णेपिन्निन्नकालानांग्रहणंनन्नवतियथापशुनायजेतपशुमालन्नेतेत्युत्पत्तिवाक्यत्वात्सं
ख्याविवक्ष्यते। उदात्तादयस्त्वन्नेदकाइत्युक्तं॥ ॥

सिद्धत्वेनाप्रमितत्वात्तद्विशेषणोपादानं नवाक्यन्नेदमंतरेणन्नवति सचान्याय्यइतिन्ना
वः यत्तुकश्चिद्विधावपिव्यक्त्यंतरस्योपादानं तद्वाक्यन्नेदमंतरेणन्नवतिद्विवचनदित्यादौपरत्वात्तिंगा
दितिद्रष्टव्यमित्याहुः॥

कै० वि० १ ३५२ नांतरीयकत्वादिति। अनेन नांतरीयकविशेषणाविशेषय एव विवक्षाविचार इति ध्वनयति अत एव न श्रेयांसं प्र
बोधयेदित्यादौ अनुवाद्यविशेषणश्रेयस्त्वादेर्विवक्षायामपि दोषः वस्तुतो व्याख्यानमेव शरणं नांतरीयक
संख्यालिंगविषयन्याय्यस्य प्रधानव्यक्तिविषयकत्वानौचित्यात्। उपेयिवानित्यादौ उपेत्य विवक्षायाश्च
दर्शनात्।। लृकारेणाल्ग्रहणाय तु लृवर्णस्य ऋवर्णवद्भावो वाच्य इति तात्पर्यं।। परे तु जातिपक्षेपि त

अनुवादे तु नांतरीयकत्वादेकव्यक्त्युच्चारणेपि सकलव्यक्तिग्रहणं यथा ग्रहं संमार्ष्टीति
सर्वेषां ग्रहाणां प्राजापत्यनवग्रहा इत्यादिस्थो वाक्यैस्योज्ञातानां संमार्जनं।। ।।

परसूत्रेपि स्यु जातिग्रहणात् प्राप्तसवर्णग्रहणनियमार्थत्ववत्तत्प्रयुक्तसवर्णग्रहणनिषेधाय प्रत्यय
इति स्पष्टकार्यमेव ध्वनितं चेदं ज्यादादीयस इति सूत्रे भाष्ये किं च तत्र व्यक्तिविवक्षायां यत्र क्वचित् प्रयोगे
एकाकारव्यक्तिः साध्वी स्यात् न योगांतर इति व्यक्तिविवक्षया समाधानं दुर्घटमित्याहुः।। ।। ३५२

तपरस्तत्कालस्य।। ।।युजेः संबंधवाचकत्वेन संबंधस्योभयनिरूप्यत्वेन संबंध्यंतराकांक्षायामाह। न्यायेने
ति। प्रसिद्धत्वादिति। निष्ठांतयुजेः प्रायो न्यायसंबंधिन्येव प्रयोगादित्यर्थः नन्वेवं युज्यर्थेंतर्भूतत्वाद प्रयोग
इति कुतो नोच्यत इत्यत आह। धात्वर्थ इति। यद्ययमंतर्भूतः स्यात्तदा न्यायेनायुक्त इति प्रयोगो न स्यादि
ति भावः दंडेनायुक्त इत्यादिवचनस्यादित्यपि बोध्यं। एतेन मेघो वर्षतीत्यादौ प्रसिध्या जलमित्यो

तपरस्तत्कालस्य।। ।।अयुक्त इति न्यायेनासंबद्ध इत्यर्थः न्यायशब्दस्य प्रयोगः प्रसिद्धत्वान्न कृ
तः कदाचित्प्रसिद्धार्थस्यापि प्रयोगो दृश्यते न्यायेनायुक्तमिति। धात्वर्थेंतर्भूतस्य प्रयोगाभावो न हि प्र
वसति जीवति प्राणानिति तदित्यनेनेति। सकालो यस्येति कालसामानाधिकरण्येन तच्छब्दोपादानात्।
तदित्ययं च वर्ण इति परामृष्ट इत्यर्थः तपरशब्दवाच्यस्यार्थस्य तच्छब्देन परामर्शात्। वर्णस्येति। वर्णवाचिनस्त
च्छब्दस्येत्यर्थः।। ।।

देरप्रयोगादकर्मकतेति निर्बोक्तिः परास्ताप्रास्ते। प्रतिनिर्दिश्यत इति सामानाधिकरण्येन विशेष्य तद् इत्यर्थः
तदित्ययं च वर्ण इत्यस्य साकांक्षत्वादाह। परामृष्ट इति वर्णस्यैव परमर्शहेतुमाह। तपरेति तः परो यस्मा
दिति विग्रहे बध्यवधिमतोः साजात्यात्सवर्णत्वस्य वर्णनिष्ठत्वाच्च तेन वर्ण एवोच्यत इति भावः।। ।।

कै॰वि॰१ ३५३ एकार्थवृत्तित्वरूपसामानाधिकरण्यस्य शब्दधर्मत्वात् कथं वर्णस्य कालेनेति भाष्यमत आह। वर्णवाचिन इति।
सामानाधिकरण्यानुपपत्तिप्रदर्शनाय कालस्वरूपमाह। काल इति। अपरिच्छिन्नस्य विभोः कालस्य व्यवहारा
नुपयोगित्वादाह। प्रसिद्धेति। वर्णस्येति। गुणरूपत्वोद्द्रव्यरूपत्वादित्यर्थः अन्यमात्रे कालोपाधिरिति तु नयु

कालेनेति। कालवाचिनेत्यर्थः कालो हि प्रसिद्धपरिमाणा क्रिया अप्रसिद्धपरिमाणस्य क्रियांतरस्य परिच्छे
दिका यथा दिवसमधीयत इति दिवसशब्देनोदयादिरस्तमयान्त आदित्यगतिप्रबंध उच्यते। स चाध्य
यनस्य परिच्छेदकत्वात्कालः वर्णस्तु क्रियात्मको न भवति। तस्य काल इति यैव एकस्य वर्णस्य परिच्छे
दिका क्रिया निमेषादिः सैव यस्य परस्य तत्कालकालः। उष्ट्रमुख इति। गम्यमानार्थत्वात् द्वितीय मुख
शब्दाप्रयोगः उष्ट्रो मुखमस्योष्ट्रमुखः न च प्राणी प्राण्यन्तरस्य मुखमिति सामर्थ्यात्सादृश्यस्य प्रतीतिः स
मग्रेण चोष्ट्रेण मुखस्य सादृश्याभावादुष्ट्रशब्दोऽवयवे वर्त्तते मुखेनैव मुखसादृश्यं प्रसिद्धमिति सामर्थ्यादु
ष्ट्रमुखमिव मुखमस्येत्यर्थो गम्यते॥

क्तं दिवसादिव्यवहारस्य सूर्यक्रियादिभिरेव दर्शनात् इति भावः एतत्कालस्वरूपकथनं कालाः परिमाणि ३५३
नेति सूत्रस्य भाष्यविरुद्धमिति तत्रैवोपपादयिष्यते। सैवेति तज्जातीयेत्यर्थः॥ ॥छ॥ ॥

तदीया क्रियेति। उच्चारणरूपेत्यर्थः। क्रियांतरस्य। वर्णांतरोच्चारणस्य। वर्ण एवेति। वर्णाश्रितक्रिया
गतपरिच्छेदकत्वस्याश्रये उपचाराद्वर्णपरामर्शितत्तच्छब्दस्य मुख्यवृत्तेरेव कालशब्देन सामाना
धिकरण्यमित्यर्थः पूर्वव्याख्यात विशेषमाह। वर्णस्येति। अनेन लक्षणाबीजं संबंधो दर्शितः क्रि
यायाः परिच्छेदकत्वं सापेक्षं न स्वतंत्र इति दृष्टान्तेनाह। यथेति भाष्ये। व्यापकमिति स्वतंत्रविधायक

एवमिहापि वर्णः कालो न भवतीति सामर्थ्यात्तदीया क्रिया क्रियांतरपरिच्छिन्ना सती क्रियांतरस्य परिच्छे
दिकेति वर्ण एव परिच्छेदक उच्यते। अथवेति। वर्णसहचरितायां क्रियायां तच्छब्दो वर्त्तते। स कालोऽस्येति। त
द्वर्णसमवेता क्रिया परिच्छेदिका अस्येत्यर्थः यथाश्मादि द्रव्यं द्रव्यांतरपरिच्छिन्नं सुवर्णादीनां परिच्छेदकं तद्व
त् क्रियापीत्यर्थः। दीर्घग्रहणादिति। नेदकाउदात्तादय इति भावः। तत्रेह वृद्धिरादैजिति षण्णामाकौ
राणां वृद्धिसंज्ञेष्यते। एकस्यैव तु दीर्घस्य स्यात्। तपरकरणे त्वैजर्थमेव स्यात्॥ ॥छ॥ ॥

ग्रहणासंबंधएवभाष्यतात्पर्यमितिभावः।व्यपदेशिवद्भावेनकेवलेपिसिद्धमितिइहचनेतिभाष्यमयु क्तमतआह॥व्यपदेशिवादितिसनिषेधः प्रत्ययविधौतन्मात्रोपयोगिसंज्ञाविधौचेतिभावः।तदनाश्रित्येदं॥ ॥ ३७५

ननुनपुंसकेभावेक्तल्युटौ घञपवादौ स्त्र्यधिकारात्परतोवासरूपविधिश्च नेतिसंबंधमिति नपुंसकग्रपमैकवचन मनुपपन्नमतआह। द्वितीयांतमितिनपुंसकेपीति घञन्नया। पुंसीतिभावघञ्विषयकं क्वाचित्कं चेतिभावः चेत

संबंधमिति। द्वितीयांत मेतत्संबंधमनुरोत्स्यतेनहास्यतीत्यर्थः अपवासंबध्यतइति संबंधकर्मणिघ
ञ्नपुंसकेपिबाधकाभावात् नवतिरद्धिग्रहणासंबंधांगादिग्रहणमिहानुवर्त्ततइतिनास्तितस्यत्य
दादित्वेः संबंधः तद्यथेति।एतद्दर्शयतिस्वरितत्वप्रतिज्ञानादुत्तरसूत्रएवयोग्यत्वाद्य स्याचामाद्रि
रितिसंबंध्यतेएङः यस्याचामादिस्तद्वृद्धमितिवाक्यार्थसंपादनायइहत्वयोग्यत्वात्संबंधानुपप
त्तिः तुल्यजातीयस्यनिर्धारणात् त्यदादीनांचावेश्रमत्रूपत्वान्नावाद्यस्याचामादयस्त्यदादयइति
संबंधाभावात्॥ ॥७॥ ॥

नावतस्त्यागोपादानेसंभवतः यस्यादिरित्यस्यतुकथंतेस्यामतआह।एतादितियोग्यत्वादिरित्यस्येङित्येकवचनांतेनसं बंधइतिशेषः।तुल्यजातीयस्येत्युपलक्षणात्युदादीनीत्यनेनादिरित्यस्यभिन्नविभक्तिकत्वाच्चेत्यपिबोध्यं॥७४॥ ॥

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी

कै॰ वि॰ १
३७६

एङ्प्राचां॥ ॥कुणिनेति विषयसंबंधज्ञापनात्प्राग्ग्रहणमाचार्यनिर्देशार्थं अन्यथा प्राग्देश इत्येव वदेत् इति
भावः ज्ञाप्यावैषम्याय च व्यवस्थितविभाषाश्रयणं तत्फलमाह। तेनेति अन्येन त्विति शिष्टान्वये संभवत्यनेनान्वयो
नुचित इति तद्भावः वाहीकश्च देशविशेषः तत्र स ग्रामः प्राग्देशबहिर्भूतः वाहीकदेशश्चोभयसंबंधः प्राग्देशबहिर्भूतो

एङ्प्राचां॥ ॥कुणिना प्राक्ग्रहणमाचार्यनिर्देशार्थं व्यवस्थितविभाषार्थं चेति व्याख्यातं तेन क्रो
डो नामोदग्ग्रामः तत्र भवः स्त्राव्यकौरस्तु कुणिदर्शनमशिश्रियत्स्त्रैपुरं स्त्रौनगरं वाहीकग्रामो तत्र
२× दत्तो नाम वाहीकेषु ग्रामः तत्र भवो देवदत्त इत्यवृद्धत्वात् टञ्ञिठौ न भवतः× वृद्धत्वात्। वाहीकग्रा
१× क्रौड इत्यणेव भवति अन्येन तु प्राक्ग्रहणं देशविशेषणं व्याख्यातं तेन देव× मेभ्यश्चेति ञिठौ भवतः॥ ॥

वा अत एवाव्ययात्यविति सूत्र शाकलनाम्नो ग्रामस्य उदीच्यवाहीकोभयरूपता भाष्यकृतोक्ता एतेनोभयबहिर्भूता
वाहीका इत्यपास्तं। वाहीकग्रामाविति आद्यः अस्याप्राग्देशीयाविति शेषः पूरणीय इति बोध्यं। अन्यथा कुणिमताश्रय ३७६
णोऽस्य प्रमाणता नोपपद्येत वञ्जिगविति वाहीकग्रामेभ्यश्चेत्यत्र वृद्धादित्यनुवृत्तेः॥ ॥छ॥ ॥ ॥

प्रागुदग्विभागस्तु शरावत्यास्तु योऽवधेः देशः प्राग्दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तर इत्यमरेण दर्शितः शरावती चोत्तरपूर्वाभिमुखी
स्यिके ऐशानीतो नैरृत्यां पश्चिमाब्धिगामिनीस्येत्यन्ये। उभयथापि प्रागुदक्स्वरूपेन विवादः। वाहीकलक्षणं च पंचानां सिंधुषष्ठाना
मंतरं ये समाश्रिताः वाहीका नाम ते देशा न तत्र दिवसं वसेदिति कर्णपर्वणि। एवं च धर्मबहिर्भूतत्वाद्वाहीकत्वं शतद्रू विपाशा एवती
ति वस्ता चंद्रभागेति पंचैनद्यः सिंधुः तन्मध्यदेशो वाहीक इति तद्व्याख्यातारः कुणिमताश्रयणे शैषिकेष्वित्यस्य वैयर्थ्यं व्यव

शैषिकेष्विति। वचनादयत्यविकारयोर्वृद्धलक्षणप्रत्ययाभावः। क्रौडदेवदत्तयोस्त्वप्राग्देशवाचिनोर्व्यवस्थित
विभाषया न भवतीति प्राग्देशवाची नस्तु देवदत्तस्य वृद्धसंज्ञकत्वात् काश्यादित्वाद्वृद्धलक्षणौ ठञ्ञिठौ भ
वतः॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे प्रथमस्याध्यायस्य नवममाह्निकं समाप्तं॥ ॥छ॥ ॥

स्थितविभाषयैव सिद्धेरतोऽन्यमताश्रयेणैव भाष्यं भाष्यप्रमाता वाहीकग्रामावपीत्यन्ये। भाष्योक्तव्यवस्थितविभाषातिरि
क्ता न व्यवस्थिता इत्यस्यार्थस्य शैषिकेष्विति ज्ञापकमित्यपरे अपत्येत्यादि उदीचां वृद्धादिति नित्यं वृद्धेति चेति सर्वेष्टसिद्धिः॥ ॥
॥इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते भाष्यप्रदीपोद्योते प्रथमस्य प्रथमे नवममाह्निकं॥ ॥छ॥ ॥त्रिवसुरसक्ष्मा
के वर्षाऽब्दे अयने तथा॥ तपः कृष्णे तु सप्तम्यां चंद्रवारेण पूर्णता॥ ॥वाराणसीनिवासीलक्ष्मणयादवस्येदं पुस्तकं जानी आशारामेणालिखितं॥ ॥

॥इति कैयटविवरणप्रथमाध्यायस्य प्रथमः पादः समाप्तः

अथ प्रथमाध्यायस्य द्वितीयपादप्रारंभः

श्रीगणेशायनमः॥ गाङ्कुटादिभ्योऽञ्णिन्ङिदितिदेशत्वेनवार्त्तिकानुत्थानमाशंक्याह चत्वारोह्येतेति। उपहिताः दूषणद्वारा
साक्षाच्चोक्ता इत्यर्थः तत्राद्येति। तत्रहिगाङ्कुटादिभ्यः परोऽञ्णित्प्रत्ययः ङित्संज्ञकः ङकारयुक्त इत्यर्थः। तयोरिति तच्छब्देन गुण
भूतयोरपि इकारककारयोर्बुद्धिस्थतयापरामर्श इत्याह भाष्ये ङकारककारयोरिति। यथाचैतत्तथावस्यायुक्तं ङित्वकि
त्वयोरप्रसिद्धिरिति लक्ष्यवहाराप्रसिद्धिरित्यर्थः तदाहयेन तस्येति सत्वेवेति यद्वदिरिति शेषः अञ्णित इत्यहणं वैयर्थ्यापत्त्या

श्रीगणेशायनमः। गाङ्कुटादिभ्योऽञ्णिन्ङित्। चत्वारोऽत्र पक्षास्तत्र पक्षित्तभाष्ये ङित्वकित्वसंबंधप्रतिपादनं। भा
वनं। सज्ञाकरणं अतिदेशश्चेति। तत्राद्यपक्षनिराकारणपरवार्त्तिकमुपन्यस्यति। ङिच्चिद्वचन इति। सताहीति विद्य
मानेन वक्तृना संबंधोर्थस्य शक्यते कर्तुं न चयोः गाङ्कुटादिभ्यः परस्य प्रत्ययस्य ङकार इत्संज्ञोऽस्ति येन तस्य ङिदिति व्य
पदेशः स्यात्। सत्वे वा भूतानुवादे प्रयोजनाभाव इत्यर्थः। भाष्यमापततीति। नचगाङ्कुटादिभ्यश्चपरे ङकोङितोऽनेनवि
धानमुपपद्यते। अञ्णित्ग्रहणानर्थक्यप्रसंगात्॥

चमोराजीति वल्लोपाभावार्थमनुवादय इति नशंक्यं। ननु विशेषविधानादिशब्दैरसता विविधायोनशशास्यसंबंध
प्रतिपाद्यते इति चेन्न। तद्दस्याप्यप्राप्तमात्प्रसंगात्प्रजित्। ग्रहणेति। न च वक्ष्ये दिति विहितञ्यङकमेणि ङश्चव्या
वृत्त्ये न तदिति वाच्यं ङॉङ्कुटादिभ्योऽनेन तयोर्विधानेपि प्रत्ययाधिकारे स्यपागभावेन प्रत्ययत्वाभावान्नकारण
कारयोरित्वाप्रवृत्तौ ञ्णितोस्तयोः संभवात्। भाष्ये भाष्ये नेनार्थनेनेति प्रकरणेनेत्यर्थः॥ शि०शा० ९ ३७८

ननु भाष्ये तदित्यपयुक्तं पंचमीति निर्देशेनादेशविध्यसंभवादत आह। गाङिति। गाङादिभ्यः परस्य प्रत्ययस्य तत्त्वादेः सिद्धत्वाद्विशेष
णपरविधिनात्पर्यमित्याह ङकार इति। नन्वेवं लोपस्यापरूपकत्वेन विधानं व्यर्थमत आह इतांचेति। एवं च कार्यार्थं विधान
मिति भावः। ननु भाष्यमानः सर्वो ष्यादेशः पदेत्यत्रमानाभावादादेशप्रतिषेध इत्ययुक्तमत आह ष्ट्वेति अनेनागमत्वं निरा
कृतम्। उरग्न परवदनंतरोस्त्विति चेदत आह ङ इत अनंतर इति। नन्वेवमपि बहुव्रीहौ। गाङिच्छब्दे न प्रत्ययाभिधानात्तस्यचा
नैकाल्त्वात् कथमादेः स्यादत आह तत्पुरुष इति न च तस्यादित्वे इत्वं व्यर्थं नशक्तः ङित इत्येव सिद्धेरिति वाच्यं। अतद्धि

भाष्ये नेद्रति। गाङ्कुटादिभ्योयोऽञ्णित्प्रत्ययः स ङिद्भवति। ङकार इत्संज्ञकस्तस्य भवतीत्यर्थः। ननु ङकार आदौ मध्ये
ते वेति निर्देशाविशेषं नापेक्षते। इदमपि कुतः तस्येव विधानात्। इतां धर्मी श्रूयमाणानामपि कार्ये प्रति विशेषकत्वं भवती
तिच्चेदिति। टित्वकित्वमित्वानामभावात् ङ इदनंतरोऽस्येति। अनंतरार्थे बहुव्रीह्यभावाच्चादेः परस्येत्यादेः स्थाने ङ
कारः आदेशः प्राप्नोतीत्यर्थः। ङ इत्त इति तत्पुरुष एवन्याय्यः स्वपदार्थप्राधान्येन तस्यांतरंगत्वात् बहुव्रीह्यर्था
नुपपादनाच्च। कुटिनेत्यादौ प्रसिद्धङित्वाश्रयणादयोऽयथादेशाः क्रियंते न तदानेनैतदर्थाभिधाने समर्थाः। तदादये श्चे
हशास्त्रेन प्रसिद्धाः। अथास्मादेक्षवचनादपूर्वाः क्रियेरंस्तदा ङिच्चेत्यंत्यस्य स्यात्॥

न इति पर्युदासेन प्रत्ययसंज्ञाकालिकादेरेव तेनेत्वविधानात् अनुपपादोनुपपत्तिः तामेवदर्शयन्नि कुटिनेत्यादाविति
अन्यथास्मादेवेति। अनंतरत्तम परिभाषाकं स्फुतादित्यर्थः अंत्यस्य स्युरितिनवङित्वस्य गुणप्रतिषेधाद्यर्थत्वेन चारिता
र्थ्यात्तान ङन्यायेन सर्वादेशो भविष्यतीति वाच्यं। गुणप्रतिषेधाद्यर्थत्वे सर्वादेशत्वं सर्वादेशत्वे च तदर्थमिसन्योश्रयेण
सर्वादेशत्वेनाभेत्यादेशत्वापत्तेरिति भावः। तात ङस्तु यथा सर्वादेशत्वं तथोक्तं॥

कौ०वि०
२

भाष्ये तस्मादित्युत्तरस्येति एवं चादेः परस्येत्यस्य प्राप्तादेशापत्तेरष्टासिद्धेः सन युक्त इति भावः सौत्रः स्तोय थासवीदेशात्वंतथ्ये(सं)
प्रसारणंव्यर्थं हि ज्येत्य। तेन गाङ्कुटादिभ्य इति व्यर्थमेवानुवदेदिति भावः भाष्ये क्ङितन्त्वहणमिति क्ङिति चेत्याद्यवित्य
र्थः कृत्रिमेति उभयगतिमतान्ते इदं दृशालं बोध्यं भाष्ये एवञ्चुसदत्त इति सौत्रप्रदर्शनं। अवृतदत्तमिति। अस्योर्ये चेत्यादि
नसहनिर्दिष्टे भेद इति निर्दिते भेद इत्यर्थः। अतिदेशगतिरीतिलुक्तलाभ इत्यर्थः आहार्यारोपस्य तत्कार्यबोधनकलक
त्वादिति भावः व्यपदेशातिदेशो किं व्यपदेशाविरुद्धाकिंतु व्यपदिश्यस्य स्वाश्रयस्यनिवर्तनात्सहकार्येतिव्यपदेशः ङित्वा
दिरूपनिमित्तं करणेघजय दितु अतिदिश्यमानविरुद्धकिंतु व्यपदेशस्य स्वाश्रयस्य निवर्तनात्सहकार्ये तिव्यपदेशोङित्वो

कथं पुनरिति। इत्संज्ञोह्यसन्नेव कार्यमात्रं प्रतिपादयति। आदेशस्तु भावरूपो ह्यन्यस्य प्रसंगो भवतीति। किंही
ति। लोपस्य यथा आदेशत्वं तथाङ्कारस्यापि इत्संज्ञकस्य भविष्यतीत्यर्थः। तत्र स्थानिनं निवर्त्य ङकारो निवर्ते
तासंज्ञाकरणइति। अल्पपरिमाणसंज्ञा कृतेति स्पष्टातिरिक्ताद्वोच्चारणे संज्ञास्वरूपानुपलंभात्संज्ञिनां संप्र
त्ययः। ङित्संज्ञाकरणं च। कुटादित्ववचनात्संप्रसारणार्थं स्यात्। लिटः कित्संज्ञावचित्ववीति संप्रसारणार्थी
स्यात्। गाङ्कुटादिभ्यस्तु हि ङित्संज्ञा किमर्थं स्यात्। अनर्थिका भवति न्यायानुमते ऽर्थे किं कुर्मः। क्ङिति चेत्यादि
बुद्धोगिकस्यैव ग्रहणं स्यात् यस्य करोङ्कारश्चेत्संज्ञकः। अनयोरेवेति कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्यय इति
न्यायात्। च सन्दानां तु। वङित्करणं क्ङित्यदेशो बुधग्रहणार्थं स्यात्। यत्र संज्ञारूपानुपलब्धिः। एवञ्चुसदत्त इति
निर्दिते भेदे तत्कार्यप्राप्त्येत द्रूपारोपतो किं यत इत्यतिदेशगतिः। अकिंद्विधिप्रसंग इति। कार्यातिदेशोतन्त्रतिवद्धानि
कार्याणि व्यपदेशान्तरेण विभक्तानि गुणनिषेधादीनामेवातिदेशः॥
ङित्वादिरूपं निमित्तं करणे घञ यदि तु अतिदिश्यमानविरुद्ध स्वाश्रयकार्याभाव अतिदेशस्वभावसिद्धः यथा तत्रैव दृष्टांते
मघवानादित्विवसिरितिनतेवत्तथापि परिहारांतरस्याभिधास्यामानत्वान्नैवंनसुत्रुनिरूपितं भगवता॥ शि०श०
३७०

विशिष्टमात्रेति। ततः परस्य यतन्नातिदिश्यत इत्यर्थः सत्सम्यर्थे यितेरविधानादाह सत्सम्यर्थे इति यद्यपि सत्सम्यर्थत्वं
तेकदेशस्तदर्थे प्रयुक्तः सत्यातत्यभामेति वदित्यपि भाष्याशयो वक्तुशक्यत्तथापि तार्थं धातुकमिति सूत्रविषये पचेतानि
त्यादौ आतो ङित इति स्वकार्यं स्यादिति देशानापत्तिरत आह अयंभाव इति। तद्रूपासंगः तद्रूपारोप इत्यर्थः निर्लिंगव्याख्यानम
युक्तमत आह। उपदेशेति। पूर्वस्येति। परनिमित्तस्येत्यर्थः भाष्ये सत्सम्यर्थे पीत्यपि नाषष्ठ्यर्थसिनहल्तेनोभयसिद्धिः तेन तुल्य

अभागमस्तु स्वाश्रयः केन निवार्यतेोयथा ब्राह्मणवदतिदेशः क्षत्रियस्य स्वाश्रयं युद्धादिन निवर्तयति। अकि
तीति च पर्युदासाश्रयणात्। किंतु निवद्धकार्याभावात्स्वाश्रयोभागमः स्यात्। सिद्धं त्विति। प्रसज्यप्रतिषेधे आ
भागमनिषेध एव किं कार्यं सिद्धं तु पूर्वस्येति। विशिष्टमत्र ङित्कार्यमतिदिश्यते न सर्वमित्यर्थः। सत्सम्यर्थे पी
ति। सत्सम्यर्थे वर्तमानादिवार्थे वतिरित्यर्थः। ननु नेह विरूपात्सत्तकथमयं परिहारः। अयंभावः यथातम
ति। सत्सम्यर्थे विद्यमानादिवार्थे वतिरित्यर्थः। एवमिहापि व्याख्यानात्। विशि
ष्टकार्यप्राप्त्यर्थे वा ब्रह्मदत्तवातेय अपितु कस्यचिदेव कार्यस्य लाभार्थः। एवमिहापि व्याख्यानात्। विशि
ष्टङित्कार्यातिदेशार्थ एवाजिणतः प्रत्ययस्य तद्रूपासंगः। उपदेशग्रहणानुवृत्त्या वोपदेशो यो ङित्स्याद्य
त्तानेव इमिति सामर्थ्यात् पूर्वस्य कार्यातिदेशोयं। अथ किमर्थमिति। कार्यार्थत्वात् अनुबंधासंगस्यैके
नैवानुबंधेन गुणनिषेधादेः सिद्धत्वादनुबंधभेदोऽनर्थक इति प्रश्नः। एकस्य चानुबंधस्य करणेति देशा
विभेदेन न कर्तव्यः
मित्वित्यं नैकदेशत्वाभावेनात्पर्यात्। तेन ततः परस्य यत्कार्यं तत्त्रेति बोध्यं। अनुबंधभेद इत्यस्य प्रत्ययात्तवित्यादिः अति
देशाविभेदेनेति अल्पप्रकरणे इत्यादिः अपि नातत्सत्वदेशो वचोभयग्रहणं न कर्तव्यं भवतीस्य चितं श्वेतिभावाद्धेद्भ्वो
रिति च इज्यत्तं नित्य दूवच्चेरस्यतिवर्त्तीत्यद्भवच्चतुमित्युम। सर्वत्र ङित्त्वे कृत्त्वेवादेशाः यथेह भवतीति भाष्यस्य यथेहग्रन
इत्यादौ संप्रसारणं भवति तथा वज्रादावपि स्यादित्यर्थः

कै०वि० ३

भाष्ये अथाङ इति एव मानुपूर्व्वी कथं प्रत्यय इति भावः अन्यथा कलाभावाद् उपसर्गविशेषेऽत्र ङिदित्यनमुञ्चस्तो भाष्या संगतिः स्यश्चेति केचित् भाष्ये अपर आहेति यद्यपि सर्वत्र ङित्वे किं त्वे वा सूत्रेऽस्त्यत्र मेवो वाहातथ्यमेवं च सर्वथा जागर्ति इत्यादौ गुणभवनमसिद्धमिति भाष्यदृष्टान्तासंगतिः तथा विजागरितः इत्यत्र सिध्यर्थमन्यतरद् वियदितस्सूत्रे न क्रि यतेनदा यत्नं च इत्यादु न्नूस्कूकु दादी सप्तमी निर्देशादिति। पूर्वस्य कार्येति देङ्त्यस्य परिमिन्नकार्ये इत्यर्थः स्वकार्ये वि ध्यतएवातो ङित इत्यादीति बोध्यं ननु नञ्केति निषेधः औपदेशिकस्येवेति न दर्शित आह नत्वेति। न त्वौपदेशिकस्यप्र

आवस थ इति तु दिवि सिभ्यां ङिदित्यतो ङिदिति वर्त्तमाने उपसर्गविशेषे इत्यथ प्रत्ययः। ज्ञान इति। किति गुणाइ
ध्यते न विति। एवं च विषयविभागः पृथगनुबंधो वा दानेल भ्यते। नु वित्तेति। सूत्त वे धू विधूनने। किती तिस
प्तमी निर्देशादिट्प्रति षेधस्याप्यतिदेशः स्यादित्युपन्यासः। न त्विट्प्रतिप्रतिषेधः पूर्वस्य कार्ये। कुटित्वेति
नत्का सेडिति निषेधो विशेषा नुवादानादौपदेशिकवनातिदेशिकस्यापि कित्वस्य स्यात्। अथवा यत्प्राप्तं
कार्ये तदति दिश्यत इति त्वाप्रत्यये कित्वातिदेशेन श्वाश्रयस्य कित्वस्या निवर्त्तनात् येन नाप्राप्त इति न्यायं
भावाच्च। न हि कुटित्वाकुटितुमित्यादौ कित्वप्राप्ते ङित्वारंभः॥

थमोपस्थितत्वेन तन्नि षेधेन चरितार्थमातिदेशिकं न निषेधेनेत्यरुचेराह अथ वेति न स्यादिति कुटादिभ्यः प
रस्य कित्व विधाने त्वन्यत्र चरितार्थं कुटित्वेत्यादौ कित्वप्रतिषेध एव स्यात् ननु कित्वमिति भाष्यास्तरार्थः एवं च
कुटित्वेत्यादौ गुणः स्यात्। ननु प्रथमानुबंधकरणे पि नु वित्वेत्यादौ कथं भुक्त इति निषेधोन औपदेशिककित्वस्ये
दित्य आह ङित्वे नेति भाष्यत स्मादिति एवं चादेशो यं च इति स्थितं॥

ग्रं०ग्रं० ३८०

सार्वतु लिंगादि ति। वचनादीनां ङित्वादित्यर्थः तुल्यजातीयस्य ज्ञापनेन आजादौ ङित्वमतिव्याप्तं। धातुप्रत्ययसामान्यविषये
तु ज्ञापके व्याप्तमिति भावः अर्धधातुक शब्दस्य च रसाधर्थ्य टगंत विनो तो दात्तत्वाद् दच्चोंतोदात्तादिति ठ आत्तीतीत्यत आह
अर्धेति अर्धधातु शब्दः तत्पुरुषे तो दात्तः ततश्च भवार्थे ठक् च इति ठञ् जित्वादाद्युदात्तत्वमिति भावः भवेति। तेषु
भवासत्तार्धधातुकमित्यर्थः ठञंतत्वादिति। आर्धधातुक शब्द स्येत्यर्थः आर्धधातुक संज्ञो भासत्तित्वेन भवानार्धधातुकं
यानित्यर्थः आर्धधातुके इति वदार्धधातुकानितिविक्रम्ये आर्धधातुकीयानि सुक्तिः। प्रियतद्धितादस्तित्यात्यादि निन्याय
नेति बोध्यं ननु हेङित्वे नैव सिद्धेतदादेशातात ङ्गे ङित्वसार्वधातुकाङित्वस्य ज्ञापकं स्यादत आह तातङस्त्विति पित्वान् ङित्वा

सार्वधातुकमपित्। लिंगादव्याप्ति। रतिव्याप्तिं चेति प्रदर्शनाय सार्वधातुकग्रहणस्याक्षेपप्रति समाधाने भाष्यका
रेणोपन्यस्ते। आर्द्धधातुकीयानिति अर्द्धधातुषु भग इति ठञंतत्वादन्तोदात्तत्वाभावात् व द्वचोंतोदात्तादिति ठञ
भावेन्नद्धाछो भवति। तातङः स्तु ङित्वं तिपः पित्वात् प्राप्तमित्यज्ञापकं साधर्म्युक्ताङित्वस्य द्विनिषेधो ङित्वमज्ञापकं अ
स्य हि पित्वात् ङित्वाप्राप्तिः। अवतेञ्जवंत इति गुणात्पूर्वं नित्यत्वादुत्तरंगत्वाच्चैकादेशस्तत्र कृते परस्येहापित आ
श्रितत्वात् परस्य कार्यवत्त्वादिवद्भावात् गुणनिषेधः स्यात्।

प्राप्तिरिति तद्भिन्नत्वेत्यत्रानुगार्थमनुदात्तार्थं चावश्यकमिति भावः एवं च पूर्वसूत्रे हि निर्देशादिहापित इत्याश्रयणमिति नात्य
र्थं यद्वाङ निषप्रसक्तिरिति प्रभृतकाणानामिति वप्रसक्तिः पाठ इति तात्पर्यं। लुङ्लिङ्करणानामिति ते चाशक्तेन प्रत्यादिव
द्भावादिति शब्दफलला भाषा दिवत्वमेव प्राप्नोति नत्वंतवद्भावः तेनहि ङित्वाभावार्थः फलति नतु शब्द इति भावः साधा
रणति व्याश्रयेण्यस्य प्रवृत्तिमाक्ते त्वस्कृत स्कविभिन्नतिमित्ते पर त्वतिभिन्नप्रस्थानिकेन त्परिभाषाप्रवृत्तिरिति
भाष्याशयः

DR. BHAU DAJI MEMORIAL

इधि भवति। इष्टासिद्धिमेव दर्शयति नि वमूवेत्यजि तिि। ननु किल्वविधानसामर्थ्यादनिग्लक्षणा याञ्जपि वद्धेः प्रतिषेधो भविष्यतीत्यत आह गुणमात्रेति एवं च तन्निषेधेनास्य चारितार्थ्येनानिग्लक्षणवृद्धिनिषेधकत्वे मानाभाव इति भावः। ननु छंद

इधि। किमर्थमिति। विनापि सूत्रे णेष्टं सिध्यति सत्यपि चेष्टं न सिध्यतीत्याह। वभूवेत्यजलक्षणत्वाद्वृद्धेरिग्लक्षणत्वाभावात्प्रतिषेधाप्रसंगात्। गुणमात्रनिषेध एवानुवम्यविषय इहं वभूवेति च गुणाभावप्रसंगस्यादिति प्रश्नः। इंधेरिति। भाषायां लिट आमा व्यवधानाच्छंदस्यमंत्र इत्यो प्रतिषेधात् दित इदं। न त्वस्य भाषायां प्रयोगाभावः। तत्र छंदस्युभयथेति लिटः सार्वधातुकत्वात् समीधइति ङित्वान्नलोपः। आर्द्धधातुकत्वात्त्वप्रश्नमभावः व्यत्ययो बहुलमिति वचनाद्वानित्यो बुगिति। ॐ सुपित्यत ॐ रितिनानुवर्त्तत इति भावः। एकदेशविकृतस्यानन्यत्वाच्च शब्दांतर प्राप्त्यभावः। सत्यामपि शब्दांतर प्राप्तौ कृताकृतप्रसंगित्वात्त्वुको नित्यत्वं। वु कि कृते गुणस्य प्राप्तिरेव नास्तीति नैतयोक्तल्यवलत्वं

स्येव समीधेइत्यादौ न लोपार्थं कित्वमावश्यकमत आह तत्रेति। नन्वेवं निकरणस्यादत आह आर्धेति नन्वेवं शब्दांतर प्राप्तिः कुविनस्यादत आह सत्यामपीति। श्रौतरूपमादायेति भावः॥

मृडमृद विपरीतेति विशेषणी भूजम्जादिसंकोचस्यन्याय्यत्वादयं न्याय्य इति भावः न च लौकेप्रधानसंकोचप्रयचन्याय्यत्वे न व्य द्रियतेरा इ: संकोचः कार्य इति। राजनिमित्तं स्वव्यवहारसंकोचस्तरस्यः कर्त्तव्य इति तत्स्थौ तस माधस्ते व्याख्यानादिति विशेषणां स्यादिति। सुखेत्यादि चष्यावर्त्यं स्यादित्याहुः अनस्यानर्थकत्वे नैवचारणादि शेषणाव्यावर्त्यं चित्यं वस्कृतः कः कित्वसामर्थ्यादिवतुल्यजातीयानेत्तौ नियम इति बोध्यं भाष्ये विभाषितेऽमहणमुपलक्षणमित्याशयेनाह गुधेति। ननुहद

मृड। मृडादिभ्य एवेति। विपरीतनियमस्तु व्याख्यानान्न विष्यति। मृडादिभ्यः क्त्वा एवेकिदिति। नद्य नियमार्थे शास्त्र प्रवृत्ति र्लक्ष्यमूलत्वाद्व्याकरणस्मृतेः लक्ष्येति। क्त्वात्रस्य नियमः स्यात्। किं त्वं तु क्त्वातोऽसुकसु न इत्यादौ विशेषणार्थं स्यात्। एवमपीति। क्लिशः क्त्वानिष्ठयोरिति विकल्पेनेड्विधानात्। अस्तु नाम इति। मृद मृद वद वसां क्त्वः कित्वविधानं नियमार्थं गुध कुष क्लिशीनां तु रलो व्युपधादिति विकल्पे प्राप्ते नित्यार्थं। तत्र विधिसंभवे क्लिशेरनिटः क्त्वः कित्वविधानं नियमार्थं न भवति। मृद विद सनर्थमिति। तत्र चरितार्थत्वादनिटः क्त्वः कित्वविधानं नियमार्थं न भवति॥

विदेति सूत्रे स्वपि प्रच्छि ग्रहणमनिटां नियामकं स्यादतो भाष्ये रुद विद स्वपीति तत्र सूत्रे स्वपि प्रच्छ्योर्ग्रहणमिति त्यर्थः। न ध्वनयः स्यात् चष्टेत त्रैति व्याख्यानात्तत्कृपानसंवंध इति भावः स्वपिप्रच्छ्योः क्त्वः कित्वविधानमनिटः क्त्वो नियमार्थं न भवतीत्य० न्वयः॥

कैं०वी० ६

इको झल्ः सूत्रे किमर्थमिति। वक्तव्यमिति। क्तः परस्येत्युक्तमत आह इक इति। उत्तरार्थं सूत्रमावश्यकमिति भावः। अत एवे
कधातोर्नित्यं गुणोऽस्त्विति। त्वरार्थाधिकानुरोधात्। ननु गुणस्य परत्वात्कथं दीर्घो बाधक इत्यत आह अस्तु नेति। एवं चानवकाशत्वा
त्वाद्दीर्घो गुणस्य बाधक इति भावः। भाष्ये कृते भवेदिति। अनवकाशत्वेन बाधकस्य प्रवृत्त्युत्तरमुत्सर्गस्य प्रवृत्तेरंगीका
रादिति भावः। शास्त्रं प्रवर्त्तमानमिति। एवं चादृष्टार्थं प्रवृत्त्या शास्त्रस्यानर्थक्याभावान्न बाध इति भावः। शास्त्रमान

इको। किमर्थमिति। इको झल्। हलन्ताच्चेत्येक एव योगः कर्त्तव्यः किमर्थो योगविभाग इति प्रश्नार्थः। व
क्ष्यमाणश्चात्राभिप्रायः। दीर्घत्वमिति। अज्झनगमां सनीति दीर्घत्वं नाप्राप्ते गुण आरभ्यमाणं तस्य बाध
कमिति भावः। कृते भवेदिति। शास्त्रमावर्त्यमानं धर्मसाधनं जपादिवदिति भावः। अनर्थकं त्विति। शा
स्त्रं पूर्वकालप्रयोगाद्धर्मो न तु शास्त्रप्रवृत्तिमात्रादिति भावः। ह्रस्वार्थमिति। ह्रस्वानामेव दीर्घविधानसा
मर्थ्यात् गुणो न स्यात्। दीर्घाणां तु प्रागेव ताद्रूप्यात्तद्रूपविशेषसंपत्तिफलत्वाच्छास्त्रस्य दीर्घशास्त्राप्र
वर्त्तनात् गुणप्रसंगः। दीर्घाणामपीति। गुणबाधकरणार्थं दीर्घेष्वपि दीर्घशास्त्रं प्रवर्त्तत एवेत्यर्थः। न हि
भुक्तवानिति। तृप्तिफलं भोजनं कृत्स्ने च संपन्ने पुनर्न प्रवर्त्तते॥

मिति क्वचित्पाठः। तत्राप्ययमेवार्थः। ननु शास्त्रस्य साधारणत्वेन ह्रस्वविषये एव बाधे नान्यत्रेत्यत्र किं विनिगमकमत
त आह ह्रस्वानामेवेति ह्रस्वार्थं दीर्घविधानं चेत्किं तत्राह भाष्ये भवेदित्यादि गुणायेति एवं च तन्निवृत्त्या रूपविशेषसं
पत्तिः फलमस्त्येवेत्यर्थः। न हीति हि शब्दः सूचितं हेतुमाह तृप्तीति भाष्यमित्यस्य कर्त्तव्यमिति व्याख्याशेषपूरणमन्यत त्रि०शा० ६ ३८३

तृप्तिविशेषेति। विजातीया विजातीयात्तृप्तिस्तज्जनकत्वमिति भावः। भाष्ये भोजनविशेषादिति भोजनेति कर्मणि ल्यु
ट् शाल्यविशेषादिति पाठः। न हीति तत्र तृप्तिविशेषवत् नात्र दीर्घविशेषः फलमिति भावः। ह्रस्वेष्विति। लक्ष्यभेदादेक

ननु चेचतित। तृप्तो विपुनर्भुंक्त इत्यर्थः। भाष्यमिति। कर्त्तव्यं भोजनादित्वप्तिविशेषाद्यर्थिभिरित्यर्थः
न किंचिदिति। न दीर्घाणां दीर्घतरः संपाद्यत इत्यर्थः। अग्निवदिति। दग्धस्यायोग्यत्वाद्दृष्टदाह इति भा
वः। दहाव्ययोग्यत्वाद्दीर्घेषु दीर्घशास्त्रेण न प्रवर्त्तितव्यमिति भावः। दीर्घाणामपीति। ह्रस्वेष्वपूर्वदी
र्घरूपसंपादनार्थं दीर्घशास्त्रं प्रवर्त्तते। दीर्घेषु तु रूपप्रतिबंधि गुणनिवर्त्तनेन स्वरूपप्रत्यापत्तये। य
था मोराजिसमः क्वाविति मकारस्य मकार इति भावः। तच्चैश्च ह्रस्वानामिव दीर्घाणामपि येन नाप्राप्ति
- न्यायेन दीर्घेण गुणो बाध्यत एव। यथैवेति। दीर्घारंभाद्विकृतेनैव दीर्घेण स्थानव्यमिति भावः। कृदि
त्वमिति। यद्यन्तरेण दीर्घविधानं प्राप्नुयाद्दित्वं न तु दीर्घेण बाध्येतायनक्तदीधीश्च यमेव कृदित्वं तस्य
- तदेव फलं दीर्घस्य संजातमिति कृदित्वं प्रवर्त्तिष्यते। तथा चोच्यते। यं विधिं प्रत्युपदेशोऽनर्थकः स विधि
र्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यत इति। दीर्घाणामिति। इत्वोत्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेनेति
गुणप्रसंगादिति भावः। शीसती ति। असति किं त्वे गुणवत्स्विलोपस्यापि विशेषाभावाद्दीर्घेण बाधनं स्यादि
त्यर्थः। क्वास्ता इति। यथा नत्र लिङ्गनांतरादीनामन्यत्रपातोऽसंभाव्यः एवं किल त्वशिलोपयोरपि संबंधो न संभाव्यो
वि स्यां विधिनियमरूपे लाघवस्ति रिति भावः। यन्नाप्राप्तिन्यायेन। अनवकाशत्वेन कृदित्वं कृतः इदितो रित्व शिलोपस्यापि विशिष्ट
निमित्तत्वाभावात्क्वचिल्लोपस्तत्रप्रयोजनमत। शसती तिशिलोपस्यापीति बाध्यसामान्ये चिंतीतायामिति भाव॥ ॥

कै० वि०
७

दीध्यातीतितत्वे श्रुरादिति चिमितद्र स्वत्वि सनीसंतेता ऽभ्युदेअपूर्त पिति इत्विम्पालल्लोपे विशेषचिंतावामविद्यद्दत्याह। अथवेति।
ननुयेननाप्राप्तिन्यायेनयश्रोभयाप्राद्त्तालंभावनात्रेषांमवस्थापकत्वनचतथाप्रकृतेःयचैतेधुलीत्यादौपरत्वपत्वार्थछित्ते
वाध्यकिंशास्त्रविहितस्येत्वाकांक्षायांमध्येपवादापुरस्तादित्यादविषयःयेनेत्यस्थयन्नार्थवच्छिन्नकार्यमित्यर्थःयेनत्तसतोनेत्य

एवांभिसंबंधइति।स्त्रीस्तनीतिरोर्गुणत्नोपदीर्घत्वानिप्राप्नुवंतीतितत्रासतिहिकित्वेऽनवकाशत्वाद्धिशेषाभा
वाद्गुणवल्लिलोपस्यापिदीर्घत्वबाधकंस्यात्।अथवारस्ताद्पवादाअनंतरान्विधीन्बाधंतेनोत्तरानि
तिणिलोपस्यैवबाधकंततस्यातगुणात्तस्यादेवसतितुकित्वेनैवगुणोबाधितइति चिचीषतीत्यादिषु
जघ्यानवकाशं दीर्घत्वंपरत्वाणिलोपेनबाध्यते॥

र्थतुनास्यविषयःनाधिकार्यभेदेयञ्चरूपरमर्थ्यातुगमकरूपाभावादितिचेन्नाव्यक्तिपक्षेकिमिदंगुलबाधकतयासर्वविष
यं।उत्तणिलोपबाधकतयाणिविषयमितिसंदेहव्यवस्थायाअव्यवस्थापेक्षितत्वेनशास्त्रप्रवृत्तिःस्यपादेत्यभिमानात्व
क्तत्त्वेवंसतिशिगमेत्येववदेदितिबाध्यसामान्यचिंतायसमाश्रित्यैवभाष्यव्याख्याचिंतेतिदिक्॥ त्रि० ३०
७
३८४

\

तध्वनयनत्रांकते।नत्वसत्यपीतियेनेत्यस्यवेनकार्यमित्यर्थइतिभावः नैतदस्ति।येनेत्यस्यचितरेत्यर्थकतयायत्वाध्यसामान्य
चिंतापरत्वमस्यनदायंग्रंथइतिभावःभाष्येकिंत्वारंभेतदोषइत्याहतत्रणिलोपस्येत्यादिनाप्रतिपदविहितेनेनितिमीषतोवै
चरितार्थेनित्यर्थःएवंचतत्रस्त्रेमीमहलोनमिनोतेरपिमहत्तदीर्घस्यप्रयोजनमितिभावःसावकाशमितिभाष्यस्यसार्थक
मित्यर्थःपरत्वादितियद्यपिप्रमित्सतीत्यत्रअपवादत्वात्दीर्घेणगुणस्येवद्वीप्सतीत्यत्रबाध्यसामान्यचिंतायांणिलो

ननुअसत्यपिकित्वेयेननाप्राप्तइतिन्यायेनगुणस्यैवबाधकंदीर्घत्वंभविष्यतिनणिलोपस्यगुणबाधेन-
चसावकाशंदीर्घत्वंपरत्वाणिलोपेनबाध्यतइतिन्यायेनगुणस्येवबाधकंदीर्घत्वंभविष्यतिनणिलोपस्यगु
णबाधेनेष्टोव्यतइतिनार्थःकिंत्वेननैतदस्ति।यत्तबाध्यभेदेनापेक्ष्यतेइदंसर्वत्रप्राप्तंरदतुद्धचिदेवेति
तदायंन्यायः।यदातुबाध्यमात्रमेवापेक्ष्यतेविध्यंतरेणाव्याप्तोविषयोनकश्चिदस्तीतितदासर्वस्यैवबाध
याभाव्यं

वस्यापिबाधेनभाव्यंतथापिदीर्घसमानकालिकस्यणिलोपस्यगुणस्यैवबाधेविदीर्घकृतेस्थानिवत्वेनप्राप्तणिलो
पःस्यादेवनचदीर्घविधानसामर्थ्यदस्माविशारमान्युगहणसंपादनेनकृतार्थत्वात्एवंचपरत्वादित्यस्यदीर्घोसरका
लंप्राप्तत्वादित्यर्थःअत्रावसरन्यायस्तुशास्त्रेनास्त्येवेतिभावः॥

यत्रलक्षणेति। यथाविभाषिकसमासेऽव्ययीभावसमासइत्यादौ। तत्रहिसमाससंज्ञायाःसंज्ञाबलेनज्ञानायलक्षणपर्यालोचनमित्य
र्थः। प्रयोगरूपेतिनञ्चमीयतइत्यादौप्रयोगनिष्ठएवहिणमाभावनहोवधिविशेषइत्यादेरसंगतिःस्यादितिमासाहचर्यात्मीञ्च

असत्यपीतिमीनातिमिनोत्योःसत्यनवकाशत्वात्गुणंबाधित्वादीर्घत्वंप्रवर्त्तेत। ततोणहरोन
णहणादिस्त्राबेनप्रतिपदविहितेनगुणोबाध्यते। कृतेचेत्यात्वेहलंतात्वेतिकित्वात्हस्वपेक्षगु
णाभावः। तत्रसामान्यणहणेचरितार्थत्वाद्दीर्घविधानस्यत्दीस्पतीतिपरत्वाणिलोपोभविष्यती
तिनार्थः किंत्वेन। ननुलादेशोकृत्वात्मिनोतेमीरूपस्यमीणहणेनग्रहणेतिनैवदोषः। यत्रलक्ष
णाभिनिर्वृत्तत्वेनूनरूपमपेक्ष्यतेतत्रलक्षणप्रतिपदोक्तयोरितिपरिभाषोपस्थानंनतुयत्रप्र
योगरूपाश्रयणेय। तत्रनत्वेवमत्यसत्यपिमीणहणेनणहणेमीनातीत्यादिनाआत्वेकृतेणमा
भावनहोवधिविशेषइतिमाणहणेवधिविशेषइतिमीणहणेनातहादिस्त्रविष्यतीतिसामान्यगह
णमपिदीर्घस्यप्रयोजनंनोपपद्यते। एवंतर्हिदोषांतराभिधानेनास्यपूर्वपक्षस्यनिराकरणात्भा
ष्यकारेणनैतत्सुष्ठुनिरूपितं॥

क्षांशे॰ विस्वानप्रवर्त्ततइत्येवसमाधातुंयुक्तं। तध्वनयनाहनन्वेवमसत्यपीतिकत्वाभावेपञ्चिपयत्वेनात्वस्यसुलभत्वा
दितिभावः। एवंचमीणहणमपिव्यर्थमितितात्पर्यं॥

भाष्येमीनातिमिन्योमोदीर्घत्वेकृतइत्यत्रपर्जन्यवल्लक्षणप्रवृत्तिमाश्रित्यमीनातिनिर्देशःपरत्वादित्यस्योत्तरकालप्रासत्वा
दित्येवार्थः पश्चाद्दीर्घस्तरस्थानिवत्त्वेनणिलोपोभवतिएवंतत्पक्षसुत्तरमेवगुणोपिस्यात्दीर्घत्वंतुसामान्यणहणावि
धानार्थस्यात्इतिभावः नस्त्यनवकाशत्वमितिनास्त्यनर्थकत्वमित्यर्थः दीर्घत्वंबाध्यतेइतिप्रवृत्तमपिनिवर्त्ततेइत्य
र्थः। धातुरवकाशइति। तस्यचकुटादित्वप्रयुक्तङित्त्वेनगुणनिषेधाद्दीर्घश्चरितार्थइतिभावःएवंचेसमाधेएवावका

नदेवदोषांतरमाह। यथैवेति। सामान्यणहणेउपयुक्तत्वाद्दीर्घत्वस्यनास्त्यनवकाशत्वमितिद्वा
भ्यामपिगुणणिलोपाभ्यांदीर्घत्वंबाध्यतइतिकर्त्तव्यंकित्वं। नचदी। घविधानस्यकुङ्शब्दइतिधातुर
वकाशःचुकूषतइति। यस्मात्कूङ्शब्दइतिपाठः तत्रकुटादित्वात्ङित्वेसतिगुणाभावात्दीर्घस्यश्र
वणं। सिद्धावेदलोकयोश्चकूतशब्दस्यप्रयोगोदृश्यते। गुध्कृषौअवकाशइतिचेत। उहनिगमामितिब्रू
यात्किंप्रत्याहारेण॥

प्रोक्तिभाष्योक्ताऽसंगतेतितात्पर्यं। उहनेतिनन्वाआदेशागमेरित्यर्थस्नाभाष्येअजणहणंहनिसाहचर्येणत्नुम्विकरणस्थ
निकादेशागमेरेवणहणेनादोषात्। एवंचकुङःसत्वेविनतितिरितिबोध्यंकुगुदुभ्यःकुटादिभ्यःसंनोनभिधानमित्यन्ये॥

कौ० वि०
१०
९

हलंतं चेत्तौ। अंतग्रहणस्य समीपवचनत्वात्तादर्थ्यानुपपत्तिर्हलः समीपादिक परइत्यर्थः। ततः परत्वं च सामर्थ्यादिकं वर्णव्यव हितं ग्राह्यमत अवयव इति भेद एवावयवावयवि भावादाह। अत्यंतभेदे। इति। इ भेदे भेद एवावयवावयविभाव इत्यर्थः। भाव्ये इत्यर्थबोधासमर्थत्वेन निर्देशस्यायुक्तत्वाद् इकोन्ता मेति। इगंतस्य धातोरित्यर्थः हलंतस्यादिति। हलंतावयवः स्यादित्यर्थः। अन्यथा इगंतस्य अन्यः। हल्कथं तौ भविष्यतीति शेषः इक्ष्वेदेन वर्णमात्रग्रहणाद्धे वर्णयोर्वर्णयोः परस्परमवयवावयवि भावो विरु द्ध इति भावः। नन्वानंतर्यादिषु बहुव्रीहेरिव मत्वर्थस्यायाभावाद् वर्णयोरवयवा वर्णयोरवयवावयविभावो नैवतो हल इत्ययुक्तमत आह हलंतादिति। स्नादिषु धातो ग्राह्यरूपस्य वा हलाविशेषणात्तदंतविधिरित्यर्थः। यस्तु तदवतो

हलंता। अयुक्त इति। अंतग्रहणमवयववचनं मत्वा पर्यनुयुंक्ते अन्यस्यान्य इति। अत्यंतभेदमनेन दर्शय ति। अवयवावयविनोः स्तभेदविवक्षापि भवति। तत्र नां पट इति अभेदविवक्षापि पटी भवति तंतवइति इव तौ हल इति। हलंतादित्यर्थः। विपक्षतीति। अत्र संप्रसारणप्रसंगः। तद्यः सामीप्य इति। एवं च हल्त्वासावं तश्चेति कर्मधारयः। निपातनाद्विशेषणस्य परनिपातः॥

हलंतादीतिन्यासकरणे तात्पर्यं अत एवेगुपधाद्धलंतादिति वक्ष्यति। कर्मधारय इति स्वपदार्थप्रधानत्वेनांतरंगत्वा द्यमेवोचित इति भावः। पूर्वनिपातदोषं परिहरति निपातनादिति: बहुव्रीहिपक्षेप्येतदावश्यकमिति भावः। दंभ इत्येति इत्वेऽनुपधत्वात् गुणप्रसक्तेः किं कित्त्वेनेत्याशंक्याह असतीति। नलोप इति। अनिदितामित्यनेन॥

शि० शा०
१०
३८६

Dr. BHAU DAJI MEMORIAL

एकवहलंतादित्येकवचनोपात्तं जातेः स्वागतमिति। तस्या प्राधान्येन विवक्षितत्वादेको व्रीहिः संपन्न इतिवदिति भावः। ननु जा तिनिर्देशोऽयं पर्यायक्रमत आह यद्यपीति। यद्यप्येकैकव्यक्तिव्यंग्या जातिस्तथापि तावकेन विजातीयव्यक्त्यव धानेऽपि किंचिद्व्यक्तिद्वारकं सामीप्यं किंचिद्व्यक्तिद्वारकं च ततः परत्वमाश्रीयत इति भावः। व्यक्तिद्वारकाइति विशेषण भूतव्यक्तिद्वारक इत्यर्थः। तदपेक्षं व्यक्तिद्वारकं च ततः परत्वमाश्रीयत इति भो० जात्यपेक्षं अभिन्नप्रत्ययः हलित्येका कारः प्रत्ययः अनेन हल्त्व जातौ प्रमाणं संज्ञाशब्दाश्च जातिशब्दा एवेति दर्शितं। यद्यपीति। सारानुसाराद्देवपरत्वाद्

एवमपीति। व्यक्तिनिर्देशा इति भावः। असति च कित्वे। नलोपो न स्यात्। दंभेरिति। वर्णग्रहणे जातिग्र हणमिति ज्ञापितं। न चात्र व्यक्तिगतमेकत्वं अपितु जातेः स्वगतं। तत्र यद्यप्यावद्व्यक्तिव्यतिरिक्ता जातिः तस्याश्च व्यक्तिद्वारकाः सामीप्यादयो धर्माः तदा तस्या एकत्वादिकं समीपत्वं सन्नश्च परत्वं तदपेक्षती तिसिद्धं भिपत्तीति किंत्वा हकारादिषु वा भिन्नवत्प्रत्ययार्थाभिधानाद्धल्त्वजातेः सद्भावः। यद्यपीत्यस्य भेदा व्यक्त एव जातिरिति पक्षः। तदा भेदबुद्धसादभेदाश्रयणादिष्टसिद्धिः॥

तिभावः परस्परभेदकधर्मपरित्यागेन व्यक्तिमात्रविवक्षायां सापेक्षैवेति तात्पर्यं तदाह भेदबुद्धसाद भेदाश्रयणा दिति। अयं पक्षो मंजूषायामुपपादितो विस्तरेण स्माभिः शक्तिवादे। नैयरे तु हल् जातिरित्यस्यंतत्राधाश्रयहल्समु दाय इत्यर्थस्तस्य चसाक्षादेव सामीप्यं ततः परत्वं चोपपद्यते। तदुक्तं भाष्ये इकस्तत्यो हल् जातिरितीति अत एवार्द्धधातु क इति सूत्रेऽपि जातेः पौर्वापर्यासंभवाद्विषयसप्तमीविज्ञायत इतीत्याहुः॥

कै०वि०
९९

लिङ्सिचौ। सकृत् श्रुतस्यार्थद्वयमिति कालभेदेनार्थद्वयसाजात्यबोधजनकत्वमित्यर्थः नन्वात्मनेपदयोर्लिङ्सिचावित्याख्याने संसम्यनुपपन्नेत्यत आह निर्धारणे इति निर्धारणं च सजातीययोरिति तद्व्यावर्तकः भाष्ये सिजविशेषितः इति। संभवव्यभिचारयोरभावादिति भावः ननु लिङ् आत्मनेपदत्वाभावात आह लिङ्शब्देनेति ननु संभावितात्मनेपदयत्वो सुट् सीयुडावेव लिङ् तद्ग्रहीष्येत इत्यत आह सीयुडादिति। न त्वसुडुभयोरेकशेषनिर्देशात आह न चेति अनेन शास्त्रीयैकशेषो वारितः

लिङ्सि। कथमिति। आत्मनेपदेष्विति सकृच्छ्रुतस्यार्थद्वयं न लभ्यते। तत्र यदि निर्धारणे सप्तमी तदा तुल्यजातीयस्य निर्धारणाल्लिङेव विशेषितः स्यात् लिङ्शब्देन लिङादेशानां ग्रहणात्। अथ परसप्तमी तदा सिजेव विशेष्यते न लिङ् सीयुडादिसमुदायो लिङ्शब्देन रह्यत इति तस्यात्मनेपदपरत्वादुपचारात्सिजेवात्मनेभावः। न चानयोर्भिन्नयोरर्थयोः सह विवक्षासंभवतीति एकशेषस्याप्रयोगः। सिच्च विशेषित इति।।
आत्मनेपदपरत्वादुपचारात्सिजेवात्मनेपदमुच्यते। गौणमुख्यार्थयोरात्मनेपदशब्दयोः सारूप्यमात्रप्रवृत्तः एकशेषः करिष्यत इति भावः आत्मनेपदेलिङीति। अवयवगतं वाचत्वं समुदाय आश्रयेष्यत इत्यर्थः।।
अथवा तंत्रेण शब्दद्वयोच्चारणादर्थद्वयं लभ्यते नैवेति। संभवव्यभिचाराभ्यां सिजेव विशेष्यते न लिङित्यर्थः

प्रयोग इति। कृतैकशेषस्य सूत्रे प्रयोग इत्यर्थः। निर्धारणविभक्त्यंतत्वे सिच्छेषणत्वासंभवादाह आत्मनेपदेति। ननु सकृच्छ्रुतस्य कथमर्थद्वयबोधकत्वमत आह सरूपमात्रेति अर्थभेदेपीत्यर्थः। अत्साद इतिवदिति भावः सोत्र एकशेषवदतिबोधः। समुदायेष्विति व्यपदेशिवद्भावेनेत्यर्थः। अथवेति। तंत्रं च सह विवक्षायामपि विद्धन्मानसराजहंसेतिवदिति भावः।। ।।श्री।। शि०शा०
९९
३८७

स्याद्यो न प्रयुक्त इति। एवं च षष्ठी हेतुप्रयोग इत्यस्याप्राप्तिरिति भावः अपत्यरूपत्वस्येतितत्वेन शिवस्याक्यांतुच्छो नस्यात्किंत्वचस्यादिति भावः। वस्तुतस्तु कारस्य पदे दृत्वे नेद्वत्पदार्थनिर्देशाधिकारात एवं वेदं त्वेनाप्युपपन्नबोधशेषविशेषे नु साधु रितिततस्येदमिति सूत्रेतस्यायत्यमिति च सूत्रे निरूपयिष्याम इति चिंत्यमिदं सत्र संबंधो हेतुमत्त्वाचेपर्यवस्यतीति भाष्ये हेतोरिति प्रयुक्त हेतुशब्देन चात्र फल इत्सन्नतकारः किंमुखसुखार्थं तत्तपरसूत्रवत्यर्थः इति विचारतात्पर्यं तकार इति यस्ये

स्यास्वोः इच्चकस्येति। कथं पुनरत्र षष्ठीया च ताहि शब्दः प्रलोकेन प्रयुक्त इति हेतुस्तत्तीयया भाव्यं। नैष दोषः। हेतुरूपतायाभविवक्षणात्संबंधिरूपेण विवक्षितत्वात्। यथा मदीयाः पुत्रा इति शेषिकः प्रत्ययस्तदुत्पत्तिकालेऽपत्यरूपत्वस्याविवक्षणात्। तकार इत्। तकारेत तस्य भावस्तकारेत्वं किमर्थं क्रियते दीर्घो माभूदिति। आंतरतम्यात्प्राप्नोतीति भावः। भाव्यमानोऽणुसवर्णान्न गृह्णातीत्येव तु परिहारोऽनित्यत्वान्नोक्तः। क्वचिद्भाव्यमानस्यापि सवर्णग्रहणात्। यथा अमुष्यामित्यादावूकारो दीर्घस्य भवति। परिहारांतराभिधानाद्वा। आंतरेणापीति। इकारविधानेन विनापीत्यर्थः। किं त्वं तु कर्तव्यमेव। तेन विना ह्रीईत्वस्य प्रत्यभावात्। अनंतर इति। असद्भ्रा आदेशौ क्रियमाणा इत्यर्थः

तिशेषः बहुव्रीहेरयं त्वदेशेत्यत्रेत्तसंज्ञकतकारवत्त्वं किमर्थमिति भाष्यार्थः मुखसुखार्थमिति तदर्थत्वेन वर्णोच्चारणस्य सार्थक्यादिसंज्ञालभत इति भाष्यमतं ननु श्रुतत्वाद्ध्रस्व एव भविष्यतीत्यत आह। आंतरम्यादिति। सूत्रारंभं विनेत्यर्थः किंनस्यादत आह। किंत्वमिति। तदर्थं सूत्रमावश्यकमिति भावः। इत्वस्येति छेदः असाद्भ्रा इति सामर्थ्यादसद्भ्रा इत्यर्थः
अव्यवहितपरोनंतरशब्देनेति भावः।।

कै० वि० ११ यद्यनेनेतिटिग्रहणं वाक्येनैव सूत्रेण प्लुतेन भाव्यमित्यनुवाद्दोषभियानेन प्लुतविधानमित्ययमत्र पक्षे भाष्यान्तरार्थका
र्यः। अन्त्येत्विति। अनन्तरेत्यादि। सूत्रे ऽसहेत्यो आदेशोऽश्रूयमाणोऽपीत्यर्थः। किं यमाणाइति पाठे विश्रूयमाण इत्येवार्थः। दीर्घ
एवेति। ओं तस्यो(?)ऽस्तीति भावः। वार्त्तिके अनन्तरे श्रूयमाणे वीत्यर्थे दीर्घः स्यादिति। श्रीवो वोष्यः प्लुतो मा भूदिति। त्राको स्वरत्वेना
वतारयति नन्विति स्यादिति तथा च तत्र प्लुतइत्यः स चासतीति तपत्वे पुनर्विहितेन दीर्घेणाबाधितः सन्प्लुः स्यादित्यर्थः। ननु किं
मिति प्लुतस्तत्रेष्यत इति शंकते। माभूदिति स्मृति इति। एवं च प्रश्नाख्यानादिविषये तस्येष्टत्वान्तन्निवृत्त्यर्थं विधानमित्य
र्थः स चासतीति सिद्धे दीर्घे दीर्घविधानसामर्थ्येन वाधादित्यर्थः। सति तु तपरत्वे दीर्घो प्राप्त्या प्लुतो निर्विघ्न इति भावः।

प्लुतश्चेति अनेन तपरत्वं प्रत्याख्यायते। यद्यनेन प्लुतो विधीयेत तदा यत्रापि विषये अनन्त्यस्यापि प्रश्ना
ख्यानयोरित्यादिना प्लुतो विहितस्तत्राप्यनेन विधीयेत। अस्मिंश्च कर्त्तव्ये पूर्वत्रासिद्धमित्याष्टमिकस्य प्लु
तस्यासिद्धत्वान्न ततश्च पक्षेनुवाद्दोषः प्राप्नोतीति दूषणमेव न भविष्यति। अन्ये तु तपरत्वमनेन समर्थितमि
ति व्याचक्षते। अनन्तरेत्यादेशोऽश्रूयमाणो दीर्घ एव स्यान्ननु सिद्ध एव दीर्घ इत्युक्तं सिद्धस्यापि पुनर्विधा
नं प्लुतनिवृत्त्यर्थं स्यात् मा भूत्प्लुत इति इति चेत्तन्न। प्लुतश्च विषये स्मृतः स चासति। तपरत्वेन प्राप्नोतीति दी प्र
र्घनिवृत्त्यर्थं तपरत्वं स्थितं। प्लुतविधौ तु वाक्यस्य टेरित्यधिकारात्कथमिकारस्य प्लुतः स्यादिति चिं। त्वमे ग

यश्चास्त्रासत्त्वं तपरत्वेन न बाध्यते सिद्धत्वादित्याशयः प्रकारद्वयमपि दूषयति। प्लुतेति अनन्त्यस्य पदस्य पदस्य टेः
अपि नावाक्यचटेः प्लुतप्रश्नाख्यानयोरित्यर्थस्तस्येति भावः। टिग्रहणं वाक्येनैव संबध्यते न त्वेतेन पदेनेति तु भाष्यतात्पर्यं श्री० श्री० ११
यत्वदितिमित्यादेशो गुणेन्वत इत्यपूत द्विषयं भाव्यमिति तन्न। तेन ह्रूयमाणार्थपदवाचिनपवटेः प्लुतविधानादित्याहुः॥ ३८८

उच्चैरुदात्तः। नन्वच इत्यनुवृत्ताव पि कथं परिभाषा ऽप्रवृत्तिः अनुवृत्तस्य प्रवृत्तस्य प्रकृतसूत्रे वयपेक्षितसंज्ञिसमर्पकत्वेपि स्वरोच एव स्था
नेऽस्त्यर्थकत्वेमानाभावादत आह उच्चैरिति संज्ञिसमर्पणस्य प्रथमान्तानुवृत्त्यापि सिद्धेरिति भावः। स्थानेनान्वयादौ उच्चैरुच्चदेशे उपलभ्य

उच्चैरुदात्तः। पदविनिर्दिष्टमिति उच्चैर्नीचैरित्येते अव्यये अधिकरणशक्तिप्रधाने तत्राच इत्यनुवृत्तौ
सत्यं अयमर्थो भवति उच्चैः स्थाने उपलभ्यमानोऽच उदात्तसंज्ञः स्यात् च स्थान इति हल्स्वरप्राप्ताविति स
त्यासच इत्यस्यानुवृत्तौ समासस्येत्यन्तोदात्तत्वं राजदृषदित्यादौ असत्यां त्वनुवृत्तौ समासस्य योऽन्तो दकार
स्तस्य स्वरप्राप्तावविद्यमानत्वादकारस्य स्वरः सिध्यति एवाच परिभाषायतो नाव इत्यत्रानाव इति प्रति
षेधेन ज्ञापिता अन्यथा नाव्यमित्यत्र नकारस्यायोग्यत्वादाकारस्य चानादित्वादुदात्तत्वं न भविष्यतीति किं
नाव इति प्रतिषेधेन।

मानः व्यत्यमानः स वा च इति वाक्यभेदेन पर्यन्तान्यदेन संबंध इति भावः। निन्वचा ग्रहणानुवृत्त्यैव सिद्धे मास्तु परिभाषा प्रवृत्ति सिरतर्भ
हसत्यामिति समासस्येत्यन्त च इत्यस्योपस्थित्या नोत समासे विशेष्यमाणो राजदृषदित्यौ न स्यादित्यर्थः। यतो नाव इति पदं न
स्यादित्युदात्त इति तदर्थः

(अजन्वयव्यतिरेकौ बोजमित्याहुरिति तेरायोनि अत्रहो जिनिपाता आद्युदात्ता लिङ्‌निङ्‌ङस्याभ्यामिति भावः नपुनरंतरेणेति अचवदर्शने)
(इदं च किं याशास्त्रिकविषयं लो त्र वयोगातिरिक्तविषयकं च बोध्यं स्वयं राजंतइति भाष्यस्योदात्तादिगुणेरित्यर्थः अनुगच्छतीति अ)
(जुगमिति शेषः नन्वत्र वर्णसादृश्यमिति निर्वचनं हि तत्प्रातवर्थयोगेनार्थाभोग्यविवर्णसादृश्येन चेत्याशयः अर्थयोगस्त्वास्तो)
यावतेति तच्चाचः स्थानेहल्लघुदात्तादिग्रादेन प्रत्यायितः स्यादिति वाच्यं अंतरतमपरिभाषयाऽप्राप्तेः ननु शेषवा अविद्यमा
वसरिपभाषया अन्यत्राप्राप्ते स्तत्रेहापीत आह अनुदात्तादेरिति स्वत एवेत्यस्याचात्रैस्वर्यवत्तेषामनुदात्तत्वमेवेति विशेष स्वरा

अथप्रश्नमनिर्दिष्टमिति ननु कोविशेषः यावतापल्लस्वरो विधीयते तत्रव्यञ्जनस्याविद्यमानत्वादच एव भविष्यति अ
नुदात्ताजुपरागवशाद्भातदनुवादेनाकार्यविधानेन कश्चिद्विशेषः एवं तर्हि न्यायक्लप्त्यादनार्थ एवायं विचारः ननु
चेति बाधकभावात्तु भ्रांत्यासिद्धिर्नैतेइति अन्यथाप्यकप्तर्ने भोयपत्तेरिति भावः॥

प्राप्यास्वरएव चविनि इतइत्यर्थः ननु स्वतस्तथात्वकल्पने निमित्ताभावः किंचोदात्तसमवधानेप्यनुदात्तत्वप्रतीत्यापत्तिरेच्चंच
हलादि प्रातिपदिके आद्युदात्तेप्यत्रापत्तिरत आह अजुवेति न्यायमिति उक्तत्वादीनां धर्मत्वविषयकन्यायेत्यर्थः।भाष्येनुवस्ते:
प्रयोजनाभावात्तदेशानुपपत्तिरिति टध्यति किं चेति अनुव्यत्तेर्न फलमित्यर्थः भाष्येयदि लत्वं तेनतदार्थः पतोनसंतेतोनार्थ इत्य
न्वयः नन्वियं प्रतीतरक्तस्फटिकप्रतीतिवत्भ्रांतेत्यत आह बाधकेति प्रतीतिर्भ्रांतैवेत्याहुर्नैतइति भाष्ये तच्चाचष्टे अन्यथा योनिति
त्तकोलोहकसभाद्दर्शः रिक्तकः धर्षणेनउल्वलोकतः वदरपिटकं वदरफलं युक्तपिटिकेति संप्रदायः प्रतोतेर्नूतत्वे बीजं
छतिकुतोन्विति

नत्का।नसेडित्यनेन कथं कित्वं क्रियेतेत्यत आह।अकारेति।विपरीतत्त्विति।तथाहि सनिशाविचित्यादावपि कित्वं स्यादित्यर्थः ननु निर्वत्तस्येति न
चैवं त्कोपि विद्यमानस्य कित्वस्य कथं निषेधइति वाच्य कार्यस्यैव निषेधो ननु विद्यमान कित्वस्येति नरोपआतिदेशिकस्य निर्वत्तस्य निषेधे
तु तेन कृत कित्कार्यस्यानेन प्रतिषेधे विरोधः स्पष्टं एवेति दिक्।ननु सन्ग्रहणाभावे विसिच्वश्चितादिरिडन्तैव प्राप्नोत्यादेशो च सि
द्धमित्यत आह।स्थासिति तत्रचविरावशावेपरत्वात्कृतेइत्यन्वयः वध्यपवादत्वादितियेन नाप्राप्तिन्याये न नस्य च नवकाशत्वेनेति भावः

नत्का।कृते किंत्वइति अकारप्रश्लेषः।निष्ठायामिति।शीङादिभ्यएव परा निष्ठा न कि रिति नियमः।विपरीतस्तुनिष्टैवेति व्या
ख्यानान्तुभवतिपरोक्षायामिति पूर्वाचार्यप्रसिद्धपरोक्षालिड्‌च्यते।असत्वत्रेति।प्राप्नोतु कित्वमित्यर्थः।ननु निर्वत्तस्यनि
षेधः कर्तुं शक्यते।उपावस्थायिवाता मितिस्थासआतां इतिस्थितेइत्वं च प्राप्नोति चिरावशावश्च तत्रपरत्वाच्चिरावत भा
वाध्रुवकप्राप्नोति।वृद्धिश्च।तत्रवद्धपवादत्वात्तद्धगागमः।तत्रकृते यकारस्येति प्रसंगः।नन्वपुनर्वृद्धिर्लभ्यते पूर्वमे
वयुक्तावाधितत्वात् इति भावः असतिकित्वइति।कुलमहणस्य ज्ञापकइति त्वं न तावत्स्थितमित्यातिदेशिकस्यापि
कित्वस्य न सेदिति निषेधो भवतीत्यभिप्रायः।सुधीवासुपीवेति।अनौ व दूर्व्वाहेरितिप्रकृतस्येवङीपो निषेधः न तु रेफस्या
पितस्तु संनियोगशिष्टानामन्यतरापाये उभयोरप्यपायइति न्यायान्निवर्त्तते।अयन्यायो विल्वकादिभ्यश्छस्य लुगित्यत्राद्यपद
शेन ज्ञापितः॥

तदेवाह नचपुनरिति भाष्ये इत्वकित्संनियोगेनेति उक्तार्थत्वं खंडयति तदाह।आतिदेशिकस्यापीति।तथाच कित्वनिषेधे तत्संनियुक्ते त्वस्याप्य
भावइति भावः।ज्ञापितेत्यादिदेशिकानिषेधे उक्तस्त्राव्युपयोगइति अन्यत्।नन्वेवं नोदूर्व्वाहेरित्यस्य स्त्रियां विहितं नेत्यर्थः तु रेफस्यापिनि
वृत्तिर्वा च निकीति विषमोदृष्टांतोत आह अनइतिप्रत्ययाधिकारात्प्रत्ययस्यैव निषेधइति भावः।छग्रहणेनेति।तद्धि विल्वकादेरुक्त
स्य प्रत्ययस्य भनिमित्तेतद्धिते विधीयमानो लुकप्रत्ययार्थो भावाच्छस्यैव सिद्धइति छमात्रस्य लुग्यथास्यात् न तु तत्संनियोगशिष्टकुकोनि
वृत्तिरित्यर्थमिति भावः

के०वी० ९३

ननु युकारस्य द्वित्वं बाधितत्वात्कथमित्यत्र इकारस्य द्विरुक्तत्वादाह युगागमेनेति। तत्र द्वाभ्यां लिङ्लोपाभ्यामिकारादेशेन तत्र वकारस्यान्तरङ्गत्वाद्विरवस्थितिरिति भावः। नत्र एव सत्त्वाय सक्तत्रास्त्वनास्तीति तातात्पर्यं वक्तुमथवा सत्त्वमिति भाष्ये मैकदेशः युक्तिरिति तन्तोर्नुकारिकोलोपमात्र बाधवद्वा प्राप्तेरिति बोध्यं तस्मात्लप्रहणस्य ज्ञापकत्वं स्थितं औपदेशिकस्यैव निषेध इति। भाष्ये आनिदेशिकमिति। अर्धसंयोगाद्विडित्यनेन आजिवानितिति कित्वात्परत्वात्पूर्वमिटि सेडिति निषेधेन कित्वाभावान्न लोपाभावेसंयोगादित्यस्याप्राप्तेर्नलोपसिद्धये चकारग्रहणं सन्नापेक्षात्कृतं बहिरङ्गत्वं तत्राश्रीयतइति भावः एकादेशो वस्वेकाजिति। कृतद्विर्वचनानामेकाचामिति स्थित

अस्त्वत्रेति। यकारस्य कृते इत्येव द्विर्न विद्यति। युगागमेन ह्याकारस्य द्विर्बाध्यते। नन्विकारस्यापि। आजिवानिति। इदं नोपपद्यते। अत्र हि नलोपे कृते द्विर्वचने एकादेशो च वस्वेकाजाद्घसामिति ईडागमः। न हि कित्वप्रतिषेधान्नलोपनिवृत्तौ द्विहल्त्वात्तु टिसंत्येकाच्त्वभावादिति णिवत्तौ नलोपादीनां चकुकथापतिश्च कृके बुचेष्टतो व्यवस्थाभाष्यकारेण तु परिहारान्तरसद्भावादेवाप रिहारो नाश्रितः। निगृह्णीति रिति। नितु चेत्थ्य न ह्यादीनामितीडागमः। क्त्वा च विग्रहादिति। विग्रहो विभागो योगस्य करिष्यतइत्यर्थः॥

त्वादिति भावः नलोपनिवृत्ताविति निमित्तापायन्यायेनेति भावः। द्विहल्त्वादिति। तस्मान्नुडित्यनेन नुडिति भावः इणिवृत्ताविति तन्निवृत्तौ सत्यां कित्वान्नलोपे द्विहल्त्वाणिवृत्तावेकादेशेनैकाच्त्वादिटि सेत्त्वात्कित्वप्रतिषेध इत्येवं नलोपादीनां चक्रकप्राप्तिरित्यर्थः इष्टतइति। सा चौपदेशिककित्वेन नलोपे इष्टः प्रवृत्ताविष्टसिद्धेः स्यादित्यर्थः उक्तन्यायस्य भाष्यकृतानङ्गीकारे णान्चक्रकप्राप्तिरेवनेत्यनेति तु चेत्यादिनाइडागमप्रतिषेधः किं न स्यादत आह अग्रहादीनामिति अनीदेशादित्यत्रोपसर्गस्य घञीति दीर्घः॥ शे०रा० ९३

३००

अन्वयव्यतिरेकौ चोजमित्याहान्तरेणायोनि अत्र ह्येजिनिपाता आद्युदात्तास्तिङ् निङ् इत्याभ्यामिति भावः स पुनरन्तरेणेति अ चवप्रदर्शनं इदं प्रक्रियाप्राप्तातिरिक्तविषयं सोऽत्र प्रयोगातिरिक्तविषयकं च बोध्यं स्वयं तत्र अंत। इति भाष्यस्योदात्तादिगुणेति त्यर्थः अनुगच्छतीति अनुगुणमिति शेषः नन्वत्र वर्णसाद्रूप्यमिति निर्वचनं हितत्तत्प्रात्वर्थयोगेनार्थाभोवयि वर्णसाद्रूपेन

॥ अन्तरेणापिव्यंजनमिति आप्यायध्वमिति यथा अत्र ह्याकारवदात्तस्तिङ् तस्य निघातः ततश्चान्वयव्यतिरेकाभ्यामच्छब्देनैते गुणांयिदितु हल्नामभ्येते गुणा अभिविष्यन्तराहल्नामच्छाचमिन्नस्वरताणुषान्वस्वतयामात्वच्चामेवस्वरमनुविदधाति हल्नः तस्मान्न हलां स्वयं स्वरोऽस्तीति निश्चयः अन्वमवतीति अनुगच्छतीत्यर्थः। द्राष्टसमाचारश्चेदं निर्वचनमभिहितं न तत्र वर्णसादृश्यं किंचिदस्ति। अभ्यवागानिरपिव्यंजेरर्थः विविधांगच्छत्यनुपरागवणादितिव्य जनमित्यपमर्थः पर्यायान्तरेण भाष्यकारेणाभिहितं तु परागश्च पूर्वपरास्वनिविपरेणात्वाहल्नोऽभवति न पूर्वेण॥

वेत्याशय अर्थयोगएवास्तीत्यासाह च अथवेति विविधमिति उदात्तत्वादिरूपमामनाधकारगमनं जधीनमिति शब्दादेव्यं ग्यतइति भावः पर्यायेति मोहियमनुगच्छतिसतद्धनविविधं गच्छतीत्यर्थः ननु विरुद्धस्वरद्वय ध्यातस्य व्यंजनस्य स्वरद्वयानुगणापत्तिरत आह उपरागश्चेति स्वभावएवात्र बीजं॥

कौ० वि०
९३

अधिकरणशक्तिप्रधानत्वात्कथमयं पर्यनुयोगोत आह स्रुतीति उच्चैः श्रवमाणउदात्त इत्यादिरर्थ इत्यभिमानस्त्वनवस्थित
त्वं कोदोषात आह न च तिभाष्ये एवं तर्हि लक्षणमिति न श्रुतिरागतप्रकर्षाश्रयमुच्चत्वं नीचत्वं किंतु ईदृशातापकत्वमिति मितिभा
वः श्रौती ही तिस्त्रायामोशेनांश्रुतिप्रकर्षानुमेयत्वात् तस्य चाप्यनवस्थितत्वात्स्वप्नवस्थितत्वमिति भावः श्रौता तौ ही तिस्त्र

उच्चनीचस्येति श्रुतिप्रकर्षापकर्षलक्षणोच्चनीचत्वाश्रयः पर्यनुयोगः न चानवस्थितवस्त्वाश्रयेण साधुत्वं
व्यवतिष्ठते एतदपीतिश्रोतारि वक्रुगतानां यामादीधर्माणां कार्यं दिवस्यति कार्यं च संकीर्त्यंते तथाहि महाप्राणो
नीचैरुच्चारयन्स्वरेणामहांतं देशं व्याप्नोति अल्प प्राणस्तूच्चैरपि वदन्नल्पदेशं व्याप्नोतीति सिद्धं त्विति प्रक्र
म्यंते त्रिन्वर्णा इति प्रक्रमः स्थानमुच्यते तेनायमर्थः एकस्मिंस्ताल्वादिके स्थाने ऊर्ध्वाधरभागेयुक्तेऊर्ध्व
भागेनोच्चार्यमाणउदात्तः अधरभागनिष्पन्नोनुदात्तः एवं चोच्चैरित्यनेनोर्ध्वभागोगृह्यते नीचैरित्यध
रभागः अभ्याससमिधगम्यश्चायं स्वरविशेषः षड्जादिवद्विज्ञेयः॥

प्रक्रम्यंते इति अधिकरणे घञ्निनौदात्तोपदेशावस्थितिव्यक्तिप्रतिषेधः ऊर्ध्वभागे नेति ऊर्ध्वदेशभागावच्छिन्नवायुसंयोगेनेत्य
र्थः। न चेदं पूर्वं कर्तव्यमित्याह एवं चेति करणस्य चाधिकरणत्वविवक्षावोध्याकस्याधर्मभागेवदित्याकांक्षायां योग्य
तया स्थानस्येति लभ्यते इति भावः मेदं प्रतिनुवचनमवावश्यकमिति बोध्यं उरः कंठः शिर इति शिरः पदं ताल्वादिनामुपल
क्षणम्।।छ।। ३९१

श्री० शु०
९३

उदुपधात्। भाव इत्यस्य पंचम्यंतत्वेनान्वयतो उदुपधात्परनिष्ठासंभवइत्यत आह सय संबंधीति ङेन्द्रे। त्कृच। नन्विटि वाप्र
संग इत्यत्र सेट्प्रकरणादिति हेतुर्नोत आह। अन्यतरस्यामि। ति चेति। ननु श्रुकः किती तिनिषेधात्कित्वनिषेधं वि
नेड्वदुर्लभ इति सेडनुवृत्तिरफलेत्यत आह अस्ति चेति। ननु सति पूङश्चेत्यस्मिन्कथमकिदाश्रयं सेद्मत आह

उदु। उपदुपधाछपदाति। आपः संबंधीत्राधिकरणोय तस्मादित्यर्थः। पूङ। पूङ इति सेडित्यन्यतर
स्यामिति चानुवर्तनात्सेटो रेवत्का निष्ठयोः कित्वविकल्पः स्यात्। ततश्च पुवित्वा पुवित इति पक्षे
स्यात। अस्ति चेडागमः पूङश्चेति विकल्पेनेड्विधानात्। नवेति।। इद्धिश्चपूङश्चेति सूत्रं वार्त्तिककां
रः प्रत्याचष्टे। तत्रानियौरेवोक्ता निष्ठयोरनेन कित्वं निकल्प्यते। तत्र यदा कित्वं तदा श्रुकः किती तीट्
प्रतिषेधात्पूत्वा पूत इति भवति। यदा त्वकित्वं तदा इट्गुणयोः पवित्वा पवित इति भवति। भारद्वाजी
या इती। लाघवमनादृत्य सूत्रकारेण पूङश्चेती द्वितीयं पठितं इह विकल्पो नानुवर्त्तते। उत्तरत्र वाग्र
हणादिति सिद्धतीष्टमिति भावः। उत्तरार्थमिति। नत्का सेडिति कित्वनिषेधस्य सिद्धत्वात्।।

इद्धिधाविति। ननु गोरत्वाद्भारद्वाजीयमतमयुक्तमत आह लाघवमिति विभाषामध्ये इति। विभाषयोर्मध्ये इत्यर्थः
किमर्थं तर्हि त्का भहणमिति प्रश्नो भारद्वाजीयमते वोध्यः। नन्विहार्थत्वे संभवति कथमुत्तरार्थं च मत आह नत्केति।।

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीस्मारकसंग्रहः

कै०वि० त्वषिम्नपारंपर्यप्रतिपादनेति चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् परंपराप्रतिपादनेनेत्यर्थः। श्लोक्यु। वेत्यनुवर्त्ते
९७ रुभयथापि विवक्षत्यसिद्धेर्विचारोनुपपन्न इत्यतस्तात्पर्यमाह किमिति। ननु क्वचिद्विधिमुखेनन

त्वपि। पूजार्थमिति। शास्त्रस्य पूजापारंपर्यप्रतिपादनेनानादित्वात्प्रामाण्यप्रतिपादना
त्। शलो। किमिदमिति। किमियमप्राप्ते विभाषा आहोस्वित्प्राप्त इति प्रश्नः। तत्राप्राप्तवि
भाषायां सत्र एवाप्राप्तं कित्वं पक्षे विधीयत इतीत्कानुवृत्तिरनर्थिका नहि तस्य कित्वं
विधेयं स्वत एव भावात्। अथ प्राप्तविभाषा तदा त्कः कित्वमस्तीति तस्यैव पक्षे निषेधः कर्त्त
व्य इति सन् ग्रहणं न कार्यं न हि तस्य कित्वमस्ति यत्पक्षे निषिध्यते। शल इति। अप्राप्तविभा
षयमेकेनैव सूत्रेणाव्यवस्थितेत्यर्थः। एकसूत्रत्वदर्शनाय विचारः कृतः न तूभयत्र विभा
षा न संति। प्रतिलक्ष्यं व्यापाराश्रयणे तासां सिद्धत्वात्॥

कश्चिन्निषेधमुखेन व्यापारादुभयत्र विभाषात्व प्रतिलक्ष्यलक्षणभेदादत आह एकरूपत्वेति। व्यापारै शि०शा०
क्ये संभवति तद्भेदस्वीकारे निष्फल इति भावः ९७

३०२

ऋकारो। भाष्ये प्रतिनिर्दिश्यत इति। विशेष्यत इत्यर्थः। ऋकारः कालो यस्येति ऋकाल इव कालो यस्येत्यर्थः। ननु ऋकारानां व
र्णानां बहुत्वात्। एकः संज्ञीत्यनुपपन्नमत आह ऋ इत्येकस्येति। उपात्तद्विमात्रत्वाकारेणैक इति भावः। संज्ञिविशेषण
स्येति उ इत्यस्येत्यर्थः। संज्ञानां चेति। प्रदेशेषु त्रिविधव्यवहारदर्शनादिति भावः। संख्यातानुदेश इति। संख्यातं सम्य
क् ज्ञानमनतिक्रम्यानुदेशः संबंध इत्यर्थः। सुप्सुपेति समासः। स्थानक्रमेणान्वय इति यावत्। नन्वेवमर्थतः समसंख्य

ऋकारः। अयुक्तोयमिति। तपरस्तत्कालस्येत्यत्र व्याख्यातत्वादिह न व्याख्यायते ह्रस्वादिष्विति। ऋ इ
त्येकस्यैव शब्दस्योच्चारणाद्देशान्तरगमात्तत्संज्ञिविशेषणस्यैकत्वे सति संज्ञिनोप्येकत्वात्संज्ञानां च त्रित्वात्सं
ख्यातानुदेशाप्रसंग इत्यर्थः। सिद्धं त्विति। त्रयाणां कृतैकादेशानां निर्देशात् द्विशेषणत्रयावच्छिन्नत्वात्संज्ञिनाम
पि त्रित्वात् यथासंख्यसंबंधः सिद्ध इत्यर्थः। शब्दो अर्थतश्च साम्यं यथासंख्यसूत्र आश्रीयते न शब्दत एव।
अथवा शब्दतः साम्याश्रयणेपि संहितावशादेकमिव प्रतीयमानास्त्रयः शब्दा उच्चारिता इत्यदोषः। कथं पुनरिति। प्रत्य
क्षेणैकस्यैव शब्दस्य श्रवणात् भेदावगमे नैव प्रमाणाभाव इति भावः। लिङ्गमिति। अनुमानात् भेदावसाय इति भावः

त्वविशब्दतस्तदभावात्कथं यथासंख्यसूत्रप्राप्तिरत आह अर्थतश्चेति अत एव पूर्वस्मै पदानां पालित्यादेर्यथासंख्यमिति भा
वः। ऋशब्दस्य त्रयोऽर्थाः इति तात्पर्यं। त्रयः शब्दा इति। वैयाकरणे सथा सुत्रे यत्वादिति भावः। भाष्ये विकारोदीर्घरूपः तेन निर्दे
श इति त्वतीयात्तत्पुरुषः तदा प्रश्लिष्टेन इति अनुमानादिति। अनेकसंज्ञाकरणात् संज्ञिनां शब्दतो भेदावसाय इत्यर्थः। प्रयोग
स्थविमतास्संज्ञाभिन्नसंज्ञिविषयाः नानासंज्ञात्वादिति भाष्ये॥

भाष्ये प्लुताश्रय इति न च मध्ये करणे कथं प्लुताश्रयः प्रकृतिभाव इति भावः। इति भाष्यं मध्ये त्रिमात्रसत्त्वेऽपि गौर्विराट् दीर्घत्रिमात्रस्यैव
प्लुतोऽत्र काश्रयप्लुतत्वमारोपयातिमिगासंधौ कर्त्तव्ये प्रकृतिभावापत्तिः सत्या व्यवहार इवदीर्घादिव्यवहारोपि लौकिक
शास्त्रीयोभयविषय इत्यभिमानः तदाह लोकेति शास्त्रादिति। लौकिकव्यवहारोप्यनादिशास्त्रसंस्कारपूर्वकः अन्य
थासंज्ञाकरणानर्थक्यमिति भावः। अनंतरतमः उकारादिः नहीति अबाधेनोपपत्तौ बाधानयुक्तेति भावः। प्रतत्वा

भयंतावदिति। लौकिकव्यवहाराश्रयेण ह्रस्वत्वं ह्रस्वत्वं च सिद्धमाश्रित्यैतदुच्यते। पत्ताविति। शास्त्रान्
स्थितायां ह्रस्वादिव्यवस्थायां लोके ह्रस्वादिव्यवहारो नान्यथेति भावः। यत्नमिति। अनंतरतमादेशवि
धानार्थमेतत्स्यादिति चेत्। तन्न। न हि स्थानेंतरतम इत्यस्याः परिभाषायाः प्रत्यक्षायाः बाधायुक्तेति विशे
षानुपूर्वीप्रतिपत्तौ लिंगत्वमेव प्लुतविधानस्य। मात्रिकेणेति लिंगद्वयेनांत्यमध्याभ्यां मात्रिकस्यापकृष्टत्वा
दित्यर्थः दीर्घप्लुतयोस्त्विति। उकारेणत्वाद्विमात्रत्रिमात्रयोः ह्रस्वरूपस्य च ग्राहक इति ह्रस्वे संज्ञात्रयाणा
मपि प्राप्नोति। नन्वेवं दीर्घप्लुतसंज्ञाभ्यां द्विमात्रत्रिमात्रयोर्ह्रस्वसंज्ञा बाध्यते। संज्ञानां समावेशाभ्युपगमादाक
डारादेका संज्ञेति वचनात् द्विमात्रत्रिमात्रोच्चारणत्वात् भिन्नकालानां न ग्रहकाविति न तत्र दोषः॥ ॥

पूर्वनिपातबाध इति न युक्तं प्रागुक्तयुक्तेरत आह लिंगद्वयेनेति। अबाधेनोपपत्तौ बाधानयुक्तेति भावेऽनणत्वादिति। इदं
ज्ञापितत्वस्याप्युपलक्षणं नतु ह्रस्वसंज्ञावद्दीर्घप्लुतसंज्ञेपि त्रयाणां स्युरिति संज्ञात्रयकरणं व्यर्थमत आह द्विमात्रेत्यादि। अन
णत्वादिति। यत्नाभिविवेचनव्यापकजात्यविवक्षणं चेत्यपि बोध्यं नन्वेवं वाचानां संज्ञितत्वाद् यथासंख्यभंग इति चेन्न। प्राक्सा
नादेशात् शे०शा० ९५

भाष्ये सिद्धत्वव्यवस्थिता इति। प्लुतत्वादयो भिन्नव्यक्तिगता एवेति भावः। ननु तपरस्तत्कालस्येति तत्कालपरस्तत्कालस्येति सूत्राभावात् कथं समत्वम
त आह एकेति। तदेवोपपादयति ऊ अजिति। किं चैवमुकाराणामेवसंज्ञित्वेन संज्ञाविधानेवैयर्थ्यापत्तिः अपितु तैरजिति। तत्र च मुख्यसामा
नाधिकरण्य उक्तदोषात् लक्षणया सामानाधिकरण्यं दर्शयितिनवेति। तत्र सादृश्यं तरासंभवाच्चाख्यानाच्चकालकृतस्यैव तस्य ग्रहणमि
ति भावः। हलांत्विति विशेषादाचामेवस्वरकाथनादिति भावः। प्रत्याहारेपुञ्जातिपक्षाश्रयणात् दोष इति तात्पर्येण नु ह्रस्वसंज्ञा ह्रस्व विधाय
यावत् चेति। एककार्यत्वादेतदुक्तं। ऊ अजित्येव कालाथेलभ्यते। उकारादयो वर्णव्यभिचरंतीतिनावत्वेनते विशेष्यंते। अपितु तैरस्तु
तत्रोकारादिकालत्वाद् उकारादिद्वयोपि न गृहीष्यतइति नार्थः कालग्रहणेन। ततकिं पतेश्रूयमाणेनैवोकारेणकालं विशेषयितुमि
ति सवर्णग्रहणं न भविष्यति। तत्रैतत्स्यात्। उकारात्परः कालशब्देन श्रूयत इत्याह। प्रत्येकं चेति। प्रत्येकमाश्रयणोसंभवात् संज्ञा
त्रयकरणाच्चेति भावः। अत्राच्संज्ञायामिति। ह्रस्वसंज्ञा च प्राच्संज्ञेति तद्विधानउकारः सवर्णान् न ग्रहीष्यतीति। उदात्तादि यस्तु गु
णानभेदका इति तत् भिन्नस्यापि ह्रस्वसंज्ञा भविष्यति। उदात्तादिषु संज्ञासु अच्चग्रहणं निवृत्तिमिति दीर्घप्लुतानामपि ताभावि
ष्यंति। हलां त्वयोग्यत्वात्तदभावः। इकोयणचीतिनुप्राच्संज्ञाविधानं अपितु आदिरंत्येनेति विहितसंज्ञानुवाद इति सवर्णग्रह
णं भविष्यति। अथवा ह्रस्वसंज्ञेति। त्रयाणां चेद्ध्रस्वसंज्ञा तदा ह्रस्वप्रदेशेषु त्रय संज्ञिनः उपतिष्ठेते। तत्रांतरतमादेशविधानेह्रस्व
संज्ञाविधानमनर्थकमेव स्यात् अथवा वचनादनंतरतमो भवेत् एवमपि ह्रस्वप्रदेशेषु अग्रहणमेव कुर्यादित्यर्थः। ॥

केषु एकमात्रादीनां त्रयाणामपि विग्रहणार्थः स्यादित्यत आह त्रयाणां चेदिति अनंतरतमेति। प्रमाणत इति शेषः ह्रस्वप्रदेशेष्वग्रहणमिति
न च विधीद्धस्व ग्रहणे त्रयाणां विधानमुत्तअग्रहणे त्वेकाणोकस्यैव। विधीयमानत्वेन सवर्णग्रहणे कत्वादिति विशेष इति वाच्यं विधी
यमानेनापि क्वचित्सवर्णग्रहणादित्यभिमानः अनुवादे तु उभाभ्यामपि त्रयाणां ग्रहणेनाच ग्रहणमेव कार्यमिति भावः॥ ॥

भाष्येननुच्चेदमिति। ह्रस्वप्रदेशेष्वजग्रहणेत्वचश्चेतिनियमाभावाद्धलामप्यादेशः प्राप्नोतीतिभावः। परिहरतीति स्यादेतदिति किंचि
त्कराणि किंचिद्विशेषकराणि नचास्ति कश्चिद्ध्रस्वविधाने विशेषः अंतरतमपरिभाषया मात्रिकस्थाने मात्रिकस्य द्विमात्रिकस्था
ने द्विमात्रिकस्यैव विधानादितिभावः। नचानंतमादेशविधानार्थं तद्बाधकल्पनापेक्षयेष्टानुरोधेन तयोर्ह्रस्वसंज्ञाभावज्ञाप
नस्यैवोचितत्वमितिभावः। यावदज्ग्रहणमितिप्रयोगेयत्परिमाणकाज्जुच्चारणमित्यर्थः। तावत् ह्रस्वग्रहणमिति तात्पर्येण क्वचिदे
वग्रहस्वशब्देनाग्रहणं विधानमतस्तानि व्यर्थान्येवेत्यर्थः। येतुह्रस्वविधायकेष्वज्ग्रहणमिवकार्यमित्येतद्भाष्याशयं वर्णयंति
तेषां संज्ञयाविधाने नियममित्यादेः समाधिरयं कथमिति चिंत्यं। षड्ग्रहणान्यष्टौग्रहणानीति भाष्यस्य चोपपत्तिश्चिंत्येति दिक्॥

इदं तर्हीति। असत्यां ह्रस्वसंज्ञायां ह्रस्वादेश इतिकर्तुं न युज्यते। ततश्च ह्रस्वविधिषु देशेषु बहुकृत एव इगिति वक्तव्यं
तद्गुरु भवति। ग्रहणानीति। रघुतेनेनार्थ इति ग्रहणपदमुच्यते। ह्रस्वादेश इत्यागः प्रश्लेषनिर्देशात् पृथक् प्रयोगाभावात् आ
इः न गणितं। ननु मितां ह्रस्व इत्यत्र हेऽवेश्न इत्यस्य हिऽयतीत्यर्थमेव इगिति वक्तव्यं। तथा खित्यनव्ययस्येत्यत्रापि पर
मनुमन्य इत्यर्थमिति गौरवप्रसंगः एवं तर्हि चइगितिपंचकृत्वोक्तव्यार्थमाणेप्रतिपत्तिलाघवं भवतीति लाघवोपल
क्षणपरं भाष्यं द्रष्टव्यं। ह्रस्वदीर्घप्लुत इति सौत्रत्वान्निर्देशस्य लिंगव्यत्ययेन पुंस्त्वं॥

अनुवादे तु ह्रस्वग्रहणात् ग्रहणयोः समत्वेनेति। एतदर्थद्वयबोधनार्थमिवेदमाश्लिष्टत्वाद्वोपादानं भाष्य इति बोध्यं लाघवो
पलक्षणपरमिति केचित्तु एतत्सूत्रस्यैतद्भाष्यप्रामाण्यात् कर्मेत्रेणिङितिसूत्रे चिणमुलोरिति सूत्रस्य दीर्घग्रहणस्यैत
दिदानीं प्रयोजनं यद्दीर्घविधौ स्थानिवत्वनिषेधइति वदतो भाष्यकारस्य प्रामाण्याच्च चिणमुलोरिति सूत्रस्थ भाष्याच्च हेऽवेष्टन
इति धातोर्घटादावसौ पठ्यते किंतु पाठः परमनुमन्य इत्यादेश्चैतद्भाष्यप्रामाण्यादनभिधानमिति प्रथाश्रुतं भाष्यमेव सम्यगित्याहुः पुंलिंगैक
वचनदर्शनाद्वानुपपत्तिमंग्रांक्याह सौत्रत्वादिति लिंगस्य लौकिकत्वात्सर्वत्र परित्यक्तुं शक्यतेऽनतुशास्त्रीयैकवचनस्येति भावः॥ ॥

तदशिष्यं तत्युक्तवद्भावशास्त्रं भाष्ये कृत्रिमा इति शास्त्रकृता बोधितसंकेता इत्यर्थः। कृत्रिमसंज्ञा न ह्येहेतुमाह प्रत्यासत्तीति सामर्थ्यमिति। प्रकरण
ल्लिंगवत्त्वदित्यर्थः। अवगम इति भावे ङ्तो यौगिकः संज्ञाशब्द इत्यर्थः। प्रतीति प्रामाण्यमवश्याश्रयणीयमित्याह तत्र यथेति। प्रमाणमिति। वचन
मंतरेणापीत्यर्थः। लुब्योगाप्रख्यानात् योगप्रमाणे च तदभावेऽदर्शनं स्यात् इत्यनयोस्तात्पर्यं दृष्टांतदार्ष्टांतिकयोः रूढयौगिकत्वरूपवैषम्यपरिहा
रं चाह न चेति। एवं च लिंगप्रकरणं जात्याख्यायामित्यादिसंख्याप्रकरणं च पूर्वाचार्यानुरोधेन कृतमिति ध्वनितं सूत्रकृता सर्वं चेदं कालोपसर्जने च
तिनसंगृहीतं। योगानवगमादिति। संप्रति विनापि तत्त्रियोगं जनपदे पंचालशब्दव्यवहारदर्शनादित्यर्थः। तत्र सर्वेषामिति। उपचर्यादिरूप

।। तदशिष्यं। क्रियापना इति प्रत्यासत्तिन्यायाश्रयेण प्रश्नः। नेत्याहेति। प्रत्यासत्तेः सामर्थ्यं बलवदिति। नहि दिग्घुघभा।
दिसंज्ञानां प्रमाणत्वं युक्तवद्भावशास्त्रस्याशिष्यत्वे हेतुरुपपद्येत संबंधाभावात्। संज्ञानमिति। सामर्थ्ये बलेनाव
गमः संप्रत्यय इत्यर्थः। तत्र यथा पंचाला वरणाः सिकता वर्षा इत्यत्रकेलिंगसंख्याविशेषावगतिरुत्पद्यमाना प्रमाणं।। ए
वं पंचालावरणा इत्यादावपि न च पंचालादयो यौगिकाः अपितु जनपदादीनामेताः संज्ञाः अतो योगानवगमात् तद्धितो
नोत्पद्यत इति लुबपि न वक्तव्यः तन्तत्र सर्वेषां लिंगानां सर्वभावात् केनचिच्छब्देन प्रत्याध्मानं वस्तु कस्यचिल्लिंगस्य व्यंज
कमिति दारादिषु नियतलिंगता सिद्धा बहुत्वमप्यवयवगतं शक्तिगतं तत्र समारोप्यत इति संख्यायोगोऽपि सिद्धः। एका
सिकतेत्याद्यपि शिष्टप्रयोगदर्शनात्स्यात्
स्यस्यैकैवत्नान्वयित्वादिति भावः। ववस्क। द्रव्यलिंगसंख्याकरणीकाश्रयत्वं हि द्रव्यत्वमिति तदेव द्रव्यत्वानुपपत्तिपरिहाराय लिंगपरिव्यंजकं शब्द
स्तकरणामिति भावः। एवं च दारपदार्थस्य स्त्रीत्वे पि शब्देन उपचयलक्षणं पुंस्त्वमेवाभिव्यज्यते सर्वेषां सर्वत्र सत्त्वादिति तात्पर्यं। एकाकिकनेति अयं प्रये
गोहवं यवरटू सूत्रे भाष्ये। एवमन्येपि। अवादिशब्दे विधेयविशिष्टप्रयुक्ताः साधव इति ध्वनयन्नाहादीति।।

जात्याख्यायां जातिवाचिद्विनोमते जातेरेकत्वात्बहुवचनार्थमावश्यकमितीदमयुक्तमित्यसंगत आह द्रव्यं त्विति जातेरुपलक्षणत्वं तु प्रत्य तावच्छेदकतया बोध्यं प्रकारांतरमपि मंजूषायां द्रष्टव्यं जात्याख्यायां बहुष्वेकवचनमित्यसंगतमत अभेत्र पक्षइति। क्रियादिप्रवृत्तिनिमित्त काश्रवत्वानस्यादिति भावः द्रव्यवादे क्लत्तगतोह। जातिपदार्थे ति जात्याख्यायामेकस्मिन्निति पदैकार्थ्यं तद्युक्तं सामान्याभिधानादिति योजना वार्तिकस्य अत्रपक्षे बाहहोहाद्यन्वयो विशेषणीभूतव्यक्तिद्वारकं परं परायाजातावेवेति भावः अभ्युपगमत्वे हेतुमाह बहुष्विति अ

जात्या। जातिरुपलक्षणं द्रव्यं तु शब्दार्थ इति दर्शनाश्रयेणाह। इदमयुक्तमिति। बहुष्वेकवचनमिति। अ
त्रपक्षे जातेरुपलक्षणत्वेनाख्या जात्या ख्येति व्याख्यानं। जातिपदार्थपक्षाश्रयेणोत्तरमाह। जात्याख्या या
मिति। गार्ग्यगार्ग्यौ चमिति गोत्रस्यापि जातित्वाभ्युपगमादेतदुक्तं। बहुषु गर्गेषु गार्ग्यत्वस्याभिन्नस्याभा
वात्। एकस्मिंस्तु पिंडे अवस्थाभेदानुगताडित्वत्वादिका जातिर्जात्याख्यायामिति वचनसामर्थ्यान्न
गृह्यते। जातिपदार्थमते हि सर्वे शब्दा जात्यार्थाभिधायिन इति सामर्थ्याद्भिन्नपिंडविषया जातिरा
श्रीयते।

भिन्नस्याभावादिति पाठः अतएवाभ्युपगमवादोयमिति तात्पर्यं क्वचित्वभिन्नस्याभावादिति पाठः। तदा जात्यंगीकारे प्रमानत्दर्शन मिदं अन्यथा गर्गानिष्ठजनकतानिरूपितजन्यत्वस्य प्रतिव्यक्तिभेदात् गार्ग्य इत्यनुगताकार प्रतीतिर्न स्यादिति भावः नन्वेवं परिमा णभेदाद्व्यभेदेन डित्थत्वादीनामपि जातिशब्दत्वेन त॰ त्रापि बहुवचनं स्यादत आह एकस्मिन्निति सामर्थ्यमेव दर्शयति जातिपदार्थे ति सर्वेशब्दा इति। युक्तयुक्त्या पाचकादयोपि॥ शि०शा०
५१

४२९

भाष्ये तत्त्वविवक्षितमिति प्राधान्येनेति शेषः भाष्ये ब्रीहिभ्य इति। स्त्रेएकस्मिन्नित्येकशब्देन एकवचनं गृह्यते भीमो भीमसेन इतिव त्सप्तमी च षष्ठ्यर्थे इति भावः सप्तम्युपादानादतिदेशावेत्यत्तरं। बहूनामर्थानां वचनं भ्यसादि बहुवचनमपि भवतीत्यत आ ह। बहूनामिति कर्मणि ल्युट् बहूनामर्थानां संबंधि यदुच्यते तद्बहुवचनं तच्चोपस्थितत्वाद्बहुत्वमेव तदा हुत्वमेवोच्यत इति॥ एकत्वरूपेर्थे शास्त्रीयो बहुत्वरूपार्थस्य तादात्म्येनाहार्यारोप इति तात्पर्यं अतएव तद्विशेषणानामपि सिध्यतेति। एवमिति। अन्य

बहूनामिति। बहूनार्थानां बहुत्वमेवोच्यत इत्येकस्मिन्नर्थे बहुत्वमनेनातिदिश्यत इति बहुत्वात् बहुव
चनं भवतीति नास्ति स्वान्यादेशाभावः। एवं तिष्यपुनर्वस्वोरित्यत्रापि द्विवचनबहुवचनशब्दाभ्यां द्वित्व
बहुत्वयोरभिधानादर्थातिदेशात्स्थान्यादेशाभावाभावः। सख्या सैप्रयोग इति। एकस्येव द्वैत्वाति
देशः क्रियमाण एकवत्स्य प्रयोगेरपि प्राप्नोतीति प्रतिषेध उच्यते॥

था तत्रापि तिष्यपुनर्वस्व इत्यत्र जसि चेति गुणः स्यादिति भावः एकशब्दप्रयोगविरोधात्बहुवचनाप्राप्तेराह। एकस्येवे ति जातेरेकत्वाबगतावेवातिदेशप्रवृत्तेरिति भावः भाष्ये प्रसंगादस्मदो द्वयोश्चेत्यस्य प्रतिषेधमाह। अस्मद इति॥

कै०वि० ५१

ननुद्रव्यपदार्थाश्रयेण प्रत्याख्यानेव्रीहिःसंपन्न इतिइवप्रयोगोनस्यादत आह उभयेतिकदाचिद्द्रव्यंप्रधानंकदाचिज्जातिःप्रधा
नमित्यर्थः।भाष्ये पृथक्त्वेनेति भेदेनेत्यर्थः जातिशब्देनेति।जातिशब्दत्वाभिमतेनेत्यर्थः निष्कृष्टजात्यभिधायकगोत्वादिश
ब्देतुनायंविधिरिष्टइतिभावः तदाहद्रव्यमपीति प्राधान्येनेतिशेषः तदाहतत्रकदाचिदिति।जातिप्रकारकव्यक्तिविशेष्यकएव
शक्तिग्रहः गोगीपदवाच्यइतिजातिव्यक्त्युभयविषयकबोधेकारणं।अतएवजातिविशेष्यकशक्तिग्रहविषयात्गोत्व

उभयपदार्थपक्षाश्रयेणप्रत्याख्यानुमाह।अशिष्यमीति।तत्रकदाचिज्जातेःप्र
धान्यंकदाचित्द्रव्यस्येतियथेष्टंप्रयोगउपपद्यते॥ ॥ श्रीँ ॥ ॥श्रीः॥

पदान्नकदापिव्यक्तिबोधः जातिव्यक्त्योरन्यतरस्यविशेष्यतायांचपुरुषेच्छैवनियमिका तात्पर्यग्राहकंचैकवचनबहुवचनादि।
एतदेवाभिप्रेत्यजातिप्राधान्येद्वंद्वैकवत्भावोव्यक्तिप्राधान्येतुनेतिव्यवहारइतिभावः तत्रजातौव्यक्तेःप्रकारताऽभेदेनेतिनवाह।
द्यन्वयानुपपत्तिः गोत्वपदजन्यगोत्वबोधेतुभेदेनेतिनगोत्वंवाहयेत्यादिप्रयोगः व्यक्तिद्वारकोन्वयइत्यस्याप्यपमेवार्थइतिबोध्यं।भा
ष्येमहतिगोमंडलइतिअतिनिबिडगोमंडलेअविविक्ततयादृष्टेइत्थमुक्तिः तत्रजातेरेवशाब्दार्थत्वेजातेर्दृष्टत्वात्प्रश्नानुपपत्तिरित्यर्थः॥ ॥ शि०शा० ५१

४३०

अस्मदोद्व: नन्विंद्रियाणांस्वातंत्र्येविवक्षितेव्याप्तिपाणामिंद्रियांतराणांकर्तृत्वाभावाद्बहुवचनमनुपपन्नमत आहएकेंद्रियेति।स्वविषयौदासी
न्यंसंनिधानत्वेहेतुः।संनिधानत्वंसहकारित्वंनन्वेवमस्मदःप्रयोगोनुपपन्नोमहाहंशरीरंचेति।अहंकारोऽहंत्वप्रतीतिरहंकाराद्इत्यादिः।पार
तंत्र्येति।तथाचकरणत्वेनविवक्षितत्वात्संनिधापकत्वंनतुकर्तृत्वंनास्तीत्यर्थः।उच्चारयितात्मनेअहंकारास्पदात्मनोवाएकत्वाद्द्वावामित्यनु
पपन्नमत आह।एकशेषेति।मदादीनांपत्न्यंतरंतच्छिष्यतइतिभावः अस्मदोर्थद्वयाभिधानादित्यत्रास्मद्इतिशेषत्वविवक्षयाषष्ठीसंप्रत्ययेति

अस्मदो।तद्यदेति।एकेंद्रियप्रवृत्तौचेंद्रियांतराणामौदासीन्येनसंनिधातृत्वात्कर्तृत्वविवक्षेतिवयंपश्यामइ
त्यादिसिद्धं।शरीरइवेंद्रियस्थप्यहंकारोत्पादाद्द्वयमित्यनेनेंद्रियाणामभिधानात्पारतंत्र्यविवक्षायांत्विंद्रियाणा
महंब्रवीमीत्येकवचनंसिद्धं।युष्मदस्मदोःशेषेकृतेशेषेअस्मदोर्थद्वयाभिधानात्द्विवचनमितिनार्थोयोगेनसंप्रत्यय
माणार्थयुष्मदादिगुरौपक्षेबहुवचनंसिद्धं।फाल्गुनी॥बहुवस्तेऽर्थाइतिअमावास्यायामथादित्यमंडलंप्रविष्टेनचंद्रेण
नक्षत्राणांयोगोऽस्त्येवेतितत्रापिबहुवचनंअर्धंचाश्छत्रिणाइतिन्यायेनसिद्धेएकस्यांतुताराणांफाल्गुनीशब्दोनवर्त्तत
इत्येकवचनाभावः।सर्वत्रचलौकिकःप्रयोगःप्रामाण्येनाश्रीयतइत्यनवस्थानंभवति।

व्यवहारइत्यर्थः एवंचयुष्मदिगुरावेकेषामितिक्वचिद्वृत्तावुच्यमानमसंगतमितिभावः अतएवाचार्याः कथंपत्नीत्यादिसंगच्छन्तेइत्थमेवडित्थाःक
थयंतीत्याद्युपपत्तिर्बोध्या एतदर्थंचप्रत्याख्यानप्रकारस्यावश्यकत्वात्सूत्रंप्रत्याख्यातमितिभावः फल्गुनी।अमावास्यायांचंद्रस्यनष्टत्वात्कथंबहुवचनमि
त्यत आह।अर्थमेवेति।ननुचंद्रस्यफल्गुन्यादिपरत्वाच्युत्वाभावात्कथंतमादायफल्गुन्यावित्यादिप्रयोगोऽत आहकुर्वधवाइति।तद्रूपापारोपात्संबंधप्रवृत्ति
रितिभावः नन्वेवमेकस्यांविवक्षायामेकवचनमपिस्यादत आहएकस्यामिति।नन्वेवंनक्षत्रांतरेऽपिचंद्रसंबंधविवक्षायांद्विवचनादिस्यादत आहसर्वत्रेतिअन
वस्थाअतिप्रसंगः

कै०वि०
५३

तिष्यपुनानुमाणकवाचिद्वंद्वनिवत्यर्थंतदत आह तिष्येति। तिष्येणेति। नक्षत्रेण युक्तः काल इत्यणो लुबविशेष इति। लुपि जाते संधिवेला घणः स्वातितिष्यपुनर्वसवितिलुक्। यौगिकत्वादिति लोपेनापि उत्तवत्रिशिष्टस्य तदर्थात्मर्थाविशेषगात्मनः क्रिये बोध्यते अत एव लुबादिप्रत्याख्यानं सूत्रकृतोक्तमिति भावः। अंतरंग इति। कालार्थतद्धितांता माणवकार्थतद्धितोत्पत्तिरिति कालमाणवकयोरंतरंगबहिरंगतेति भावः। यथेति द्रव्यकर्मणि क्रियास्वरूपपरिपूरणं। कालकर्मणि च वर्णता वा क्रियाया काल संबंधपूरणमिति तयोरंतरंगबहिरंगता बोध्या। नन्विति। अ

तिष्य। नक्षत्र इति किमर्थमिति। तिष्यपुनर्वसवो माणवका इत्यत्र गौणार्थत्वान्न भविष्यतीति प्रश्नः। उत्तरवादि नस्त्वयमभिप्रायः। तिष्येण युक्तः कालस्तिष्यस्तिष्ये जातो माणवक इति यौगिकत्वान्नास्ति गौणार्थत्वं। ज्योतिषि वर्तत इति। नन्वेकेनैव नक्षत्रग्रहणेन कालमाणवकयोर्निवृत्तिः सिद्धा। तत्र किं द्वितीयेन नक्षत्रग्रहणेन। नतद्सि अंतरंगः कालः बहिरंगस्तु माणवक इति अंतरंगस्यैव कालस्यैकेन नक्षत्रग्रहणेन निवृत्तिः स्यात्। यथाऽकर्मकत्वं तरंगं द्रव्यकर्म निषिध्यते न कालकर्मेति मासमास्यते देवदत्तेनेत्यत्रापि भावेलकारः सिद्धो भवति। द्वितीयेन तु नक्षत्रग्रहणेन बहिरंगोपि माणवको निवर्त्यते। ननु नक्षत्रद्वंद्व इत्युक्तेऽर्थात् द्वयोरपि कालमाणवकयोर्निवृत्तिः सिद्धेत्याह। अथ वेति। तिष्यपुनर्वस्वोरिति योगविभागः क्रियते। नक्षत्र इति चानुवर्त्तते। तेन यत्किंचित्तिष्यपुनर्वस्वोः कार्यं तन्नक्षत्रवस्योरेव भवतीत्यर्थः॥

कर्मकाग्रहणेन शक्तस्यैव साक्षात्कर्मणि व्यावर्त्तकमाने युक्ता पूर्वं पश्चात्संबंधसत्त्वेनांतरंगस्यैव व्यावृत्तिः। नन्वेवं प्रकृते। अस्य हि स्वार्थसमर्पणद्वारान्यव्यावर्त्तकत्वेनाविशेषादुभयव्यावर्त्तकत्वसंभवात् इति भावः। अत्र त्वस्यां गाधिकाधिकारस्थेन कथं संबंधोत आह। तिष्येति नक्षत्र स्याणनक्षत्राणतत्तः सप्तम्यां नक्षत्राणीति निर्देशः॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

शि०शा०
५३
४३१

यत्नोपेति। तद्बुध्य विशेषणार्थमावश्यकमेवेति भावः। पुनर्नक्षत्रे तिष्यपुनर्वस्वोः शब्दयोरभिधेये नक्षत्रे वर्त्तमानानां नक्षत्रशब्दानां द्वंद्व इति स्वार्थ इति भावः। अर्थस्यैवेति द्व्यर्थसंबंधिनो बहुत्वस्य द्वित्वातिदेश इत्यर्थः। समासस्येति। कृत्तद्धिते ति सूत्राद्विपरिणतविभक्तिकं समासग्रहणमनुवर्त्येत्यर्थः। नास्तीति त्यं तेन पूर्वमतं दूषणं। अथ भाष्यं व्याचष्टे अवयवेनेत्यादिना। अवयवार्थकेनवृत्तिपदार्थबोधनमित्यर्थस्तदाह समुदाय इति उद्भूतावयवभेद इत्यर्थः। विपर्यास विषया इति। यस्तिष्य इत्युपलक्षणं यौ पुनर्वसू स तिष्योयेषामित्यर्थस्या

यत्नोपेकृतेमेव नक्षत्रग्रहणमित्यभिप्रायेणाह। अथ वेति स्वरूपग्रहणे प्राप्तेर्थग्रहणार्थं द्वितीयं नक्षत्रग्रहणं। पुनर्नक्षत्रग्रहणे सत्यर्थस्यैवायमेवं नेपेक्षितो वा तद्शब्दस्यातिदेश इति पर्यायाणामपि ग्रहणसिद्धिः। तिष्यपुनर्वसवः अनुराधा इति। केचिद्धि पुरुषा अन्यपदार्थः नक्षत्राणां तु बहुव्रीहिरिति द्विवचनप्रसंगः। अन्ये त्वाहुः। नक्षत्रवृत्तेः समासस्य ग्रहणे पुरुषाणामन्यपदार्थत्वे स प्रसंग एव नास्तीत्यठयवेन विग्रहः समुदायः समासार्थ इति तिष्यादयस्य एव विपर्यास्तद्विषया बहुव्रीहिणो व्यंतद्इत्यस्तिप्रसंगः जातिद्वंद्व इति। कथमनयोर्जातिशब्दत्वं यावता जातिप्रदेशेषु भिन्नाधारा जातिरिष्यते। न त्ववस्था भेदकल्पितभेदैकवस्तु विषया एवं तर्हि प्रतिमन्वंतरमन्यान्यानि नक्षत्राणीति दर्शने भिन्नाधारा जातिः संभवतीति न कश्चिद्दोषः॥ ॥

यीति भावः विपर्यासो भ्रमः अनुराधा इत्यस्य च विपर्यासेन ग्रहणमानादित्यर्थः। अविवक्षितत्वात्तावचनात्मुह्यैः कर्तस्त्रिके अविवक्षिता इत्यर्थादिति भावः। भाष्ये कथं चात्रेति प्राणस्यादीनामेव समाहारद्वंद्व इति नियम इति भावः एवं तर्हीति। द्वंद्वश्चेत्यादिषु एवां समाहार एवेति नियमबोधनद्वारा तद्व्यतिरिक्तसर्वद्वंद्वस्थानेनोभयरूपत्वबोध्यत इति भावः॥

कै॰वि॰
५७

स्तदानघेतेष्विति।आयोमय:प्राणा इतिश्रुतेरक्षिर्विनाल्लायमानप्राणएवलोकेप्राणिन इत्यक्यंते इद मेवपृष्यत्वंभाष्येऽत्र भवद्धरेनो
तइतिभाव:लोकेप्राणव्यवहारस्याप्यभावादाह।तदधिनेति।अप्राणीति।न्यायसिद्धार्थद्योतकत्वेनसर्वशब्दस्यसंकुचद्वृत्तितैवयुक्ते
तिभावस्तध्वनयन्नाहन्यायेति।एकवद्भावप्रकरणेवेयर्थ्यमुद्धरन्नन्यायमेवदर्शयति।एकेतिविषयविभाव:।सिद्धएवेतिन्यार्थ
इत्यनेनेत्यर्थ:।नह्येतेष्विति॰अयोमय:प्राणाइतिश्रुतेरक्षिर्विनाल्लायमानप्राणएवलोकेप्राणिनइत्यक्यंतेइदमेवपृष्यत्वंभाष्येअत्रभ
वद्धरेनोच्यतइतिभाव:लोकेप्राणव्यवहारस्याप्यभावादाह।तदधीनेति।एवंचतथानियमेपिनक्षतिरितिभाव:केचित्तुइत्यानुरो

सर्वोद्वंद्वइति।अप्राणिजातिद्वंद्वोनित्यमेकवद्भवतिप्राणिद्वंद्वस्तुविकल्पेनन्यायसिद्धश्चार्थोबहुवचनग्रह
णेनलिंगेनसूच्यते।एकवद्भावप्रकरणंद्विविषयविभागार्थमरब्धं।प्राण्यंगादीनांसमाहारएवेति।ननुप्रा
ण्यगादीनामेवसमाहारइतिततस्तत्प्रकरणानुपात्तानांसमाहारेतरेतरयोर्द्वंद्व:सिद्धएव।अथवेति।न
ह्येतेषुलोकेप्राणिव्यवहार:सिद्धभाव:।प्राणएवेति।तदधीनस्थितित्वात्प्राणिनामितएवप्राणाउ
च्यंते॥ ॥इत्युपाध्यायजय्यटकृतेभाष्यप्रदीपेप्रथमस्याध्यायस्यद्वितीयेपादेद्वितीयमाह्निकम्॥

येनद्वंद्वश्चेत्यादीषुसमाहारएवेतिनियम:एवंचाप्राविषद्धेजातिरप्राणिरप्राणिनामितिनित्यैकवद्भावेबहुवचनाभावतस्तत्रमनर्थकं
सदुक्तार्थज्ञापकं।ज्ञाप्यकोटौसर्वशब्देनैकवद्भावविषयोजातिद्वंद्वएवगृह्यतेद्वंद्वश्चेत्यादीनामेवन्येषांतुनित्यत्वमेवानएवैकवद्
वप्रकरणंपूर्वत्रनित्यार्थमुत्तरत्रव्यभिचारार्थमितिभाष्याक्तलेतिसत्रस्यभाष्येणनविरोध:अतएवमदंगाद्यंवत्स्रणाइत्यादिसंगच्छते।
यद्वाजातिप्राधान्येएकवचनव्यक्तिबहुवचनमित्युभयमप्यत्रैवार्थेइदंज्ञापकमित्याहु:॥ ॥इतिश्रीशिवभट्टसुतसतीगर्भजनागोजि
भट्टकृतेभाष्यप्रदीपोद्योतेप्रथमस्यद्वितीयेद्वितीयमाह्निकं॥

शि॰शा॰
५७
४३२

सरूपाणामन्यर्थीकृतमपिसाम्यंगृह्येतेतिप्रश्नानुपपत्तिरतआहरूपस्येति।अंतरंगत्वं।शब्दर्थप्रतीते:पूर्वंनियमेनप्रतीयमानत्वं।अर्थोहि
तद्विपरीतत्वाद्बहिरंग:तथानुकरणादन्यायामप्रतीतेर्हेयश्च।शब्दस्यतुज्ञानमात्रेभानात्सकृत्रापिनहेय:उपदेश:संबंधग्रह:पर्यायास्
यापृतिपाद्यमानत्वमसाधारणत्वंच।ननुसामानानामित्युक्तेपिवर्णकृतलाघवाभावोतआहप्रतिपत्तीतियद्यपिसहमानेनइतियोगस्तत्रा
पितथापिप्रवीणास्विरुद्धएवायमितिभावस्तदाहरूढशब्दत्वादितिसरूपशब्दस्तुज्योतिर्जनपदेतिसमानस्यसभावविधानाद्वयवा

सरूपाणां।रूपग्रहणमिति।रूढशब्दत्वात्समानशब्दस्यतुल्यार्थत्वावगमात्।सरूपाणामितिपुनरुच्य
मानेपदद्वयार्थावगमपूर्वकान्यपदार्थावगमात्प्रतिपत्तीगौरवंभवतीतिप्रश्न:।शब्दोर्थश्चेति।स्व
+रूपस्यांतरंगत्वादुपदेशानपेक्षणाच्चतत्कृतमेवसमानत्वंप्रतीयतेप्रतिपत्तिलाघवंचसमाना
नामित्युच्यमानेभवति+१रूपमित्यत्ररूपग्रहणेनज्ञापितंव्याकरणेरूपवदर्थोपिगृह्यतइति
ततश्चार्थरूपाभ्यांसमानत्वंगृह्येतेत्यर्थ:।शब्दानुशासनप्रस्तावाच्चशब्दसंबंधिरूपंगृह्येतेननुचरू
पोह्यमित्याह।श्रुतौचेतिश्रोत्रोपलब्धावित्यर्थ:।अथवाश्रोत्रेंद्रियंश्रुतिरुच्यते॥ ॥ ॥श्री॥॥

र्थानुसंधानद्वारेणैवसाधुत्वंप्रतिपादयतीतितात्पर्यं।ज्ञापितमितिशब्दार्थविवेकचिद्वुक्तन्यायप्रवृत्तेज्ञापितंदृष्टसर्वार्थ:श्रोत्रेंद्रि
यस्यकरणत्वेप्याधारत्वासंभवादाहश्रोत्रोपेतिभावसाधन:श्रुतिशब्दइतिभाव:।अथवेतिश्रुत्यवच्छेदेनेत्यर्थ:करणसाधनसइति
भाव:आधिग्रहणविषयताद्वितीयेतितुप्रतीतिरितिविवेक:प्राधान्येनश्रोत्रेंद्रियग्राह्यंवस्तुत्ररूपशब्देनोच्यतइतितात्पर्यं॥ ॥

शेषणमिति। अन्येतरनिवृत्तिविशिष्टमवस्थानं विधेयं तच्चैकस्य द्वयोरित्याद्याकांक्षायां प्राथम्यादेकस्यैव भविष्यतीत्यर्थः। कर्मसाध
नेति तत्र हि सरूपाणां संबंधी शिष्यत इत्यर्थः। तत्राक्षिप्तसंबंधिपदे आक्षेपकसामानाधिकरण्यायैकवचनांते एकत्वविवक्षेति
भावः संक्षेपार्थकत्वे द्विवचनानुपपत्तिः संख्यार्थत्वेऽर्थासंगतिरत आह द्वित्वेति द्विबह्वोरिति विषयसप्तमीति भावः। शेषशब्दे
न्तनोपयुक्तादन्यस्मिन् असंभवात् तदाह तत्र भावेति। व्याप्तीति। अन्यत्र शास्त्रे आद्युदात्तश्चेत्यादिनिर्देशेन... नानीस्वरादितिरेफो
च्चारणेन च प्राथम्यन्यायापेक्षया व्याप्तिन्यायस्य प्राबल्यबोधनात्। एवं चेतरनिवृत्तिमदवस्थानं तदर्थः तत्र यद्यपि स्थितेः सिद्ध

एकग्रहणमिति। शेषणं शेष इति भावसाधनपक्षे प्राथम्यादेकस्यैव शेषो भविष्यति शिष्यत इति
शेष इति कर्मसाधनपक्षेप्येकत्वसंख्याया विवक्षितत्वादेक एवावशिष्यत इति प्रश्नः। द्विबह्वो रि
ति। द्वित्वबहुत्वविषयस्यानेकस्य शब्दस्येत्यर्थः। तत्र भावसाधनपक्षे व्याप्तिन्यायाश्रयेणानेक
स्यापि शेषः स्यात्। कर्मसाधनपक्षेपि संस्कार्यत्वात् प्राधान्यात् संख्याया अविवक्षा स्यात्। यथा ग्रहं संमा
र्ष्टीति भावः॥

त्वात् निवृत्तिरिति भावः संस्कार्यत्वादिति। शिष्यमाणत्वविधाने नशेषपदार्थो दोषिसस्य संस्क्रियमाणत्वादिति भावः स्वरूपाणामि
ति शेषः। संस्कार्यत्वादिति शिष्यमाणत्वविधाने षष्ठ्या विधेयबोधकशेषपदेन सामानाधिकरण्यान्वययोग्यः संबंधी आक्षिप्य
ते। स चैकवचनांत एव यद्यपि तथापि तस्य विधेयेन शिष्यमाणत्वेन संस्क्रियमाणत्वेनानुवाद्यत्वादेकत्वाविवक्षेति तात्पर्यम्।

सरूपाणामिति। न्यासानुसारतो व्याख्यानमाश्रित्येषां निर्धारणे षष्ठी साध्वनुशासनत्वात् साधुरित्याद्यध्याहारः एवं च तेषां मध्ये
एकस्य धातुसाधुत्वेऽपरस्यासाधुत्वेनार्थान्निवृत्तिरिति भावः षष्ठीति निर्दिश्यमानस्यादेशा इत्यर्थमावश्यकस्य व्याख्यानापे
क्ष गौरवपरिहाराय नियमार्थत्वमभ्युपगीकार्यमिति निर्धारणषष्ठी न युक्तेति भावः। अंतरतम इति। शब्दतोर्थश्चेति आदिः त
मग्रहणादिति भावः। घुदात्तशब्दस्य बहुव्रीहित्वमनुपपन्नं स्यात्। उक्तार्थत्वात्। कर्मधारयात् मत्वर्थीयोनिष्ट इत्यत आह। ए
द्भावति अत्रोदात्तशब्दो धर्मिपरः आरंभस्यापि तथात्वे एकशेषानर्थक्यमत आह। आरंभेपीति। अत्रोदात्तशब्दो धर्मपर

शेषग्रहणमिति। सरूपाणामेकः साधुर्भवतीति। वाक्यशेषोध्याहरिष्यते कस्य शब्दप्रयोगः। आश्रयग
तसंख्याप्रतिपादनाय द्विवचनबहुवचने भविष्यत इति प्रश्नः। द्रव्यं पदार्थ इत्युपलक्षणं त्वाकृति
रिति दर्शने सूत्रमारब्धमित्याह। प्रत्यर्थमिति यावंति द्रव्याणि विशिष्टगुणक्रियाविषयत
या विवक्षितानि तावंतः शब्दा नामैकैकार्थोपस्थापनाय प्रयोक्तव्याः एकशेषारंभ इत्यर्थः॥ ॥

इति भावः। विधीयमानानेकोदात्तस्योभयत्र न स्यात् स्यादित्युयुगपदित्यादौ समावेशादर्शनादिति तात्पर्यम्। तेनेति। पर्यायेणेति भा
वः। ननु नवशाब्देश्रूयमाणोदात्तानुदात्तयोरनुग्रहायांतरतमपरिभाषयोभयस्वरकएकारादेशो भविष्यतीति चेन्न। तेनैव
रूपेण साधुत्वग्रहणमित्यत्र नियामकाभावेन पक्षावस्य दुर्वारत्वात्। यत्तु इत्थं इश्चेत्येकशेषे एकआदेशोऽप्युपत्वादंत्यस्य स्यात् तत्
वैत्वनिकादनुचरितार्थं ततः सवर्णदीर्घदीर्घादिति सूत्रे सवर्णदीर्घनिषेधे पर्यायविषयं तिस्यादित्याहुः तन्न सरूपाणामिति
बहुवचनेन प्रत्येकं स्थानित्वबोधनेन रमागम्यन्यायेन सर्वनिवृत्तेरदोषात्॥

लोपलोपिपदयोः येनसत्त्वमात्रं स्यादलोपनीयस्येति लोप्यपदं मलहूलोरिति रूपं। संबंध इति। कृत्तद्धितसमासेभ्यो भावप्रत्ययस्य संबंधाभिधायकत्वादिति भावः एकैवेति गार्ग्यस्यापत्यानीति विग्रहलक्षणादिति भावः बहव इति। अपत्यानां बहुत्वात्तत्र नैकस्याः प्रकृतेः। बंकैव बहवः परेत आह यत्राकृतेश्चेति यद्यपि जातेरेकैकव्यक्तिव्यंग्यत्वं व्यद्वाक्तिरकत्वेन परत्वं चैतत्तथाप्यत्र बहितव्यक्तिद्वारकं सर्वगतं जातेः।

लोप्यलोप्येपिते तेति। लोपनीयस्य लोपित्वं लोपसंबंधोत प्राप्नोतीत्यर्थः। गार्ग्य इति। प्रकृतिरर्थाभेदादेकैवयञ्प्रत्ययास्तु बहवः। यन्त्राकृतेश्च एकत्वात्त्व्यवधानाभावादनेकस्यापि तिप्रत्ययस्यपरत्वं न विरुध्यते। तत्र गार्ग्ययञ्यद्यपि स्थितेयदा गार्ग्यशब्दमुक्त्वा प्रत्ययानामेव एकोयशब्द आदेशः क्रियते तदा तस्य बह्वर्थत्वात् लुकि सिध्यति। यदा तु विरूपाणामपि समानार्थानामेकशेषवदेक आदेशः सप्रकृतिकः क्रियते। तत्र गार्ग्य इत्यस्यात्ययोश्च यशब्देपा गार्ग्यशब्द आदेशः तत्र यशब्दांतस्य बहुषु वृत्तिः नतु प्रत्ययमात्रस्येति भावः॥

परत्वमपिमिति मानः व्यक्तिपक्षे पि विजातीय व्यक्तिव्यवधानमेवव्यापीवर्त्यतेन सजातीयतद्व्यवधानमित्यन्ये प्रत्ययानामेवेति समानाकारत्वादिति भावः इदं चिंत्यमेकविभक्तावित्युक्त्यानत्प्रकृतित्वायोग्यानां केवलप्रत्ययानामेवेति। समानाकारत्वादिति भिन्नीकशेषात्प्राप्तेः गार्ग्यसहितानामेव हितत्प्रकृतिना विरूपाणामिति। अंत्ययशब्दयोरपि गार्गीपत्यत्वेनैवबोधकत्वात्समानार्थत्वं बोध्यं। परदिति रुक्तस्तकं संप्रति पन्न वि।प्रयाभिप्रायेण॥

नन्वा श्रियमानगर्गयञशब्दांतर्गतयशब्दस्यान्यत्वेन कथं यञ्जंतत्वादीत्यत आह आदेश्रापक्षेपीति। वचनसामर्थ्यादिति। लुग्वचनसामर्थ्यादित्यर्थः यञ्जबुद्धीति। एतेनावयवस्याप्रत्ययत्वात्लुगसंभव इति परास्तं लौकिकस्य गोत्रस्येति प्रवराध्यायप्रसिद्धस्येत्यर्थः। यस्कादिभ्य इत्यतो गोत्रे इत्यनुवृत्त्या गोत्रे बहुत्वे वर्तमानस्य यञ्जंतस्य लुगिति व्याख्यानात् इदं च प्रतिकृतिबहुत्वेवर्त्तिन लुगो न बहुत्वे इत्यदोष इति भावः। लौ

यञ्जंतं यद्बहुष्विति। आदेशपक्षेपि वचनसामर्थ्यात्सारूप्यात्यञ्जबुद्धकृत्वाद्वाद्यञंतमेतदित्याश्रीयते। काश्यपयइति। काश्यपइ्वायं तत्र तत्प्रतिकृतिरितीवेप्रतिकृताविति विहितस्य कनो जीविकार्थे चापण्य इति लुप्। ततः काश्यपश्च काश्यपश्चेति प्रकृतिप्रत्ययविवक्षायामेकः काश्यपशब्दः प्रयुज्यते स च बह्वर्थे ऽजंतश्चेति लुक्प्रसंगः लौकिकस्य गोत्रस्य तत्र ग्रहणमिति परिहारस्तु रखस्यते इतीहनोक्तः। पय इति। उत्तरत्रार्थ विधेप्रतिषेधादिति प्रत्याख्यानं करिष्यते। किमर्थमिदमिति। जातिः शब्दार्थः तस्याश्चैकत्वादतनेकशब्दाप्रयोगः। आश्रयगतसंख्याप्रतिपादनाय द्विवचनबहुवचने भविष्य

किं कस्येति सिद्धांतस्वरूपकथनं एकग्रहणविषय शब्दस्य इत्यभिप्रायेणोत्तरयति भाष्ये पय इति भिन्नविभक्तिव्यावृत्यर्थमेकग्रहणमिति भावः नुस्त्राभावे सरूपाणामित्यापत्तिरत आह जातिरिति॥

कै०वि० ५१ द्रव्यमिति तत्र हि प्रत्यर्थं शब्दनिवेश इति न्यायात् तत्तद्व्यक्तिप्रतिपादनाय नानाशब्दप्रयोगः प्राप्नोतीत्यर्थः। उपलक्षणं त्विति यो रक्तवासाः स देवदत्त
इत्यादौ रक्तवासस्त्ववदित्यर्थः। अन्यथानन्त्यात् तत्र शक्तिग्रहो न स्यात् केवला व्यक्तिरेव वाच्यार्थः। जातेः शक्तिग्रहे प्रकारत्वेपि न तत्र शक्यताव
च्छेदकता नामिति निमित्तांशतानुभवस्येत्येव चशब्दात् नागशब्दस्येव बोधे प्रकारत्वान्न निर्विकल्पकत्वं तस्य। तत्पक्षे चानुगतधर्माभावान्नानन्ते
नानुगतानेकव्यक्तिबोधसंभव इति सूत्रमिति भावः। विशिष्टगुणक्रियाविषयत्वमिति तदाश्रयत्वेनोपलक्षितानीत्यर्थः। अपरे तु किमर्थमि
ति प्रत्यर्थमिति। अक्षादीव्यन्तां दीयतां भुज्यन्तामित्यादौ वाक्ये प्रत्यर्थं शब्दनिवेशस्यापि दर्शनात् कदाचित् एकशब्दप्रयोगे सह वि

द्रव्यं पदार्थ उपलक्षणं त्वाकृतिरिति दर्शने सूत्रमारब्धमित्याह। प्रत्यर्थमिति। यावन्ति द्रव्याणि विशिष्टगुणक्रियाविषयत
याविवक्षितानि तावतां शब्दानामेकैकार्थोपस्थापनाय प्रयोगे प्राप्ते एकशेषारंभ इत्यर्थः। किमिदमिति। यदिहेतुरहि।

वक्षायां प्राप्तद्वन्द्वनिरासार्थं सूत्रमावश्यकमित्याशयः। किमिदं प्रत्यर्थमिति अर्थार्थं प्रतीत्यादेरपि तदर्थस्य संभवात् प्रश्नः। एकवचनान्तेन निग्रह इ
त्यक्षरनैकैनैवेत्यर्थः। अनेकशब्दत्वमिति अनेकशब्दत्वमेवेत्यर्थः। एकेनापीति। अपि नाम वाक्यसंग्रहः शास्त्रेण सहविवक्षाविषयशास्त्रीय
द्वन्द्वस्यैव वारणात् इति भावः। किमिदमिति अक्षादित्यादावेवाप्रत्यर्थं शब्दनिवेशस्यादिदृष्टत्वेन विरूपविषयेपि लाघवायैकशब्दप्रयोग एव प्राप्ते शि०शा०
ऽनेकशब्दप्रयोगाय विरूपाणामनेकशेष एव कुतो नारभ्यत इत्यर्थ इत्याहुः॥ ५१

४३५

हेतुरहितमिति। प्रत्यर्थमित्यादिरुक्तो न हेतुः अपक्षत्वत्तित्वादिति भावः। अत एव भाष्ये दृष्टान्तमास्थायेत्युक्तं विरूपानेकशेष इति। नन्वेनेकशेष
इत्यस्यानेकस्य शेष इत्यर्थो वा एकशेषो नेत्यर्थो वा एकशेषनिवृत्तिर्भवतीत्यर्थो वा। नाद्यः त्रिषु प्रतिपाद्येषु द्वयोः प्रयोगापत्तेः शेषशब्दस्वारस्ये
नैकनिवृत्तेरावश्यकत्वात्। न द्वितीयः एकशेषाप्राप्त्याऽसंभवात् इति चेन्न तृतीये दोषात् तत्रापि भिन्नशब्देन द्वन्द्व एव न तु वाक्यं वृ
क्षो यूनेत्यादौ प्रसिद्धैकशेषस्य पुष्पवन्तावितिन्यायेन सहविवक्षाविषयस्यैव सत्त्वेन तद्भिन्नस्य सहविवक्षाविषयस्य शास्त्रीयस्यैव ग्र
हणानुचितत्वात्। तत्रेदं वचनं न घटपटावित्यादि विषयं अपत्यर्थं शब्दनिवेशे शब्दानां तुल्यरूपतायाबीजत्वेन तदभावेन तस्याप्राप्तेः
किन्तु जननीपरिच्छेदकर्त्रीद्विवाचकमातृशब्दविषयं तयोरेव सादेवैरूप्यात्। अत्रापि विभक्तावित्यावश्यकं अन्यथा हरि त

किमिदमिति। यदिहेतुरहितं दृष्टान्तमाश्रित्य विरूपानेकशब्दप्रयोगदर्शनात् सरूपैकशेष आरभ्यते। तदा सरूपैक
शब्दप्रयोगदर्शनाद्विरूपानेकशेषः किमिति नारभ्यत इति प्रश्नः॥

वर्तीविशिष्टस्त्रीहरिणस्त्रीवाचकयोर्हरिणीशब्दयोस्तद्धिते वैरूप्येणानेकशेषापत्तेर्विभक्तिसामानाधिकरण्येन च वैरूप्यात् द्वयोरन्यथा
ऽसंभवात्। तत्रेदं न विधायकं। चार्थे द्वन्द्व इत्यनेनैव सिद्धेः किन्तु नियमार्थं तेन लोकसिद्धसहविवक्षाविषयत्वं व्यावृत्तिः तथा विरूपाणामे
व द्वन्द्व इति नियमः। अन्यथैकशेषारंभेणास्य समकलकत्वानापत्तिः। तन्न्यासे हि सर्वेन नाप्रमित्यायेन द्वन्द्वबाधक इति सरूपाणां द्वन्द्वाभा
वस्येष्टत्वात्। अन्ये कशेषपदेन चात्र त्यास सरूपाणां तन्त्र न्यायसिद्धैर्लौकिकविग्रहाभावो विबोध्यते। न चास्यार्थस्यैकशेषारंभे कथं सिद्धिः आव
श्यासरूपाणामेकैकशेष इति नियमस्याप्यङ्गीकारात् इति बोध्यं

ननु विरूपाणां भिन्नार्थानां नैकस्यानेकार्थाभिधानशक्तिमत्त्वमित्येकशब्दप्रयोगान्नानेकशेष आरंभणीयोत आह। प्रयोगाद्विति मुख्यादनार्थं त्रेतिपा
ठे वा शब्दश्चार्थे क्वचित्त्वेत्येवपाठः प्रयोगानुसरणेद्रति प्रयोगाणां शास्त्रेणानुसरणे। अन्वाख्यानेद्रत्यर्थः लाघवायेति सुशब्दावद्वोनापशब्दनि
वृत्तिवदेकशेषारंभेणानेकशेषनिवृत्तेः सिद्धत्वादितिभावः यदानुद्यौरिति सरूपौ च सरूपाश्चेत्येकशेषेणानिर्दिशादितिभावः। एवं चा
प्रयोगानुशब्दशक्तावगनुगम्यमानायां न किंचिदारब्धव्यं। द्र्यवदर्थं यस्ते विल्वभावदेकः शब्दो नेकमर्थं क्वचिदिवन् प्रत्याययि
ष्यति। अन्यथा एकशेषारंभे विकथं प्रत्यायः स्यात्। न हि स्वतोऽसती शक्तिराचार्येण कर्तुं शक्यते। मंदबुद्धि क्षत्यादनार्थं न
यथास्थितं प्रयोगानुसरणे कोनुरोधः स्वरूपैकशेषारंभेण पुनर्विरूपानेकशेषारंभे लाघवायैकशेषारंभश्चेत्तल्लघीयसी वि
रूपप्रतिपत्तिः तत्र हि प्रवृत्तिविषया बुद्धिरेकारूपैव भवति। एकशेषे तु प्रवृत्तिनिवृत्तिविषयेति प्रतिपत्तिगौरवप्रसंगः। अवर
नोद्यौरिति। यदा त्रयाणामेकः शिष्यते तदा द्वयोर्निवृत्तिर्वक्तव्या व्याख्येयेत्यर्थः शेषशब्दस्य निवृत्तिविशिष्टावस्थानवा
चित्वात्। यदा तु द्वयोरेकशेषस्तदैकस्य निवृत्तिः। चतुःप्रभृतीनां त्वेकशेषे त्रिप्रभृतीनां निवृत्तिरिति प्रवृत्तिलक्षणविषयभे
दात् अनेकशेषारंभे त्विह पृथक्प्रयत्नो बुद्धिगौरवापत्तिरित्यर्थः सुकरतरकं चेति। एवं हि प्रकरणमभिन्नरूपं भवति। वक्ष्ये
पृ नैत्यादिभिः सूत्रैरेकशेषस्य विधानात्। अनेकशेषारंभे त्विह पृथक्प्रयत्नया गौरवं स्यादित्यर्थः॥

वरतो द्वयोरिति भाष्यं यत्र बहूनामेकशेषस्तद्विषयमेवेतिता स्यर्थं निवेकशेषैर्भस्य गुरुत्वेन सुकरत्वमेव नास्ति कुतः सुकरतरकत्वमित्यत आह शि०श०
एवं न हीति पृथक्प्रकरणतया वृद्धो यूनेत्याद्यर्थं चैकशेषो वक्तव्यं वाच्य इति भावः॥ ५८

४३६

संख्येति तेनैकदिगितिवत् समानवाचित्वे पृथक् सर्वेभ्य उत्पन्नाया विभक्तेर्निमित्तत्वलाभाद्वात्तिका स्थानं भज्येन। एवं चैकशेषविषयसरूपसमु
दाया देकत्व संख्याविशिष्टविभक्तौ परत एकशेष इत्यर्थः किमिति प्रश्न इति भावः प्रश्नुराशयं विशानुमाहेतरो भाष्ये। एवमित्यादि प्रशस्वाश्रय
माह एकेत्यादि संख्याभेदावगमे द्विवाद्यवगमे इत्यर्थः एवमपि प्रातिपदिकादित्येकत्वस्य विवक्षा यांनमानमनमाह ~~एकेत्यादि~~ गुणेचेति

किंपुनरिति। किमयमेकशब्दः संख्यावाची तुल्यतावाचीति प्रश्नः। एवं भवितुमिति। संख्यावाचित्वे नैकशब्दस्य प्रसि
द्धत्वात् नैवभावादिति। ङ्याप्प्रातिपदिकादित्यत्रैकवचनां तानामेवबंधः क्रियते वर्त्तिपदार्थानां सर्वत्र संख्याभे
दावगमे प्रमाणाभावात्। गुणे च संख्यानभिवक्ष्यते यथा कर्त्तुरीप्सिततमभितिद्वयोर्बहूनां चेप्सिततमस्य कर्मसं
ज्ञाप्रवर्त्ततेतत्र नांतरीयकं संख्यायाग्रहणं दानमितिलक्ष्यसिद्ध्यर्थमाश्रीयते॥

संस्कार्यत्वादिति भावः यथा कर्त्तुरित्यत्रेति भावः। लक्ष्यसिध्यर्थमिति। एवं चपशुनेत्यादिदृष्टांतदानमभ्युच्चयो विधेयगतासं
ख्या विवक्षितानानुवध्यगतेत्येव मीमांसकमर्यादेति भावः। उक्तं तत्समुदायस्य प्रातिपदिकत्वाभावादिति भाष्ये उक्तं प्रातिपदिकत्वप
र्यास्यधिकरणत्वात्प्रत्यय इति द्विस्त्रार्थः नहि प्रातिपदिकसमुदाये प्रातिपदिकत्वं यथा जनपदसमुदाये न जनपदत्वमिति कैयटोक्ते
पयोगश्चिंत्यः

Dr. BHAU DAJI MEMORIAL

कौ० कि० ५९

परस्परापेक्षायां कार्यविशेष इति शेषः। समुदायार्थः समूहरूपः समुदय इति। समुदायो वेत्यर्थः। ननु सुबन्तानामिति निर्देशसंसर्गाच्च कारकार्थ
वताम् उपलक्षणमिदं तुल्येति। यत्रैकदिति। समुदायो यौ गित्यादौ। प्रसिद्धतरार्थानुपपत्तौ प्रसिद्धार्थविरहितो नान्य इति भावः। सामुपल
क्षणमिदं तुल्यत्वं भेदाधिष्ठानं तेन पृथक् सर्वेभ्यः शब्देभ्योऽर्थतश्च तुल्यायां विभक्तौ परत एकशेष इति तात्पर्यम्। अर्थतश्चेत्युक्तेः प्रथ

ननु चेति। अवयवार्थातिरेके तावत्परस्परापेक्षायां सत्यां समुदायार्थोपजननात् सरूपसमुदाया निमित्ते शिष्यमेकापा
तिपदिकसंज्ञास्ति तया सरूपसमुदाय एकं प्रातिपदिकमिति स्वपक्षत्याप्तिरविरुद्धा। अर्थवत्समुदायानामिति
अविशेषेण नियमो न तु सुबन्तानामेवेति मन्यते। इदानीं तुल्यपर्यायमेकशब्दमाश्रित्याह। यद्यपि पुनरिति। पृथक्
सर्वेषामिति रसस्वसस्वस इति स्थिते विभक्तौ परतो यानि रूपाणि तेषामेकशेष उच्यमाने विभक्तिनिमि
त्तत्वात् प्रकृतिनिवृत्तेः केवलानां विभक्तीनां प्रयोगप्रसंग इत्यर्थः॥

माद्यीतीयाद्द्विवचनान्तानां नैकशेषः विनिगमनाविरहाद् अर्थलिंगश्चेत्यस्यालाभः तदाह वक्तुमित्यादि केवलानामिति। निवृत्तप्रकृती
नामित्यादि। भाष्ये तदाश्रयत्वादिति बहुव्रीहेस्तु विभक्त्याश्रयत्वास्तु त्ये एकशेषस्येत्यर्थः। नर्के यदि त्यस्य च अनुत्पन्नप्रत्ययाप्रकृ
तिः प्रकृतेरनुत्पन्नश्च प्रत्ययो न प्रयोक्तव्य इति तात्पर्यमित्यपि भावः। अधुनेति। यदिदमोऽधुना प्रत्यय इशो लोपश्च तदेदं। निमित्तापा
यपरिभाषानात्येवेत्यन्यत्र प्रपंचितं॥ त्रि०प्रा० ५९ ४३७

संयोगान्तेति। एवं च निवर्तमानवृत्तशब्दसंबंधिविभक्तिश्रवणप्रसंगस्तद्दोषवारित इति भावः। नन्वित्र संयोगान्तस्य पदस्येति पाठः
संयोगान्तस्य पदान्तस्येति तु व्याख्यानमसंगतमेव। ध्वसोरिति सूत्रे द्विराकरणको निर्देश इति। भाष्यविरोधात्। संयोगसंज्ञा सूत्रेऽदपद
सामर्थ्यमद्विवचनान्ते सैर्ने मास इति ध्वननाभाष्यकृता प्रयोजनान्तराभावस्य ध्वनितत्वेन ताहृशेऽर्थे मानाभावाच्च। दोषान्तरमप्याह सं
योगान्तलोपस्य चेति हल्ङ्याप्भ्य इति च। न च तत्र सुतीसिती प्रत्यये प्रकृत्याश्रयत्वात्तस्याप्रवृत्तिः तदाश्रये मानाभावात् फलाभावा
च्चेत्यभिप्रायः। केचित्तु अनिकपदद्विवचने भाष्यकृता वक्ष्यमाणत्वात् यारीत्याप चसिप चसीत्यादेः समुदायस्य पदत्वं बदिहापि रसस

संयोगान्तस्य लोपेनेति रसस सस इति स्थिते संयोगान्तलोपो भवति। ननु संयोगान्तस्य पदस्य लोप उच्यते तत्र पूर्वपदं सेक
कारान्तं द्वौ सकारौ द्वे पदे इति पदत्रयं संपद्यत इति कुतो लोपः॥ संयोगान्तलोपस्यापवादः संयोगादिलोपस्तेन भाव्यं। पूर्व
त्रासिद्धमिति वचनात्। हल्ङ्यादिलोपेनैव च भाव्यं। अत्राव्याचष्टे। संयोगस्य यौ लः सकारस्तस्य लोपः स च हल्ङ्याब्भ्य
इत्यनेनेति। संयोगादिलोपेनेति। अत्रापि एकस्य पदस्य संयोगस्यादिर्नास्तीति हल्ङ्यादिलोपमेव संयोगादिलोपं प्रतिपन्नाः
संयोगश्चासौ प्रत्येकं हलां संयोगसंज्ञेति पक्षाश्रये आदिश्च वक्तव्यः प्रत्येकं तस्य लोपो हल्ङ्याब्भ्य इत्यनेनेत्यर्थः॥

रसस इति समुदायस्य पदत्वं वक्तुं शेषे तानि प्रत्यभिज्ञानात् अन्त्यसकारे सुत्वाच्चर्त्वविषये संयोगादिलोपसंयोगान्तलोपयोर्विरो
धाभावे संयोगान्तलोप उक्तः हल्ङ्यादिलोपस्तु हलन्तप्रकृतेः पर इत्यर्थात् तेसाशयः प्रत्येकं संयोगसंज्ञेति पक्षे परस्य संयोगादित्वेन सं
योगादिलोपभाष्योक्तः वाधूरिवस्सेन तत्र सूत्रे सङ्गीत्यादाश्रित्य चेदं प्रकारान्तरेणास्य दूषयिष्यमाणत्वाच्च तदनादरणं तस्य प्रत्याख्या
नाच्चेत्याहुः

कै०वि०
६०

नन्वेकशेषं विना कथं द्विवचनोत्पत्तिः संभवेत आह स्वभावत इति। कृते चैकशेषे बालानां चेति। इदं च बहूनामभिप्रायं तत्र हि हल्ड्याब्भ्य इति लोपे प्रत्ययलक्षणेन विभक्तिपरत्वे एकशेषे द्विवचनादेः पुनरेकशेष इत्यर्थः। भाष्ये यदि पुनः समासे इति। द्वंद्व इत्यनुवर्त्य तत्र कृते इति व्याख्यानात्तस्य निमित्ततयानासीद् द्वंद्वबाधकः। द्वंद्वे कृते एकविभक्तौ परतः सरूपाणामेकशेष इत्यर्थः। अत्र पक्षे संख्यावाच्येवे

अवरत इति। स्वरसमासिति प्राप्नोति दुष्टत्वप्रतिपादनपरं चैतत्। न पुनः कदाचित्। याणां श्रवणप्रतिपादनार्थं। द्विवचनबहुवचनयोरिति। ये स्वभावत एव द्विवचनबहुवचनान्ताः प्रयुज्यन्ते ते गोदौ दाराः सिकता इत्यादयः।। तत्र द्विवचनबहुवचनश्रवणप्रसंगः। कश्चिद्वचनलोप इति। यस्त्वयां कश्चिद्वचनलोप उक्तः स परिहृतः। अथवा सुपा परिहृतो न तिङ इत्यर्थः। स्वरसमासान्ते चेति। समासे कृते समासान्तोदात्तत्वे च यदि पूर्वशेषस्तदा सर्वानुदात्तत्वं प्राप्नोत्यथ परशेषस्तदाश्वशब्दस्यान्तोदात्तत्वप्रसंगः।।

कदाद्यः समासान्तर्गतसर्ववचनलोपात् कश्चिदित्ययुक्तमत आह यस्त्वयेति यस्त्वयावचनलोपासिद्धिरूपः कश्चिद्दोष उक्तः स परिहृत इत्यर्थ इति भावः। अत्राध्याहारगौरवमाशंक्याह अथवेति समासान्तोदात्तत्वे च कृते इति। विभक्तिलोपे एकशेषे न्यायान्तरं गत्वादिति भावः प्रसंग इति। इष्यते त्वाद्युदात्तत्वमिति भावः। अश्वशब्दस्य कन्नन्तत्वात्।। शि०शा०
६०

४३८

परत्वादिति परस्यौत्कृष्ट्यात्पूर्वकालप्राप्तत्वादित्यर्थः एकशेषस्य समासाद्भिन्नस्तु तत्फलं तरमिति भावः एवमग्रेऽपि। एवं चापवादत्वाशं काचिंत्यैव प्राप्तेरौभयोदयित्वा दाबविरोधे विप्रतिषेधात् ततः पूर्वं तत्र बाध्यबाधकभावे विबाधकत्वदर्शनात् समाधिरपि चिंत्यः भाष्ये सारूप्यादिति समासान्तप्राप्त्यभावे तस्य विभक्तिपरत्वाभावः। तद्विशिष्टस्य तु न सरूपत्वं एकशेषो न स्यादिति किं चैकशेषस्य पि त्वाबाबित्यस्यासिद्धिरिव। ऋच इत्येवमापत्तेः ऋगचशब्दयोः एकशेषेऽपि न तत्सिद्धिरस्तीति बोध्यं उत्तरपदस्यान्ता इति अ

परत्वादिति। ननु नाप्राप्ते समासान्तोदात्तत्वे आरभ्यमाण एकशेषस्तस्य बाधकः। नैतदस्ति। निरवकाशो हि बाधको भवति। कृते च समासान्तोदात्तत्वे एकशेषस्य प्रवर्तनाद्विरोधाभावाच्च नास्त्युत्सर्गापवादभावः। ऋक्छत्रेति ऋक् च ऋच अ इति स्थिते अन्तर्वर्तिन्या विभक्तेर्लुका लुप्तत्वात् प्रत्ययलक्षणप्रतिषेधाभावाच्च नास्त्युत्सर्गापवादभावेकविभक्तिपरत्वे एकशेषनिमित्तं समुदायाद्विभक्त्युत्पत्त्याद्यातस्यां च नास्ति सारूप्यं एको हि ऋक्छब्दः अपरस्त्वृचशब्दः। समासान्तः समासस्यैवावयवो नोत्तरपदस्येति चेत् न हि तेन व्यवधानात् समासविभक्तेरेकशेषो न स्यात्। समासार्थस्योत्तरपदस्यान्ताः समासान्ता इत्यभिभाष्यकारस्य दर्शनमिति। ऋगृचशब्दयोर्वैरूप्यमाश्रित्य भाष्यकृता दोष उद्भावितः।।

यं पक्षत्रं निर्भुज्य एवेति पंचमषष्ठयोर्दूषणम्। गोस्त्रियोरिति अत्रोक्तं भाष्यकारस्य मतमिति। एवं विधं भाष्यं न दृश्यत इति चिन्त्यं इदं न चेद्भाष्यमेव तथाप्यर्थैकस्यार्थबलेनापरस्यानर्थकत्वे न कथं नेकशेष इति वाच्यं द्वंद्वापवादनामर्थवतामेवैकशेष इत्यर्थे मानाभावात् विशिष्टरूपोपादानविषयाप्यर्थवत्परिभाषापदहानात्।।

सर्वेष्विति समासविभक्त्यावन्तर्वर्त्तिविभक्तौ चेत्यर्थः। तदेवाह यद्यन्तरिति। तत्र विग्रहप्रदर्शनेन स्पष्टमेवोक्तं वचनसामर्थ्यादिति लुक्
लुप्तत्वादिति भावः। अथापीति द्वंद्वे सुप्लुकि सौत्तरपदिकान् ङितो विभक्तौ कृतो ङ्गीति गुणेऽपि नितिदीर्घे विपरत्वात्कृते इति भावः।
एकवचनांतेन विग्रहे तु समासविभक्तावैवैरूप्यं। अंतर्वर्त्तिन्यां तु नेति तात्पर्यं समास एकशेषे इति। प्रत्यर्थं शब्दनिवेशे एकपचा

अंगाश्रये चेति। वह्राद्रादनंगाश्रयेपि। यथा नौश्च नावौ चेति। स्वसा च स्वसारौ चेति। किमर्थमेकवचनांतं द्वि०
तीयं द्विवचनांतमिति चेत् सर्वथा वैरूप्यप्रतिपादनाय तथाहि यद्यंतर्वर्त्तिन्यां विभक्तौ लुप्तायामपि व
चनसामर्थ्यात् प्रत्ययलक्षणमाश्रीयते तदा तत्र वैरूप्यमथापि समासविभक्तौ कविभक्तिपरत्वं तथापि वै
रूप्यं। तिङ्समास इति। समास एकशेषे विधीयमाने तिङ्समासे प्येकशेषो वक्तव्यः स च तिङ्समासो वक्तव्य
इत्यर्थः। एकमिति। विनापि तेनार्थस्यावगमात्। प्रकृत इति। आख्यातमाख्यातेनेत्यत्र द्वंद्वश्च सरूपाणामिति वक्तव्य

एकाक्रियोच्यते एकेन पचति येकः कर्त्तेति अनेकक्रियाकर्तृविवक्षायामनेकतिङन्तप्रसंगे एकशेष इष्यते स च तेषां समासाभावात् न प्राप्नो
तीति सरूपतिङन्तानामपि द्वंद्वो वाच्य इत्यर्थः। आयोस्तिङो नैवेषि समासस्याधातुत्वस्तत्तिङो प्राप्तेराह भाष्ये तिङ्। छिरिति। सुबग्र
हणात्तिङो लुगप्राप्तेराह प्रतिषेधश्चेति। प्रतिषेधो च लोपः। उपलक्षणमिदं। पादौ यादा इत्याद्यावेकवद्भावस्यापि प्रसंग इत्याः। पिबौधं शि०श० ६९ ४३१

फलरूपन्यास इति। द्वितीयपक्षे स्येति शेषः। उत्पत्तेनैव। तत्पक्षदूषणमुपक्रमते नैवष्टश्चविभक्त्युपलब्धिस्तदाश्रयत्वादित्यनेन बोधितस्ता
स्म इत्यर्थः। दूषणांतरं वक्तुमुक्तानुवाद इत्याह द्विवचनेत्यादि। वक्ष्यतीति वार्त्तिककृदिति शेषः। तदर्थं तद्वतारणार्थं। पुनश्चोद्यत इति
असमासे वचनलोप इत्येतदित्यर्थः। वक्ष्यतीति यदुक्तं तदाह द्विवचनेति। केवलेति। श्रवणमेव न दोषो पि तु द्विवचनाद्यसिद्धिरपि
विवचनादि भक्तिलोपे कृतेपि प्रत्ययलक्षणेना प्रत्यये इति निषेधात्प्रातिपदिकत्वाभावेन द्विवचनाद्यनापत्तेः। तदर्थं वचनारंभे गौर

य दिपुनरिति। दोषांतराभिधानाय पुनरुपन्यासः। तदर्थमिति। पूर्वदोषमात्रमुपन्यस्तं केवलायाविभक्तेः श्रवणं
प्राप्नोतीति इदानीं तु तत्प्रतिविधानाय वचने क्रियमाणे गौरवमापद्यते इत्येतत्प्रतिपाद्यते। तिङंतान्यपि कार्य इ
ति। कारकभेदात्क्रियाभेदानेकतिङन्तप्रसंगे एकशेषो विधेयः। ततश्च परत्वात्सरूपाणामेकशेषं बाधित्वा। द्वंद्वः
प्राप्नोति। सकृद्गतौ विप्रतिषेध इति पुनरेकशेषो न प्राप्नोति सत्यपि वा पुनः प्रसंगविज्ञाने स्वरसमासांतेषु दोष एव

वंचद्रिसंयुग्मो रितिद्वापकं वचनलोपविषयमेवेत्यर्थः। आर्थ्यद्वापकत्वस्य सामान्यापेक्षत्वे विरोधमाह द्वंद्वप्रतिषेधश्चेति। द्वंद्वस्यैकत्वे
कत्वात्तदभावे ऽप्यसार्थक्यमन्यते। भ नवकाश इति। सहविवक्षायां व्यपेक्षाभावे ह्येकशेषस्तत्र च द्वंद्वस्य नित्यता विशेषणविशेष्य
भावानापन्नस्यानेकस्य युगपदेकपदार्थसंबंधबोधनेच्छा सहविवक्षेति भावः कारकभेदादिति। न हि तत्र द्वंद्वप्राप्तिः सुबंतानां त
द्विधानात् इदमवकाशमात्रं। न त्वत्रैकशेषे तोष्टसिद्धिः॥

कै०वि० ६१

भाष्ये यदि पुनरिति चतुर्थः पक्षः स्वरूपार्थे सप्तमीति भावः तदाह षष्ठीनिर्दिष्टो वेति षष्ठ्यर्थकत्वेन निर्दिष्टो वेत्यर्थः। भाष्ये एकवि
भक्त्यंतानामिति वेति। एकग्रहणं कर्त्तव्यं भवतीत्यर्थः प्रयोजनप्रश्नस्ये वोत्तरदानात् न वेति प्रत्याख्यानमप्येकग्रहणस्यैव ए
कविभक्त्यंतानामिति न वक्तव्यमेवेति। न वेति प्रतीके स्वार्थस्योपयोगश्चिंत्यः यदि पुनः प्रातिपदिकानामिति प्रतीके चिदं वक्तुं यु
क्तं अयं तर्हि दोष इत्यधिमिम भाष्यस्वारस्येन तावत्यर्थंतं विभक्तिप्रतानामेकशेष इति पक्षानुवृत्तेरेवला मेनतथा व्याख्यानस्या

यदि पुनरिति। सप्तमीनिर्देशे प्रकृतिमात्र निवृत्तौ प्रत्ययश्रवणप्रसंगः। षष्ठीनिर्देशे तु विभक्त्यंतानां निवृत्त्या
भाव्यमिति नास्ति केवल विभक्तिश्रवणप्रसंगः। कश्चिदिति। शिष्यमाणस्य एकवचनस्य श्रवणप्रसंग एव
एकविभक्त्यंतानामिति। सप्तमीनिर्देशमपास्य षष्ठीनिर्देशः कर्त्तव्य इत्यर्थः। किं प्रयोजनमिति। एकग्रह
णस्य प्रयोजन प्रश्नः। षष्ठीनिर्देशस्य तु प्रयोजनमुक्तमेव कश्चिद्वचनलोपः परिहृत इति। न वेति। एकवि
भक्त्यंतानामिति न वक्तव्यमेव प्रयोजनाभावात्। ततश्चानुत्पन्नाया मेव विभक्तौ प्रातिपदिकानामेकशेषे कृते
शिष्यमाणस्य निवर्त्तमानार्थाभिधानात् द्विवचनबहुवचनसिद्धिः। विप्रतिषिद्धाविति। चतुर्थ्यंतस्य शेषे ब्राह्म
णेभ्य इत्येकत्वं न प्रतीयते तृतीयांतस्य शेषे ब्राह्मणैरित्युक्ते संप्रदानत्वं न गम्यते यश्चत्रादौ ऽनेकार्थप्रत्याय
नाय प्रभवति स शिष्यते नान्यः

नौ चेत्यास्तु विप्रतिषिद्धावेताविति कर्त्तृसंप्रदानयोरर्थयोर्विरोधेन युगपदेकरूपेणैकत्रान्वयाभावेन सहविवक्षाभावादेकशेषाप्रा
प्तेरेकत्वेन विभक्तिर्न विरोध्येत्यर्थः। कैयटोक्तं ब्राह्मणेभ्य इत्युक्ते इत्यादिनु वचनलोप वचनविधिकरणोपि एकग्रहणं ज्ञेयं व्योपिय
दकमिति बोध्यं॥

त्रि०शा० ६१

४४०

भाष्ये अनेकमर्थमित्यस्य युगपदेकरूपेणेत्यादिः अयं तर्हीति प्रतीके एकविभक्त्यंतानामिति क्रियमाणे प्रत्यक्तदोष इति व्याख्ये
नं भाष्यान्तरस्वरसविरुद्धं उक्तदोषाभावे व्ययं दोष इति ह्यर्थस्तत्स्वरमर्यादया लभ्यते। द्विवचनेति। शिष्टस्य विभक्त्यंततया ऽप्रा
तिपदिकत्वेन द्विवचनाद्यप्राप्तिः सा पि वाच्येत्यर्थः द्वितीय पक्षाद्विशेषं दर्शयितुमाह एकेति प्रातिपदिकानामिति अनुवृत्तस्य
बहुवचनेन विपरिणाम इत्यर्थः यद्यपि विभक्त्युत्पत्तेः पूर्वं सरूपाणामेकशेष इत्यर्थं भाष्यतात्पर्येण प्रातिपदिकग्रहण

अयं तर्हीति। एकविभक्त्यंतानामिति तु क्रियमाणे प्रत्यक्तदोषः। कश्चिदिति। शिष्यमाणस्यैकवचनलो
पो वक्तव्यः। यदि पुनरिति। एकविभक्ताविति न क्रियते हस्वो नपुंसक इत्यतः प्रातिपदिकग्रहणमनुव
र्त्यानुत्पन्नायामेव विभक्तौ सरूपाणां प्रातिपदिकानामेकशेषः क्रियते। तिङंतेषु कथं। उच्यते लावस्थाया
मेवं पच् लपच् ल इति स्थिते कृदंतत्वात् प्रातिपदिकत्वे सत्येकशेषः। मातृमात्रोरिति। कथमयं निर्देशः
या वतैकशेषेण भाव्यं। एकशेषसति विवक्षितार्थानवगमात्। तदभावः। अयं ह्यत्रार्थो विवक्षितः। जननी
वाचिनः परिच्छेत्तृवाचिनश्च मातृशब्दस्यैकशेषप्रतिषेधो वक्तव्य इति एवं चार्थो मात्रोरित्युक्ते न गम्यते॥॥।

नुवृत्तेः फलं चिंत्यं तथा विहरितहरिणेत्याद्यग्रिमवार्तिकोत्थानावसरे योक्तं। कृदंतत्वादिति। अतिङिति प्रतिषेधस्तु तिङ एवस्थे
नित्वप्राप्त कृत्वस्येति अभिमानः। भाष्ये मातृमात्रोरिति। प्रातिपदिकयोरनयोः सारूप्यादिति भावः। इदं यात्रादीनामुपलक्षणं या
वतैकशेषेणेति जनन्यादिवाचकयोर्निषेधे विधायकयोर्निषेधे मानाभाव इत्यर्थः। तदभाव इति। विवक्षितार्थानवगमार्थे
कशेषेन कृत इति भावः एवमेव यत्तदेतेभ्य इत्यादौ कोशेषु वैकशेषाकरणं॥

मतशब्दस्य विना स्वरसं स्पष्टयति अर्थेति अर्थ नियमानिवगतिरिति। प्रकरणादिना प्रतीतिसंभवात्खिंत्य मेतत्। एवं च विभक्त्यंतानामेकशेषे त्वतीर्यातादीनामेकशेषो भवत्येव। प्रथमाद्वितीययोस्त्वनेतिमते दोषाभावात्। एकविभक्तावितिपदरहितप्रातिपदिकैकशेषपक्षे एवैषदोषइत्यर्थो भाष्यस्य। विभक्तिपदाभावे सरूपाणामेवैकशेषइत्येवं नियमेन प्राप्तेः। प्रतिषेधेनसह विवक्षाविषयेकशेषस्यनिषेधे तद्विषये द्वंद्वः पक्षेवाक्यं च सिध्यति। असह विवक्षाविषयतंत्रं तु भवत्येव। मातृभ्यां कृतं देहीति। च

अथमतमेतदिति। अर्थविप्रतिषेधात्रैकशेषोन भवति। कृतेह्येकशेषेतातिरित्यनुप्रयोगेषु मर्थो नप्रतीयते। तैरिति चोक्तेस्वार्थानवगतिः। अभ्युपगम्यवादेनत्वेतदुच्यते विभक्त्यंतानां सारूप्यइति॥ प्रातिपदिकावस्थायांसदासारूप्यात्सर्वत्रैकशेषः स्यात्। विभक्त्यंतानां तु सरूपाणामेकशेषे यत्रै वत्तीयादौ विभक्तिसारूप्यंतत्रैवैकशेषो न तु प्रथमद्वितीययोरित्यर्थः॥

अत्ताभ्यांतामित्यादिवत्। अथमतमित्यनेनाहचिर्बोधितनदीजं तु सूत्रव्याख्यानपक्षमेदेनलक्ष्यभेदानौचित्यमिति तस्माद्विभक्त्यंतानामेकशेषेपिमातृमात्रोः प्रतिषेधोवक्तव्यएवेतिगूढतात्पर्यं। तद्ध्वनयन्नाह एवं च कृत्वेति एवमंगीकृत्य प्रातिपदिकानामेकशेषपक्षे प्रतिषेधश्चोद्यतेइत्यर्थः। वस्तुतो विभक्त्यंतानामेकशेषेपि तद्वक्तव्यमित्यर्थः। अस्य मतस्य भाष्यानभिप्रेतत्वेतु विरूपाणामनेकशेषइत्यादिप्रागुक्तभाष्यविरोधइति दिक् तद्ध्वनयन्नाह अभ्युपगम्यवादेनत्विति सर्वदेति सर्वत्रेत्यर्थकं॥श्र

DR BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारकम्

अत्रैवपक्षेदूषणांतरमाह। हरितेति। लिंगविशिष्टपरिभाषामनाश्रित्येदं सा च स्त्रीति। एवं च वर्णादनुदात्तादिति ङीप्रकारो। ननु लौकिके प्रयोगे सरूपत्वे येषां प्रातिपदिकत्वाभावात्कथमेकशेषसिद्धिस्तत आह प्रातिपदिकग्रहणमिति। तदनुवर्त्तौ लौकिके प्रयोगे सरूपाणामित्युक्तेपि अंतरंगत्वादेकशेषप्रवृत्तिर्विभक्त्युत्पत्तेः पूर्वमेवेति सुप्प्रकृतीनामेवैकशेषसिद्धिरिति भावः लौकिकप्रयोगाश्रयेणामेकशेषस्तत्प्रकृतिकविभक्त्यंतएव प्रत्यासत्तेः एतेन हरिणीशब्दस्यापि तत्प्रकृतिकत

हरितेति। एवां प्रातिपदिकावस्थायां वैरूप्यमित्येकशेषो न प्राप्नोति। विभक्तौ तु सारूप्यसद्भावात्सिध्यत्येकशेषः हरितस्य स्त्रीति। नानेन पुंयोगः प्रतिपाद्यते तत्र हि ङीषाभाव्यं हरितीति। किं तर्हि अयमर्थः। हरितशब्दस्य हरिणी सा च स्त्री। न चेति प्रातिपदिकग्रहणे विच्छिन्नत्वाद्दिङ्नानुवर्त्तते। सारूप्यं चेहाश्रीयते न च प्रातिपदिकानि लोके प्रयुज्यंते। किं तर्हि पदान्येव शास्त्रेपि प्रकृत्याद्यपदेशो नानुमेयत्वात्प्रातिपदिकानां प्रयोगाभावः। तेन पदावस्थायां मातृमातारइति वैरूप्यादेकशेषाभावाद्धरिण्यावित्यादौ तु भवतीति तितेषप्रतिविधानं कृतं। अपर आहेति। फलासंभवप्रतिपादनार्थमिदमुक्तं इत्यर्थः॥

द्वितघटितप्रयोगे वैरूप्यमस्त्येवेति परास्त। नन्वन्यत्र तरपमश्रौ घइत्यादौ लौकिकासंभवे शास्त्रीयमहणस्योक्तत्वादत्रापि तथैवास्त्वित्यत आह शास्त्रीयमपीति लौकिकताद्दशप्रयोगत्वावच्छेदेनचसारूप्यं विवक्षितं तत्तदाहत्तेनेत्यादि। फलासंभवेति लौकिकेप्रयोगे सरूपाणामित्युक्ते प्रातिपदिकैकशेषस्योक्तिसंभवएव न किंतु विभक्त्यंतानामेकशेषइति पक्षस्यैवापत्तिरिति भावः

कौ॰वि॰ ६६

अथानेनेति। यद्यनेन पक्षेणाप्रयोजनं स्यात्तदाप्यसौ विसमर्थयितुं शक्य इति शेषः। परत्वाह वाढमर्थ इति। स एवाह किं वक्तव्यमिति। प्रातिपदिकानामेकशेष इति सूत्रं कर्त्तव्यं नेत्यर्थः। सारूप्ये रोति तेन स्वोपलक्षकतया विभक्तिराश्रीयत इति भावः। येत्वाहुरिति।

इदानीं भाष्यकार एकं पक्षं समर्थयितुमाह। अथानेनेति। विभक्तिः सारूप्ये रोति। एकविभक्तिर्नैकशेषनिमित्तत्वेनेष्टो वाश्या किं तर्हि सारूप्योपलक्षणार्था एकविभक्तौ लौकिके प्रयोगे यानि सरूपाणि दृष्टानि तेषामेकशेषः। स चानैमित्तिकत्वाद्विभक्तिं नापेक्षते भाष्येषु प्रातिपदिकग्रहणस्योपलक्षणार्थत्वात् ड्यन्तादीनामपि हरिण्यादीनामेकशेषो भवति। स्वरभिन्नानामिति वचनात् ङीवन्तस्य हरिणीशब्दस्य शेषः येत्वाहुर्हरितहरिणयोरेवैकशेषे कृते उत्तसभयवाचित्वे ह्यन्यतरस्य वर्णवाचित्वं जातिवाचित्वं वाश्रित्य स्त्रीप्रत्ययः क्रियत इति तेषां पक्षे स्वरभेदप्रसंगः॥

प्रातिपदिकग्रहणं नोपलक्षणमिति भावः हरितहरिणयोरिति विभक्तौ दृश्रीयते इति भावो यानि सरूपाणि दृष्टानि तदवयव प्रातिपदिकानामित्यर्थ इति भावः अन्यतरस्येति सिद्धस्यान्यतरस्योभयवाचित्वेनेत्यर्थः जातिवाचित्वं चेति चकारघटितः पाठः॥श्री॥ शे॰श॰ ६६

४४२

क्वचित्सारूप्य इति। वस्तुतस्तु विभक्तिलावच्छेदेन सारूप्यविवक्षणे मातरमातारौ शेष इति बोध्यं। एकशब्दस्वारस्यैनैव कारायकर्षणेन चैकस्यामपि विभक्तौ यानि विरूपाणि तेषामर्थात् इति दिक् एकग्रहणफलं तु नित्यमेव अत एव द्वयथकसर्वेषां विभक्तयंतानामेकशेष इति शेषः कग्रहणं पृथग्विभक्तिप्रतिषेधार्थमित्युक्तं तेन हि तदर्तिरिक्तपदेषु तदैव्यर्थं ध्वनितं तत्र सेवितं नार्थो विप्रतिषेधादिति तत्प्रसारब्यानमेव अत्रापि विभक्तिः सारूप्येणाश्रीयत इत्यवोचत्। न चैकविभक्तिरिति न चेवं लक्षणं ग्रहणमित्यादावेकशेषानापत्तिः दीर्घस्यैवैक

मातरमात्रोस्तु क्वचित्सारूप्येप्यर्थविप्रतिषेधादेकशेषाभावः। यत्रत्वेति। अनेनानैमित्तिकत्वमेव प्रतिपाद्यते। विभाग इति कर्मादिकारकमिह विभक्तिशब्देनोच्यते। तेन हि प्रातिपदिकार्थो विभागो नावस्थाप्यते। तत्रैकस्मिन्कारके विवक्षिते तन्निमित्तया विभक्त्याभाव्यं इत्येकविभक्त्यन्तानां सरूपाणामेकशेषः सिध्यति॥ ॥श्री॥

त्यिकत्वेन सारूप्यं तिममाभावादिति व्याख्यं। विरूपाणामपि समानार्थानामिति सिद्धेः यत्ने कग्रहणसामर्थ्येन वधि भक्तिविषये एकशेषस्त स्यामेव सारूप्यमित्यर्थः तितनी पादे मातरमात्रोरेकशेषसिद्धिरिति तन्न वार्त्तिकारंभे सर्वत्र प्रतिषेधेन पक्षयोः फलभेदाप त्तेरित्यलं भाष्ये किं वक्तव्यमिति एकविभक्तौ नामिति वक्तव्यं किमित्यर्थः। तेनहीति। नालुकात्करणसाधनः कारकशक्तिवाची विभक्तिशब्द आश्रीयत इति भावः। विवक्षित इति। अनेनास्त्रेषि विषयसप्तमी तिदर्शितं कारकशक्तेः शब्दात्परत्वात्तसंभवात् इति बोध्यं॥ ॥

लुप्तप्रत्ययस्येति बहुव्रीहिः एकार्थत्वाच्छिष्यमाणस्येति। नच शिष्यमाणं लुप्यमानार्थाभिधायीतिन्यायविरोधः प्रत्येकपर्यासैकत्वविशि
ष्टानामेव शिष्यमाणशब्दबोध्यत्वाद्द्वित्वादिविशिष्टार्थाप्रतीत्या द्विवचनाद्यसिद्धेरिति भावः एवंचैकैकस्येति युगपदधिकरणवच
नताश्रयेणेति भावः सर्वेषामर्थानां सर्वैः शब्दैर्युगपद्बोधनेच्छा हि सहविवक्षेति तात्पर्यं। भिन्नार्थत्वादिति सर्वेषामर्थानां सर्वैः शब्दैः स

कश्चिदिति। अवाद्व्यवस्थितस्य लोपो वक्तव्यः तस्मिन्नपि कृते प्रत्ययलक्षणेन प्रत्ययान्तत्वात् प्रातिपदिकसंज्ञाया अ
भावात्। द्विवचनबहुवचनेन सिध्यत इति तेनापि वक्तव्ये तस्मिन्नपि कृते प्रत्ययलक्षणेनैव नङिसंबुद्ध्योरिति
ज्ञापकं न लोपविधिवमेवाव्याप्यविशेषेण लुप्तप्रत्ययस्य प्रातिपदिकसंज्ञाया ज्ञापकं। एवमप्येकार्थत्वाच्छिष्य
माणस्य द्विवचनबहुवचनासिद्धिरेव। सहविवक्षायामिति। एवंचैकैकस्यानेकार्थाभिधानात्। द्विवचनब
हुवचनानां तामेवैकशेषेणः। नतहीति। नित्यैनेकशेषेण भवितव्यमिति वाक्यं न प्राप्नोतीत्यर्थः। इतरेतिभिन्नार्थत्वा
त् एकशेषवत्या वाक्यं न वाध्यत इत्याह। नैतदेति। प्रत्येकमत्र विवक्षेत्यर्थः। वालास्तु प्रक्रियावाक्येनैव कर्त्त
व्यत इत्याह अथापीति

हित्येनार्थप्रतिपादनविवक्षाभावादिति भावः इत्याहेति। इत्याशयेनाहेत्यर्थः अथापि निदर्शयितुमित्यनेन वक्ष्यमाणस्यासाधुत्वं
बोधितं। यथा चालौकिकविग्रहवाक्येनासाधुनापि समाससंज्ञाप्रवृत्तस्य निदर्शनं तथानेनापीत्यर्थः॥ ॥श्रीरामजी॥ शि०श०
६५

४४३

द्रव्यवाचिनामिति तत्त्वाचिनामित्यर्थः ननु कर्त्रादिभेदात् क्रियाभेदावगमे नैवात्र क्रियेत्यनुपपन्नमत आह आख्यातेति शब्दशक्तिस्व
भावादिति भावः सर्वैर्वा सर्वापि निवृत्तभेदा। ख्यतो द्वित्वादिसंख्यारहिताभेदस्य तत्सहचरितद्वित्वादेः ख्यानमेकत्वं तु प्रतीय
त इत्येकवचनमिति भावः प्रकर्षाभ्यावृत्त्यादयस्त्विति अभ्यावृत्तिरावृत्तिगणनाम् आश्रयाभ्यावृत्तीति। आश्रयप्रकर्षात् प्रकर्षः
अभ्यावृत्तिर्जन्मतत्गणनमेव क्रियागणनमिति भावः एकत्वं न विघ्नतीति। द्वित्वादिप्रतीतौ हि उत्तरया पूर्वसंख्या बाध्यता

यथा जातीयकानामिति। द्रव्यवाचिनामित्यर्थः एकाहीति। अख्यातवाच्या क्रिया सर्वैव निवृत्तसर्वभेदा
प्रतीयते। भवक्रियास्यत इत्यादौ वस्तुतस्त्याकर्तृभेदात् भेदेपि तिङन्तात् भेदस्यानवगमात्। प्रकर्षाभ्या
वृत्त्यादयस्तु भेदनिबन्धना आश्रयाभ्यावृत्त्यादिभेदनिमित्ता नैकत्वं क्रियायां विघ्नन्तीति तानीति कर्तृक
र्मसमवेतसंख्याभिधायिनी द्विवचनबहुवचनेऽत्यर्थः। ननु कर्तृकर्मणोर्लविधानादनेकस्मिन्कार
केऽनेकेनैव लकारेणोत्पत्तव्यं॥

सद्वितहृति : स्यादिति भावः कर्त्तृकर्मेति। अस्यारोपितेत्यादिः भाष्ये साधनशब्देन तिङ् तामिधेयकर्तृकर्मगतसंख्याविशे
षउच्यतेतद्येत्तासि। तदारोपावेत्तासि। एवंचैकशेषप्रिमिनेवतद्दृशेषान्तवदभेदप्रसंग इति नैकशेषस्याच विषय इति भा
वः अनेकेनैवेति। वर्त्तमानेलडित्यत्र संख्याविरक्षणेपि धातुभेदेन वाक्योपक्रमवत् कर्तृरूपार्थभेदेनापि वाक्योप
क्रमवादनेकप्रसंगो दुर्वारिः अत एवात्र एकप्रकारेण अनेकपक्षुत्पत्तिं भाष्यकृद्दूषयति॥

कौ॰ वि॰ ६६

जात्याश्रयणादिति जात्याश्रयानेकव्यक्त्याश्रयणादित्यर्थः अर्थत आन्तर्यादिति। द्व्यर्थस्य लद्वयस्य द्विवचनं बह्वर्थस्य लसमु
दायस्य बहुवचनमिति भावः केचित्तु अनेकलकारोत्पत्तौ न मानं वर्ण्यर्थत्वाल्लाघवात्। एकस्मिन्नेकार्थत्वस्य व्यापारोपात्तत्वाद्(?) इत्या
हुः एवं चानवकाशत्वादेकशेषो द्वंद्वबाधक इति स्थितं भाष्ये ऽथ वा पुनरित्यादिना समुदायादेकविभक्त्या इति पक्षः सम
र्थितः। समुदायविभक्त्यैवेति अवयवारभ्यत्वात्समुदायसंख्यायाः समुदायगतसंख्याभिधायि समुदायविभक्त्यैवावयवार्थे
पि तत्संख्याप्रतीतेर्गतार्थत्वान्नावयवेभ्यः पृथग्विभक्तिप्रसंग इति भावः अवयवानां पदत्वादित्युपकारस्य समुदायवि

भवत्येवानेकोलकारः। लकारजातिरव्यवधानात्। लस्येत्यत्र लजात्याश्रयादनेकस्यापि लस्य स्थाने
र्थत आन्तर्यात् द्विवचनबहुवचने भविष्यत इत्यदोषः। तुल्यजातीयस्येति। अवयवानां समुदायार्थत्वं
त्र॰ त्वात्समुदायविभक्त्यैवावयवार्थस्य संख्यावगमात् पृथगवयवेभ्यो विभक्तिर्नोत्पद्यते। किंत्वत्र स
मुदाये तु सुबंतानां द्वंद्वबचनेनायं न्यायो बाध्यते। इत्यवयवेभ्य एव विभक्त्युत्पत्तिः॥ ॥श्री॥

भक्त्यासंभवाच्चिंत्यमिदं किंच विशेष्यविभक्त्या विशेषणीयसंख्यादीनामुक्तावपि विशेषणाद्यथा साधुत्वाय विभक्तिः
येक्रियते तथात्रापि स्युरिति तस्मात्प्रत्येकगतसंख्याया। अविवक्षणात्प्रत्येकं सुबुत्पत्तिः समुदायगतबहुत्वसंख्यायाः
वविवक्षणेन तद्बोधकसमुदायादेव विभक्तिस्तावताप्यपदं न प्रयुंजीतेति निषेधातिक्रमाभावादिति भाव्यार्थः प्रत्येकसंख्या
विवक्षाभावे सति बहुत्ववत्त्वेन विवक्षिरणात् पृथक्पदयोगार्हत्वमप्येवानेतिभेदसंसर्गद्वारकमर्थवत्वमस्यनेति न नियमे
न व्याप्तिरिति तात्पर्यं॥

शे॰ शृ॰ ६६

४४४

तत्र सरूपसमुदायादेकविभक्त्यावेकशेषपक्षेदोषमुपपादयति। तत्र भिन्नेति पदस्य विभज्यन्वाख्यानपक्षेऽदंशावंतसमुदाय
स्य-व्याप्रत्ययांतत्वात्प्रातिपदिकत्वमिति भावः स्त्रीप्रत्यये चानुपसर्जनेनेति तु स्त्रीप्रत्ययत्वेन तद्व्याप्यधर्मेण वा स्त्रीप्रत्ययग्र
सुबंतानामिति। यद्यपि गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरित्यभ्यते। तथापि पूर्वपदं तत्र सु
बंतमेवेति तोपित द्वैत्तयासुबंतानामेव समासः। अन्यथा नलोपादीनि पदकार्याणि पूर्वपदे न स्युः। उत्तरपदमेव तु
तत्रासुबंत। इह राजन् राजन् औ इति स्थिते परत्वान्नित्यत्वाच्चोपधायादीर्घे कृते वैरूप्यादेकशेषो न प्राप्नोति। उच्य
ते। विरूपाणामपि समानार्थानामिति भविष्यति अंतरंगत्वाद्वा। दीर्घत्वं हि नांतेरंगं उपधां विभक्तिविशेषमसंबुद्धि
सर्वनामस्थानमपेक्षत इति बहिरंगं। सर्वत्रेति। षष्ठ इत्यादि इहोपस्थिता। पृथग्विभक्तौ परत एकशेषः एकवचनांतानां वा
समासोत्कस्यां विभक्तौ परतः सरूपसमुदायाद्वा विहितायामेकविभक्तौ परतः। यानि निपदिकानां वा। सह विवक्षा
यां वा प्रत्येकद्विवचनबहुवचनांतानामिति। तत्र पश्चिमं पक्षत्रयमंगीकृत। तत्र भिस्ता भिस्ता भिस्ता आम् आम्
इति स्थिते सर्वविधिभ्यो लुग्विधेर्बलवत्वात् लुकि कृते विभक्त्यभावादेवादेकविभक्तौ परतो धीयमान एकशेषो न प्रा
प्नोति। प्रत्ययलक्षणं च नास्ति न लुमतेत्यस्येति प्रतिषेधात्। प्रातिपदिकैकशेषपक्षे समर्थयते द्व्याप्प्रातिपदिकंत
स्मात्तद्धिता इत्यावंतादशकृते परत्वाद्धादिवृद्धौ कृतायां वैरूप्यादेकशेषाप्रसंगः। यदा तु सह विवक्षायां विभक्त्यंतानां
मेकशेषः सुबंताच्च तद्धित इत्ययं पक्षस्तदा सुबंतसमुदायात्तद्धिताभावात्पूर्वमेकशेषः पश्चात्तद्धित इति न कश्चिद्दोषः॥

हलोऽइति तात्पर्यं तदा सुबंतसमुदायादिति तस्य सुबंतत्वपर्यालोचनाधिकरणत्वाभावादिति भावः एवं च भाष्ये सर्वत्रशब्देन पक्षद्व
यमेवग्राह्यमिति तात्पर्यं॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्रीरामजी॥

कै० वि० ६७ वक्तृतत्कृतद्वयवादेकस्मात्तस्य दुर्बलत्वेन तत्र कृते परत्वाद्दीर्घो वैरूप्यात्तत्पक्षेप्येकशेषो न प्राप्नोति। न च विनिगमनाविरहेण प्रत्येकमुक्ताबराबापत्तिः तावतापि अअमैत्तमित्यस्याप्रायत्या नियतभेदासिद्धेस्तदवस्थत्वात्॥ किंच प्रातिपदिकानां चेकशेषे सिद्धमिति भाष्यन्यूनता प्रत्येकं द्विवचनाद्यंतानामेकशेष इति पक्षेपि वचनकृती त्यादोषाभावात्। युगपदिति द्विधिकरणा वचनतायां दुःखत्वद्रूपपादत्वयोर्द्वितीये भाष्ये वक्ष्यमाणतयानत्यक्तस्योक्तिसंभवाभावाच्च समर्थानहृ तोन तु न वि

ननु प्रातिपदिकानां चेति। अनैमित्तिकत्वादंतरंगत्वात्पूर्वमेकशेषः। पश्चाद्द्विरन्यवात्द्वित एव पश्चाद्युत्पद्यत इति तत् कश्चिद्दोषभाव·

नक्तिनिमित्तकार्यस्य पूर्वं प्रवृत्तिः विप्रयोह आगतं विप्र। वाहूप्यमित्यादि विभाषा पूर्वा तिस्त्र भाष्यस्थस्यासंगत्यापत्तेरित्याहुः। प्रातिपदिकैकशेषपक्षे मातृमात्रादौ यथानैकशेषस्तथोक्तमेव। भाष्ये सिद्धमिति सुवंतात्तद्धितोत्पत्त्यापत्तत्पक्षे एकशेषस्यांतरंगत्वात् एवं च सर्वत्रेत्यसंगतमिति भावः इदानीं तस्य सार्थक्यं दर्शयितुमपत्यार्थप्रत्ययपक्षे यदि पूर्वं सा हृत्वपत्यादिप्रिति। एकाप्रकृतिरिति अर्थाभेदात् मिनैवेत्यर्थः॥ शि० शा० ६७

४४५

तिनैवाज्यो बहुर्विधिति। तेनैव विरूपाणामपीति वचनेन वक्तृतोनेन गार्ग्यप्रत्ययस्य शेष इति तस्यैव लुप्यमानार्थाभिधायित्वमित्यत्रापि पक्षे नंतं यद्बहुर्विधित्यर्थे नैव लुगिति केचित् अन्यबिकेति। मंत्स्वुध्यनुगहायतु कार्यमेव वार्त्तिकसूत्रजालवत्ननुबहुव्रीहौ निष्ठांतत्वाद्भिन्नस्य पूर्वनिपातः स्यादत आह स्वरेणेति। साधनं कृतेति समासः घञंतत्वादिति अन्तरव्याप्ताविति भिर्व

वक्रदंडश्च कुटिलदंडश्चेति। द्वंद्वनिवृत्त्यर्थमेतद्वक्तव्यं तेनैवाज्यो बहुर्विधित्यपि पक्षे आश्रीयमाणो द्वंद्वः सिध्यति। यदा त्वयं तं बहुर्विधित्याश्रीयते तदा गव्य विकल्पात्पाश्रयणात् वक्रदंडश्च कुटिलदंडश्चेति वाक्यमेव भवति न द्वंद्व इति न वक्तव्यो विरूपाणामेकार्थानामेकशेषः। स्वरभिन्नानामिति। स्वरेण भिन्नानामित्यर्थः। अक्षश्चेति। एको त्त्रशब्दोऽशेर्दीर्घ इति सप्रत्ययांतत्वादंतोदात्तः। द्वितीयस्तु घञंतत्वादाद्युदात्तस्तस्यैव शेषो भवति। एको मीमांसकशब्दो गुलंतत्वान्मध्योदात्तः परस्तु मीमांसामधीते क्रमादिभ्यो वुन्नित्याद्युदात्तस्तस्य शेषः। एकश्चेति द्वंद्वो प्यत्रानभिधानान्न भवति॥

दिप्रकृतिके त्यादिः अनभिधानस्यावश्याश्रयणीयतां दर्शयति द्वंद्वोपीति। संख्याशब्देष्वेकादिषु एकशेषमापादयतोयं भावः द्वित्रिचतुः शब्दादिभ्यो नेकार्थाभिधानं यद्यपि शब्देभ्य इव तस्यादिति अवश्यमेकशेषेणानेकार्थत्वं वक्तव्यमिति एकादिशब्दानामपि तत्प्रसंग इति। भाष्ये यौगपद्यत इति। द्वित्वरूपार्थ इत्यर्थः॥

PAGE(S)MISSING

NOT AVAILBLE

446

कै॰वि॰ ई॰

द्वावित्यर्थ इति। तस्य च द्वौ शब्दौ वाचकाविति भावः। संदेहादिति निश्चयात्मकप्रतीत्यभावोऽसंप्रत्यय इत्यर्थः। नचैव्यते चद्युवानावित्यनेन संदेहबीजं दर्शितं। एवं तर्हि नेमावित्यादि भाष्यस्य वाचकशब्दांतरसत्त्वाविशिष्टार्थासंप्रत्यये नैकादिशब्दानामेकशेषाभाव इत्यत्र तात्पर्यं। विंशत्यादीनां तु भवत्येवेति दिक्। इदानीं तु हृदयस्थमनिवेशं तद्विशब्दादिरूपं दृष्टांते

अर्थासंप्रत्ययादिति। यत्रैकः शब्दोऽनेकमर्थमभिधातुं शक्नोति तत्रैकशेषो नान्यत्र प्रयुक्तानामन्वाख्यानात्। एकाविति चोक्तेऽसहायादिरर्थोऽवगम्यते न तु द्वावित्यर्थः। अन्यपदार्थत्वाच्चेति। असंदिग्धेन पदांतरेणायमर्थः प्रत्याय्य इत्यर्थः। गार्ग्यावितिगार्ग्यश्च गार्ग्यश्चेत्यस्याप्यर्थस्य संभवात् संदेहाद्द्व्यर्थासंप्रत्ययः। उत्तरकालं तु प्रकरणादिवशात् संदेहनिवृत्तिः। ननु वक्ष्यमाणेति वचनात्। संदेहेऽप्येकशेषः स्यात् अस्य तु निःसंदेहविषये संभवात् कथं संदिग्धविषये प्रवृत्तिः। नैतदस्ति। अक्षादिष्वपि संदेहविषये वृत्तिदर्शनात्। एवं तर्हीति। अर्थासंप्रत्यये सत्यन्यपदार्थत्वादित्ययं हेत्वर्थः। यदि तर्हीति प्रत्यर्थं शब्दनिवेशात् एकशेषे सति एकस्यानेकार्थत्वसंभवति। पदानां समुदायवाचित्वं द्व्यादीनामभ्युपगम्यते तदा बहुवचनादिविरोधः एकवचनप्रसंगः। यत्तु वनानीति बहुवचनं तत्समुदायप्रचयविवक्षायां न त्ववयवभेदविवक्षायां। समुदायादिति समुदायवाचिन इ

त्वं प्रत्यययुक्त इति भावः। अथवानेमइति। द्वावित्यादयइत्यर्थः। तेषामेकशेषप्राप्तत्वे हि तद्दृष्टांतेनात्रैकशेषापादानं नत्वेतेनत्येति भावः। यद्यपीति। एकशेषं विनैवेत्यर्थः। ननु समुदायो नामार्थः न च तस्यार्थोऽस्तीत्यत आह।। समुदायवाचिन इति।। श्री।।

शि॰शा॰ ई॰

४४७

+पि न स्यादित्याह अन्यदिदानीमिति। न ह्याचष्टे अवश्यमिति भावः। एवं चेद्द्वशेषविषयेऽपि धर्म्यद्वित्वनम् किंचित्कृतमिति भाव +२४ प्रश्न इति। एकश्चैकश्चेति विग्रहे शिष्यमाणद्विशब्देन किं साद्व्यमित्यर्थः। परस्परेति। एकशब्दयोः सहविवक्षायां शिष्यमाणैकशब्दस्य तदर्थाभिधानसामर्थ्यात् परस्परापेक्षयैकैकत्रार्थे द्वित्वोत्पत्तौ तदभिधानसमर्थशब्दप्रवृत्तिः। तदलौकिकं च द्वौ द्वौ चेत्यादीति भावः। अन्योन्यापेक्षाकृतद्वित्वेन पत्येकद्विशब्दप्रवृत्त्या सारूप्यमिति भाव्याद्दरार्थः। अत एवाग्नेऽन्योन्यकृतभावविषय एव प्रश्नः। अन्योन्यकृत इत्यस्य परस्परकृत इत्यर्थः। भावः प्रवृत्तिनिमित्तं। मातृपुत्रादिशब्दस्य परस्परकृतमातृत्वपुत्रत्वं

किंकृतमिति। एकश्चैकश्चेति विग्रहे कथं द्विशब्दः प्रवर्त्तत इति प्रश्नः। अन्योन्यकृतमिति। परस्परापेक्षया द्वित्वोत्पत्तौ सत्यां प्रक्रियावाक्यमिदं भवति द्वौ च द्वौ चेति। तत्रैको द्विशब्दः शिष्यते। मातेति। यथा सुतजन्मनः प्रागलब्धमातृव्यपदेशा स्त्री पश्चाल्लभते। एवं संख्येयांतरापेक्षायां सत्यां पूर्वमप्रवृत्तो द्विशब्दः पश्चात् प्रवर्त्तत इत्यर्थः। अपाये चापीति। पुत्रविनाशेऽपि पितृव्यपदेशो न निवर्त्तते पितृविनाशे पुत्रव्यपदेशः चतुर्णां त्वेकापाये नास्ति चतुःशब्दस्य प्रवृत्तिः। अन्यदिदानीमिति। अवश्यं सा धर्मे सति वैधर्म्येण भाव्यं। अन्यथा तत्त्वमेव स्यात् ननु सा धर्म्यं तत्र वैधर्म्ये द्वावेनेन कश्चिदपि हेतुः स्यादित्यर्थः।। ।।श्री।।

इति वंधनाः तदाह यथेति। पुत्रविनाशेऽपीति न तु पुत्रस्य बुद्धिस्थत्वेन तन्नाशेऽपि पितृव्यवहारोऽस्ति भाविपुत्रस्य पितेति व्यवहारवत् प्रकृतेऽप्येकस्य बुद्धिस्थत्वे तदपायेऽपि चतुरादिव्यवहार इति किं वैषम्यं पुत्रस्याबुद्धिस्थत्वे तु तत्सत्त्वेऽपि न पितृव्यवहार इति चेन्न नष्टस्य पितेति व्यवहारवत् नष्टबुद्धिस्थपदार्थमादायैकस्य विद्यमानत्वे द्वौ स्त इत्यादिव्यवहाराभाव इति वैषम्यमिति तत्याग्रायात् नास्ति चतुःशब्द इत्येति। एवं च दृष्टांतदार्ष्टांतिकयोर्वैषम्यमिति भावः। नन्वेवं परिहारे दृष्टांतदार्ष्टांतिकभावः।। का

DEBHAU DAJI MEMORIAL

कै०वि० ७०

साधर्म्यसत्यपिउक्तवैधर्म्यमीजमाहमात्रादय इति आश्रयसत्त्वाभावादिति। सद्भावोऽत्र बुद्धिकृतः तेन मता मानेत्याद्यपपत्तिं समुदायेति। इतरसाहित्यविशिष्टद्रव्यनिष्ठेनेत्यर्थः वार्त्तमित्यस्या सारमित्यर्थ इत्यन्ये भाष्ये यदित्यस्य यत्रेत्यर्थः सर्वे परस्परसापेक्षा इत्यर्थः ननूद्यमनस्यैव कर्त्तृत्वप्रतीतौ कारणत्वात्तस्य च प्रत्येकवृत्तित्वादेकैक इत्येवयुक्तं तत्राह। कारणमुद्यमनं चेदिति। स्वतुल्यद्वितीयसहायं विना प्युद्यमनं स्यात्तन्न च तथादृश्यते तस्मात्परस्परसापेक्षपृथक्पृथक्कर्त्रे

मात्रादयश्च शब्दाः संबंध्यंतरापेक्षयैकस्मिन्नाश्रये वर्त्तंत इति संबंध्यंतरं विनाशेऽपि आश्रयसद्भावाद्युक्तं पत्त्रवर्त्तते। आदयस्तु समुदायनिष्ठेन एकावायेन तत्समुदायाभावात्कथं प्रवर्त्तेरन्। एतच्च वार्त्तमिति। एतदुक्तं। यदाश्रयसंनिधानादेकावायेऽपि मात्रादयस्तदपेक्षाः प्रवर्त्तंत इत्यर्थः इदानीमेव तद्धे धर्म्मरहितं द्वितीयं दृष्टांतं वक्ति। एकैक इति। यथोयं तृणां परस्परसन्निधिकृतं कर्त्तृत्वमेकैकापायेऽपि निवर्त्तते तथाद्यादिष्वपदेसोऽपीत्यर्थः कथं तत्रेति। न्याय्यमित्यध्याहारः। एकैक इति। परस्परनिरपेक्ष इत्यर्थः। कारणमुद्यमनं चेदिति। कर्त्तृत्वप्रतीतावित्यर्थः कार्यकल्पितत्वाच्छक्तीनामेवमुक्तं॥ ॥श्री॥

त्वमित्यर्थः एवं च तत्र यथान्योन्यकृतेनोद्यमनकर्त्तृत्वरूपार्थेन प्रत्येकस्मिन्तेन सह उद्यच्छतीति शाब्दस्तथान्योन्यसव्यपेक्षद्वित्वेनैकैकस्मिन्नपि द्विशब्दप्रवृत्तिरिति सिद्धमेकशेषशास्त्रं द्यौश्च द्यौश्चेति विग्रहः द्वित्वविशिष्टेन बोधाच्च प्रत्येकं द्विवचनं। प्रयोगे त्वेकशेषेणैव प्रयोगात्र कदाप्येकवो द्यौद्यावित्यतः एकैकोन द्यावित्याद्यपपन्नं द्यौनैकस्त्रयोन द्यावित्येवं विधव्यवहारादुत्तरसंख्यायाः पूर्वसंख्याबाधकत्वमिति तत्त्वं शि०शा० ७०

४४८

अथवेति। अत्र पक्षे तत्तुल्यमिति सव्यपेक्षास्त्वित्कस्तरयोज्यं। नोद्यच्छतिवांतरेणेत्यत्र स्वसमकक्षं सहायमिति शेषो बोध्यः वस्तुतो द्यादीनामेकशेषशास्त्राभावेऽपि नियमतउद्भूतावयवभेदसमुदायविवक्षणेन न कदाचिद् द्यादिभ्य एकवचनम्। अथवानेमे इति भाष्यस्यायमेवार्थः एकशेषेणाप्ययमेवार्थः सूचित इति बोध्यं भाष्ये प्रथमेति प्रथमेन मध्यमः प्रथमादिनोत्तम इति वक्तव्यमित्यर्थः पुरुषे। प्रथमाद्यन्यतमे एकत्वादिति। भेदावगमहेतोरभावादित्यर्थः प्रत्यक्षमहंकारावास्यदन्वेतनत्वं

तत्तुल्यमितितेनोद्यंत्रातुल्यं द्वितीयमुद्यंतारमंतरेणेत्यर्थः। अथवातत्तुल्यमिति। द्यादिशब्दे सव्यपेक्षतुल्यमित्यर्थः। प्रथमेति एकस्मिन्पुरुषे क्रियाया एकत्वान्नास्त्येकशेषः। पुरुषभेदे तु प्रत्यक्षपराभावादिभेदे विरोधात् क्रियायाऽनेकत्वादेकशेषो वक्तव्यः कुतश्चैकशेषप्रकरणादिवशादर्थविशेषावसायः। यया तु युष्मदस्मदी एवानेकार्थाभिधानसमर्थे इति पक्षे अत्रापि चानिवृत्तभेदाया एकक्रियाया आख्यातेनाभिनाभिधानं तदेकशेषो न वक्तव्यः॥

पराक्रतदास्यदनचेतनत्वं। आदिना प्रत्ययेऽपि त्वपरोक्षत्वे। प्रकरणादीति गम्यावित्यत्र वद्धपूर्नोरिवेतिभावः यदा त्विति। त्यदादीनीत्येकशेषारंभादितिभावः आख्यातेनाभिधानमिति प्रथमत इति शेषः पश्चाद्वित्वादिप्रत्ययः समभिव्याहारादितिभावः एवं चेदं वचनमवैयाकरणतार्किकस्येति तात्पर्यं स्वरूपव्यापारक्रियैव व्यास्य प्रत्याख्यातप्रायत्वाद्विवचनाद्यसिद्धेश्च नास्य विशिप्रत्याख्यानं भाष्य इति बोध्यं

कै० वि० ७१ असरूपत्वादिति। असमानशब्दत्वादसमासार्थत्वाच्चेत्यर्थः। द्विवचनेत्यादिग्रंथस्य वक्ष्यमाणत्वादिरित्याद्यभिप्रायकः सूत्रे
प्रत्यानुनिवृत्तिप्रसंगइति। जातिवाच्येषु नामस्वास्तत्त्वे पितद्‌र्थाभावेन तद्बोधप्रसंगइतिवक्ष्यं युक्तं यद्यपीति शब्दा
र्थसंबंधस्य नित्यत्वादितिभावः। विग्रयोगः द्वद्वरूपः एतत्प्रतिपादितमिति। भाष्येकृतमिति करोतिरेकशेषविधान

द्विवचनेति। प्रत्यर्थशब्दनिवेशे एकैकः शब्दः एकैकार्थाभिधायीति सह विवक्षायां निवृत्तेषु शब्दांतरेषु
शिष्यमाणेन शब्देन स्वस्मिन्नेवैकत्रार्थे अवस्थेयमिति भावः। सर्वेषु पक्षेष्वद्यं दोषः। प्रातिपदिकैकशेषे
द्विवचनबहुवचनानुत्पत्तिप्रसंगः। विभक्त्यंतानां विभक्तौ वा परत एकशेषेऽर्थाभावान्न द्विवचनबहुवच
नयोर्निवृत्तिप्रसंगः। अथ स्वभावतः। शिष्यमाणोऽनेकार्थः किमेकशेषेण। वाचनिकी चेति। यद्यपि स
र्वमेव स्वाभाविकं तथापि यत्र प्रयोग विप्रयोगो दृश्येते। तत्र विप्रयोगनिवारणाय यदुच्यते तद्वाचनिकमभि
धीयते। सच द्व्यर्थ इति। सरूपाणामेकशेषो नैवार्थश्चैकविभक्ताविति वक्तव्यमित्यर्थः। सिद्धमिति। ए
कशेषारंभसामर्थ्यादयमर्थो विगम्यते। शिष्यमाण शब्दोनेकार्थाभिधायीति। एकेनह्यनेकार्थाभि
धानायैकशेषः क्रियते। एकार्थाभिधानेह्यनेकशब्दाप्रसंगादनर्थकएकशेषः स्यादित्यर्थः। इतरएतत
सामर्थ्यमजानन्नाह। कथमिति। तच्चैकशेषकृतमिति। एकशेषविधानेनैतत्सैवतिपादितमित्यर्थः। लो
पकृतमिति। लोपद्वारेणेत्तत्संगृहीतमित्यर्थः। अनेनेति। एकशेषविधानेन॥

सामर्थ्यालब्धप्रतिपादनेवर्त्तते तेन शब्दार्थसंबंधनित्यत्वेपि नक्षतिरितिभावः लोपस्याभावमकत्वात्तत्कृतत्वमर्थविग शि० शा०
तेरनुपपन्नमत आह लोपद्वारेणेति एवं च शिष्यमाणस्य लुप्यमानार्थबोधकत्वमनुभवसिद्धमितिभावः भाष्येवक्तव्य ७१
तावाभवतीति वाचार्थे किंचित वेत्येवपाठ विघमनेव बोध्यते इत्यर्थः॥ ४४०

एतज्ज्ञान इतरः शंकते उच्यते तर्हीति तद्व्याचष्टे। वचनादिति शास्त्रस्य शास्त्रीयकार्यार्थत्वादितिभावः संप्रत्ययः स्यादिति
भाष्ये अश्वत्वादिमास्यादित्यर्थः तर्हि शब्दस्य चार्थेतया व्याख्यानेमानं दर्शयति सर्वोमंथ इति। भाष्येथ किमर्थं लोप इति।
अग्निचिदित्यत्र लोके न एव कर्त्रर्थप्रतीतिसिद्धेरितिभावः प्रत्यलक्षणमिति अनेन लोपेनानुत्पत्तिरेवाख्यानमितु
क्तं। नप्रत्ययर्थमिति ततश्च वक्ष्यश्चेति वाक्यं नस्यादितिभावः इतराभिमतमनूद्य दूषयति प्रत्यर्थमित्यादि प्रत्यर्थश
१ +नियकस्यनस्यादितिप्रयोगइति शेषः प्रत्याख्यानवादीआह यद्येकेनेति वक्ष्यावित्यादिदर्शनादिभावः आरंभवाद्याय हतिते + १
॥ उच्यतेति। वचनानेकार्थकार्यारोप्रवर्त्तता। यथा आत्याख्याया मेकस्मिन्निति। नत्वेकार्थः शब्दए
कशेषविधानेनानेकार्थः संपद्यत इत्यर्थः। गामश्व इति। अश्वधर्मसमारोपः केवलं प्रतीयते न तु ता
त्विकमश्वत्वमित्यर्थः। यदि तर्हीति। यदि च लोकः प्रमाणमित्यर्थः। उच्यते तर्हीत्यत प्रभृति सर्वो ग्रंथ
एकशेषप्रत्याख्यानवादिनः। तदपि प्रत्यर्थमेवेति। अर्थो ह्यभिधेय उच्यते। यश्च द्व्यर्थः शब्दो ना
सौ द्व्यर्थतां जहाति वक्रार्थश्च बहूर्थतां। रोदसी दारा इति यर्थेत्यर्थः यावतामिति। वक्षश्चैव वक्षश्चेति
दर्शनादनारब्ध एकशेषे अनेकार्थत्वैकस्य न स्यात॥

इति वेशादेकेनानेकाभिधानाभावादेकशेष आरब्धव्यः अन्यथाऽप्रत्यर्थं स्यात् एकेनानेकस्याभिधाने प्रत्यर्थं शब्दप्रयो
गो न स्यादिति चेदित्यर्थः यद्येकेनेति अविनीतस्सूचयति नैकैकस्याभिधानं वयं निराकुर्मः किंतु सह विवक्षायामेकेनानेका
भिधानमपि स्वीकुर्मः तेन वाक्यसिद्धिरेकशेषारंभश्च न कार्यः द्वंद्वस्तु प्रयोगादर्शनान्नतन्निवृत्यर्थोपि सद् इति तदपीति स्वीय
त्वीवार्थात्याग एव प्रत्यर्थत्वमितिभावः आरंभवाद्याह यावतामिति। एष एवन्याय्य इत्यर्थः न्याय्यत्वं कुत इत्यत आह वक्षश्चे

कै०वि० ७२ सहेतिसमुदायार्थप्रादुर्भावादितिभावः। द्विवचनाद्युत्पत्त्यर्थमाहउद्भूतेति। एकेनैवेतियुगपदधिकरणवच
नतारीत्येत्यर्थः लक्षणांतरेणेति। सजातीयत्वात्सदृटितिबुद्धिस्थेनेत्यर्थः। भाष्यएकेनापीति। अपिनानेकेनापि

एकेनापीति। सहविवक्षायामेकएवशब्दः उद्भूतावयवभेदंसमुदायमभिधत्तइत्यर्थः। ल
क्ष्यन्यगोधाविति। अत्रापिसहविवक्षायांसमुदायार्थप्रादुर्भावादेकेनैवसमुदायस्यप्रति
पादनान्नद्वितीयस्यप्रयोगोनप्राप्नोतीत्यर्थः। अनुक्तत्वादिति। लक्षणावित्यस्य लक्षस्यलक्ष
णेनसहत्वंगम्यनेननुन्यग्रोधेनेत्यर्थः। उभयदर्शनाच्चेति। सरूपस्यविरूपस्यचैकस्याने
कार्थाभिधायित्वदर्शनादित्यर्थः। द्यावेति। द्योशब्देनद्यावापृथिव्योरभिधानात्। ततःपरस्ये
कारस्यसुपांसुलुगित्याकारः गोतोणिदित्योकारांतग्रहणात्णित्वाद्वृद्धिरावादेशश्च। पृथिवी
इति द्विवचनांतवाछंदसीतिपूर्वसवर्णदीर्घः पृथिवीशब्देनात्रदिवस्पृथिव्योरभिधानं॥।

प्रत्याख्यानवाधेवयुक्त्यंतरमाहउभयदर्शनाच्चेति। उभयोरप्येकेनानेकार्थाभिधानदर्शनादित्यर्थः तद्याचष्टेसरूपस्य त्रि०शा०
चेति। द्विवचनां। नमि। अतएवपदकालेपृथिवीइतीतिप्रगृह्यत्वं। ननुद्यावेत्यादौविवक्षावित्यादावपिवैविजातीया ७२
नेकार्थाभिधानंस्यादितिचेन्नस्वभावेनवारणात

४५०

यत्रैकंप्रवृत्तिनिमित्तमितितत्रशक्यतावच्छेदप्रकारबोधांगीकारेतदनुगतीकृतानेकव्यक्तिबोधोन्याय्यएवैकस्मात्तद
व्यपदार्थवादेपि। शुद्धव्यक्तिबोधइत्यादिनो मतेपिप्रवृत्तिनिमित्तोपलक्षितानेकव्यक्तौशक्तिः। तदात्यर्यं ताहकस
त्वेएकस्मादप्यनेकशुद्धव्यक्तिबोधइतिसर्वथाद्रव्यपक्षेपिसूत्रंप्रत्याख्यानं इदमेव। तंत्रंयदेकस्ययुगपदनेकार्थकबोधकत्वं
तदाहप्रत्याख्यानइति। इदंचप्रत्याख्यानमर्थस्यान्यप्रमाणत्वादित्यनेनसूत्रकृतापिदर्शितप्रायमेव। नन्वेवमपिवोदु

विरूपाणामिति। प्रकरणादिवशाद्यत्रार्थविशेषावसायस्तत्रप्रवृत्तिनिमित्तभेदेपिविरूपोऽनेकार्थाभिधायीदृश्य
ते। तत्रसरूपः कथंनस्याद्यत्रैकंप्रवृत्तिनिमित्तमित्यर्थः। तदेवंद्वयाभिधानपक्षेपिप्रत्याख्यातएकशेषः। अने
कार्थप्रकर्मेपिनेकाएवशब्दःप्रयुज्यतेननुद्वंद्वःअनभिधानात्। इदानीमाकृतिपक्षाश्रयेणप्रत्याख्यानंक
रोति। आकृत्यभिधानादिति। जातिःपदार्थःतस्याएकत्वादनेकशब्दप्रयोगप्रसंगएवनास्ति०किमेकशेषेणेत्यर्थः
कथंपुनरिति। द्रव्यव्यतिरेकेणाकृतेरनुपलभादभावंमन्यमानस्यप्रश्नः। प्रख्याविशेषादिति। प्रख्याबुद्धिःतस्या
अविशेषादेकरूपत्वात्तद्विषयस्यावैक्यंप्रतीयतेगुणप्रमाणादिभिन्नेष्वपिगोगौरित्येकाकारप्रत्ययोदयादवश्य
मेकेनालंबनेनसामान्येनभाव्यमितिजातिसद्भावएकत्वंचावसीयते। गौरित्यकस्केइति। गौरित्येतेनशब्देनोक्तेप्रत्यायिते
सामान्यलक्षणेर्थेविशेषानवधारणादैक्यंसामान्यस्यावसीयतइत्यर्थः॥।

वरीतआहनत्वितिसहविवक्षायामेकजातीयार्थानेकशब्दप्रयोगादर्शनेननतदसाधकत्वप्रतिपादनार्थसूत्रमितिभावः एकाकृ
तिरितिभाष्येस्यात्सीतिशेषः द्वैरर्थःशब्दनप्रतीतिविशेष्यःबुद्धिरितिप्रमात्मिकेत्यर्थः ननुव्यक्तौक्येस्यादेवप्रतीत्येकरूपतेत्य
तआहगुणेति। आलंबनेनेतिविषयेणेत्यर्थः। प्रत्यायितइति। अनेकशेषीत्यादिःविशेषानवधारणादिति। आश्रयभेदेपीत्या

अविछेदं व्याचष्टे अविशेष इति तस्याप्रतिरिति विशेषानवगते पूर्वं सामान्यस्य शाब्दबोधगतिरित्यर्थः अयं भावः गुणादिभिन्ने ध्रु
नुस्थले काकारप्रतीत्या जातिसिद्धौ तत्र शक्तिग्रहः शब्दात्तस्या बोधश्च व्यक्तीनां बानेत्यात्तासु न शक्तिग्रहो नापि शुद्धानां तासां बो
धस्तासां विशेषरूपत्वेन विशेषावगतिप्रसंगात् तथाकृतिरूपादिकं शाब्दबोधे भासते सामान्येन तथा विशेषो पि भासते तजातेः श
क्यतेतु तदाश्रयत्वेनाक्षेपादिना सामान्याकृतिरूपादेरेव ग्रहणमिति न दोषः प्रथमतो बालस्य यद्यपि विशेषव्यक्तावेव श
क्तिग्रहस्तथाप्यावापोद्वापन्यायेन व्यक्त्यंतरे अनयनादिदृष्ट्वा पूर्वजातशक्तिग्रहस्य जात्याश्रयमात्रे व्यवस्थितिरिति त

कृतत्त्वेत दिति। भवतु सामान्यमेकं तस्य तु वाहदोहादिकायामर्थक्रियायामयोग्यत्वात् द्रव्यस्यैव योग्यत्वात्
अभिधानं स्यादित्यमिति मत्वा प्रश्नः। अव्यपवर्गात श्चेति। अव्यपवर्गो अभेदः अविछेदः अविशेषस्तस्या प्रतिः
प्रतीतिरित्यर्थः। जातितो वाभिधीयमानायां द्रव्यद्वारकावाहदोहादयऽप्युपपद्यंते जातितद्वतोश्चाभेदोपचारात्
गोः शुक्ल इति सामानाधिकरण्यादिव्यवहारोप्युपपद्यते। अथ प्रख्याविशेषाद्व्यपवर्गगतेश्चेति किमर्थमु
भयोरुपादानं एकेनापि हेतुनैकत्वाभिधानयोः सिद्धत्वात् नैष दोषः। अनभिधीयमानापि जातिः सन्निधिमात्रे
ण प्रख्याविशेषनिमित्तं भवतीति प्रख्याऽविशेषेण प्रत्यभिज्ञाप्रत्ययस्थैर्यैकत्वमेव प्रतिपादितं नाभिधानं॥।

त्वं वाहादिक्रिया तर्हि कथमत आह। द्रव्यद्वारका इति आश्रये करणमेव जातौ तत्करणमिति भावः अन्वयबोधे तु बाधज्ञानस्याप्रति
बंधकत्वान्न तदनुपपत्तिः जातीत्यादिप्रयासो व्यर्थ इति कश्चित् सन्निधिमात्रेण। शक्तिग्रहे व्यक्त्या वुपलक्षणतामात्रेण। प्रत्यभिज्ञाप्र
त्ययभिज्ञाविषये प्रत्ययेन तदुच्चारित गोशब्दाद्यदृशः प्रत्ययस्तादृश एवैतदुच्चारितादित्येवं प्रतिभिज्ञा विषयता सा चैकाकारतां विना
नुपपन्नेति त्रि०ग्रा० ७३

४५१

द्वितीयेनाभिधाने सिद्धेपि एकत्वं न सिध्यतीत्याह तथा वनमिति। अविशेष इति। एकरूपत्वमित्यर्थः वनशब्देन कदाचि
दाम्रसमुदायस्य कदाचिन्पलाशसमुदायस्य कदाचित्खदिरसमुदायस्य कदाचिदाम्रादिसमुदायस्य प्रतीतेरिति तात्प
र्यं तदाह भिन्नस्थेति। एकस्येयुक्त्यंतरमाह ज्ञायते चैकेति। आद्यव्याख्याने ध्याहारभयाद्व्याख्यांतरस्याह अथवे
ति। उपदिष्टमिति। भावे क्त इत्यर्थः भाव्यकः पुनरिति। अनेनापि प्रख्याऽविशेषस्यैवोपपादनादिति भावः प्रत्यक्षमिति प्र

तथा वनमिति सर्वविशेषाभ्यंतरीकरणेनाव्यपवर्गतापि प्रख्याया अविशेषो नास्ति। भिन्नस्थालंबनत्वा
द्वनमिति प्रत्ययस्य। एकोपदिष्टमिति। एकस्मिन्नुपदिष्टं गोरयं त्वयापदानस्पृष्ट इत्यादिवक्तुं। अथ वैकमु
पदिष्टं यस्य तदेकोपदिष्टं सरूपदिष्टं गोत्वादि सर्वत्र ज्ञायात इत्यर्थः। उपोद्बलकमिति। उद्गतबलं प्रत्य
क्षं तत्पूर्वकत्वादनुमानस्य। उद्बलस्य समीपमनुमानमित्यर्थः। प्रख्याविशेषादित्यनेन प्रत्यक्षं जात्यालंबनप्रमा
णमुपन्यस्तं। ततो विप्रतिपन्नप्रतिपादनायानुमानमिह जातिसद्भावे ज्ञायते चैकोपदिष्टमित्यनेनोक्तं। देशाका
लावस्थापिंडांतरेष्वबाधितप्रत्यभिज्ञाप्रत्ययोऽन्यथानुपपत्त्या सामान्यसद्भावोनुमीयत इत्यर्थः। अ
थवा बलमुद्दीपयत्युपोद्बलकमुपबृंहकमुच्यते॥

प्यस्तशब्देन शाब्दमप्युच्यते तत इति तत्रेत्यर्थः विप्रतिपन्नेति। देहात्मप्रत्ययवत् भ्रांतत्वशंकयेति भावः प्रयोगस्त्वविम
तप्रमयो जातिविषयो देशादिभिदेऽप्यबाधितैकाकारप्रत्ययत्वात् संमतवदिति अवस्थेति। अवस्थाकृतभेदोपपा
दनेन च नव्यक्त्यैक्यं विषय इति सूचितं। प्रत्यभिज्ञाप्रत्ययेति। तद्विषयप्रत्ययेत्यर्थः उपबृंहकमिति। भ्रांतत्वशंकानिवर्त
नेन प्रमाणनिर्वाहकस्तर्क इत्यर्थः

कै०वि० ७४ नसादृश्येति सादृश्यस्यैकक्रियाकारिकात्वादिति भिन्नकभ्रमरूपानेत्यर्थः अविगीतः प्रमाणभावः प्रमाणत्वं यस्य स्म
तस्य स्मरणस्य पदार्थविषयकस्य तेनोपनिबद्धानि वचनानि यैस्तेषामित्यर्थः द्रव्यस्य शब्दार्थत्वेहि एकत्वात्लक्षणबध्य
निषेधाद्येव प्रतीयेतैः एकः क इति चेत् यो यस्य तद्वाक्यश्रवणकाले बुद्धिस्थः स इति गृहाणजातेः पदार्थत्वे तु न दोष इति

धर्मशास्त्रं च तथेति। अनेनैतद्दर्शयति। न सादृश्यैकार्थक्रियाकारित्वादिनिमित्ता प्रत्यभिज्ञा सर्व
त्रेति नाद्यं। किंतर्हि। अभिन्नविषयनिमित्ता स्मृतिकारणामथवि। न प्रमाणभावस्मृतेरुपनिबद्धवच
नानां जात्याश्रयेण सर्वव्यवहारप्रवर्त्तनादित्यर्थः। एकत्वास्तमिति। एकैकस्यैव द्रव्यस्य ब्राह्मणशब्दवा
च्यत्वात् इति भावः। तस्येति। भो अथ पवर्गनिरस्ता तास्मृतिकारणमपि तथैव व्यवहारदर्शनादित्यर्थः। न
न्वेकमनेकस्थं कथं भवति। नहि देवदत्तो युगपन्मकरायां स्रुघ्ने च भवतीत्यत आह। अस्तिचेति। अवय
वी यद्यप्यनेकावयवस्थः तथापि तत्सद्भावे विविधाहन्नासो दृष्टांतत्वेनोपात्तः॥

तात्पर्य। अन्यत्र कामचार इति सर्वेषामिति निर्दोषः एकेन एकस्याहननेजातः शास्त्रार्थ इति अन्यत्वास्तत्र विषये सर्वेषां म
चारः स्यादित्यर्थः नन्वेकमिति। जातिरूपमित्यर्थः। तद्वावेविवाहादिति। बौद्धादीनामिति निर्दोषः किंचर्समस्त्येन प्रत्य शि०शा० ७४
वयवमवयवी नोपलभ्यत इति वैषम्याद्विसनदृष्टांतेत इति भावः

४५२

साकांक्षत्वाद्वाक्यस्याहएकस्याहएकस्यापीति। एकस्यापि अनेक इति पाठः एकस्यापीन्द्रशब्दस्य यथानेकोयागांगित्वेन वि
षय एकबोधज्ञानविषयश्च एकदेशावच्छिन्नानेकयागेषु तथादर्शनसंभवात्। तथा एकस्या अपि जातेरनेको वि
षय आश्रय तयेत्यर्थः। अनेकस्थ इति पाठे एकोपि यथा इन्द्रशब्दोनेकयागस्थ एकस्यापि बोद्धविषयस्तथा जातिर
पीत्यर्थः। अव्ययीभावे इतीन्द्रस्य प्रादुर्भाव इत्यर्थः सर्वेष्विति। प्रादुर्भावविषये शब्दरूपात ध्यात एकादेवतावी
ह्यादिद्रव्यवत्सर्वयागेषु गतां युगपत्प्रतिपद्यत इत्यर्थः भाष्ये पीन्द्रः इन्द्रशब्द आहूतः प्रादुर्भूतः युगपत्सर्वत्रांभव
दृष्टीइवद्विषय इति। एकस्याप्यनेक इतिवाक्यशेषः। शब्दप्रादुर्भावे अव्ययीभावे कृते वतिः प्रत्ययः सर्वत्रे
ति। सर्वेषु यागेषु द्रव्यवदंगतां प्रतिपद्यत इत्यर्थः। एकत्वेपीति। यद्येकस्यानेकसंबंधो नाभ्युपगम्यते तदे
कः शब्दोनेकं अर्थसंबंधाभावान्न प्रत्याययेदित्यर्थः। उक्तमेवार्थं समर्थयितुमाह। द्रव्याभिधाने हीति। श्रु
तिस्मृतिविहितानां सर्वव्यवहाराणामप्रवृत्तिः स्यादित्यर्थः। ननु चेति। सर्वविषया चेदाकृतिश्चोद्यते। त
दा सर्वव्यक्तिविषयमनुष्ठानं विना वैगुण्यमेव स्यादित्यर्थः॥

तीत्यर्थः। यदीति। अनेकाधिकरणस्थपदेनानेकसंबंधो विवक्षित इत्यर्थः एवं चैकः शब्दो यथानेकत्रार्थे एकेन युगपत्
गृह्यते तथा जातिरपीत्यर्थः भाष्येन्यपरोऽशास्त्रात्कमिति। एकः शब्दः प्रत्यर्थं निवेशित्वादेकं द्रव्यं गोरूपं बोधयेत तस्यकेनवि
दालंभे कृते परैस्तेन वा गवांतरालंभेऽशास्त्रार्थः स्यात् एवं न ब्राह्मणमित्यादावपि एकस्य ब्राह्मणस्यावधो विषयस्तत्रान्य विषये स
र्वेषां कामचारेण प्रवृत्तावपि न प्रायश्चित्तं स्यादिति बोध्यं सर्वपुरुषान्प्रति एकव्यक्तेरेव बोधनमित्यभिमानः॥ ॥श्री॥

अथानुष्ठानेति। अयंभावः जातेः साक्षादनुबंधनाद्यसंभवात् व्यक्तिद्वारा तद्वाच्यं तत्रानुष्ठानसिध्यर्थमेकप्रयोगे एकव्यक्ति
द्वारकमेव तदाश्रीयते तत्राकृतेरेकत्वेविनिगमनाविरहात्सर्वव्यक्तिद्वारकमेव तदाश्रीयेत। आकृतेरनेकत्वेतु प्रतिज्ञाहानिरि
रिति। पूर्वरीत्याऽस्यावतारणाच्चशब्दोनुपपन्नोत आह तुशब्दस्यार्थ इति। भाष्येऽनवयवेनेति जात्याश्रया व्यक्तिविशेषा अव
यव इत्युच्यंते अनवयवेन व्यक्तिविशेषानालंबनेत्यर्थः। नचाश्रयभेदात्तद्भेदोत आह सर्वाभिरिति। भेदकाभावान्नभेद

अथानुष्ठानसिध्यर्थमेकद्रव्यविषयमेवकर्म क्रियते तत्राप्युच्यते। एकाकृतिरिति चेति चशब्दस्तुशब्दस्यार्थेव
स्यमाणार्थावेद्यासमुच्चयेना। सर्वेदानीमिति। एकत्वेजातेरेकशब्दप्रवृत्तेः सिद्धत्वादेकशेषारंभः प्रत्याख्याये
त। अनेकत्वेत्वारव्धव्य एवैकशेष इत्यर्थः। एवंतर्हीति। सर्वाभिर्व्यक्तिभिः संबंधस्यतुल्यत्वात्सर्वत्रैवाभिव्य
क्तवुद्धत्यादनात्। प्रत्येकं समाप्तत्वादेकस्मिन्नपिद्रव्येतत्कर्मक्रियमाणं जातौकृतमेव भवतीत्यर्थः।
यथादित्य इति। प्रतिदेशं यथा सर्वात्मना दित्य उपलभ्यते। तथा जातिरपीत्यर्थः। ननुवेति। द्रव्येपिपदार्थे
जातेरनभिधेयायाउपलक्षणत्वेनाश्रयणात्परित्यक्तभेदं द्रव्यमात्रं विशिष्टजातियुक्तं शब्देनोच्यते॥ ॥श्री॥

इतिभावः प्रत्यक्षविरोधात् धर्मिग्राहकमानविरोधाच्च भेदानुमानमसंगतमितिभावः ननु आदित्यस्यप्रत्येकं समाप्त्यभावे
न दृष्टांतासंगतिं मत्वाह प्रतिदेशमिति। अनभिधेयायाइति। शक्यतावच्छेदकमशक्यमेवेत्यर्थः यद्वा प्राधान्येनानभि
धेयाया इत्यर्थः परित्यक्तभेदमिति। परित्यक्तावांतरभेदमित्यर्थः॥

४५३

ननु द्रव्यस्य प्रत्येकं समाप्तेः प्रकृतेनुपयोगोत आह शास्त्रमिति शब्देनाभिधाने इति। प्राधान्येनेत्यर्थः तन्वेवं चोदनायां चैकस्ये
ति चोनुपपन्न इत्यत आह वाक्यकार इति। प्रयोजनानि प्रयोजनांतराणि समुच्चयेनेति द्रव्याभिधानेह्याकृत्यसंप्रत्ययइत्य
नेन समुच्चय इति बोध्यं। एकस्याग्नेयादेरुपाधिरष्टाकपालत्वादिस्तस्य पुनः पुनः प्रवृत्तिरिति वार्त्तिकार्थः समासश्चार्थ

प्रत्येकं च परिसमाप्यत इति। शास्त्रमित्यध्याहारः। अथवा जातिरूपलक्षणभूता प्रत्येकं परिसमाप्यत इति व्या
ख्येयं। एकशेषस्त्वयेति। जात्युपलक्षितस्य द्रव्यस्य शब्देनाभिधाने सत्यभिधेयानेकत्वेऽनेकशब्दत्वप्रसंगादित्यर्थः
त्वयापीति। जातेरेकत्वात् द्वित्वबहुत्वनिबंधनानि द्विवचनबहुवचनानि न सिध्यंतीतिभावः। एवंभाष्यकारेणाप
क्षयोः साम्यं दर्शितं। वाक्यकारस्तु जातिपक्षाश्रयणस्य प्रयोजनानि समुच्चयेनाचष्टे चोदनायां चैकस्येति। सा
मान्यस्याग्नेयादेरुपाधिवृत्तेरिति। अष्टाकपालत्वादिरुपाधिः तस्य वृत्तिः प्रवृत्तिः एतदुक्तं भवति। यदि
आग्नेयादिशब्देन सामान्यमभिधीयते तदा तेनैवाग्नेशब्दयाणामाद्येपात्प्रतिद्रव्यमष्टाकपालत्वमुपाधियु
ज्यते द्रव्ये तु पदार्थे एकेनैव यजमानेन सकृदेवाष्टाकपालः पुरोडाशो निरूप्यते नान्येन नान्यदेत्यर्थः। कः पुन
रिति। गोरनुबंध्य इत्याग्नेयमष्टाकपालमिति चानयोरित्यर्थः। एकानिर्वृत्तेनेति निष्पन्नो हि पशुर्यागसाधना
योपादीयते। अपरानिर्वृत्तेनेति। आग्नेयोष्टाकपालः चोदनयैवोत्पद्यते न तु चोदनायाः पूर्वं निष्पन्न इत्यर्थः॥ ॥

त्वात्। एकस्येति व्याचष्टे सामान्यस्येत्यादि अष्टाकपालत्वादीत्यादिपदेन निर्वापः अतएव भाष्ये स एव दर्शित एवं
निरूप्येत्यादिना प्रवृत्तिरिति पुनः पुनः प्रवृत्तिरित्यर्थः उत्पाद्यत इति। उत्पाद्यत्वेन बोध्यत इत्यर्थः॥ ॥श्री॥

कै०वि० ७६ ननुप्रकारभेदेपिद्वितीयोपन्यासेकिंबीजमतआहतत्रेतिरूपसामान्याद्वासिद्धमित्यइत्युणितिसस्त्वस्थभाव्यरी
त्यानिव्यन्तेइदंअभिधेयंनेदमितिविवेक्तानहादित्यर्थः।ननुतत्राप्युक्तरीत्यैवप्रवृत्तिःस्यादतआहसा
दृश्येति।तस्यसंबंधिकत्वेनप्रतियोग्यंतरानुपस्थितेरितिभावः।ननुव्यक्तिशक्तावानंत्यव्यभिचारयोःस
त्वात्।जातौशक्तिरित्यावांक्चजातिरेवनास्तीत्याहवृत्तिविकल्पेतिजातिर्नतावद्द्रव्येषुव्यासज्यवृत्तिःएका

तत्रनिर्वृत्तेभेदाग्रहणात्द्रव्यांतरेपिप्रवृत्तिःस्यान्नतुनिर्वृत्त्यैसाद्दृपाग्रहणा
दित्यवयवाश्रयणीयाजातीःद्रव्याभिधानमिति।जातेर्वृत्तिविकल्पात्तमन्तेनाभाव
मन्यमानोव्याडिर्द्रव्यमेवशब्देनाभिधीयतइतिमन्यते॥ ॥ ॥ ॥श्री॥

श्रयानाशोऽप्रतीत्यापत्तेःकिंचगणमालभेतेत्यादिनोदनासुसर्वद्रव्यालंभापत्तिःप्रत्येकसमाप्तौतुद्रव्यांतरे
नदृत्तापत्तिः।तत्रापिसत्वेएकाकृतिरितिप्रतिज्ञाहानिरित्यर्थः।तत्तत्संस्थानाद्युपलक्षितमधिष्ठानंचेत्तन्य
मेवद्रव्यमितिनानंतव्यभिचारावितितात्पर्यं।श्यैवेचोदनाविति।पूर्वतर्कवाक्येषु।तस्यद्रव्यस्यारंभणात
इहमुपलक्षणमारंभणालंभनादिकरणादित्यर्थः।तत्रारंभणंकर्योवंधनं॥ ॥ ॥श्री॥ शि०शा० ७६
४५४

जातिवादेदूषणमाहभाष्येआकृतौचोदितायामिति।कार्यसंबंधित्वेनचोदितायामित्यर्थः।तच्छेषपूरणेनव्याचष्टेऽयुक्तमित्या
दिनातत्रैवदूषणांतरंचैनकमितिविपर्ययस्यापीति।सत्प्रतिपक्षसंभवादित्यर्थः।एवंचानेकद्रव्यगतैकाजातिरभ्युपगंतुमेवन
शक्यतइतिभावः।ननुजातेर्नित्यत्वात्कथंनाशारिकंचैकनाशेपिव्यक्त्यंतरेणाभिव्यक्तजात्याश्वाप्रचरेदेवत्यतआह।अभि
व्यंजकेतितिव्यासज्यवृत्तिर्जातेःसर्वव्यक्तिभिःसंभूयाभिव्यज्यतइतिमतेइदंदूषणंजातेर्नाशश्चतिरोभावएवेत्यर्थः।एवं

आकृतौचोदितायामिति।आकृतिवादिपक्षेशब्देनाकृतिश्चोद्यतेद्रव्येतुकार्यप्रवर्तते।अयुक्तंचैतत्।नह्यन्यस्यचोदने
न्यस्यकार्येक्रियमाणेयथोक्तंकृतंभवति।तस्मात्द्रव्यमेवशब्देनोच्यतइतिन्याय्यं।नैचैकमिति।नचहेतुरहितेनादित्य
दृष्टांतेनसाध्यसिद्धिर्भवति।देवदत्तदृष्टांतेनविपर्ययस्यापिसाधनात्।श्वमतइति।अभिव्यंजकविनाशेजाते
स्तिरोभावात्पिंडांतरेश्वेतिप्रयोगःस्यात्।ज्ञातप्रत्ययइवैकापायइत्यर्थःयद्वाकृत्र्थापायेआश्रितस्याप्ययायः॥
अवयवापाये।अवयविनइवेतिजातेर्विनाशप्रसंगइत्यर्थः।गौर्जातइति।जातेनगोपिंडेनगोत्वमभिव्यक्तव्यंतच्चस
र्वाश्रयवर्त्तीति।एकोगोपिंडप्रत्यक्षत्वेसर्वगोपिंडप्रत्यक्षत्वप्रसंगः

चश्वानामलोकेनसंचरेदितिभाष्यस्यव्यक्त्यंतरेश्वप्रत्ययविषयोनसंचरेन्नूनस्यादित्यर्थःएवंविनाशायद्व्यक्तिषुध्वंसपरंत
थेतियतमृष्टमाकृतौतिरोधानपरमित्युपयुक्तमितिमत्वाहयद्वेति।आद्यविद्यकोधर्मविशेषोजातिरितिभावः।जातेर्नैतिव्या
सज्यसर्वाश्रयवर्त्तिगोत्वंसर्वाश्रयज्ञानेनैरभिव्यक्तं।अन्यथागोत्वज्ञानमेवनस्यातइत्यर्थः॥

कै॰वि॰ ७१ अस्तु तर्हि नित्यत्वप्रत्यक्षत्वापत्तदाश्रयसर्वस्य प्रत्यक्षत्वमत आह भाष्ये अनवकाशमिति। अर्थान्तरप्रत्ययावकाशरहितं गोभ
तं गोत्वप्रत्यक्षाय गोस्स्वयं स्वसर्वप्रत्यक्षं स्यात्। गोव्यक्तिनामनन्तत्वादनवरोकोऽन्त्वमित्यर्थः। न विद्यतेऽवकाशो यस्मा
दिति बहुव्रीहिरिति तात्पर्यं। अत्र पदेऽध्याहारस्के आत्यन्तान्तरमाह अन्यथेति। नायातीति। उत्पन्नगविव्यक्त्यन्तरादायाती
ति न शक्यं वक्तुं। तस्यानिःक्रियत्वात्। न यातीति पाठे उत्पन्नव्यक्तिं व्यक्त्यन्तराद्गागमन प्राप्नोतीत्यर्थः न चतत्रा
सीत् इति। प्रागाश्रयाभावादित्यर्थः। तत्रैव हेतुमाह। अस्ति पश्चादिति। यतः पश्चादेवास्ति। अतः पूर्वं नासीदिति

अनवकाशमिति। पदार्थान्तरप्रत्ययस्यावकाशाभावात्। अथवा सर्ववस्तुव्यापि गोत्वमेष्टव्यं। अ
न्यथा न यातीति न च तत्रासीदस्ति। पश्चान्न चांशवत्। जति पूर्वं नाधारमहो व्यसनसंततिरिति दोषाप
त्तिः। ततश्च व्यक्त्यैव कैकत्र साव्यक्ताऽभेदात्सर्वत्र गायदि। जातिर्दृश्येत सर्वत्रेति। सर्वेषु पदार्थेषु गोप्रत्य
यप्रसंगः

त्यर्थः एतेन मायासीत् माचमूत्तत्र गोत्वमिति परास्तं। ननु सक्रियत्वमंगीकृत्यं यो नागमनमस्त्वत आह न चांशव
दिति। निरवयवत्वेनांशाभावादित्यर्थः ननु पूर्वं धारं त्यक्त्वा नैवायातीत्यत आह जहातीति। पूर्वत्रापि वृत्तीनेरिति
भावः तस्मात्सर्वगैकेतिवाच्यं। ततश्च कंचा चिद्व्यक्तैव व्यक्ता सा अभेदात्सर्वगतिवाच्यं। ततश्च सर्वत्र दृश्येत तदाह स शि॰मु॰ ७१
र्वेष्विति। अत्र पदे गोभूतमभिव्यक्तगोत्वेन व्याप्तं तुल्यव्यक्तित्वेन जात्यन्तरावकाशरहितं सर्वं स्यादिति भावार्थः जा ४५५
तिसंकरप्रसंगश्चेत्यनेनापि बोध्यं

नहीति। एवं च तत्तच्छब्दप्रतिपाद्ये एकस्मिन्विरुद्धधर्मोपपत्तेरभावाद्द्रव्यमेव पदार्थ इति भावः भाष्ये गोश्च गोश्चेत्यनेनाभि
प्रेतं वैरूप्यमुमपादयति भेदेति एवं खंडो गौर्मुण्डो गौरिति वचनस्यादिति भावः प्रत्यभिज्ञा प्रत्ययस्तद्विषयः प्रत्ययः भाष्ये

अस्ति च वैरूप्यमिति। तस्माद्द्रव्यमेवास्तु न तु सामान्यं न ह्येकस्य भेदाभेदौ विरुद्धौ उपप
द्येते इत्यर्थः एकार्थक्रियाकारित्वादिनिमित्तस्तु प्रत्यभिज्ञा प्रत्ययः। गोश्चेति। भेदा
भिधानः समुच्चयः सामान्यस्यैकत्वाभिधेयत्वयोर्न्तस्यादित्यर्थः। आकृतावपीति। प
दार्थ आकृतिपक्षपरिग्रह एव न सिध्यति। न हि शाबलेयकरा॰ हादेव नान्ताद्येका
कृतिसद्भावः

त्ति च वैरूप्यमिति वाक्यस्य चशब्दं व्याचष्टे तथा च विग्रह इति एकार्थत्वे यथाणामिव सह प्रयोगो न स्यादिति भावः। भाष्ये स
र्वेष्विति। विजातीयानेकार्थसरूपशब्देष्वित्यर्थः मुक्तशंसयई मिति। एकशेषांगीकरणमिति शेषः जात्यभावे व्याडिम
ते उक्तसंतिरस्यति आकृतिसद्भाव इति

+भाष्ये दर्शितं।बहुवचनवदिति आश्रयगतेसंख्यावत् आश्रयबोधे दृष्टानेकशब्दत्वमपि प्राप्नोतीत्यभिमानः+१
अथचेति।इत्यादीनाव्याख्यातंसर्वगोभूतमित्यादिदोषंपरिहरति।सर्वगतत्वेपीति।संकरोपिनपरस्परपरिहारेणभिन्न
वस्तुनिष्ठामेकैकत्रस्थितेःसंकरत्वात्।नसर्गत्वादीनामितिभावः।आद्यव्याख्यायांत्वादोषस्तुजातेःप्रत्येकंपरिसमा
प्त्यंगीकारेणस्फुटःएकैकव्यक्तिव्यंग्यत्वाच्चनविनाशेत्यादिदोषः।ननुसर्वामिति।यथात्मनांव्यापकत्वेपिक्वचि

इदानीमाकृतिवादीदोषान्परिहर्तुमाह।लिंगेति।आकृतिसद्भावःपूर्वमेवप्रत्यक्षानुमानागमप्रवृ
त्तिभिःप्रतिपादितः।सर्वगतत्वेपिपदार्थानांविचित्रशक्तियोगात्।कश्चित्पदार्थःक्वचिदेवाकृति
मभिव्यनक्तिनतुसर्वःसर्वः।गुणाश्चात्रद्वित्वस्त्रीत्वादयोविवक्षिताः।तैश्चैकेनैकार्थसमवाय
लक्षणःसंबंधःइत्याकृतावपिपदार्थेलिंगसंख्यासिद्धिरित्यर्थः॥अनित्याइतिकदाचित्स्त्रीत्वयुक्ते
नपिंडेनाकृतिर्व्यज्यतेकदाचित्पुंस्त्वयुक्तेनकदाचिदेकाधारस्थाप्रतिपद्यतेकदाचिदनेकाधारस्थेत्य
र्थः।किंपुनरिति।तेहिगुणत्वेनप्रसिद्धाःनचैतेनित्यत्वंलिंगवचनसिद्धौहेतुरुपपद्यतइतिप्रश्नः
प्रकरणादर्थनिश्चयइत्याह।नेत्याहेति।वचनपरिहारस्त्वितिलिंगपरिहारेनकिंचित्द्व्यतिवचन
परिहारेभिधीयमाने।एकाकृतिरिति।प्रतिज्ञाहानिः।द्वित्वबहुत्वसंबंधस्यापिअभ्युपगमात्।द्वि
वचनवद्बहुवचनवदनेकशब्दत्वमपिप्राप्नोतीत्येकशेषोपिवक्तव्यइत्यर्थः॥

त।शरीरेकश्चिदेवात्मास्फुरतिनतुसर्वःसर्वत्रतद्वदित्यर्थः।एकार्थसमवायेतितेनचनिमित्तेनजातौलिंगसंख्या
रोपइत्यर्थः।भाष्येगुणस्येतिजातावेकवचनं।अनित्याइति।अनियताइताइत्यर्थः।अवापित्वोयापित्वाभ्यामनियतत्वमेव

जातिर्व्यपदिश्यतइति।यवइत्येकवचनेनतत्रजातिप्राधान्यावगमादितिभावः।एवंचारोपितद्वित्वादिनानप्रतिज्ञाहान्या
दीतितात्पर्यंअभ्युपगममितिगौणपितृत्तरासंख्यापूर्वासंख्यांबाधतइतिभावः।आविष्टलिंगेति।स्वाश्रयेनेकलिंगसत्वे
विस्वयंयत्किंचिदेकमेवोपादास्तेतथाचानेकलिंगत्वासिद्धिरितिभावः।उक्तमेवार्थदृष्टांतेनाहततश्चेतिनचैवंलिंग
स्यासिद्धिःकुतः।ब्राह्मणीशब्दवाच्ययाजात्याआश्रयगतंस्त्रीत्वमेवोपादीयतेब्राह्मणशब्दवाच्ययापुंस्त्वमेवेतिव्यव

गुणविवक्षानित्यत्वादिति।स्वतआकृतेरेकत्वंद्रव्यगतद्वित्वबहुत्वविवक्षायांतुद्विवचनबहुवचनेभवतः।आ
श्रयधर्मैराश्रितानांव्यपदेशः।यथासंपन्नोयवोविनष्टोयवइतिसंपत्तिविनाशाभ्यांद्रव्यगताभ्यांजातिर्व्यप
दिश्यते।तथालिंगसंख्याभ्यामपीत्यर्थः।भवेदिति।अभ्युपगमेविरोधाभावात्।वचनपरिहारस्त्वभ्युपगमं
।विरुणद्धि।द्वित्वबहुत्वयोगाभ्युपगमेनैकत्वहानादनेकशब्दत्वप्रसंगाच्चेत्यर्थः।लिंगपरिहारश्चापीति।त्रि
शेषणानांजातेरित्यत्रीत्क्रमाविष्टलिंगाजाति।रितिततश्चैकमेवाश्रय।तल्लिंगमुपादत्तेसर्वदाजातिः।यथा
न्नाम्यपशुजातयःसर्वेस्त्रीत्वमेवोपाददत्तेगावइमाइतिअन्यास्तुपुंस्त्वमेवब्राह्मणइमेइतियथेत्यर्थः।नसौ
दितिसिद्धांतवादीयुक्तपक्षमाश्रयइति।लौकिकमिति।स्तनकेशादिसंबंधइत्यर्थः।तस्मिन्नाश्रीयमाणेलि
गांतरेणसंबंधोनस्यात्।तस्मात्स्वसिद्धांतव्यवस्थाश्रीयते
स्थासभवतीतिदिवाव्यंब्राह्मणीपदार्थःइयंब्राह्मणव्यक्तिरिदंब्राह्मणवस्तुब्राह्मणीदाराइत्यादिव्यवहारानुपपत्तेरित्याशयात्।सिद्धांतवा
दीतिआकृतिवादीत्यर्थः।स्तनकेशादिति।केशोभगंलिंगांतरेणेतितिब्राह्मणीदाराइत्यादौद्रव्यद्वाराजातेर्लिंगांतरेणयोगोनस्यात्तदस्त
दीत्यादौचकस्यापिलिंगस्ययोगोनस्यादितिभावः।शब्दविशेषापेक्षयातुजातेराविष्टलिंगत्वोक्तिरितितात्पर्यं॥

कै०वि० १९

भाष्ये कृतांतः सिद्धांतः किमिति। संस्त्यानप्रसवशब्दयोः कोर्थ इति प्रश्नः उत्तरं संस्थानेति। संस्थाने भिधेये स्त्यापतेर्ड्ट् प्रत्ययां तः
स्त्रीशब्द इत्यर्थः सूते: सप्रसकारस्य पकार इत्यर्थः प्रसवे भिधेये पुमानिति शब्दः गर्भः श्रुतं स्त्यायति शोणितेन संधीभवतीत्यर्थः
सूते शुक्रं त्यजति योनिरूपे आधारे स्थानं मपचयः प्रवृत्तिः वृद्धिः शब्देत्यादि। इदमुपलक्षणं सत्वादिकार्यमात्रस्येति बोध्यमुप
लक्षणत्वं ध्वनयन्नुक्तयोर्व्याप्तिमाह सर्वाश्चेति। सूत्रीयः पदार्थाः एवमात्मिका इत्यस्य विवरणं संस्त्यानेत्यादि गंधवत्य इत्यंतं। पृथि
व्यपेक्षया प्सु अल्पेऽप्सु पृथिवीभ्यां तेजसि अल्पे इत्यल्पीयांसः। तत्र इत्युपलक्षणं वायोरूपाभावात्। आकाशे स्पर्शस्याप्यभावे
न वस्तुतस्तेजोवन्न रूपाणां सर्वमूर्तीनां त्रिवृत्करणमात्राभिप्रायेणेदमुक्तं बाधाकाशशब्दवाच्ययोर्लिंगव्यवहारस्तु इश्वर इवत्त्व

गुणानां सत्वरजस्तमः परिणामरूपाणां शब्दादीनां वृद्धिह्रासमध्यस्थावस्थः शब्दैकगोचराः लिंगत्वेन परिगृह्यंते
आत्मनस्त्वपरिणामरूपत्वात् प्रवृत्तिधर्मत्वेप्यप्रवृत्त्यनुयायित्वाल्लिंगयोगः॥

कार्यते जो वन्नगतोपचयापचयाशेषेणेति बोध्यं प्रवृत्तिः स्वल्पपीति परिणाम इत्यर्थः प्रतिक्षणपरिणामित्वाद्भूतानां नहीनि
अस्था वतिष्ठत इत्यनेनान्वयः किंतु परिणामं तएवेति शेषः तत्त्वोभयमिति। बध्यपचस्वरूपमित्यर्थः सर्वत्रेति पदार्थे इत्यर्थः
सर्वदेत्यपि बोध्यं कैयटे गुणानामिति शब्दस्पर्शादीनामित्युपलक्षणं सत्वकार्यमात्रस्य। अन्यथा शब्दे लिंगविवाहाशेनस्यानूतासां लिं
गत्वे प्रमाणं दर्शयति। शब्दैकेति शब्दजन्यबोधविषया इत्यर्थः अप्रवृत्तिधर्मत्वेपि स्वतो लिंगरहितत्वेपि। अन्यप्रवृत्त्यनुयायित्वा
दिति। परिणामवदन्यदात्माध्यासेन तत्परिणामानुयायित्वादित्यर्थः। एवं च प्रकृतिपरिणामविशेषरूपजातेः स्वत एव लिंगयोग इति तात्पर्यं शि०रा० १२५ ४५७

भाष्ये कथं तस्येति। असंकर इति शेषः। ननु शब्दनित्यतायां वाचनिकानीत्ययुक्तमत आह संकीर्णेति भावः। अभिधेयत्वे
प्युपसर्जनत्वात्कथं तत्कृत उपकारोत आह तत्र यथेभाष्ये द्रव्यं गणं भूतमिति अस्योपपत्तिरुक्ता जात्याख्यायामिति सूत्रे। साध
नसंख्याकृत इति साधनसंख्याशेषकृत इत्यर्थः इत्यदोष इति। एवं च लिंगयोगः स्वत एवः संख्यायोगस्त्वाशेषेण एकाआकृति

वाचनिकानीति। संकीर्णप्रयोगोपलंभात असंकरार्थो यदा द्रव्यपदार्थिकस्य वाचनिको वचननियमः
तदाकृतिवादिनोपि सद्भेवं व्याचष्टे। एकाश्रयसंबंधविवक्षायामाकृतेरेकवचनं यथा पशुना यजेतेति
अनेकाश्रयसंबंधविवक्षायां द्विवचनबहुवचने। ननु द्रव्यस्यानभिधेयत्वात्कथं तत्कृत आकृतेर्वचनो
पकार इत्याह नहीनि। तत्र यथा पचती पचतः पचंतीति क्रियाप्राधान्येपि साधनसंख्याकृतो वचनभे
दः एवमाकृतिप्राधान्येपि द्रव्यसंख्याकृत इत्यशेषः॥

रिति प्रतिज्ञाच्चानारोपितसंख्याभिप्रायान्नाष्येकशेषारंभः अनेकशब्दप्रयोगमानाभावादिति तात्पर्यं। अत्र भाष्ये द्रव्यपदार्थ
वादे आकृतेर्विशेषणत्वोक्त्या तज्जात्यनुवृत्तीकृती कृतानेकव्यक्तिबोधस्यैकस्मादेव शब्दात्संभवेन नाशब्दप्रयोगाभावात्तत्प्रसे
व्यकशेषेन कार्य इति सूचितं जातिवादे व्यक्तिर्द्रव्यवादे जातिः शक्यतावच्छेदिकेति च सूचितं॥

ननुगुणवचनानामित्यादिवचनात्तत्रास्तुतथाइहतुअजातिरितिनिषेधात्कथंतत्रवृत्तिरत आहजातितद्वतोरितिन
त्वत्रतद्वचनप्राप्तिःअतएवगुणवचनवदितिभाष्येउक्तमितिभावः यद्यपिजातेराश्रयेतोनलिंगादीतिविशेषणानां
चेत्यत्रोक्तंतथापिविशेष्यगतलिंगादिनिषेधःसःतत्राश्रयपदेनविशिष्यग्रहणात् इहत्वाश्रयपदेनाध्यारोपस्तत
इतिनविरोधइतिभावः अत्रचाभेदएववीजं योपदभेदमापन्नःसस्वाभिन्नाश्रयगतलिंगवचनादिग्राहीतिवचना

यस्माविति। जातितद्वतोभेदाध्यवसायात्तद्व्यात्माजातिःप्रती
यमानाहृतलिंगसंख्याग्राहिणीत्यर्थः॥ ॥ ॥ ॥श्री

नद्यांस्तविशेषःशुक्लादिशब्दवाच्यगुणानांगुणिनाभेदविवक्षे। शब्दवाच्यजातेस्त्वभेदविवक्षैवेतिपरेतुतयो
रभेदमाश्रयग्रंथयोजनेतदभेदादेवारंभणादीन्यपितत्रभविष्यंतीत्यतोधिकरणगतिरितिसूत्रग्रंथानुत्थानम्
तोगुणवचनानांविशेष्यगतलिंगादिग्राहित्ववत्जातेराश्रयगतलिंगादिग्राहित्वंस्वभावादितिएतद्भाष्यार्थम् हु: शि०श० ८० ४५८

भाष्येआकृताविति। प्रधानभूतायामित्यादि। आकृतिरेवतत्रान्वयबोधेप्रधानंक्रियातुपात्रेइवद्रव्येइतिभावः। शाब्दबोधे
तुनबाधज्ञानंप्रतिबंधकमिति। नतदनुपपत्तिः। सर्वएवेतिगौरानीयतामित्यादिरपीत्यर्थः। भाष्येआरंभणंकयःआल
भनस्पर्शः। आकृतिसहचरितेइति। आकृत्याश्रयेइत्यर्थः इतीदृशदिति। स्वभावाद्धेतुरहितदृष्टांतेनाप्यनेकवृत्तित्वं
जातेरभ्युपगम्यतेइत्यर्थः। नन्वेवंनेकव्यक्तिवृत्तीतिसामान्यलक्षणविरुद्धमेतत्। अतआह। यथेति। द्रव्याधीनस्थि

चोदनुसुचतस्यारंभादितियदुक्तंतत्परिहारार्थमाहअधिकरणगतिरिति। यथाग्निरानीयतामितीत्यु =
क्तेकेवलस्याग्नेरानयनासंभवान्नांतरीयकत्वात् अचोदितमपिपात्रमानीयतेएवतद्वाग्नेरानयनंप्र =
त्यात्रस्थस्यतथाकृतावारंभणादीनिचोद्यमानानिसामर्थ्यात्तत्साहचर्यात्तद्द्रव्यमभिनिविशंतेसर्वेप
वाकृतेःक्रियायोगोंतर्भावितद्रव्याद्एवेतिद्रव्यद्वारकःसंपद्यते। अनाश्रितत्वादिति। यथागुणानांद्रव्या
धीनस्थितित्वादाश्रितत्वंनैवमाकृतेः। अन्यत्रापिप्रत्ययाभिधानयोराकृतिनिमित्तयोर्भावान्नित्यत्वंतस्याः

तिकत्वमाश्रितत्वंविवक्षितमित्यर्थः अन्यथापीतिकर्मणशाकुल्यनधीनस्थितिकत्वाप्याकाशस्यतदवछिन्नत
याश्रोत्ररूपत्ववतद्द्रव्यमताश्रितस्यापिमहासामान्यस्यनित्यस्यगवादिद्रव्यपरिछिन्नतयागोत्वादिरूपतेत्यर्थः। अ
न्यत्रापितीक्वचित्पाठःतत्रव्यक्तंतरेत्यर्थः प्रत्ययोज्ञानम् अभिधानंशब्दः॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारकम्

कौ॰वि॰ पूर्वोक्तिएवेति।अन्याश्रितत्वादित्येवएवेत्यर्थः।भेदादितिनित्यमेकमनेकव्यक्तिवृत्तिसामान्यंतद्विपरीतंद्रव्यमि
८१ तिभेदइत्यर्थः।अनेकात्मत्वादित्यस्यभिन्नस्वभावत्वादित्यर्थइतिभावः।ननुविमहत्त्वेद्वंद्वापत्तिरतउक्तंसमुच्च
योपपत्येति।तत्रतुसहविवक्षाभावान्नद्वंद्वइतिभावः।सहविवक्षायांतुनतथाप्रयोगेनभिधानादितिबोध्यम्।इ

इतरःसंबंधमात्रमाश्रितत्वंस्यैवमाकृतेर्व्योमत्वात्पृच्छतिकिमुच्यतइति।अनेकात्मत्वादिति।पूर्वोक्तिए
वार्थोविशिष्यानेनप्रतिपाद्यते।नित्यात्वाकृतिरेकासर्वत्रगातद्विपरीतंद्रव्यमितिभेदात्तद्द्रव्यविना
शेपिनजातेर्विनाशः।गुणानांतुद्रव्याधीनस्थित्युत्पत्तित्वादाश्रयनाशोऽवश्यनाशइतिनतैर्व्यभिचारः॥
वस्तुवैस्थ्योत्तानइतियथावस्तुस्योपरिशाखादिस्तत्तावतानःस्थितोनवस्तुविनाशमनुविनश्यतितथा
जातिरपीत्यर्थः।वैरूप्यविनहाविति।द्रव्याणांस्वगतभेदइवतिवद्यौवैरूप्यविनहावित्यर्थः।तत्रद्र
व्यगतभेदोपचारादेकस्यामव्याकृतौसमुच्चयोपपत्याविनहौनविरुध्यते।क्रियासामान्यादिति।भिन्ना
सुक्रियासुअभिन्नप्रत्ययाभिधाननिमित्तंयत्सामान्यंतेनैवद्रव्येष्वपितन्निमित्तंभवति॥ ॥ ॥

व्यगतलिंगादिनाहित्ववत्स्वगतभेदनाहित्वमपितस्यादितिबोध्यंभिन्नास्विति।आश्रयभेदात्कर्मभेदाच्चेत्यर्थः।तदेवेति त्रि॰शा॰
समवेतसमवायेनेत्यर्थः।आश्रयांतर्गतं।पाकक्रियागतं।सामान्यं।पाकत्वादि॥ ॥ ८१
४५१

परंपरयोपकर्तृत्वेदृष्टांतमाहयथेति।एवंवव्यात्वादिगतसामान्यस्यपरंपरयाद्रव्येसत्वेनतत्तज्जातिविशिष्टस्यद्रव्यस्यवा
च्यत्वमितिभावः।नचैवंनानार्थोच्छेदः।नानाजातीनांसंबंधघटकत्वेननानार्थत्वोपपत्तेः।तत्तत्क्रियात्वसामान्यसमनि
यतस्यात्तत्वादेर्जातिरूपस्यासपदार्थत्रयसाधारणस्याविशक्यतावच्छेदकत्वशक्यत्वान्यतरांगीकारात्सिद्धमिति
भाव्यार्थः।मन्येस्त्वारंभेवीरमावश्यकंएकरूपेणैवसर्वार्थबोधादितिभावइतिबोध्यं।नन्विदानींतनमाषस्यषोडशाभा

यथावाचकइत्याश्रयांतरगतमपिहिसामान्यंसमवेतसमवायात्द्रव्येउपकरोतियथागौरिकादिगतंलौहित्यं
संयुक्तसमवायात्पटेलोहितप्रत्ययमादधाति।पुराकल्पइति।पुराकल्पेप्रसिद्धोर्थः।संप्रतिनिमित्ताभावेपि
तथैवव्यपदिश्यते।माषसंख्यइति।तत्रषोडशभागत्वेनमाषःप्रसिद्धः।तथैवकार्षापणेमाषःषोडशत्वंना
मसान्येमाषुपादत्तेमाशब्दइतिसिद्धमेकशब्दत्वं॥ ॥

गत्वाभावात्कथंसंख्यासामान्यमतआहपुरेतिव्यपदिश्यतेइतिबोध्यं॥आरोपादितिभावः।माषसंवधांमासःषोडशाभा
वात्कथंसंख्यासामान्यगपलरूपःकार्षापणेमाषःपंचगुंजामिति।षोडशोभागःतथोःषोडषभागत्वेनसामान्येनसर्वेषुमा
षत्वव्यवहारइतिभावःननुसंख्या॥

कौ॰वि॰
८१

ननु संख्यागतं सामान्यं संख्याशब्दप्रवृत्तावेव कारणमत आह संख्येवेति। तत्संख्येति संख्याम्लानकत्वात् इत्यर्थः। अभिन्नप्रत्ययएकाकारप्रत्ययः अभिधानं शब्दप्रयोगः परीक्षत्वेति इदंबुद्धिविषयतावच्छेदकावच्छिन्नत्वादिनामुपलक्षणं

संख्यासामान्यादिति। संख्येव सामान्यमभिन्नप्रत्ययहेतुत्वात्। ननु षोडषसंख्या षोडशपदार्थेषु व्यासज्यस्थितानत्वेकस्मिन्षोडशे। एवं तर्हि षोडशसंख्यापूरणत्वं नाम यत्सामान्यं तत्संख्यामूलत्वात्संख्यासामान्यमुच्यत इत्यदोषः। अथडित्वादिति भिन्नेषु संज्ञिषेकाकृत्ययोगात्कथमेकशब्दवाच्यत्वं। उच्यते। भिन्नडित्वशब्दगतं डित्वशब्दत्वं नाम यथाशब्देष्वभिन्नप्रत्ययाभिधानहेतुः तथा सोयमिति शब्दार्थयोरभेदाध्यवसायादध्यस्तडित्थत्वे षु संज्ञिष्वपि संवंधादभिन्नप्रत्ययाभिधाननिमित्तमिति सिद्धमेकशब्दवाच्यत्वं तथा ताविव्येताविति चपरीक्षत्वप्रत्ययत्वादिकं सामान्यमाश्रयणीयं। गोत्वाश्वत्वे सामान्ये इति व्यावृत्तेष्वनुवृत्तप्रत्ययहेतुत्वं सामान्यानामपि सामान्यमाश्रियितव्यम्। अथवाति: सामान्यानि सामान्यानीति तार्किकशीर्देः रक्ष्यमिंनवैयाकरणैर्नियोगत आस्थेयं। कार्याण्तीयमानाहितेवांपदार्थाइति सामान्येष्वपि सामान्यमस्ति। अभावाश्चत्वार इत्यत्रापि निरुपाख्यत्वं सामान्यं कल्पनीयं तदेवं स

मैथिका: वैशेषिकादय: निरुपाख्यत्वं। विशिष्यनिर्वक्तुमशक्यत्वं तत्समनियतो जातिविशेषो भावत्वमेव सर्वत्रेत्यन्ये।

शि॰श॰
८१
४६०

वक्ष्यमाणा अजबर्करादीनां वृद्धयुवसंज्ञकत्वाभावादाहउभयेति। अथवेति। स्वशास्त्रीयवृद्धसंज्ञकं तु नाटह्यते व्याख्यानादिति बोध्यं सामान्यविशेषवाचिनां सहविवक्षाभावाद्द्वंद्वाभावेन तद्रूपवादेकशेषस्याप्यप्राप्तेराह अजो

वद्धो। इहकस्मादिति उभयगतरिह शास्त्रे संभवतीति मत्वा प्रश्नः। अथवा वृद्धशब्द इह शास्त्रे अपत्यविशेषेण परिभाषित इति मत्वा तावद्भ्योवाची गृह्यते तत्साहचर्यात्युवशब्दोपितथैवेप्रश्नः। अथवा वृद्धशब्द इहशास्त्रे) अजोष्ट्राश्वशब्दानां जातिशब्दत्वेप्यत्र शब्दांतरसंनिधानात् वृद्धावस्थाभिधायित्वं द्रष्टव्यं। अन्यथा सामान्यविशेषशब्दानां द्वंद्वो न स्यात्। सामान्यशब्देन सर्वविशेषाणामाक्षेपात् विशेषैः सहसमुच्चयाभावात्। वक्ष्यमाणं मनसि कृत्वाह। तल्लक्षणश्चेदिति। इतरो गृहीताभिप्रायआह। तल्लक्षण इति। परिहारस्तूत्तरत्र वक्ष्यते॥

द्वितीयद्यविकरभकिशोरशावेशावकवचनै तथापि भाष्यप्रामाण्यात्तरुणवचनो वोध्यो बर्करस्तरुणोजः समुच्चयाभावादिति। सहविवक्षाभावादित्यर्थः वक्ष्यमाणं यथा त्रोर्ध्वप्रकृतेरित्यादि। उत्तरत्र। भ्रातृपुत्राविन्यत्र

कौ०वि ८३ स्त्रीपुंवदावाप्यवादीतिक्तिनादीनां तु न ग्रहणं वक्ष्यमाणेत्यधिकारात् अत्र पदे पुंवदिति सामर्थ्याद्भावाविदेशः श
ब्देतिस्वरूपार्थवृत्तिशब्देत्यर्थः वक्ष्यते विशेषणसामर्थ्यात्स्वरूपग्रहणं नेति भावः शेषइति। यञिञोश्चेत्यत्रास्त्रि

स्त्रीपुंवच्च। इदमिति। यदि स्त्रीशब्दस्य स्वरितत्वं प्रतिज्ञायते तदास्त्र्यधिकारविहितटाबादिप्रत्य
यग्रहणं। ततश्चायमर्थः पुंवत् स्त्रीप्रत्ययो न भवतीत्यभावातिदेशः क्रियते। स्वरितत्वाभावे तु
शब्दग्रहणमर्थग्रहणं वा तत्र शब्दग्रहणपक्षे स्त्रीशब्दस्य पुंशब्दस्येव रूपं भवतीति स्त्रीत्वम
निवृत्तमेव। अर्थग्रहणपक्षे तु पुमर्थातिदेशे तदर्थप्रतिबद्धानां कार्याणां सिद्धिः। तत्रार्थस्य प्रा
धान्याद्दृष्टत्वाच्चार्थपक्षाश्रयणे अस्त्रियामितीति पर्युदासप्रसज्यप्रतिषेधः तदा दोषः। पर्यु
दासे तु श्रिष्यमाणः शब्दो निवर्त्यमानार्थाभिधायीत्यस्ति स्त्रीसदृशोऽर्थ इति लुक् सिध्यति॥
गार्ग्यात्रेयेति। स्त्रीत्वस्यानिवृत्तौ नायं पुंसि बहुत्वे समुत्पन्न इति नत्वं न सिध्यति॥

यामित्यनुवृत्तेः पर्युदासे विति सर्वं वाक्यं सावधारणमिति न्यायेनास्त्रियामेव वर्तमानस्येत्यर्थात् पर्युपि दोषइ शि०शा० ८३
त्यतेपुंबहुत्वे इति पुंमात्रगतबहुत्वेत्यर्थः॥ ४६१

भ्रातृपुत्रौ यत्रैके तिसमानेत्यर्थः अन्यत्वेति अन्यकृतमित्यर्थः वैरूप्यमिति बाहुल्यार्थे ष्यञ् इत्येतद्वर्जयित्वेति। भ्रातृपुत्रौ
पिता मात्रा श्वशुरः श्वश्र्वा इत्येतेषां ज्ञापकत्वात् नपुंसकमनपुंसकेनेत्यत्र तदनुवृत्तेश्च त्यदादीनीत्यस्यैव वर्जनमुक्तं
तत्र हि सर्वग्रहणसामर्थ्यात् तन्निवृत्तिरिति भावः ननु स्त्रीगोव्यक्तिपुंगोव्यक्तिवाचकयोर्गौश्च गौश्चेत्येकशेषो वा नापत्ति
स्तल्लक्षणविशेषाभावात्। अत आह। यदांतरगम्येति। तल्लक्षणविशेष इति स्त्रीत्वपुंस्त्वरूपविशेष इत्यर्थः। ए
तौ गावाविति। तल्लक्षणेत्यस्य तद्रूपइत्येवार्थः। ऊर्ध्वमित्यादेश्च प्रकृत्यतिरिक्तशब्दकृत एव चेत्तद्रूपो विशेष इ

भ्रातृ। यत्समानायामिति। एकापत्यत्वं नाम समानाकृतिरस्ति। ऊढमिति। यत्रैकाप्रत्ययप्रकृतिरन्यत्तु वैरूप्यं
तत्रैकशेष इत्यर्थः। त्यदादीनि सर्वैर्नित्यमित्येतद्वर्जयित्वा सर्वं चसरूपाणामित्यस्यानुवृत्त्याश्रयणात् य
थोक्तार्थलाभः। अत्रैवार्थे एतत्सूत्रं लिंगं परांतरगम्येपि तल्लक्षणो विशेषे पुमान् स्त्रियेत्येकशेषो भवति। य
थागोश्चेयमित्येतौ गावौ चरतः इति

त्यर्थः सूत्रे व्येवेत्यस्य प्रकृत्यतिरिक्तकृत इत्यादि। प्रकृत्यरितिकृत एव तद्रूपो विशेषश्चेदित्यन्वयः। तद्रूप इत्यस्य
वृद्धयुवत्वरूपः स्त्रीत्वपुंस्त्वरूप इत्यर्थः प्रकृतिश्चात्र स्त्रीत्वाद्यर्थकप्रत्ययस्यादर्शने इति बोध्यम्। न च इंद्रेंद्राण्यावित्या
दावव्याप्तिः शार्ङ्गरवेति। अनुक्तः प्रकृत्यवयवत्वेन तत्कृताव्यत्र स्त्रीत्वप्रतीतिरिति न दोषः एवं हि पत्नी वृद्धमिति भाष्ये। एवो
ऽस्थानेऽभवति भक्तारस्वारस्यं बनैतिरूर्ध्वप्रकृतेर्विशेषश्चेत्तल्लक्षण एवेत्यन्वयेन तदितरकृतविशेषविरहरूपे विशिष्टा
भावे तात्पर्यान्न दोषः स चेह विशेष्याभावादस्त्येवेत्यन्ये

कै०वि०
८७

भाष्ये असरूपाणामिति। अनेनोक्तत्रिसूत्र्यां प्रत्याचष्टे गार्ग्यपत्यत्वमिति। गोत्रयुवसाधारणं अपत्यत्वेनैव गोत्रादिप्रत्यये भ्यो वे
धात् युवत्वादिविशेषानादरेण गार्ग्यश्च गार्ग्यश्चेति गोत्रशब्दयोरेव सरूपैकशेषेण सिद्धमित्यर्थः। नन्वेवमन्यतरस्य युवत्वं न प्र
तीयेतेत्यत आह। आरभ्यमाणेऽपीति। नार्थ इति। वृद्धो यूनेत्यादिनेत्यर्थः। ननु प्रकरणाद्यनपेक्ष्य युवत्वादिप्रतिपादने पि

वत्साचेति। वत्साहंसी। पूर्वसूत्र इति। पूर्वाचार्यकृते व्याकरणे अपत्यमंतर्हितं वृद्धमिति पौत्रप्रभृतेरप
त्यस्य वृद्धसंज्ञा कृता। वृद्धो यूनेत्यत्र च कृत्रिमस्य जीवति तु वंश्ये युवेत्यस्य ग्रहणं तत्साहचर्यात्तव
द्धस्याप्यपत्यस्य ग्रहणमित्यर्थः। असरूपाणामिति। गार्ग्यपत्यत्वं सामान्यं वृद्धयूनोर्विवक्षितमिति सि
द्धमेकशब्दत्वं। आरभ्यमाणेऽप्येकशेषे गार्ग्यावितिविशेषो नावधार्यते किं वृद्धयुवानौ प्रक्रांतौ उत वृद्धा
विति। प्रकरणाद्यपेक्षेतु विशेषावसाये सामान्योपक्रमेऽपि तथैव विशेषोऽवसायिष्यत इति नार्थ एक
शेषारंभेण द्वंद्वोपि गार्ग्यगार्ग्यायणाविवत्यनभिधानान्न भविष्यति। स्त्रीपुंसयोरविवक्षणे एव जातिमात्र वि
वक्षायां ब्राह्मणावित्यादिप्रयोगसिद्धिः॥

यां द्वंद्वः स्यादत आह द्वंद्वोपीति। सहविवक्षायां द्वयोः प्रयोगाभाव एवानभिधानादिति भावः। ननु स्त्र्यभिधाननिमित्त
स्त्रीप्रत्ययनिवृत्तये पुमान् स्त्रियेत्यावश्यकमत आह स्त्रीति॥ शि०श०
८७

४६२

इदानीं पुमान् स्त्रियेत्यस्य सार्थक्यं शंकते भाष्ये पुमान् स्त्रियेहेति उक्तरीत्या त्रैकशेषस्य साधयितुमशक्यत्वादेतदर्थमेवतत्सूत्रं
कस्मान्न भवतीति प्रश्नः कृते विरूपत्वेन प्राप्नोतीत्युत्तरं तत्र प्रश्नमुपपादयति। असत्यत्र प्रकृतेरैतिर्वा लक्षणरूपाभावात्सरूपा याश्चे
त्यर्थः विशेषः प्रधानत्वरूपः एकशेषनिमित्तेति। सारूप्योपलक्षणमेवात्र निमित्तत्वं। लिंगस्य अविभक्तिपरस्येति भाष्ये पाठ लिंग
स्य लिंगबोधकप्रत्ययस्य। कैयटे ष्यविभक्तिपरस्येति प्रतीकग्रहणं तद्ध्वनयन्भाष्ये आह यत्र लिंगं विभक्तिपरमेवेति नात्र लिं

पुमान् स्त्रिया ब्राह्मणवत्स चेति। अस्त्यत्र प्रकृतेरूर्ध्वं तल्लक्षणो विशेषः। न चात्र कश्चिद्विशेषः। स्त्रीपुंसयोरूपास्त:
विभक्तिपरस्येति। एकविभक्ताविवत्यनुवर्त्तते। तेन एकशेषनिमित्ते विभक्तौ परतः यत्र स्त्रीपुंसकृतो विशेषस्तत्रैकशे
षः इह तु तस्यां चांतर्वर्त्तिन्यां विभक्तावित्येकशेषाभावः। काशिका चेति। इत्वमस्य विशेषस्य वाचकं तच्चनैकशेष
निमित्ते विभक्तौ परतोऽनंतरमिति दोषः। एतत्समाधानार्थं विचारयति। कथमिति अर्थस्त्रियाः शब्दकारकं विभक्ति

गं विभक्तिपरस्येति प्रतीकग्रहणं तद्ध्वनयन्भाष्ये आह यत्र लिंगमेवेति च अत एवानेकशेषेसाध्ये हेतोः प्रसक्तित्वं अयमस्य सू
त्रस्यार्थः यत्र प्रकृत्यरितित्तौ एकशेषनिमित्तविभक्तिपरत्वाद्गम्यप्रवस्त्रीत्वरूपो विशेषस्तत्रैकशेषो विभक्तौ सरूपाणामिति
विभक्तौ सारूप्यं च लिंगबोधकातिरिक्तकृतमेव सामर्थ्याद्बोध्यं स्त्रीपुंसकृत इति स्त्रीपुंसबोधकशब्दकृतस्तद्गम्यो विशेषः
स्त्रीत्वादिरूप इत्यर्थः इत्वमर्थस्येति सति तस्मिन् स्त्रीत्वप्रतीतेरित्यर्थः। भाष्ये लिंगं लिंगबोधकः शब्दः शब्दो या स्त्रीति। सामर्थ्यात्तल्ल
क्षण इत्यस्य तन्निमित्तक इत्यर्थः

कै०वि०
८५

अर्थस्त्रीपक्षेपिएवमेवतदर्थमन्यतेतदाह।नचतदिति।नात्रयदेरोशस्येति अर्थशान्तन्यतरस्त्रीकृतएवयत्रविशेषोनान्यकृ
तइत्यर्थइतिभावः।शब्दस्त्रीनिमित्तत्वेनेति।स्त्रीप्रत्ययत्वेनेत्यर्थः।नात्रेतियोगपक्षग्रहणेतुउभयनिमित्तकस्यक्वाप्यभावे
नस्त्रत्रासंगतिरेवस्यादितिभाष्येवः।भाष्ये०शब्दार्थौवास्त्रीतिः।साआश्रीयतेइतिशेषः।नन्वेवमपियद्वइतिनसिध्यति

कारिकाचेति।शब्दस्त्रियाटापात्रकृतमित्वमितिसिध्यतिनार्थपक्षे।यद्यप्यर्थेनियप्कृतःतथाप्यधिकमित्व
मस्ति।नचतदर्थस्त्रीकृतमितिदोषः।गोमतीचेति।नात्रशब्दस्त्रियाकश्चिद्विशेषःकृतः।अर्थपक्षेत्वत्रसि
ध्यतिअर्थेनेकारस्यविशेषस्यकृतत्वात्।पट्वीचेति।नात्रयणादेशस्यलक्षणावाक्येशब्दस्त्रीनिमित्तत्वेनो
पात्ताज्ञ्रूपताश्रयणेनयणादेशविधानात्नचतदभावेभवतितस्त्रिनिमित्तत्वंनाप्यर्थस्त्रीयणादेशस्यनिमि
त्तमितिदोषः।शब्दार्थविति।नात्रयोगपक्षेनोभयोर्ग्रहणं।अनियमस्त्वनेनप्रदर्श्यते।तेनक्वचिच्छब्दस्त्रीकृत
विशेषपरिग्रहः।क्वचिदर्थस्त्रीकृतविशेषाश्रयणं।पट्वीत्यत्रचभवतीकारीययणादेशस्यनिमित्तमस्मिन्विषये
तद्भावभावित्वादर्थोविपारंपर्येणभवत्येवनिमित्तमीत्वयणादेशयोःएवंतर्हीति।विस्पष्टंनस्यपदिशतीत्य
त्रर्थः।सूत्रोपात्तएवायमर्थःएनात्रनभवति।एकशेषइत्याह।तदित्यनेनेति।स्त्रीपुंसयोःसहविवक्षायामेकशे
षः।सचप्रधानयोरेवभवतीति।यत्रप्रधानस्त्रीपुंसकृतोविशेषस्तत्रैकशेषः।इहाप्रधानकृतोपीत्येकशेषाभा वः

तत्राहसद्भावेनचेतितद्व्याचष्टेतद्भावेभावित्वादितिभाष्येएवंचकृत्वेति।अत्रार्थस्त्रीकृतएवविशेषइतिभावःएवंत
र्हीतिस्त्रीस्वार्थस्यविभक्तिपरत्वंतुमशक्यमितिभावःप्रधानस्त्रीपुंसकृतइतितत्कृतएवेत्यर्थः॥ ॥ ॥श्री॥

शि०शा०
८५
४६३

DR. BHAU DAJI MEMORIAL

नपुंसकमपायायिरणेति।इदंचित्यं।शुक्लनीत्यादौनपुंसकेप्रातिपदिकवैरूप्यात्।तस्मादप्राप्तिविधिरयमित्येववक्तुमुचितं।
प्रधानेकार्यसंप्रत्ययादित्यस्यकार्यस्यैकशेषस्यैकानस्थानरूपस्यप्रधानेनपुंसकेसंप्रत्ययात्तस्यैवशेषइतिनार्थः।योगप्रत्या
ख्यानेहेतुत्वानुपपत्तेरतआहशब्देनेति।नपुंसकस्यैवेतिप्रधानन्यायेनेत्यादिः।प्रधानन्यायेननपुंसकत्वविशिष्टेनैवस्त्रीपुं

नपुंस।शुक्लाचशुक्लंचेत्येकविभक्तौविभक्त्यंतानांचवैरूप्यादेकशेषोनप्राप्नोतिशुक्लश्चशुक्लंचेत्यत्रापि
विविभक्त्यंतानामसारूप्यात्।एकविभक्तौतुसरूपाणामेकशेषेपुंनपुंसकयोःपर्यायेणप्राप्नोतीवचन
मिदमेकवद्भावार्थंच।प्रधानेकार्यसंप्रत्ययादिति।शब्देनार्थस्याभिधानमिहकार्यं।तत्रचनपुंसकानपुंस
कसंनिधौनपुंसकस्यैवभविष्यतीतिनार्थःसूत्रेणेत्यर्थः।कथमिति।यथालोकेबहुषुगच्छत्सुराजा
गच्छतीतिप्रधानंराजाव्यपदिश्यतेराज्ञश्चप्राधान्यंतदधीनप्रवृत्तिनिवृत्तित्वादन्येषांइहतुनपुंसकस्य
किंकृतंप्राधान्यमितिप्रश्नः।एवंहिलोकेदृश्यतइतिव्यापित्वात्नपुंसकस्यप्राधान्यमाह।स्थिते
तिनपुंसकंसाचसर्वत्रविद्यतइतिस्थितिरूपत्वेनेनस्त्रीपुंसयोरविवक्षायांसिद्धोनपुंसकशब्द
प्रयोगः।अनिर्ज्ञातेर्थइति।सामान्यरूपेणज्ञातेस्त्रीत्वादिनातुविशेषेणानिर्ज्ञातइत्यर्थः।गुणसंदेहइ

त्यर्थस्याविवृतीतिरितिभावःसाचेतिवृद्धिह्रासयोस्थितेरपिसत्वादितिभावःनन्वनिर्ज्ञातेकथंप्रश्नोनआहसामान्यरूपे
णेतिभाष्ये।निर्ज्ञातेर्थेगुणसंदेहेचेतिगुणसंदेहस्थलकेऽनिर्ज्ञातार्थविषयेप्रश्नवाक्येइत्यर्थः॥

कै० वि०
८६

शब्दैकगोचरत्वमिमिति तत्तच्छब्दमात्रबोध्योपचयादिरूपत्वमेवेत्यर्थः। ततश्च नपुंसकस्य प्रजननासमर्थस्यापि पुंस्त्वं तु
भवितीत्याति भाव इति विवरणकृतः स्त्री वा पुमान्वेत्यस्य स्त्रीशब्दवाच्यं पुंशब्दवाच्यं वेत्यर्थः। एतच्छाब्दस्य प्रायेणेत्यादित्यनेन
न त्वकेनेककोटिकस्यैव संदेहे वहस्य दृष्टत्वेन दृक्संदेहाकारोनुचितोत्र आह्वयद्दूरादिति। इत्यस्मिन्नर्थे इति। इवशब्दो
भिन्नक्रम इति भावः। दृष्टांतत्वेनेति स्त्रीविषयो रूपशब्दो नपुंसके स्त्रिया अंतर्भावे दृष्टांतत्वेनोपात्त इत्यर्थः। एवं च व्याप

इयं चेवेति। यद्यपि नपुंसकस्य जन्म तथापि यत्प्रजननासमर्थं तन्नपुंसकमिति नेह नपुंसकलक्षणं
किं तर्हि शब्दैकगोचरत्वमेव लिंगलक्षणं। तथा सति च नपुंसको भवतीति प्रयोग उपपद्यते। महि
षी रूपमिवेति। रूपशब्दः संस्थानवचनः। यत्र दूरात्दृश्यमाने वस्तुनि निश्चयो नास्ति केवलं संभा
वना रूपः संदेहस्तत्रैकस्यापि शब्दस्य प्रयोगो भवति स्थाणुरयं स्यादिति। एवमिहापि महिषीवैतत्सं
स्थानमित्यस्मिन्नर्थे महिषी रूपमिवेति प्रयुक्तं। रूपशब्दोत्र नपुंसकलिंगो दृष्टांतत्वेनोपात्तः। यत्र तु
विशेषस्य निर्ज्ञानं शुक्लाः शाद्यः शुक्लाः कंबला इति तत्र नास्ति नपुंसकप्रयोगः। सत्यारंभे अरण्या रण्या
वित्यत्रैवकारानुवर्त्तनान्महत्त्वस्या पाधेराधिक्यादेकशेषाभावः॥

कत्वेन नपुंसकस्य प्राधान्यात्तद्विवक्षायां नपुंसकप्रयोगः आधिक्यादिति यदि विशेषलक्षणं नपुंसकत्वस्त्रीत्वपुंस्त्वकृत एवेत्य
र्थ इति भावः। भाष्ये आकृतिवाचित्वादिति। यद्यप्याकृतौ स्वगतसंख्याविवक्षा तदैकवचनं यदाश्रयगतसंख्यारोपस्तदा वि
पि द्विवचनादीति बोध्यं एतेन सरूपसूत्रविषयेप्येकवचनांत प्रयोग इति बोध्यं॥

शि० शा०
८६
४६४

पिता मात्रा। भ्रात्रादीनां वैरूप्यात्भिन्नार्थत्वाच्चैकशेषाप्राप्तेः पुमान् स्त्रियेत्यत्रापि सरूपाणामित्यनुवृत्तेः प्रश्नानुपपत्तिमा
शंक्याह वक्तीति भाष्येन पुमान् स्त्रियेति सिद्धमिति। सरूपाणामित्यपेक्षया परत्वादयमेवन्यायोर्थ इति भावः स्वस्रादिष्वपी
ति। एकापत्यवाचेः प्रवृत्तिनिमित्तस्य सत्त्वात् इति भावः एवं च भ्राता च भ्रात्री चेति विग्रहे पुमान् स्त्रियेत्येव सिद्धमिति ता
त्पर्यं। भाष्ये उत्तरयति भ्रातृपुत्रेत्यादिना च शेषे भिन्नं प्रवृत्तिनिमित्तमिति एतदेव भाष्ये कारणशब्देनोक्तं पुंस्त्वविशिष्टमेते

पिता किमर्थमिति। वक्तिविषये भ्रात्रादिशब्दानां स्वस्रादिष्ववृत्तेरसिद्ध एकशेष इति मत्वा प्रश्नः
। कारणादिति भिन्नं च प्रवृत्तिनिमित्तं भ्रातृशब्दस्य स्वसृशब्दस्य चेति। भ्रातृशब्देन स्वसुरभिधानं
न प्राप्नोति। एकशेषविषयमिति। आरब्धे एकशेषे ऽवश्यं भ्रातृशब्देन स्वसाभिधेया अन्यथैकशेषारंभो
नर्थकः स्यात्। एवमनारब्धेप्येकशेषे नित्यत्वाच्छब्दार्थस्य संबंधस्य सहविवक्षायामेव भ्रातृशब्दः स्वसुर
भिधायको भविष्यति। न ह्यविद्यमानसंबंधस्य शब्दस्य शक्तिः शास्त्रेण नियम्यते अनभिधानाच्च भ्रातृ
पुत्रशब्दयोः स्वसृदुहितृभ्यां द्वंद्वाभावः। मातापितरौ श्वश्रूश्वशुराविति द्वंद्व इष्यत एव॥ ॥श्री॥

कापत्यत्वं धातृशब्दस्य स्त्रीत्वविशिष्टं स्वसृशब्दस्येत्यर्थः तयोः सारूप्याभावात्पुमान् स्त्रियेत्यस्याप्राप्तिरिति भावः प्रत्या
ख्यानबाधाह इति वेतुल्येति आरंभबाधाह दर्शनं वै हेतुरिति। दर्शनं हेतुरिति चेतुल्यमिति। दर्शनहेतौ तत्स्यत्वाद
न्नापि दर्शनं स्यादित्यर्थः। शास्त्रारंभेणैव नियाठः नियम्यते। उत्पाद्यते। एवं च भ्रातृत्वपुत्रत्वपितृत्वश्वसुरत्वादीनां स्वसृदु
हितृमातृश्वश्रूधारो वैलोकशेषविषयेतत्स्वरूपेण स्वस्रादीनां बोध इति स्वरूपसूत्रादि प्रत्याख्यानेपि न दोष इति तत्त्वं
एवं प्रत्याख्याता त्रिसूत्रीति दिक्॥

त्यदादीनि व्याश्रय इति। त्यदादितदीन्नपदयोरेकशेषेण त्यदादिपक्षाश्रयणात् अत्रापि व्याश्रयसद्भावो ध्येयः शेषे त्यदादीनामित्यर्थः। पुंनपुंसकत इति। पुंनपुंसकयोरित्यर्थः सह विवक्षितपुंनपुंसकशेषेनेति भावः। पुंस्त्वमिति। वचनं त्वनिष्ठेयशेषेण सिद्धमिति प्रसंगोच्चारितो वचनशब्दः। शब्दपरेति। वार्त्तिके इति शेषः। ध्वनितं चेदं नपुंसकमनपुंसकेनेति सूत्रतत्त्वव्याख्यानभाष्याभ्यां। इदं वचनं त्यदादिभिः सजातीयविजातीयानां त्यदादीन्यां त्यदादिभिन्नानां च सहविवक्षायामेकशेषप्रवृत्तिविषयं। अन्तरङ्गत्वात् स्येनतथैव लाभात्। न चैवं गावश्वाश्वरंतीति उत्तरसूत्रस्थभाष्य

> त्यदादी। त्यदादित इति भाष्यव्याश्रय इति तसिः। आद्यादित्वाद्वा। सा चेति स्त्रीत्वे प्राप्ते पुंस्त्वं विधीयते। पुंनपुंसकयोस्त्वेकशेषशब्दपरविप्रतिषेधान्नपुंसकत्वं भवति। अद्वन्द्वतत्पुरुषविशेषणानामिति। न्यायसिद्धमिदं परवल्लिंगं द्वन्द्वतत्पुरुषयोरिति समासार्थस्य लिंगातिदेशात् तद्विशेषणस्यापि सर्वनाम्नस्तल्लिंगस्य सिद्धत्वात्। सामान्यमर्थ इति। वस्तुमात्रं त्यदादिभिः परामृश्यत इति तदेवेषामर्थः

प्रयोगे इमा इत्यनुपपन्नं स्यात्। निषेधवार्त्तिके द्वन्द्वपदे नैकशेषस्यापि ग्रहणात्। तल्लिंगस्य सिद्धत्वादिति। प्रधानतंत्रत्वात् गुणानां ननु नेह गवादिवत् सामान्यमर्थ इत्यत आह वस्तुमात्रमिति अविवक्षितस्त्रीत्वपुंस्त्वाद्यवान्तरविशेषणं परोक्षत्वाद्यनुगतीकृतं वस्तुमात्रमित्यर्थः एवं चैकेनैव तच्छब्देनोभयोः प्रतीतिः सिद्धेति एकशेषफलं सिद्धमित्यर्थः। लिंगमपि लोकत एव सिद्धं तच्च तात्पर्यतो निर्णेय इति भावः॥ ॥श्री॥ ॥रामजी॥

सति सूत्रे इति त्यदादीनीत्यनेनानुपूर्व्याविशेषयुक्तानां निर्देशात्। असति तु वचने निर्णायकस्य विप्रतिषेधस्य न प्रवृत्तिरिति भावः। एतन्मूलकमेव पश्यते त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यत इति। परस्य चेति भाष्ये। परस्येनेत्यर्थः आरंभवादिनापि परस्योभयथाचित्त्वमंगीकार्यमित्यर्थः। तद्देवतावितिति। अवान्तरधर्मविशेषविवक्षायां तस्याप्रसिद्धेरिति बोध्यं। भाष्ये उत्कालिताः निष्काशिताः पुरुषायेषित्यर्थः विनाशितपुंस्त्वा इत्यर्थं किंचित्। तन्न उत्तरसूत्रस्थपुंसउत्कालयितुमिति भाष्यासंगतेः किमर्थं पुंसां निःकाशनमत आह वाहायचेति प्रायेण बलीब

> परस्येति सति सूत्रे शब्दविप्रतिषेधः शब्दवचने आश्रयितुं। पूर्वशेषदर्शनाच्चेति। सति त्वारंभे पूर्वशेषो न स्यादिति दोषप्रसंगः। द्वन्द्व इति। तद्देवदत्तावित्यादिप्रयोगो माभूदित्यर्थः। आभीराः इति। ब्राह्मणमिति। तमित्यनेनेन्दुगन्तकन्यायामाभीरो नाम जायते। माहिष्यो नो प्रजायते विदूश्शूद्रगनयोर्निषादिस्मरति:

र्दा एव वाह्यन्ते विक्रीयन्ते च स्त्रिया एवेति। ततश्च गोशब्दस्य स्त्रीत्वसमानाधिकरणगोत्वं प्रवृत्तिनिमित्तं पुंस्त्वसमानाधिकरणं चेति नानार्थो गोशब्दः तत्राद्यः प्रसिद्धः अन्त्यस्तु क्वचिदेव। एवं च गोशब्दः स्त्रीगवीणामेव वाचकः प्रायेण क्वचिदेवेत्यर्थ गृहकवशेन युगवानां वाचको यथा एवनाश्वतुरोवलीवर्दान्यशेषेति प्रथमयोरिति सूत्रस्थभाष्यप्रयोगो बाहीक इत्यादौ चेति भावः एवं बलीवर्दसमभिव्याहारात् गोशब्दस्तदतिरिक्तपर इति कथाचित्याबाहाबर्थं निष्काषितपुरुषा एव गावः। गोपदव्याख्यानं तु तत्सहिता इत्यर्थाभिव्यस्य एतानाइत्कशरस्य हरणे बलीवर्दान् इति त्ववस्थाविशेषप्राप्तत्वबोधनामित्याहुः॥

कै० वि० ८८

ततश्चात्रेति अत्रोदाहरणे पुंतात्पर्यग्राहकरहितेइत्यर्थः भाष्यात्लोकाच्च गोशब्दव्यवहारः प्रायेण स्त्रीगवीष्वेवे
तिद्रष्टव्यंसमुच्चयइति।सह विवक्षेत्यर्थः।गतत्वादितिवक्तमात्रविवक्षयेत्यर्थः सामान्योपक्रमेइतिांन प्रथम
तएवविशेषावगमः।तथासतिसामान्यविशेषवाचिनोरुभयोःप्रयोगवैयर्थ्यंतस्मात्सामान्योपक्रमेवि

स्त्रिय एवेति।ततश्चात्रगोशब्दः स्त्रीगवीनामेववाचकः।सामान्येनेति।सामान्येसर्वविशे
षाणांव्याप्तत्वान्नास्तिसामान्यविशेषयोः समुच्चयइत्यर्थः।तंब्राह्मणमिति।तमित्यनेन
गतत्वाद्ब्राह्मणशब्दस्यप्रयोगोनप्राप्नोतिब्राह्मणमित्यनेनगतत्वाच्चगार्ग्यशब्दस्येतिभावः
भवतीति।सामान्योपक्रमेविशेषाभिधानमित्यर्थः।येनैवेति।यथासामान्यविशेष
योर्विशेषणविशेष्यभावोदृश्यते तथाविशेषसंनिधौ तद्वर्जितेषुविशेषांतरेषुसामान्य
शब्दवृत्तिर्दृश्यते।ब्राह्मणायातावसिष्ठोप्यायातइतितस्मात्तथाविधेयविषयेयंवाच
निकोद्वंद्वनिषेधः तस्मिंश्चसत्ययमेकशेषोनवक्तव्यइत्यर्थः॥ ॥छ॥ ॥श्री॥

शेषाभिधानमित्यर्थः ननुवाक्यविशेषणविशेष्यविषयंद्वंद्वस्तूभयपदार्थप्रधानविषयइतिकथमेतद् शि० शा० ८८
तआह।यथेति।धःप्राच्यभरतेष्वितितुल्गोत्रनिर्देशः प्रमाणप्रमेयेत्यादितुपर्वतेष्वरित्याऽसाध्वेवेत्याहुः ४६६

कै० वि० ८९

ग्राम्यपशुस्त्रीशब्देनेति॥अन्यथापुमान्स्त्रियेतिपुंसःशेषःस्यादित्यर्थः उभयेति संघस्येत्यादि वृषभस्यापीति सर्वेषा
मुत्कालनासंभवादितिभावः मिश्रत्वादिति॥तेषामुभयसाधारणजातिविशिष्टएवशक्तिरितिभावः॥ ७३॥इतिश्री

ग्राम्यस्त्रीपुंसात्मकस्यसंघस्यस्त्रीशब्देनाभिधानयथास्यादितिसूत्रारंभः उभयात्मकत्वमस्याग्रन्था
द्र अयमितिस्त्रिय एवेतियद्यपितत्रवृषभस्यापिसंभवः तथापिमल्लानासवत्भूयस्त्वात्स्त्रीभिर्व्यपदे
शोभवति अग्राम्यादिषुतुमिश्रत्वात्संघस्यपुमान्स्त्रियेतिपुंसःशेषः अनेकशफेष्वितितुश्वानांत्वार
दाप्यत्वात्स्त्रीशेषाभावः तत्रानेनप्रकरणेनप्रयोगस्यनियतत्वात्ततिः क्वचिदाश्रयलिंगेनस्त्रीत्वेनव्यपदि
श्यतेक्वचित्पुंस्त्वेनेत्यक्तंभवति॥ इतिउपाध्यायजय्यटपुत्रकृतेभाष्यप्रदीपेप्रथमस्याध्यायस्यद्विती
येपादेतृतीयमाह्निकं॥ ॥द्वितीयपादः॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्रीकृष्णायनमः

वभट्टसुतसतीगर्भजनागोजीभट्टकृतेभाष्यप्रदीपोद्योतेप्रथमस्यद्वितीयपादेतृतीयमाह्निकं॥ पादश्चसमाप्तः शि० शा० ८९

४६७

इतिप्रथमाध्यायस्यद्वितीयः पादः समाप्तः

अथप्रथमाध्यायस्यतृतीयपादप्रारंभः

कै॰वि॰ श्रीगणेशाय नमः ॥ भ्वादयो ॥ कस्मान्निमित्तादिति । फलमपि निमित्तं । अत एव मंगलार्थं इत्यत्र तंसंगच्छते । तत्रैव कारणप्रश्नश्च । अत एव यदिता वदिति भाष्ये
१ क्षिप्यः संगच्छते । ननु भ्वादयइत्युक्तेपि वकारस्य सत्वात्प्रश्नानुपपत्तिरत आह यत्तीति उकारो ग्रवकार विषयः प्रश्न इति भावः । असमाद्वा व्याप्त समासे वि सं
हिता विकल्प इति भ्रमं वारयति । अभ्युपगम्येति । नन्वेकस्मिन्निति । यद्यप्यत्र संहितानिसत्वे नैकपदत्वप्रयोजकं । संहितैकपदे नित्या धातूपसर्गयोः
नित्या समासे वाक्ये तु सा विवक्षामपेक्षत इति श्लोके समासग्रहणेनैकपदशब्देनाखंडपदस्यैव ग्रहणात । अत एवास्य अयङ्त्या आर्षमिकङ्लेन

॥ श्रीगणेशाय नमः ॥ भ्वादयो धातवः कुतोयमिति । वकारस्य भावं मत्वा कस्मान्निमित्ताद्वकार इति पृच्छति । यस्येति । यणादेशेने ॥ कोनिव
त्तितत्वात् । अथासंहितये ति । अभ्युपगम्य वाद्योयं नन्वेकस्मिन्नपदे असंहितात्वासंहितैकपदे नित्येति वचनात् । तस्मात्सर्वे ॥ र्थानिर्देशो
नेसंभवतीत्येवं परमेतत । भूवादीनामिति । स्त्रोत्वादिति भ्वादिशब्देस्य यौ विवक्षितः तत्र वाचकसंबंधी भ्वादीनां भ्वादिशब्दवाच्या
नांवकार इति व्यपदिश्यते ॥ ॥

नित्या किं तु समासत्वप्रयोजकं । तथापि अनेनैकदेशेनोक्तश्लोकग्रहणान्नदोषः । नन्वेवं भाष्यप्रामाण्योच्छेदो तत आह तस्मादिति । तथा च तात्पर्यविषय प्रमे
याबाधनाप्रामाण्यमिति भावः । ननु भ्वादीनामित्यस्य स्वरूपपरत्वे बहुवचनानुपपत्तिः अर्थपरत्वे प्रकृतासंगतिरतः पर्यवसितमर्थमत आह । स्त्रोत्वा १
दितिरीति । तत्ताभ्याकारणाहतत्रेति वाचकभ्वादिशब्दसंबंधकार्यत्वादान्यनिष्ठत्वेनोपचर्यतइतिभावः ॥ ॥ ॥

४५८

प्रयोजनेनेति । अनिमित्तकस्यास्तत्वासंमतया प्रयोजनकथनानुपपत्तिरिति भावः । उभयस्मिन्नपीष्टे प्रयोजनमात्रकथनमसंगतमित्यवोध्यं । नचा
पमिति । सर्वलोकप्रसिद्धत्वाभावादिति भावः । वैयाकरणेति । अनादिव्यवहार एव साधुत्वप्रयोजकोन सर्वलोकप्रसिद्धिः अन्यथा याज्ञिकमात्रप्रसिद्धस्यादी
नां व्याकरणाप्रसिद्धदिबुभादीनामप्यपत्त्यापत्तिरिति भावः । ननु मंगलं नाम धर्मः । तत्र न वकारोच्चारणं तज्जनकमानाभावात भ्वादिशब्देनापितत्संभावचतत्रप्र

मंगलार्थ इति । ननु निमित्ते पृष्टे प्रयोजनकथनमप्रसक्तं । नैष दोषः प्रयोजनकथनेन निमित्तस्यापि कथनात । अत एव निपातनाद्यागम
रूपोच्चवकारः कृतः नवायमसाधुः वैयाकरणनिकायेप्रसिद्धत्वात । तस्य च मंगलप्रयोजनमित्यनेन प्रतिबंधकादित्वं भवति । अपूर्वस्यहिला
भोदध्यादेर्लोके मंगलं सूचयति । तथेहाप्यागमो वकारो मंगलार्थः संपद्यते । अथ वा सतिवकारो विकृतेभ्रंशे च उच्चार्यमाणो महाव्याहृति
स्मरणां मंगलं भवतीति पारंपर्येण वकारो मंगलार्थः संपद्यते ॥ ॥

वेत्यहीति । मंगलजनक इति तार्थः । किं तु सूचक इति न दोषः । निबंधनेतु शिष्याणामप्यानुषंगिकमंगलस्य सूचनार्थमिति भावः । नन्वस्य मंगलसूचकत्व
मेव स्तवं न लोकसिद्धमत आह । अथ वेति । रेफांतस्येव महाव्याहृतित्वादाह स्मरणामिति । एवं च वकारलक्षणमंत्रे इदमेव निपातनविषयालक्षणं गुरूच्चा
रणां तु महाव्याहृतिस्मारणलक्षणमंगलार्थत्वमात्रमिति बोध्यं । तदेतत्सर्वं भाष्ये वकार आगम इत्यनेन सूचितेव कारस्यागमत्वात्तदादध्यादिवैमंगलसू
चकत्वमित्यन्ये ॥

क॰टी॰ २ ननु गणपाठेपि आदिग्रहणं विनार्थकं सर्वसंग्रहोत आह भूवादीनिति एवं येभूवादयस्तान्तेपदस्यावश्यकतया आदिपदमात्रविषयः प्रश्नो भाष्ये कृत इति
भावः। इदिभवतिभ्यां चेति भवति मादिमन्यते। आहतमेवेति। अनेन सतिपाठे संनिधानाविशेषात् तुल्यामिव प्रत्ययान्नामपि तत्पदपरामर्शकं स्यादिति ज्ञा
पकं क्लिष्टं कारणायस्य इष्टप्रतिपत्त्यर्थं आदिग्रहणं कदाचित्क्रियेतेति नात्यंतमकारणमिति सूचितं नन्वेवमेवं तर्हि सिद्धेश्वरभाष्यमनुपपन्नं सूत्रपाठि

नार्थ इति। भूवादीन् पठित्वा ते धातव इति वक्तव्यं यथा तेतद्राजा इति न स्यादिमिति। सति पाठे गतार्थे सोत्र कर्त्तव्यमस्ति तत्संबंधादित्य
र्थः अतएव प्रतिषेधप्रकर्षः संबंधाभावे तं तमेवावाकरणमित्यस्यार्थस्य प्रतिपत्त्यर्थं निर्दिष्टः। एवं तर्हीति। सूत्रेषु येपठ्यंते भ्वादयस्तदा
दयस्ता नसमाप्यते धातव इति वचने उपदिष्टसती त्यर्थः। अस्तिवधाव इति। अनेनासंनिद्धत्वपरिहृतं वाक्यश्चेत्यनेन गतार्थत्वं निराकृतं॰

तकतिपयानां धातुत्वसिद्धावपि सर्वेषां तासिध्यथा वादत आह सूत्रे स्थित पूर्वपक्षी बहिर्गणपाठेन आनात्येवेति इधिभवतिभ्यां चेति सूत्रस्थं भवतिमा
दिमन्यते इति तं प्रत्याह सिद्धा तीयदिताव तामेव धातुत्वमिष्टं स्यात्तर्हि ते धातव इति एव वदेत् इत्यादिग्रहणं ज्ञापकमिति भावः। नचप्रकारवाच्यव्यादि
शब्दोदृष्ट इति कथं सायकर्त्तव्यवस्था वाच्या इशब्दस्य प्रसिद्धतान्वादिति भावः। ननु वाद्यः पाठ इत्येतावतैव सज्ञाया अपि सिद्धेरस्तिपाठ इतिव्यर्थमत आ ए
हानेनेति ॥ ९
४६९

याचादिग्रहणाकरणे पाठेनैसंज्ञेत्येतदुपपत्तिस्तथा दर्शयतियेधातुपाठ इति यद्यपि ते इति पाठे पि पाठमूलैव संज्ञा तथापि पाठविशेषमूलत्वज्ञापनं ज्ञाप
कफलमिति भावः। ननु कृतिप्रभृतीनां सौत्राणां धातुत्वाप्याद्देशकृतिगणत्वमावश्यकमित्यागणवपत्या दावतिप्रसंगो तत आह तेषां चेति अतएवाभ्वा
दिसंज्ञोहस्वकरणं। वललमे। तान्निदर्शनमित्यपि यदि प्रामाणिकं तर्हि च एव तत् नगणपाठस्येति भावः ध्वतितं चेदं पाठे नधातुसंज्ञेत्येतद्भाष्येण। ननु
यः पश्यतीत्यादिव्याहृत्यर्थं क्रियावचनत्वस्यावश्यवाच्यतया पाठफलं नास्तीत्यत स्तत्फलं दर्शयति तत्रेति आज्ञापयतीत्यर्थे आणवयतीतिप्रा

पाठेनेति। येधातुपाठे पठितास्तेषामेव धातुसंज्ञा तेषां च पाठो नोपलक्षणार्थः। अपितु इयंज्ञाप्रतिपादनार्थः। तत्र यदि क्रियावाची धातुरिति
लक्षणं क्रियेत ततस्तत्र आणवपत्यादीनामपि धातुसंज्ञा स्यात्। अथ सूत्रपठितानामनंतरं। तथा तएवं इत्यकृच्येतत दत्रापठितानां न स्यात्
तस्माद्भूवादय इत्यकृतं तत्र सूत्रवार्त्तिकभाष्येषु ये पठ्यंते तेपि सूत्रकारादिप्रामाण्यात् धातुत्वेनाश्रयणीयाः ॥

कृतं। अपभ्रंशानामपि ख्यातं त्वे रोचे बोधकानां अरोतिकाणदेतेषां क्रियावाचित्वं बोध्यं। अथ पाठविशेषफलं दर्शयति। अथ सूत्रेति। ननु पाठस्यानुपलक्षण
त्वे सूत्रस्यादीनां कथं धातुत्वमत आह सूत्रेष्विति कृते तीयादेति सूत्र मनेकाव्यहणं तुलुंयाद्यर्थमिति वार्त्तिकं। गणः कण्ड्वादिर्भाष्यस्थिकाः विहितकार्यादे
श्यताकारणान्त्यत्वे तत्प्रमाणं तेन च पठंभात पाठेपठितानामिदानीं पाठभ्रंशोनुमियतइति भावः तन्वेवमप्यवशेषपठनीये गणे सूत्रां ते ये गणं पठिष्या
ते धातव इत्येव किं नोक्तमिति चेन्न एवं विभूस्त्रकरणे त्यक्त्वाम संदिग्धमिति सूत्रलक्षणे छेदापत्तिः। अन्यथा सर्वपाठे नापि सूत्रांतः पठितानां ग्रहणीया
नीत्याद्युक्तैव सिद्धे बहुव्याकुलतापत्तिरित्याहुः ॥

कै॰वि॰
३

ननुसमानशब्दानामित्यस्यार्थे तःसाम्येपर्यायाणामित्यर्थे संगतिः पर्यायाति संज्ञास्यपाठश्रयणप्रयुक्तत्वाभावादत आह समानश्रुतीनामिति। ननु प्रयोगस्थानां गणपठितेभ्यो भिन्नत्वेन समानश्रुतित्वेनैव कार्यस्य वक्तव्यत्वादाह इष्टेति। एतन्निष्टविभागस्य दुर्ज्ञेयत्वादाह अक्रियेति। नत्वेषामक्रिया वाचित्वात्कारकेविधौ यमानतव्यादीनां कथं प्राप्तिरित आह यथैवेति। अंतरंगेति। प्रातिपदिकादि तीयेत्यादौ प्रातिपदिकार्थनिरूपितकर्मसंभवात्प्राप्यग्रहणेपि धातोस्तव्यादिस्यादिवाकउपस्थितिभावः यथेकस्य स्कसंभवान्नवा प्राप्यग्रहणमिति भावः। अनन्यारीत्या भावेप्यनुत्व क्रियोः।

समानशब्दानामिति। समानश्रुतीनामिष्टविपरीतानाम क्रियावाचिनामित्यर्थः। तव्यदादीनामिति। यथैवेदृश्यैवंपश्येति बाह्यक्रियापेक्षेकर्मणिद्वितीया भवति एवं तव्यदादयोपि स्युरित्यर्थः। साधनमिति। अंतरंगधातुवाच्यक्रियापेक्षेसाधनेतव्यदादयः साव काशाबाह्यक्रियापेक्षेत्वे त्यर्थः। येयितिकार्यमेति स्वरविशेषार्थमुन सोप्यनमिधानान्नभविष्यति यापश्येति। यश्चेति धातुरिति विभक्तिरूत्यतेतस्यपस्तेदपिचकृते धातुसंज्ञायामातोधातोरितिलोपप्रसंगः॥ ॥ ॥ ॥

भावस्यैस्मैवतव्यस्य दिविधो भावपदार्थत्वात्। भाव साधनरूतिभावोपलक्षणं बोध्यं भावेरितिघञपिनापदरूजादिसाहचर्यात्साध्यत्वेनाविभासमाने भावे एतद्विधानादित्याहुः तन्त्रेवमपि स्वार्थिकास्तमुन्नादयः स्युः अत आह योपीति। तदर्थ्ये तुमुनः क्रियोपपदत्वाभावादप्रसक्तेराहशक्तेति नक्तांतोव्यपकृतोभावरत्युक्तेः सोपिभावएवेति बोध्यं। ननुधातुत्वेविवक्षणानुपपत्तिरिवकुतोनशंकितेत्यतआह यच्छ इति॥ ॥ रम॰ ३

४७०

Dr. Bhau Daji Memorial

कै॰ ५६

अन्यथा इत्येवमिति वाच्येअतएवोक्तः कः इत्यादि सिद्धिरिति भावः। नबलक्षणप्रतिपदोक्तपरिभाषया दाबंतस्य न धातुसंज्ञेति वाच्यं। सकारजः शकारो श्चुत्वेवर्गस्तवर्गजइत्यभियुक्तोक्तेः षृद्वादिस्वेतत्परिभाषा प्रवृत्तेर्वक्तुमशक्यत्वादित्याद्यः भाष्येतत्रानर्थकग्रहणं वक्ष्यतइति। एवंवानर्थके ग्रामविध्यर्थत तंवादिषु अधातुरिति वाचकवाचनार्थमर्थीति भावः। नन्विति। यदितुसारूप्यस्यैव संज्ञा प्रयोजकत्वादिति भावः। नैष इति। कार्यत्वात्संज्ञायाः प्रयोगानुशब्दावस्थायामेव संज्ञाप्रवृत्तिर्नतु एवस्थायांनुशब्दसंज्ञार्थमेव शुयाठइति प्रयोगस्थ यठितत्वथाते येणसंज्ञाप्रवृत्त्यातत्र

न्नस्तइति। नतुगणे तुपुपयठितः नचास्यतेनसारूप्यं निर्दोषः। प्रयोगानुशब्दएवधातुः तेनचास्यसारूप्यमस्त्येव। यद्यपिचार्यसानुबंधकस्तथापि धातुनअनुबंधकपरिभाषयाकेश्चिन्नाश्रीयतोऽथवोपलक्षणार्थमिदं तेनस्यादिस्वरूपस्य ग्रहणं। अत्रघ्नेति। अ

नकृदंतत्वात्प्रातिपदिकत्वं

कृत्तेति प्रसंगपाद्यानं युक्तेणेति इत्यादेतु धात्वादेरित्यस्य भाविसंज्ञापरत्वान्नदोष इति भावः अयंकृत्प्रत्ययः केचिदिति भत्वादयइत्यर्थ वनश्रीमतइत्यर्थः अथेति। अयमस्तुन्नयः आगुकरीत्याप्तामंजस्यात् किंचैवं कृद्ग्रहणस्य ज्ञापकत्वपरभाष्यासंगतिः चस्तइत्यादावुवंजायतिस्तुवर्णतथा तुल्यात्कथं प्रातिपदिकत्वमत आह। अत्रेतिकृतग्रहणे गतिकारकपूर्वस्यापिग्रहणमिति भावः

नवेअत्रेति भाष्यं पुनरुक्तप्रतीकाश्च भेदेनयोजयति शिष्टेति। अत्र शिष्टप्रयोगादेवोक्त्वाप्रवृत्तौ स्वार्थकादिवशब्दार्थमेवेदं सचेद्धातुत्वात्प्रातिपदिकं
येऽर्थे नवतदिति ज्ञापकत्वमिति भावः। इतरइति। अप्रयोगस्थल इति कचत्तुर्थ्येद्दुईयतया चारितार्थ्यसंभावनासत्वादिति। भावः यद्यपीष्टन सिध्य
तितथाप्यनिष्टप्राप्त्यर्थमेव शास्त्रं स्यात्। तथा चाविपरीतमेवेष्टानिष्टविभागः स्यात् इति भाष्यार्थः ज्ञापकवाधाहएवंतहीति ततवेदन वाधाह एवमपीति
नीत्नीत्यस्यतु परइत्यादिः तदाह। अथातुरिति। तदेवं समानशब्दातिप्रसंगः स्थितः। अत एव परिभाषामाहशांचेतिचकारस्तुधीयंभाग वतानव्याख्यातः अवधे

तदेवअत्रेप्यतइति शिष्टप्रयोगाभावात्। तस्मादिवउदिति ज्ञापकमेव। इतरोज्ञापकत्वंविघटयति। अनिष्टंचेति। एवंतहीति धातुसानुबंधकइतिभावः
एवमपीति। अथातुरिति प्रातिपदिकसंज्ञानिषेधान्निरनुबंधकात्तस्मारसंभवः। उभयसंभवेवास्याः परिभाषायाउपस्थानंनान्यथा। इयानवधि
रिति। अवधिमानवधिनोपलक्ष्यते। तेनविशिष्टावधियरिच्छिन्नस्यधातुसंभवेचास्याः परिभाषेविधेयेत्यर्थः। मेधशब्दइति। ततश्चमेधशब्द
स्तउदिप्रसंगः। नचार्थयाढः परिच्छेदकः तस्यायाणिनीयत्वादभियुक्तेरुपलक्षणतयोपात्तत्वादनेकार्थत्वदर्शनादर्थस्यनियामकत्वाभावात्।

संज्ञायामकारस्वसस्यातनभूइत्यादेरत आह आह अवधिमानिति। इदंचेयत्यंदेनभाष्येध्वनितमिति भावः। अभियुक्तेरिति। भीमसेनेनेत्येतित्थं। त
त्रैवहेतुमाह अनेकार्थीतेति। अर्थनिर्देशस्यव्यभिचारित्वेनाप्रयोजकत्वाद्व्यवस्थापकत्वाभावेनपरिभाषाग्रहणमयिकार्यमिति भावः॥ ॥ एम.
४
४७२

क्रियेतेतितिद्धोधितेः स्यलक्षणस्यसंभावनीयत्वेहेतुमाह एवमिति नहीति। अवैयाकरणानां वाचकत्वेपिदशदाडिमादिवत्समुदायोनर्थकइति भावः। शास्त्रानुशा
सनप्रवृत्तानामर्थविवेनेकाप्रसक्तिरतआह द्रव्येति असंभावयतइति अप्रत्यक्षत्वादिति भावः एवंच प्रकृतलक्षणेनापि द्रव्यवाचित्वाधारतुल्यानिहत्रेः
समानशब्दातिप्रसंगस्तदवस्थ इति भावः अन्यत्रेति। मानसव्यापारइष्टरूपरहः। इष्टः कोदृशः स्तहेहात्तदिति कोशातकाययरीक्ष्यं दक्षेष्टाइहेतिस
मानमेहमानानामिति भाष्यप्रयोगादीहचेष्टायामित्यर्थनिर्देशाच्चेति भावः। नन्वेकपर्यायेणार्थस्यव्याख्यानसंभवात पर्यायान्तरोपादानमनर्थक

क्रियावचनइति। एवंसतिसमानशब्दानांप्रतिषेधेनवक्तव्यः तापिपरिभाषां। नहिमेधशब्दसमुदायक्रियावचीउकारपुनरिति।
द्रव्यव्यतिरेकेणतस्याः सत्त्वासंभावयतः प्रश्नइहेति। इहाचेष्टाशब्दयोरन्यत्रव्यापारविशेषवचनत्वेपिव्याख्यात्रवचन
त्वंनोद्रव्यं। कस्यचिक्केनचिह्नवेनसोर्थः प्रसिद्धत्येनेनकपर्यायोपादानं। सर्वथेति। यावत्द्रव्यव्यतिरेकेणक्रियासङ्ग
वेप्रमाणंनोक्तंतावत्प्रयोपद्यतमत्रेणतस्याःस्वरूपंननिश्चीयतइत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥ ॥

मतआहकस्यचिदिति। सर्वथेत्यादिभाष्यमुपहासपरं साकिंशब्देव्याकरोषीतिवाउतशब्दान्व्याकरोषीति नाद्यः शब्देरेवयतोव्याख्यानं नास्तिनि
कोचादिभिःनांत्यः प्रयुक्तशब्दायाप्रसिद्धत्वेव्याख्येयत्वादतआह यावदिति। क्रियापदार्थप्रश्नेइदंयुक्तंनतुक्रियापदार्थोनातिरिक्तोद्रव्यादितिप्रश्ने।
तत्रहिद्रव्यव्यतिरेकएवस्याधनीयइतिउपहासइतिभावः। स्वरूपं द्रव्यव्यतिरेकव्यतिरेकः। शब्देरेवशब्दान्व्याकरोतीति भाष्यस्तु गणः ॥

समूहार्थकत्वात्तच्छब्दस्य प्रकृते नन्वयादाह। व्यर्थेति अत्रेदं तत्त्वं। कारकं न क्रियातस्याः कारकात् अन्यत्वे सत्यन्वयापत्तेः। कारकाणां मिथः संबंधायोग्यत्वात्। तस्माद्व्यति रिक्तक्रियाणां मित्युक्तेः सर्वत्र सर्वे सुपहाः सत्वा कारकातिरिक्तक्रियाप्रत्यक्षेणानोपलभ्यते स्येवं परोक्ष्यः सचेष्ट एवेति गृह्यामि संधिप्रत्युपहारः सपक्षे क्रियात्वाभिव्या दिभाष्यं। अत्यंतापरिदृष्टेति परेणाप्रमाणेन प्रत्यक्षेणात्यंतमवयवशः समूहरूपेणचादृष्टेत्यर्थः। तत्रापि दर्शनस्याशक्यत्वे हेतुमाह। आख्याते ति तत्राप्रत्यक्षत्वे हेतुः अनेकावयवरूपत्वं तच्च घटादिषु व्यभिचरितमतः सदसदिति। तदुपपादकं भूतेत्यादि। समूहस्य वस्तुतो बुद्धिकृतो विकल्प रूपत्वं न वास्तवमिति बोध्यं। नन्वतीतप्रयोगे सर्वेषामतीतत्वात् न विद्यति सर्वेषां भाविक्रियाणां कथं सर्वत्रैरूप्यमत आह पूर्वापरीभूते इति तत्त्वे
अर्थजातमिति। अर्थस्वरूपमित्यर्थः। अशक्येति। आख्यातपदवाच्या पूर्वापरीभूतावयवा सत्या भूतभाविवर्त्तमानावस्था अतभविष्यद्वर्त्तमानसदसदनेका वयवसमूहरूपासद्वृत्तविषयेंद्रियाग्राह्या न भवतीत्यर्थः ॥ ॥

वीजमाह साध्यमानेति वर्त्तमानविषयेपि तत्समेवमुपपद्यतं तथाहि वर्त्तवर्त्तमानत्वं प्रारब्धापरिसमाप्तत्वं। न न्वेकक्षणोत्तस्यसंभवति तस्मादाख्यत्वमतीतत्वमादाय असमाप्तत्वं तद्भविष्यत्त्वमादायेत्येव सम्प्रर्थना। यत्क्षणा एव च क्रियावयवा इति न च तत्कालसंबंध एव वर्त्तमानत्वमिति वाच्यं एवं हि प्रतिपश्यमृगो धावतीति शब्दप्रयोगानुपपत्तेः न हि स्वस्थानप्रभृति परस्थानपर्यंतं एकः क्षणोस्ति। समूहरूपत्वे तु अवयवानां तावदवच्छेदेन स्वानुभूतावर्त्त मानता अवयवानां तत एवच्छेदेन परं दीर्घयितुं तदुपपत्तेः विलाद्विलं प्रदिशतीत्यर्थः किंचिद्वच्छेदेन सरूपमनुभवतो। वयवानां तद्वच्छेदेन तं दर्शयितुं सर्पपश्ये तिप्रयोगवत् सदस्तीति सद्वृत्तीति विषयाणामेषामिंद्रियाणां तद्ग्राह्यानेत्यर्थः। राम ५
४७२

ननु यदि पिंडीभूता क्रिया कृतो निदर्शयितुं न शक्येत्यत आह। यथेति। पिंडीभूता इति कार्यात्मना स्थिता इत्यर्थः अनेन दृष्टांतेन परमाणुवदवयवक्रियाणां मप्रत्यक्षत्वं सूचितं कृतिस्थ इति। आद्य अनिर्लुठित इति छेदः। द्वितीये निर्लुठित इति छेदे निष्क्रांत इति चतुर्थ इति भेदः अत्यंतापरिदृष्टत्वेनावयवस्त रूपे णाप्यप्रत्यक्षत्वं तद्वयवानां क्षणरूपत्वात् यश्च धावतीति तदनुमापकफलपरम्परेण तेन क्रियानुमेयेत्युक्तं भवति। वर्त्तमाने लडिति सूत्रस्थभा

पिंडीभूतेति। यथा परमाणवः पिंडीभूता उपलभ्यंते न केवलाः एवं पिंडीभावाभावात् क्रियापि न प्रत्यक्षेत्यर्थः। गर्भो निर्लुठित इति यथा कु क्षिस्थो गर्भो प्रात्यक्षः तथा क्रियेत्यर्थः अथवा यथा निर्लुठितो निर्यतः कस्तैर्भिप्रत्यक्षः। नैवं क्रियेति वैधर्म्यदृष्टांतः सा सा विति। या पूर्वमुक्ता सा सा वनुमानेन प्रतीयते। केत्साविति। योभावे स्कद्रूसनपुंसकः। अन्यत्रत्वभिधेयवशाल्लिंगनियतलिंगाः। अथवाम न्यते वैत्यनुमान इति रूपं॥

यस्यासौ ण्यिवनेवा। या सर्वामिति। असु शब्द इदमर्थ इति न वयोन हृत्कर्यमिति भावः तद्वर्त्माप्यववहितोत्तरवर्ती असशब्दः प्रसिध्यर्थ इत्यनेन तुल्यु इत्तत्वेन पुंसकत्वं स्यादत आह। योभाव इति तथा च कर्णोत्पुरितिभावः अथवेति पौष्ठा॥ ॥ ॥ ॥ ॥ ॥

के॰वि॰
६

नन्वनुमानापकलिंगप्रश्ने कारकसमवधानकालिकपचत्यादिव्यवहारव्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वरूपं लक्षणमुक्तं न तु लिंगमित्यत आह यस्मिन्
चितमित्याह यस्मिन्निति इतरभेदसाधनेन लक्षणस्यैव लिंगत्वेपि लिंगांतरमाह न चेदं विमतं कारकं न्योन्याभिघते बाधकाभावे कारकसत्ताकाले व्यवह्रिय
माणत्वाद्बाधकाभावे यद्यत्कालेन व्यवह्रियते तत्ततो भिद्यत इति प्रयोगः। ननु यस्मिन्साधन इति पाठे यत्तच्छब्दोक्तकारकस्यैव क्रियात्वप्रतीयते तच्च विरुद्ध

यस्मिन्संनिहित इति यस्मिन्वस्तुनि संहिते पचतीत्येतत्प्रयुज्यते नासतिसा क्रियाक्वचित्तु यस्मिन्साधने संनिहित इति पाठस्तत्
त्रायमर्थः। यस्मिन्संनिहिते सति पचतीत्येतत्साधनविशेषे भवती। स्यादेतत तत्संनिहितक्रियाविषयज्ञानं ज्ञानवत्पचतीत्येतदस्त्वविष
यमेव ज्ञानमित्याह अथवेति। देशांतरप्राप्तिलक्षणेन कार्येणाबाधितेन क्रियाख्यं कारणमनुमीयत इत्यर्थः ॥ ॥ ॥

मत आह यस्मिन्निति यस्मिन्सति ज्ञानं न वस्तु सत्तासाधकं असतो पि शशशृंगादेः शाब्दज्ञानदर्शनादिति भावः देशांतरेति। संयोगाजन्याजन्यः संयोगाक्रियाजन्यः का
रकजन्यत्वे सति जन्यत्वादिति प्रयोगः संयोगस्य क्रियाफलमात्रो यल इत्यत्वं वोभ्यं फलानुमेया क्रियेति तात्पर्यमेतेयन्नत्यादिव्यवहारहेतोरसंभव इत्यायातं॥ ४७३

संबंधग्रहणेति। फलव्यापारयोर्जन्यजनकभावग्रहे सति हि कार्येण कारणानुमानं स्यात्स एव तु दुर्घटः प्रत्यक्षत्वादिति भावः एकैकस्येति अधिश्रयणादेरि
त्यर्थः प्रत्यक्षत्वेनेति। पश्यन्नवधारयतीति प्रत्ययादित्यर्थः बुध्यासंकल्प्येति। समस्तावि षयीकृत्येत्यर्थः उपस्थितेन संबंधग्रहो न प्रत्यक्षेणेत्युपस्थित एवेति निय
म इति भावः। एवं संबंधग्रहोत्तेकार्येणातामनुमाय पचतीति प्रयुज्यते इति तात्पर्यं इंचयोगि प्रयोगाविषयं तेषामेवावयवक्रियाप्रत्यक्षात्। अस्माकं तद्व्यवहा
रपरंपरायास्सर्वव्यापकत्वात्मक एव प्रयोगः क्रियायद्दाराममिति वोध्यं एतच्च वक्ष्यमाणेत्यादि सूत्रे भाष्ये व्यनितं। ननु तत्समूहस्य प्रत्यक्षत्वेपि एकक्षणस्य प्र
त्यक्षत्वसंभवात्तत् क्रियामात्रे आनुमानिकत्वकथनमयुक्तमित्याशंकापरति। यदापीति। तथा च तस्य व्यवहारविषयत्वेव्यवहारविषयत्वं ानुमेयैवेति

ननु प्रत्यक्षप्रवृत्तौ संबंधग्रहणाभावात् कथं क्रियाविषयमनुमानं प्रवर्तते। नैष दोषः। धातुव्याख्यासमूहस्य युगपदुद
निधानाप्रत्यक्षत्वेप्येकैकस्य तु क्षणस्य प्रत्यक्षत्वे बुध्यातान् क्षणान्संकल्प्य पचतीति प्रयुज्यते। यदाप्येकस्मिन्क्षणे प
चतीति प्रयोगः तदा तत्र समूहरूपारोपणाच्छब्दशक्तिस्वाभाव्याद्वैकः क्षणो नैव धातुवाच्यः ॥ ॥ ॥

भाष्यतीत्यर्थमिति भावः ननु तदारोपे पि वस्तुत एकस्यैव क्षणस्य क्रियात्वेन तत्र प्रत्यक्षत्वं व्यवहारविषयत्वं च दुर्वारमत आह शक्तीति। एकः क्षण इति आरो
पितसमूहरूप एकः क्षण इत्यर्थः पूर्वे तु अधिश्रयणादि एषिनेकक्षणात्मकं तस्यापि हस्तप्रसारणाद्यावादानुङ्गीसयो तत्तद्योजनादनेकक्षणः संत्ये
वेति सोपि समूहरूप एवः यस्ततेषः मप्यवयवः परमाणु प्रत्यक्षः मुतु शब्दशक्तिस्वभावान्नैव वाच्यो नापि प्रत्यक्षः अनुमानेनैवं। उत्तरदेशसंयोगादि फलं
कारणजन्यं कार्यत्वादिति। तच्च कारणं प्रसिद्धातिरेकिद्रव्यत्वादिति क्रियारूपमेव सिध्यतीति भाष्यतात्पर्यमित्याहुः ॥

केवि॰ ७

तन्वेकार्थबोधकत्वंसामानाधिकरण्यंनप्रकृतेतत्राहसामान्येति।तथाचधातुलकारयोः क्रियातद्व्याप्ययोरन्यतरस्यचनत्वंविवक्षितमितिनदोषः।यद्यपिकरोतिः
धनावक्षेपणादिवविशेषेवर्त्ततेतथापिकारकव्यापारएवतदर्थःप्रसिद्धइतिभावः।तत्रयोव्यापारसामान्यवाचीतद्विशेषाःपचादयः।किंकरोतिइत्यस्यच
करोतितत्किमितिव्यापारविशेषविषयःप्रश्नोर्थः।एवंचयन्निष्टतया प्रश्नविषयक्रियायाः करोति शब्दवाच्यायाःप्रतीतिस्तन्निष्टतयैवोत्तरभूतप
चतिशब्दवाच्यक्रियायाःप्रतीतिरितितयोःसामानाधिकरण्यंतत्रक्रियाप्रश्नजनकत्वेनसामान्यस्तद्विशेषोत्तरेणैवनिर्णयादित्याक्रियावाचित्व

किंकरोतिपचतीति।सामान्यविशेषभावेनसामानाधिकरण्यस्त्क्रियाविशेषवचनाःपचादयःप्रती
यंतइत्यर्थः।यदातुकिंकरोतीतिपृष्टेनकरोत्यपरएवकेवलमितिप्रतिवचनंतदाव्यापारमात्रस्याव
श्यंभाविसाद्विशेषविषयःप्रश्नःप्रतिवचनंतुविशेषनिराकरणेनेतिबोद्धव्यं॥ ॥

मितिभावः।नन्वेवंपचनसेवृत्तरवत्पचतिकरोतीतिसहप्रयोगापत्तिरितिचेन्न।केवलस्यधातोःप्रयोगाभावेनतिङ्प्रयोगोतदर्थेवोनक्र एम
त्रमीत्यातथाप्रयोगाभावात्यत्रतुनेदृशंवाधकंतत्रैधोवकारेत्यादिप्रयुज्यतएवेतिदिक्।यदास्त्विति।आसेरपिक्रियाविशेषत्वंअतएवगमना ७
स्तनशयनरां शय्यात्प्रश्नेअस्तेरतिप्रतिवचनमितिबोध्यं॥ ॥ ४७४

पाठनियेनमिदंलक्षणमितिशंकतेभाष्येतत्रेति।ननुसर्गस्यधात्वर्थविशेषकत्वात्प्रत्ययस्यकर्त्रर्थकत्वाच्चप्राप्त्यभावेनप्रतिषेधानुपपत्तिरितिअहभाष्येसं
घातेनार्थवत्तेति।वीप्सेतिशेषः तद्धावृत्तेसंघातस्येतिउपसर्गप्रत्ययंयोरित्यस्यतद्विशिष्टयोरित्यर्थइतिभावः अर्थवत्त्वमिति।अन्वयव्यतिरेकाभ्यामिति
भावः।भाष्येयथाहीत्यादिप्रागुक्तकरोतिसामानाधिकरण्यरूपक्रियावाचित्वचिन्हाभावात्तदभावइतिभावः अतिव्याप्तिनिराकरोतिभाष्येप्रत्ययार्थस्येति
अथातेरकः अभूदेः प्रकृत्यंतरेष्वपिनार्थकेषु।प्रत्ययस्याप्यावाप्योद्धारंदर्शयतिधातोश्चेतिअन्यस्येति।तिङाभेराद्दित्यर्थः अन्वयव्यतिरेकाभ्यामितिवा
र्तिकेनधातोरेवक्रियावाचित्वंकल्पनिर्वमितिप्रतिपाद्यतेइतउत्तरभाष्येनचेत्सामान्यशब्दाइत्याद्यंतमर्थवत्त्वमन्यास्यातंतएवावधार्यमस्य

संघातेनेतिसंघातस्यैवप्रयोगादर्थवत्त्वंकेवलानांतुधात्वादीनामप्रयोगादानर्थकं।अपिशब्दस्येति।यद्यप्ययंप्रत्ययस्तुरायः।तथापिप्रकृति
भागावबोधयत्वान्प्रत्ययभागपर्यालोचने।नक्षादेवमुक्तं।अथवाप्रत्ययार्थेकेचिदितिप्रत्यययत्वेनकल्प्यतइतितदयेसूचितदृक्तं।
किंनसाधीयइति।परप्रकृतिरेवक्रियासाधनंवाहतरासिद्धमेवप्रकृतेःक्रियावाचित्वं।प्रत्ययस्यचेति।ततश्चपक्षेतेनस्यात्कि
यावाचित्वं॥ ॥

त्ययः प्रत्ययार्थेप्रत्ययद्योत्येर्थेइत्यर्थः प्रातिपदिकविशेषणमियंवकस्यप्रातिपदिकार्थतयार्थवत्त्वतत्रस्यभाष्यस्यैवमेवआक्षेपत्वात्तदेवंसप्रत्य
यकेतिव्याप्तिंनिरस्यउपसर्गेतांनिराकरोतिभाष्येक्रियाविशेषकउपसर्गइतिप्रथान्वयव्यतिरेकाभ्यांप्रत्ययार्थवाचकस्तथाताभ्यामेवक्रियागतविशे
षद्योतकउपसर्गः क्रियायांद्योधातुरेवेतिभावः अर्थातिपर्वरुत्कृष्टक्रियायांद्योतयतीत्यर्थः यद्यपितावृत्तिरितिउपसर्गाभिधानेधातुस्थलेतत्वासंभवा
दितिभावःयद्यप्यत्रेति।धातोरूपसर्गार्थाभिधानेपिउपसर्गस्यधातुव्यभिचारात्अन्यत्रद्योत्यत्वेननिश्चितार्थस्त्वेहाप्यर्थोस्तीतिभावः॥ ॥ ॥ ॥

कै॰कि॰
८

नान्विस्मयुक्तं अधीते इत्यादावुपरिभावाप्रतीतोरत आह तद्वितिः फलत्त्वक्षणाउपरिभावोधात्वर्थः सच विशिष्टार्थयुक्तत्वरूपो विधिपूर्वकत्वरूपो वेति भावः किंतु अध्यामयर्यंतत्वरूपत्वकर्मत्वधारेर्थ इत्याद्गः किं विशिष्टं स्मरणमिति। निरंतरत्वादिकं तत्रोक्तं यः भाष्येइष्टतद्विभ्यकमिति। तत्र ग्रीतिक्रियायाउपसर्गमा नार्थत्वेतिष्टंतेधीतुत्वानामति। तिष्ठति भावस्यतुनार्थः तस्यतन्निवृत्त्यर्थकत्वात् विशिष्टस्यतत्पर्थकत्वेतुतेस्यैवधातुत्वापत्तिरितिभावः समाधत्ते प्रायमि ति। नत्स्येवमपिपातिनिवृत्तिवाविनश्तियंतेः कथंगातिवाचित्वमत आह अनेकार्थत्वादितिधातोः कचित्स्वरूपकल्पनानार्थत्वेनैवप्रकृतार्थनिर्वाहे प्र शब्दस्यार्थकल्पनेमानाभाववदितिभावः लोकेपि प्रथमगमनकर्तैर्यवप्रतिष्ठत इतिप्रयुज्यत इति तात्पर्यातदाह भाष्येन चेदंन्यायतीति प्रकिरण

अधिरूपरिभावइति। ततश्चाधीयइत्यस्य विशिष्टार्थयुक्तानां पठनं विधिपूर्वकं वा करोतीत्यर्थः अध्येतीत्यत्र विशिष्टं स्मरणरूपं ज्ञा नं धात्वर्थः। श्रोयमिति। अन्यत्रापि प्रयोगात ततश्चान्यत्रास्य योर्थो सोत्य : स एवाहाप्यनुमीयते। अनेकार्थत्वाद्वधातूनांति रेवगतिवाचीतिनिर्णयः। भाववचनइति। भावशब्दः क्रियामात्रवाची पक्षायस्य स्वभावेनेति भवेद्यन्तितितेन पचादौ प्रविधा तुसंज्ञासिध्यति अस्तिभवति विद्यतीनामपि भाववद्रूपार्थोभिधा। पिण्डात
इतिमापान्वयतीत्यादौ दृष्ट मीशादेरितिप्रेरयतीत्यर्थः ननु भाववचन इति न्यासेपचादिष्वव्याप्तिरत आह क्रियामात्रेति धात्वर्थमात्रेत्यर्थः मा त्रपदं कान्त्यैनन्वेदमप्यस्त्यादिष्वव्याप्तिरत आह अस्ति भवतीत्यादि। तस्मिन्सत्यागतः भवतं भावइत्यादिप्रयोगात अस्त्यादिक्रियापि भावपूर्व नगम्यतइतिभावः नन्वस्यापार्थस्यापि क्रियालोकिमयरङ्कं पूर्वलक्षणेनेत्यत आह भावरूपेतिति। क्रियाशब्दः सपरिस्पंदसाधनसाध्यार्थरूढो भावशब्दश्चेसपरिस्पंदास्यतरसाधनसाध्ये इतिभावः॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीस्मारकसंग्रहः

एम
८

४७५

इतरो भवत्यर्थो स्यभावशब्देनविवक्षितइत्याशयेनपृच्छति भाष्येकथं पुनरिति। ननु भवतिपचत्योर्नैकार्थत्वेरभकरूपं सामानाधिकरण्यं। भावः स त्ताविक्लित्यनुकूलव्यापारश्चपाक इतितयोरत्यंतवैलक्षण्यात् नत आह आत्मभरणेति आत्मभरणं वाषष्ठ्यादृ वविकपादनुस्यूतंसत्स्थितिप्रत्यय वेद्यं रूपं तच्चकेवलसत्त्वविलात्यदार्थमात्रसमानाधिकरणं। एवं वाश्रये पचिक्रियावोधेतत्समानाधिकरणात्मभरणस्यापि तत्र सत्त्वेनतद्वाचकत्वं

भवतिपचतीति। आत्मभरणावतो भवतिः तच्चात्मभरणं विरुद्धेकार्थसमवायेयाकत्वादिभिरविरुद्धैकार्थसमवायं यथा शुक्लं रूपमिति शुक्लो गुणो शुक्लं संरूपं सं वा स्तीति शुक्लादयोरूपवचनाः एवं पचादयो भाववचना इत्यर्थः। कः पुनरि ति। यदि क्रियैवभावः तदापस्तांतरेणादानमनर्थकं। अथान्यस्तदाव्याप्तिरिति प्रश्नः ॥ ॥ ॥

पचादीनां यथाशुक्लो गुणी रूपवत्सत्तामात्रे रूपवचनं शुक्लादीनां तदुक्तं पाचकादिभिरिति आदिपाकत्वादिभिरिति पाठांतरं अ आदिश्याम न्यादिविरुद्धेतिपरस्परमित्यादिः एवं च पचति भवतीत्यादेर्यत्कर्तृकापचिक्रियातत्कर्तृकासत्तेतिबोधः एवं च भवत्योर्थयोरेकाधिकरणवृत्तित्वमे व भवतिपचत्योः सामानाधिकरण्यमितिभावः ननूक्ते न सामानाधिकरण्येन भावपदार्थस्याप्युक्तप्राप्यत्वात्कः पुनरिति प्रश्नोनुपपन्नोत आह य दीति

कै॰वि॰ ९

भवतेरर्थेऽन्यस्तावत्तासिद्धे स्वपदेनेत्यर्थः मत आह स्वेति। न च धातूनामनेकार्थत्वात्तुल्यफलितात्कार्यिकाइतिवाच्यं। अनुपपत्तिप्रतिसंधानापूर्वकप्रती
तिविषयार्थमादायैवाने कार्थस्वीकारात्। यस्त अनुपपत्तिप्रतिसंधानपूर्वकं प्रतीतिविषयोऽर्थः स धातोर्मनादिस्तत्रलक्षणैवेत्याशयात्
तात्क्रियावाचकत्वात्तं च क्रियाबोधकत्वमेवेति बोध्यं। प्रकरणादीति। तेन तत्सापेक्षप्रतीतिकपरभवाद्यर्थे निरासः। भवनलक्षणाभावस्य स

स्वपदार्थ इति। स्वग्रहणमुपचरितार्थनिवृत्त्यर्थं गौणोऽपि पदार्थो भवतिन नु सोऽव्यभिचारात्। पद। ग्रहणं प्रकरणाद्यनपेक्षत्व
प्रतिपादनार्थं। भवनं भावइति विग्रहः। कर्तृसाधननिवृत्त्यर्थः। भेद इति। विनाशो भेदश्छेदश्चाद्यइत्यादेः स च भावविशेषोऽस्तीति भा
वः

त्राह पत्नात्सत्त्वापाश्चकेवलान्वयित्वेन सर्वसमानाधिकरणातयाभावचनवतिलक्षणं नव्याप्यव्याप्तमिति कुत्रस्माप्यमात्पर्यं। ननु अवयव ए॰
वविभागनुकूलव्यापारवाचिनां भिदादीनां कथम् भावचनत्वेत्यत आह। विनाशइति। तत्र घटादिर्नश्यति भिद्यते न जवादेशेऽपि दयतेनेति ९
शब्दशक्तिस्वभावाद्वक्तव्यं। विनाशकाले सत्तायाअभावाच्चेतेनस्याः समानाधिकरण्यमितिभावः ॥ ४७६

दोषांतमाह पचादीनां चेति भाष्ये। क्रियावचनेधातावित्ति। क्रियावचनो धातुरितिलक्षणानिरूपणावसरे यथानिदर्शितं न तथा भाववचनो धातुरितिलक्ष
णावसरे पचादीनां भवतिनानिदर्शितइत्यर्थः। तथाहि न सामान्यविशेषभावेन पचादेर्भवतिसामानाधिकरण्यं किं करोतिपचति किमकार्षीदपाक्षीत किं
करिष्यति पक्ष्यतिकिं कुरुतः पचतः स्तिन्त किं भवति पचति किं भविष्यति पक्ष्यति। इत्यादेरप्याप्तेः यतस्तत्र प्रश्नोत्तरभावेन सामानाधिकरण्यं यतश्च पु
नतो भिन्नभिन्नवचनान्यपि भवतेरेकरूपत्वं। अतः पच्यर्थो भवतेः कर्त्रैव पचतियन्त्रद्रष्टातिवाक्यष्वोत। करोतिः कृभ्वोऽस्त्यर्थः भवतिर्भूतकालार्थः भातु र्थ
निर्देशो यियस्तात्तिषुयेयसामहं करोतीति वर्तमानकालं चैकत्वं चेति। प्रश्नविषयत्वं विनाचेत्यपि बोध्यं भवतिरेकत्वमनुवर्तते इत्यक्रिया क्रि

संख्यानुरूपानिति। किं करोषि पचामि किं करोमि पचेत्यादौ विपरीतापि पुरुषानुवृत्तिः सर्वग्रहणेन विवक्षिता ॥ ॥ ॥

यासांसंख्यान्वयं दर्शयति एवं पचादिनां सर्वाणि तिवचनानीत्यनेनापि तत्रवचनेसंख्या। नचैवं पक्ष्यतिभवतीति कथं प्रयोगः भविष्यत्वाकेवत्रैमौनस
त्राश्रयत्वासंभवात् इति वाच्यं। भूत भविष्यतोरपि सत्त्वाक्ष्याभावव्यवसायावत्त्रैमानत्वात्तेरितिभावः करोतेः पचादिसर्वपुरुषानुवर्तकत्वं किं
करोषि पचामीत्यादौ व्यभिचारितमत आह। किं करोषीति। करोतेः सामान्यविशेषभावेन पचादिष्वनुवर्तित्वं ईश्वरपचादि समानपुरुषतात्रनुकू
लत्वं द्विपरीतपुरुषतात्वेति द्विविधापि सर्वपदेनसंगृहीतेत्यर्थः ॥ ॥

नहिभवतीतिनतुपःफस्पतिसभविष्यतीत्यभिप्रायेणाभविष्यतिपक्ष्यतीतिप्रयोगःकथंनेतिचेतन॰ आख्यातस्यक्रियाप्रधानत्वात।उक्तंसामानाधिकरण्य
मपिनभाववाचकतरसाधकंयथाशुक्लादीनांरूपवाचकत्वेपिनरूपत्ववाचकतातद्वत।एवंपाकत्वेनसत्त्वस्यःसामानाधिकरण्येतपचेःसद्वाचकत्वेपि
नसत्त्वावाचकत्वमितिबोध्यं।किंचोक्तौथौपिनःपचतीत्यनेनेवतत्कर्तृवर्त्तमानसत्त्वाश्रयत्वंभवतीत्यस्यानुपयोगात।तदुक्तमितिभाष्येपचदन्यःक्रियार
त्यादिकथंसंबंधरति।किंसंबंधमत्लिकाइयंवाचोयुक्तिर्वाक्यप्रयोगोयमितिभाष्यार्थइतिभावः।एषेवेतिहिरुक्तःकथमतआहयेवेति।साध्यसाधन

भवतिःपुनरीति।नहिभवतिभविष्यतिपक्ष्यत्यभ्रदपाक्षीत।भवतःपचतोभवंतिपचंतीति।कातर्हीति।कथंसंबंधइतिप्रश्नः।एषेषे
ति।याएषान्वयस्यदृष्टांसेषावर्णभासस्वरूपेत्यर्थः।पचादयइति।साध्यसाधनभावःसंबंधःनतुसामान्यविशेषभावइत्यर्थः।ननुअन्य
त्रोक्तंतिङभिहितोभावःक्रियपासमवायंनगच्छतिनहिभवतिपचपठतीतिततश्चतेनेतद्विरुध्यते।तत्राहुःकर्तृकर्मभावेनक्रि
याआख्यातवाच्याक्रियपासंबध्यतएवभवतिपचतिपश्यमृगोधावतीतिकरणादिभावेनतुनसंबध्यतेतथाप्रयोगादर्शनात।

भावःक्रियाकारकभावःनाप्रयोगादर्शनादिति।अस्योतिष्ठोमेनयजेतेत्यादावपिज्योतिष्टोमेनेत्यस्येवकरणत्वेनान्वयोनतुधात्वर्थस्येतिमतंमंतूषर एम
यांदिष्विदारेनतिरुपितेमद्वात्तस्यकारणत्वेननधात्वंतरार्थेन्वयइतिभावः।सकर्तृकायत्रक्रियातत्कर्तृकास्त्वेतिबोधेतुपश्यंतिभवतीत्यादेरष्यपतिरिति १०
बोध्यं॥

४७७

यत्रस्वाल्वितिभ्याष्ये।एकस्याएवकर्तृत्वंतान्निरूपकत्वंचनयुक्तमितिभावः।भवेदपिभवेदितिअपिभवेदितिपक्षद्वयत्वित्यर्थःनन्वन्यत्वस्यकत्वभे
दजन्यत्वाभावादनुपपन्नमेतदतआहस्वाभाविकमितितज्ज्ञानहेतुत्वेतद्धेतुत्वोपचारइतिभावःननुभवेदपिभवेदित्यस्यदेवदत्तस्यदेवदत्तस्य
त्राप्संभवावितारइतियत्नद्वयेद्वयत्वित्यर्थःलिङा अपिनाचसंभावनाप्रतिपाद्यते।अपरोलिङप्रार्थनेएवंचतयोःकालांशेउदासीनत्वादुत्तेम्प
नकाल्वइत्यपरतमपतआहअपिभवेदितिसत्तावर्तमानेत्यस्यसंभावितेतिशेषःयद्यपिउदासीनःकालेइतथापिक्रियायानियमेनकालाश्र
कांक्षासत्वात्प्रकरणादिवशेनतत्तत्कालविशिष्टक्रियावगतिःअतएवमाद्रिलुङादेःसर्वलकारापवादत्ववेहारः।एवंचनहिभूतभाविनोसत्ताद्वश्य

भवेदयिभवेद्दिति।एकस्याःक्रियायाःआत्मापेक्षःसाध्यसाधनभावोविरुद्धइतिभावः।कालभेदादिति।स्वाभाविकमन्यत्वंकालसाधन
भेदेनव्यज्यते।एकस्येति।अपिभवेदित्यत्रयोभवतिःतस्यारोग्यादिविशिष्टदेवदत्तादिकर्तृकासत्तावर्तमानार्थः।तथाभूताहिसत्ता
प्रार्थ्यतइतिवर्तमानकालप्रत्ययः।सातुसत्ताभवेदित्यस्याःसत्तायाःकर्तृत्वेननिर्दिष्टेतिभेदोस्त्येव॥ ॥ ॥ ॥

वर्तमानइतिन्यायेनसंभावनालिङंतप्रतिपाद्यस्यवर्तमानत्वसिद्धिःतदाहतथाभूताहीति।भवेदित्यस्याःसत्तायाइतिप्रार्थनालिङंतार्थोयाइ
त्यर्थःसंभावनाविषयवर्तमानसत्ताकर्तृकाप्रार्थ्यमानासत्तेतिबोधः।नन्वेकमपिप्रार्थनालिङर्तार्थस्यकथंसर्वकालसंप्रार्थनायाभविष्यद्विष
यतयातद्विषयसत्तायांभविष्यत्वप्रतीतेरितिचेन्नशांतोरोगइतिप्रश्नेपुनरुत्पत्तिध्वननायेकेनशमिष्यतीत्युक्तेसंवादाद्यापरेणशाम्यती
त्युक्ते।नीरोगपथ्यमप्यतीतिप्रयोगदर्शनेनेप्रार्थनाविषयेसर्वकालत्वाभिमानात॥ ॥

भाष्येस्मादपिस्यादिति। अत्र सापि व्यवस्थया हारेण पदार्थद्योतकत्वाद् ये: कर्मप्रवचनीयत्वेन षत्वाभावः। तदेवमत्र लक्षणोभिदादिषु व्याप्तिर्भवेति स
मानाधिकरण्याभावात्पचादावव्याप्तिश्चेति दूषणद्वयं स्थितं। कर्त्रोर्भवंतीतित्यस्यानुपपत्तेर्भाववचनो धातुरिति लक्षणमिति शेषः। भवति सामानाधिक
रण्याभावेन भाववचनत्वाभावादिति भावः। अथ तदुद्धरति अस्त्विति विप्रतिषिद्धानामि। सुपत्ललक्षणापवादानामपि भेदादयोपीति जन्मवाची भव
तिः। तेन ध्वंसस्यापि ज्ञायमानत्वान्नाव्याप्तिरिति भावः। अन्योन्याभावस्येति तत्र हि तत्तुल्यत्वात्स्यादेवेति तद्वाचक भेदशब्दसिद्धिर्वाध्या एतानीति न

अस्त्वयमिति। भेदादयो भवंतीति तद्वाचकानां सिध्यति धातुसंज्ञा। एतान्यतीति। एतत्यातिपादानि वक्तव्यानीत्यर्थः। भाष्ये तेभ्यः सभा
वद्दतिते न माध्यमात्त्वार्थ वाच्चिन्नाध्यस्तु संज्ञेत्यर्थः। अभावसिद्धमिति। शब्दशक्त्यनुसारेणोच्यते कृतताक्रियमाणताकर्तव्यतायुक्ता
न्यपि द्रव्याणि सिद्धरूपाण्येव प्रातिपदिकेनाभिधीयंते शब्दांतरेण तु तेषामवस्थांतरं प्रतिपाद्यते। मातेति। मातृत्वे पुत्रजन्मनाभाव्य
ते सर्वथेति। याहाश्रये समानदानां प्रसंगः। कर्तृसाधने भावशब्दे हृतस्यादीनां प्रसंगः। कर्मसाधने मात्रादीनामित्यर्थः ॥ ॥ ॥

पुंसकमयुक्तं उपक्रांतार्थानंवं स्वादत आह एतदि। ननु कर्मसाधने। पिष्टहारादिषु दोषोपरिहृत एवेत्यत आह तेन साध्यमानेति। साध्यावस्थापन्ना
र्थवाचिनामित्यर्थः। कृतता घटमकार्षीदित्यादौ क्रियमाणता घटं करोतीत्यादौ। कर्तव्यता घटं करिष्यतीत्यादौ॥ सिद्धरूपाण्येवेति। स्वभावेन श राम
ब्दशक्तिस्वभावेन सिद्धं। सूक्ष्मरूपेण निष्ठावस्थमेव द्रव्यं शब्दवाच्यमिति भाष्याशयः। अतएव तस्य क्रियाकांक्षाय घ पिक्रियायितमा तथा चिसाध ११
ब्दशक्तिस्वभावात्स्थूलरूपेण साध्यतयैव प्रतीयत इति बोध्यम्। मात्रत्वमिति मात्रादिशब्दा उत्पादकत्वादीनारोपेण कृतजनकत्वस्य च तत्रापि निरूपितत्वमित्यभि
नानः ॥ ४७८

भाष्ये पठिष्यतीहीत्यस्य हि शब्दात पूर्वोक्तशंकोपपादकत्वभ्रमं वारयति इदानीमिति। समानशब्दातिप्रसंगवारणाय भाववचनानामिति कर्त्रो भवंतीत्यतो
स्त्वयं कर्तृसाधनो भवतीति भाव इति न कश्चिद्दोष इत्यर्थः। भाष्यस्य स्वत्राज्ञेरे। स्वसंग्रहं दर्शयति भूरिति कर्त्तरीति अर्थेस्त्वभिन्न एव च कर्तृसाधनकर्म
र्तृसाधनकर्मसाधनयोर्विशेषः फलेदोषवारणमपि समं। न्यायप्राप्तश्च कर्तृसाधन इति स एवास्त्वित्याशयः। भाष्ये किं वक्तव्यमिति। भाववचनाभ्

इदानीं समाधानमाह। पठिष्यतीति। पठितानामेव भाववचनानां धातुसंज्ञा नान्येषामित्यर्थः। अस्त्वयमित्निभवतीति भूरिति कर्तरि
क्तिवक्तिन तु कर्मणि। अर्थे स्त्वभिन्न एव योऽहि भवति स एव भाव्यते नान्य भेदमिति। वृद्धिशब्दस्य मंगलार्थस्य प्रयुक्तत्वाद्वृकारो मग
लार्थो नोपयुज्यते। भुवमिति ज्ञायमानमर्थमभिदधतीति धातव इत्यर्थः। भवति जन्मवाचीशब्दस्यते। न तु सत्तावाचीति सिद्धार्थोभिधा
यिनां संज्ञा न भवतीति ॥ ॥ ॥

वार्योध्यानवइति किं वक्तव्यमित्यर्थः। औणादिक इति त्रितिवा हुल्लकादिति भावः। वृद्धिशब्दस्येति मध्यमंगलस्य शिवशमरिष्टस्येत्यादिभि
रेव सिद्धत्वेनेदं नातीवोपयुज्यत इति भावः। ज्ञायमानमिति तत्वेन प्रतीयमानमित्यर्थः। एवं वदता नेन प्रातिपदिकनिर्देशस्यार्थपाठो नाश्रितः
वृद्ध्यादीनां तत्वेनाभानादेव व्याप्तिर्ज्ञाप्तिद्वेरिति मन्वानः शंकते भाष्ये भाववचन इत्यादि ॥ ॥ ॥

कै॰वि॰
१२

त्र्यपपस्येति। प्रत्ययांतस्यतूपदेशाभावाद्धातुत्वेप्यप्राप्तेरितिभावः अशितीतिपर्युदासेनाशितः परत्वाभावादात्वाप्राप्तिः तत्राह तद्धीति। भाष्ये तद्धितो
रिति। आदेचउपदेशेत्यत्रधातोरिति संबध्यत इति वार्त्तिककृतोभिमान इतिभावः भाष्यकारस्तु उपदेशग्रहणबलेन तत्र धातोरित्यस्यासंबंधं वक्ष्यति। अत्र
तुनात्वं शितिनेतिनिषेधेनशित्प्रत्ययपरत्वमेव गम्यते एवं सत आत्त्वप्रवृत्तेरितिबोध्यं यं विधिं प्रतीतिन्यायेनैकारोच्चारणसामर्थ्यादात्वं न स्यादत आ
हएकारोच्चारणं त्विति। व्यवस्थितेति। साकल्यान्वाख्यानमात्रे शास्त्रव्यापारात्प्रयुक्तप्रयोगाणामसाधुत्वमिति नान्योन्याश्रय इतिभावः संस्त्याय्यौ

शिश्य इति। भावाभिधायित्वात्प्रत्ययस्यधातुसंज्ञाप्रसंगादर्थौ। शोतितइत्येनेपि तत्कैशितितुप्रतिषिध्यते। एकारोच्चारणंतुयदाक
र्तृकर्मणोर्लकारस्तदंशियपठ्क्तनत्ववदस्यमन्नतिवर्त्तते। इतरेतराश्रयं चेति। प्राक्शास्त्रव्यापारात्समुदाय एव नास्ति कुतोन्वय
व्यतिरेकाभ्यामर्थस्य प्रविभागः। तस्मिंश्चासतिभाववचनत्वापरिज्ञानात्धातुत्वं न व्यतिष्ठत इत्यर्थः सिद्धं त्विति। व्यवस्थिता एव य
चस्यारयः समुदायाः संस्त्यर्थाभिधायिनः केवलं समस्तेस्त्योत्येस्यप्रक्रियायामर्थभागाः शब्दभागश्चापोद्धृत इत्यर्थः अना
श्रित्येति। पारमार्थिकेनाश्रीयते परिकल्पितं त्वाश्रीयत एव। तत्त्वतो हि शब्दांतरणपेक्षार्थांतरे प्रयुज्यंते ॥ ॥ ॥

भिधायिनइति। संस्त्यशिपस्यापकाक्ष्यर्थः धातुसंज्ञार्थभाववचनत्वस्याश्रितत्वादनाश्रित्येत्यनुपपन्नमत आह पारमार्थिकमिति। तस्यव्यवहारेषु एम
समुदायवृत्तित्वादितिभावः वार्त्तिककृतानाश्रित्येत्युक्तेरिति तास्यये परिकल्पितं त्विति भाष्यकृता पूर्वमन्वयव्यतिरेकाभ्यां धातुरेवक्रियावाचीत्यु १२
क्तेरितिभावः ॥
४७९

चस्त्रप्रणाद्वेषसमुच्चयइतिश्रमं प्राप्तं वारयति। तदर्थेति वार्त्तिककृताधातोरित्यस्यात्वे संबंधाभ्युपगमात्तदुक्तोयं परिहार इत्यर्थः ननु स्वभावादेव धातूनां
प्रथमं भाववाचित्वे कुत इति हेतुप्रश्नो संगतस्त्यत आह प्राथम्यस्येति अवधिविषयः प्रश्न इतिभावः प्रथमश्चासौ भाववचनश्चेति विग्रहे प्रथममुच्चा
र्यमाणः सन्भाववमाहेति अर्थः शब्दतः प्राथम्यं त्वप्रथमस्य भावस्य वचन इति विग्रहेर्थतः। द्वयोर्मिकाले भाववचन इति विग्रहे विस्पष्टपदुवत्समास
सेभिधानतः स्वयं प्रथमोप्रथमो प्रथममप्रथमं वा भावमन्येभ्यः। पूर्वमाहेत्यर्थादिति बोध्यं नात्रेति। यद्यपि तिङपेक्षया कालेपि प्रथमस्तथा

प्रथमभावग्रहणं चेति। तदर्थप्रत्ययपरिहारोयं प्रथमस्यापेक्षिकत्वात्पृच्छति कुत इति। पुत्रीयतीति। नात्र प्रथमामुच्चार्यमाणः पुत्र
शब्दो भावमाह। सनाद्यंता धातव इति प्रत्याख्यातेयं दोषः सिद्धेति। प्रथमत्वं भावो प्रथमेनापि क्व चिदभिधीयते न तु द्वितीयः। शिश्ये
इतितु प्राप्नोति स्वार्थिकेन प्रत्ययेन प्रथमेन प्रथम एव भावोभिधीयते न तु द्वितीयः। अभिधानत इति। अन्येनानभिहितं भावं य आह स धा
तुः शिश्येइत्यत्र तु प्रकृति अभिहितं भावं प्रत्यय आहेति न तस्य धातुसंज्ञाप्रवृत्तिः यथा प्रथममयं स्नाने प्रथमतीत्यस्यायमर्थो यदन्ये
नादृष्टं पश्यतीति तथेहापि प्राथम्यमभिधानक्रियापेक्षमाश्रीयते अन्येभ्यो भावमभिधायिभ्यो यः प्रथमाहेति ॥ ॥ ॥

पितस्यांगोण प्राथम्यमितिभावः। न च कर्तृत्वं तः स्यतिङपेक्षयामुख्यमेव प्राथम्यं पुत्रइत्यत्र आत्मयइति अर्थत्रयस्य भासितत्वं त्रयस्येव कर्तृत्वापित्ति
तत्वं। ननु सनाद्यंता इति तस्य धातुत्वसिद्धमत आह सनाद्यंता इति। भाववचनाइति लक्षणेसनाद्यंतानामप्यनेनैव धातुत्वसिद्धौ तत्सूत्रमेव प्रत्याख्ये
येमिति भावः स्यचेति। लक्षणेभाववचनत्वदंतस्वरूपद्यतेइति तदंतस्य धातुत्वसिद्धिरितिभावः प्रथममयं स्नानमिति। प्रथममन्यैर्येवाद्ज्ञात
मित्यर्थः ॥ ॥

नन्वस्य पक्षास्यंत्यत्वात्नन्दध्यमस्त्यत्युक्तमत आह द्वाविति उभया स्पृष्टे मध्यमस्य इति व्यवहारात प्रागुक्तदोषद्वयास्पर्शी नायं मध्यम इति भावः। इक्षमन्येनेति
। एवं प्रतीषिषतीत्यादाव पि प्रकृत्यर्थातिरिक्तांतद्विषयामिक्षमन्येनानभिहितामेवसन्नाहेतियोध्यं आपादीनामिति तदंतानामित्यर्थः। क्रिया
वचनपक्षे प्रथममभावपदस्यानन्वयात्र एव परिहार इत्यसंगतमत आह तथैत्यादि भिदादीनामपि विभागफलक व्यापारवाचित्वात्क्रियावाचि
त्वमस्त्येव। अभावोपि सत्त्वाभावाध्यस्ते त्वेवेत्यभावं वाचिनामपि भावचनत्वे। अभावस्यालीकत्वान्यपरामादि ति वोध्यं। भाष्येतत्रे दमिति। तत्र क्रि

सुमध्यम इति। द्वौ शब्दार्थपक्षौ दुष्टत्वात्यागित्यत्योपादीयमानमभिधानंमध्यममितिव्यपदिश्यते। तदेवत्रिदोषत्वात्तशोभनत्वेन वि
शेष्यते। चिकीर्षतीत्यत्र करोत्यत्र करोत्यर्थोपसर्जनामिक्षामन्येनानभिहितांसन्प्रत्यय आहेतिप्रवर्त्ते तेक्षात्तु संज्ञा अप्रक्षेपश्च। शि
प्रयइतिप्रत्ययस्य धात्तुसंज्ञा न भवति। तथा स्वार्थिकानामायादीनामपि न प्राप्नोति। गोपायति कामयत इति तदर्थं सनाद्यंता धात
व इति पठितव्यमेवाइ हेति। तदर्थे प्रत्ययप्रतिषेध इतरेतराश्रयं च। प्रथममभावग्रहणं च। सिद्धं तु मित्यशब्दत्वादिति च। केवलं प्रथम
भावग्रहणमपनीयप्रथमक्रियाग्रहणं कर्त्तव्यं। तत्रेदमिति। किंकरोतीति प्रश्ने स्यादिभिः प्रतिवचनाभावात्क्रियावचनत्वमेवां पत्य
ति। पश्चाकृक्कमिहसंदेंपुस्त्वान्तेषुसंनिहितेषु कदाचित्पचतीति। प्रश्न भवकदाचिन्नेति तदस्यादिषु नास्ति नह्यस्तीति कदाचिद्भवति
अपितु सर्वदेति यत्कारिभिर्वैधर्म्यमापद्यतितत्तमिति प्रकर्षो भवति। नेवमस्तितरामिति॥ ॥ ॥

पावचनो धातुरितिलक्षणो क्रियावचनत्वाभावात्प्रासंध्यात्तुत्वमस्यादीनामितिभावः। कुतोक्रियात्वंतेषामत आह किंकरोतीति। नह्यस्तीति साध
नसंनिधानेऽस्तीति कदाचिद्भवतीति नापितु सर्वदा भवत्येवेत्यन्वयः। ॥ एप
१३
४-८०

Dr BHAU DAJI MEMORIAL

क्रियाश्रस्वरूपंशंकित्रेव नान्वयितुं पृच्छति भाष्यकार पुनरिति तदाशयं स्वयमेवोन्नीयाह किंयदिति। एवं हि भुक्तिकास्मेवास्तिकारकस्यापि क्रिया
त्वमस्तु कात्तातिरिति भावः। ननु संक्रे इति यतस्याक्रियेत्यन्वयेधात्वर्थक्रियावाचित्वदएवोपक्षिप्तः स्यादिति न ब्रूमइत्यादियंथ्यासंगतिःदेवदत्तइतिपरःक्रि
येत्याद्यवयेत्रदोःप्रधानपरामर्शित्वह्यानिरत आह। यत्रदिति। क्रियांशस्यप्राधान्येपि नतास्यर्थविषयतासर्वेनांशगुणपरामर्शकताबद्दत

+अन्यथेति। शुक्लोदनेमंदप्रयत्नः प्रवर्त्तते। मांसौदनेतुसंवेगेन। यथा चमोदनक्रियाणांपाक्यादेलक्षणात प्रवृत्तिविशेषत्वं नैवमस्यादीनां॥
+क्रियत्रदिति। यत्रच्छब्दाभ्यांकारकवैचित्र्यंनिर्दिश्यते। प्रवृत्तिविशेषइति। सर्वाप्रवृत्तिः प्रवृत्त्यंतरात भिद्यत इति सर्वस्याः क्रियात्वं ॥+॥

तस्तस्थ्यापारावेिष्टकारकारण्येनताभ्यांपरामृश्यंत इत्यर्थः कारकवैचित्र्यमित्यस्यविचित्राणि कारकाणीत्यर्थः स्वार्थष्यञितिवोध्यं। वैचित्र्यंच
तत्तद्व्यापारादिरूपमेवभाष्येशंकिताह नब्रूमइत्यादि प्रवृत्तिविशेषइति। सचास्त्यादर्थनास्तीतिभावः एतद्दोषलक्षणं प्राप्ति वचनादीनामिति
तान्युक्तवानुपाध्यायः। ननु प्रवृत्तिविशेषस्यास्त्यादेप्रवर्त्तत इत्यत्र क्रियात्वानापत्तिरत आह सर्वेति। पच्याद्यपेक्षयास्यापि विशेषएवेति भावः। शंकि
आशयमुपसंहरति पश्चाचेति। एवं चास्त्यादेर्धातुत्वासिद्धिरिति भावः॥ ॥

के॰वि॰
१४

ति द्वांत्याह भाष्ये यद्येव मिति अन्यथाहीति। कारकत्वेकाः स्तो वाच्यत्वेन स्थितात्प्रवृत्तिरुपपद्येत्यत्रार्थः। तदेवाहात्मभरणरूपेति। स्थूलरूपधारणानुकूल
त्वव्यापाररूपेत्यर्थः। स्त्रियते तत्स्थापनानुकूलव्यापाररूपेति भावः एवं चाश्रियत्यपेक्षयाप्रवृत्तिविशेषरूपतास्येत्यस्य अर्थस्येति तात्पर्यं पूर्वोक्तरूप
मात्रयेत्यद्दयमुद्दरति। उत्पद्यते इत्यादि। कादा चित्कत्वाभावइति। अयं चात्मभरणलक्षणसत्तावा चिन्मे वा तदपि कर्तृरूपे वर्त्तते विद्यमानेएवः वेरुक
काचित्कातात्प्रयुक्तातु सा स्येव। अतएव भूतभविष्यत्प्रयोगाः संगच्छंते उत्पत्तिरूपसत्तावाचिन्येव। तदपि कर्तृरूपेव वर्त्तनितु कादाचित्कातात्पर्यस्ये
दविद्यते तथाणित्यपिकारकगतप्रकर्षाति पितरेव बोध्यं। भाष्ये स्याद्रीत्रां क्रियावाचकत्वेपत्रंतरमाहयद्वा ऊवेत्यादि क्रियायाप्तति। भावीत्वी ताक्रिया चे
यद्येव मिति। अत्रापिप्रवृत्त्यंतरापेक्षयास्येव प्रवृत्तिविशेषरूपत्वमित्यर्थः। अन्यथेति। अस्तावात्मभरणरूपा प्रवृत्तिः स्त्रियते तत्स्थापनरूपा
उत्पत्तिप्रभृत्या विनाशाद्वस्त्वानुषंगादस्तीति प्रत्ययस्य संनिहितेषु साधनेषूत्पत्तिरवश्यंभावितीति कादाचित्कत्वाभावः। प्रकर्षप्रत्ययो
पि द्दश्यते विद्यते तराममि इधात्यमिति। अत्रैवार्थे आगममाह। षड्भावविकारा इति भावस्य क्रियायाः षट्प्रकारा इत्यर्थः। तेषु चास्तिः पठि
तः इति तस्यापि। क्रियात्वमित्यर्थः अस्य वा भाव्यस्य सत्तायाएते प्रकाराः। सत्त्वेनानेकक्रियात्मिकाःसाधनसंवंधाद्दव सीयमानसाध्यरू
पात्तन्मादिरूपतयावभासते। एते च भावविकाणनिरुक्ते निपुणं व्याख्याताः। इह तु प्रकृतानुपयोगात्त्र व्याख्यायंते। सर्वथेति भावविका
रेतिकोशादिति भावः विकारशब्दः प्रकारवाची अथवेति। उत्पत्तिविनाशयोरपि सूक्ष्मरूपेणवस्तुनो भावात्रेषमपि सत्तात्मकत्वमिति बोध्यं। भावस्य सत्ता
या सत्त्वसत्तायाएवं चविकाराः। क्रियाप्रकाराणामापवशात्त्रइव भासमानाद्युति वाष्णीपरापुक्तोर्थः सत्त्वे वेत्यादि वस्तुसत्त्वे वानेकक्रियात्मिकानेकक्रिया
विवर्त्तात्मिकासाधनैःकारकैः संबंधात अवसीयमानसाध्यस्वरूपात्तन्मादिरूपतयाभासत इत्यर्थः। एतच्च निरुक्तभाष्ये स्पष्टं भावविकारेति एवं

४८९

अनुमानेनेति। षड्भावविकारेष्वभावादक्रियात्वमेवमन्यमानं प्रतीत्यादि। अन्यथेति। एवं च स्थितेरपि अस्तितायामनेः तर्भावान्नषारेगणानाव्या
श्रारितिभावः। तिष्ठतेरेवक्रियात्वेषु स्रंतरमिति अमवारयति क्रियांतरेते एतन्मूलिकैवक्रियाभेदाय कालस्थितिवाक्यपदीयोक्तिः कालस्य क्रिया
मात्रपरिछेदकत्वादिति भावः। ननुयद्यस्यादेः क्रियावाचित्वं तर्हि किं करोतीति प्रश्नेत्स्यात्युत्तरं कुतोनेत्यतोपाष्पेथवानान्यदिति अत्राथवेति
यतः इत्यर्थे प्रश्नासंभवादितिनिसो तत्वेन सत्त्वविषयप्रश्नासंभवादित्यर्थः। ननु क्रियाभावयोरेकार्थत्वात्कथमभिहमेदेनोपादानमत आहप
रिष्यंदेति। आदिशब्दायोस्यैवव्याप्रकारवाचित्वेकशेषः सादृश्यं चान्यानभिहितसाध्यावस्थापन्नार्थवाचित्वेनेतिमात्रवाप्रभृतयो भूप
एवंतर्हीति। अनुमानेनस्थानस्याक्रियात्वं प्रतिपादयति। अन्यथास्थितइत्युक्ते वृद्धिस्तयानि वृत्तिर्नप्रतीयेत। अथवेति। क्रियांतरधर्मसमन्व
येनात्यादीनां क्रियात्वं प्रतिपाद्य तेधरइत्युक्तेकालविशेषावगतिर्नास्ति। अस्ति अभूत् भविष्यति त्रिकालविशेषावगमात्। साध्यमानस्य
पार्थस्यकालेन योगात्क्रियान्वरवसायः। अथवेति निष्ठितायां सत्तायां किं करोतीति प्रश्नासंभवात अस्तीतिप्रतिवचनाभावः नतु क्रि
यात्वाभावादित्यर्थः। यदातु प्रत्यासन्नविनाशं शंकयादेवदत्तः किं करोतीति प्रश्नः तदास्तितावदितिप्रतिवचनंभवत्येव। अथपद्येवेति रि
संदापरिस्पंदरूपतया क्रियाभावयोर्भेदेनोपन्यासः तदावेत्यत्रेति। अरादीनामदादोवागतिगंधनयोरिति पठितव्यमदादिगणोपगणा
नामादौ तेनमवेधातुपाठस्तत्रिविधस्गृहीताभवंति। यदितन्हाति। क्रियावचनो धातुरितिवाभाववचनो धातुरितिवालक्षणं क्रियत्तोनार्थः
कारइत्यर्थोवाधातोः प्राचीनानांनस्यादित्यत आह अदादीनामिति। अदिप्रभृतिभ्यः इत्यस्याख्यानेवा प्रभृतिभ्यइत्येचपठनीयं। अदिप्रभृतिभ्यइ
त्यत्र रसुवीहितत्पुरुषयोरेकशेषोवाबोध्यः ननु व्यवस्थानात्यादिशब्दांतर्भावेणपरठस्याविलक्षणोनापेक्षाणांतापेक्षणोपत्यात्रेदानीमित्यपुक्रमत

कै॰वि॰
२५

ननुभावक्रियापदयोःसाध्यावस्थापन्नाभिधायित्वात प्रातिपदिके पुकथमतिप्रसंगोत आह यथेतिभोक्तुंभुक्त्वेत्यादिप्रातिपदिकं व्यावर्त्यंवोध्यं प्या
पदेनतिङ्गावस्थस्यभानात्भोक्तुंपाकइतिप्रयोगोपिचिंत्यइति उपपदम तिङितिसूत्रेवस्तुतःफलं तुपाकादिशब्देष्वत्रापि।हिरुग्गिति।क्रियांतराकां
सादर्शनेनैवांक्रियावाचित्वं चिंत्यं।अतएवतद्धितश्चासर्वविभक्तिरितिसूत्रेक्रियामात्रविशेषणत्वात्क्रियाप्रधानत्वमेषांस्वयमुक्तं॥शिष्टेत्या
दिव्याहृत्तित्वत्‌अन्यानामभिहितक्रियावाचकत्वेनसादृश्यग्रहणाद्बोध्या।वस्तुतएषांधातुत्वेफलाभावः।नचप्रातिपदिकत्वाभावःफलेकृद
त्वेनतदभावस्यवक्तुमशक्यत्वातउभयोःसत्वेपिलिङ्गित्यादाविवपरत्वात्सुपामेवोत्पत्तिरिति द्वःवार्त्तिकेप्रातिपदिकग्रहणं तुप्रौढ्यैवातएव

भूवादिपाठइति।यथाभोक्तुंपाकइतिक्रियाणितुमुनादीनिभवंतितथाधातुसंज्ञापिस्यादितिपाकादीनांशयितव्यादीनांचप्रातिपदिका
नांपाठेनासीतिवर्ज्यंतेतथाहिरुक्‌एथग्गित्यादीनांचक्रियाप्रधानानामव्ययानां।एतेषामपीति।तेषामपाठेनिवृत्तिरणावयत्यादि
वत्स्यात्स्मारणावयत्यादिप्रयोगोनिवृत्तियेथास्यात्तत्मध्येमापठितान्नित्येवमर्थस्तेषामपिपाठःकर्त्तव्यइत्यर्थःशिष्टप्रयोगाइति
।प्रयुक्तानामिदमन्वाख्यानंतत्त्वात्तावयत्यादयःशिष्टैःप्रयुक्तं तदितिनाप्तितेषांशास्त्रेणानुविधानं एतेनैवन्यायेनप्रातिपदिकानिवृत्त्य
र्थमपिपाठोनोपयुज्यतेनहिपाकादयःशब्दाधातुविहितप्रत्ययपराःलोकेप्रयुज्यंते ॥ ॥ ॥

तदुदाहरणानुक्तिर्भाष्ये।ननुतेषांसंज्ञार्थःपाठःकर्त्तव्यइतिचेन्नत्याह आणवयत्यादिनिवृत्त्यर्थइत्यस्यसाधमत आहतेषामिति।पाठमात्रेहितिप्रयु
क्तानांचसंप्रदायस्यभानपाठानामपिमंदिषताीसपिवोध्यंतन्वेवमपिप्रातिपदिकनिवृत्त्यर्थःपाठःस्यादत आहएतेनेति।इदमुपलक्षणंसवतानुव
धकार्यमपिशिष्टप्रयोगादेवेतिवोध्यम।ननुशिष्टप्रयोगालंबनेनप्रत्याख्यानेशास्त्रवैफल्यमत आहभाष्येसत्रावश्यमिति।एवंचआकृतिगणे
ष्वस्तुपासनावश्यकत्वेकिंपाठेनेतिभावः।ननुतद्देवानिदर्शनार्थकतिपयपाठोप्यावश्यकइतिचेदस्तुअत्येतावश्यकतानेत्येतभाष्यतात्पर्यं एम
१५
४८२

